UGC Approved Journal No. 40920 ISSN 2277-6443

सप्तमोऽङ्कः, 2018-19

विश्वविद्यालयानुदानायोगद्वारा स्वीकृतशोधपत्रिकासूच्यन्तर्गता

# विद्यारश्मिः

## समीक्षिता मूल्याङ्कता च वार्षिकी राष्ट्रियशोधपत्रिका

## A Peer Reviewed Refereed Annual National Research Journal

वेदर्चामचयन्तस्स्मृतिचयवचनं तत्त्वतश्चर्चयन्तः,
शास्त्रान्तःसंस्पृशन्तोऽमृतगतिमतिदं दर्शनं दर्शयन्तः ।
साहित्यं स्वादयन्तस्सहृदयवसतौ भासमुद्भासयन्तो
विद्याया रश्मयो ज्ञान् पिपुरतु सुधियां शेमुषीमेधयन्तः ॥

प्रधानसम्पादकः

**प्रो. सुदेशकुमारशर्म्मा**

सम्पादकः, संयोजकश्च

**प्रो. बोधकुमारझाः**

**राष्ट्रियसंस्कृतसंस्थानम्**

( मानितविश्वविद्यालयः )

( मानवसंसाधनविकासमन्त्रालयभारतसर्वकाराधीनम् )

**क.जे.सोमैयासंस्कृतविद्यापीठम्,**

विद्याविहारः, मुम्बई - 77

UGC Approved Journal No. 40920.

ISSN 2277-6443

पत्रिका नाम **विद्यारश्मिः** (समीक्षिता, मूल्याङ्किता च वार्षिकी राष्ट्रियशोधपत्रिका)

(**A Peer Reviewed Refereed Annual National Research Journal**)

प्रकाशकः **प्राचार्य्यः,**

राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)

क. जे. सोमैयासंस्कृतविद्यापीठम्,

विद्याविहारः (पूर्वः), मुम्बई, महा. - 400 077

© प्रकाशकाधीनः ।

प्रकाशनावधिः 2018-19

संरक्षकः **प्रो. परमेश्वरनारायणशास्त्री**

कुलपतिः,

राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली ।

प्रधानसम्पादकः **प्रो. सुदेशकुमारशर्म्मा**, प्राचार्य्यः ।

सम्पादकमण्डलम् **प्रो. भारतभूषणमिश्रः ।**

**प्रो. बोधकुमारझाः**, संयोजकः ।

**डॉ. देवदत्तसरोदे ।**

**डॉ. स्वर्गकुमारमिश्रः ।**

**डॉ. (श्रीमती) गीता दुबे ।**

**समीक्षासमितिः**

- **प्रो. अर्कनाथचौधरी**, कुलपतिचरः, प्राचार्य्यः, रा.सं.सं. जयपुरम्, (राज.) ।
- **प्रो. ई. एम्. राजन्**, आचार्य्यः, रा.सं.सं. त्रिशूर्, (केरलम्) ।
- **प्रो. दिलीपकुमारझाः**, आचार्य्यः, संस्कृतविश्वविद्यालयः, दरभंगा (बि.) ।

**मूल्याङ्कनसमितिः**

- **प्रो. सुरेश्वरझाः**, आचार्य्यः, संस्कृतविश्वविद्यालयः, दरभंगा (बि.) ।
- **प्रो. देवेन्द्रनाथपाण्डेयः**, आचार्य्यः, सोमनाथसंस्कृतविश्वविद्यालयः, गुजरातम् ।
- **डॉ. राजधरमिश्रः**, आचार्य्यः, जगद्गुरुराष्ट्रियसंस्कृतविश्वविद्यालयः, राजस्थानम् ।

अङ्कः सप्तमः

अनुवृत्तयः 200

आकारः B5 (7.17" x 10.12")

मुद्रकः वन्दना आर्टस्, बी-56, स्टेशन प्लाझा, स्टेशन रोड, भाण्डुप (पश्चिम), मुम्बई - 400 078, महाराष्ट्र ।

# विद्यापीठे प्रतिष्ठिताः विभागाः

- व्याकरणविभागः
- साहित्यविभागः
- ज्यौतिषविभागः
- शिक्षाशास्त्रविभागः
- आधुनिकविभागः
- मुक्तस्वाध्यायपीठम्
- अनौपचारिकसंस्कृतशिक्षणकेन्द्रम्
- वास्तुज्यौतिषपरिचयपाठ्यक्रमः
- शोधप्रकाशनविभागः

ख्यातं राष्ट्रियसंस्कृतं सुमहितं संस्थानमद्याखिलं,
वाणीवैभवमातनोति नितरां राष्ट्रे चतुर्दिग्भवम् ।
तत्रासौ निजगौरवेण महता सारस्वतं भासयन्,
सोमैयाभुवि भासते परिसरो मुम्बापुरे संस्थितः ॥

राष्ट्रियसंस्कृतसंस्थानम्

( मानितविश्वविद्यालयः )

( मानवसंसाधनविकासमन्त्रालयभारतसर्वकाराधीनम् )

क.जे.सोमैयासंस्कृतविद्यापीठम्,

विद्याविहारः, मुम्बई - ७७

**राष्ट्रियसंस्कृतसंस्थानम्,**
(मानितविश्वविद्यालय:)
(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनम्)
**क. जे. सोमयासंस्कृतविद्यापीठम्,** विद्याविहार:,
मुम्बई - 400 077

**Rashtriya Sanskrit Sansthanam**
(Deemed University)
(Under MHRD, Govt. of India)
**K.J. Somaiya Sanskrit Vidyapeetham**
Vidyavihar,
Mumbai-400077



# चरन्वै मधु विन्दति

सन्ततं सरणाद् वारिधाराविशेष: सरिता कथ्यते । गमनात्, सङ्गमाच्च सा गङ्गेति विभाव्यते । सङ्गमश्च सरित्पतिना सार्द्धम् नान्येन केनचिदिति स्थिति: । समेषामस्तित्वम्, अभ्युदयो वा, तत्र क्रियैव कारणत्वं वहते । क्रियाजनकत्वादेव कारकत्वमिति शाब्दिकानां तस्मादेव समय: । विद्या न प्रष्टव्या, तस्या: सिद्धि: प्रष्टव्येति न: काचन परम्परा । किञ्चिन्महाकोषागारं मत्समीपे स्थितम्, परं तद् अर्गलितं, कीलितञ्च । कश्च तस्माज् जिघृक्षितुर्लाभ:? अधीतिबोधाऽऽचरणप्रचारणेभ्य: आगमस्वाध्यायप्रवचनव्यवहारेभ्यो वा विद्या भवति वेद्या । उपयोगस्यास्या: उत्तरार्द्धं वितरीतुमेवास्ति । तस्मादधीते विषये श्रान्तेरनुव्यवसायं विनैव विज्ञै: शोध: कर्त्तव्य: । शोधाच्च सिद्धान्तावाप्ति: कार्य्या । अन्यथा शास्त्रमस्मभ्यं रुष्टं स्यात् । जगति रुष्टे शास्त्रं त्रायत । रुष्टे च शास्त्रे को वा त्राता जायेत ।

तत्रास्माकं धीगङ्गा गम्यात्, सा च धीपतिना सिद्धान्तेन सङ्गंसीष्ट - इति 'विद्यारश्मि'रयं सन्दिशति, निर्दिशति 'चरतो वै मधुलाभ' इति । समुद्दिशति च विद्या ज्ञानाय, दानाय, रक्षणाय भवतीति ।

**॥ भूयाज्जगन्मङ्गलम् ॥**



**(प्रो. सुदेशकुमारशर्म्मा)**
**प्राचार्य्य:, प्रधानसम्पादकश्च**



# सम्पादकीयम्

भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनस्य राष्ट्रियसंस्कृतसंस्थानस्य मानित-विश्वविद्यालयस्य मुम्बईस्थितस्य क. जे. सोमैया संस्कृतविद्यापीठस्य शोधप्रकाशनविभागेन प्रतिवर्षं संस्कृतविद्यान्तर्गतस्य ज्ञानस्य विज्ञानस्य प्रज्ञानस्य च लोकसुलभत्वसम्पादनाय समग्र-भारतवर्षस्योत्तरतो दक्षिणं यावत्प्रखरलेखनीमण्डितानां तत्तच्छास्त्रपण्डितानां शोधपराणां युव-विदुषाञ्च शोधपत्राण्यामन्त्र्य समीक्ष्य मूल्येनाकलय्य सम्पादकीयेन च विभूष्य 'विद्यारश्मिः' इति ख्यातनाम्नी समीक्षिता मूल्याङ्किता च वार्षिकी राष्ट्रियशोधपत्रिका, या विश्वविद्या-लयानुदानायोगस्य स्वीकृतशोधपत्रिकासूचीघटकीभूताऽप्यस्ति, सा आई.एस्.एस्.एन्. संख्या-युक्ताऽऽविर्भाव्यते । तस्यासौ सप्तमोऽङ्को भवतां करकमलयोरधुना विलसति, लसति च प्रयासोऽनेन संयोगेन ।

सप्तमेऽस्मिन् सुन्दरकुसुमे वेद-वेदाङ्ग-काव्या-धुनिकशिक्षा-भाषाविज्ञान-मीमांसा-राजविद्या-योगायुर्वेदादिवाङ्मयमन्थनोत्थशोधपत्राणि नैजं सौरभमातन्वन्ति । विद्यापीठीयः शोधप्रकाशनविभागः स्पष्टं मनुते 'विद्या भाषामर्य्यादामतिशेते' इति । तस्मादत्र पत्रिकायां संस्कृतहिन्द्याङ्ग्लेति तिसृषु भाषाधारासु विदुषां वैदुष्यामृतं प्रवहति, समावहति च विविधविधान् पाठकविबुधान् पातुमेतत् ।

संरक्षकेभ्यः संस्थानस्य कुलपतिभ्यः आचार्य्यपरमेश्वरनारायणशास्त्रिभ्यः, प्रधान-सम्पादकेभ्यः प्राचार्य्येभ्यः आचार्य्यसुदेशकुमारशर्म्मभ्यः, समीक्षा-मूल्याङ्कन-सम्पादन-समितिसदस्येभ्यः सर्वेभ्यः कृपालुविद्वद्भ्यः, आचार्य्यकमलाकान्तत्रिपाठि, आचार्य्यप्रकाशचन्द्र, आचार्य्य ई. एम्. राजन्प्रभृतिभ्यः प्रदत्तशोधपत्रेभ्यः सरस्वतीप्रियेभ्यो मनीषिभ्यश्च विद्यापीठपक्षतो भूयोभूयो धन्यतावचो विस्तार्य्यतेऽस्मिन्नवसरे ।

**( प्रो.बोधकुमारझाः )**
**सम्पादकः, संयोजकश्च**

# शोधपत्रानुक्रमणिका



| क्र. सं. | शोधशीर्षकम् | लेखकः | पृष्ठाङ्कः |
|---|---|---|---|
| 1. | लिप्सानीतिः सुखावहा | प्रो. कमलाकान्तत्रिपाठी | |
| 2. | नामार्थविमर्शः | प्रो. प्रकाशचन्द्रः | |
| 3. | नैषधे पञ्चनलीसर्गस्य वैशिष्ट्यम् | प्रो. ई. एम्. राजन् | |
| 4. | Curiosity : A Source of Research | Prof. D. N. Pandey | |
| 5. | 'कर्त्तुरीप्सिततम' सूत्रशास्त्रार्थः | प्रो. बोधकुमारझाः | |
| 6. | रसानां सुखदु:खात्मकत्वं | प्रो. अर्चनादुबे | |
| 7. | वर्णान्तरत्व के सिद्धान्त | आचार्य उदयन मीमांसक | |
| 8. | संस्कृतशास्त्रशिक्षणे अन्वयविधेरनुप्रयोगः | डॉ. रा. गा. मुरलीकृष्णः | |
| 9. | शास्त्रतत्त्वसुखबोधाय तन्त्रयुक्तयः | डॉ. देवदत्तसरोदे | |
| 10. | भाषोत्पत्तिसिद्धान्ताः संस्कृतञ्च | डॉ. कुलदीपशर्मा | |
| 11. | शिक्षायां भूमण्डलीकरणस्य प्रभावः | डॉ. वी. एस्. वी. भास्कररेड्डी | |
| 12. | नारायणीयकाव्ये लक्ष्ये वस्त्वलङ्कार-रसानुमितिलक्षणानि | डॉ. नारायणन् ई. आर्. | |
| 13. | व्याकरणदिशा पुरुषार्थविमर्शः | डॉ. दयारामदासः | |
| 14. | शब्दनित्यत्ववादः | डॉ. मधुकेश्वरभट्टः | |
| 15. | भासनाटकेषु स्त्रीपात्राणि समायोजनस्य उत्कृष्टोद्धरणानि | डॉ. लीना सक्करवालः | |
| 16. | शब्दार्थसम्बन्धविमर्शः | डॉ. सुभाषचन्द्रमीणा | |
| 17. | कार्यशब्दवादे इदम् | डॉ. सुधाकरमिश्रः | |
| 18. | अलङ्काराणामलङ्कारत्वम् | डॉ. स्वर्गकुमारमिश्रः | |
| 19. | संयुक्त राष्ट्रसंघ में हिन्दी की स्थिति का मूल्यांकन | डॉ. गीता दुबे | |

| | | | |
|---|---|---|---|
| 20. | Colonial Alienation in Ngugiwa Thiong 'O's Decolonising the Mind | Dr. Shweta Sood | |
| 21. | वर्त्तमान परिदृश्य में भारत-नेपाल सम्बन्ध | डॉ. रञ्जय कुमार सिंह | |

| क्र. सं. | शोधशीर्षकम् | लेखकः | पृष्ठाङ्कः |
|---|---|---|---|
| 22. | प्रातिपदिकार्थविचारः | डॉ. नवीनकुमारमिश्रः | |
| 23. | अनुसन्धानस्यार्थविमर्शः | डॉ. विनोदकुमारशर्मा | |
| 24. | शिक्षा सामाजिकपरिवर्त्तनञ्च | डॉ. मनीषकुमारचाँडकः | |
| 25. | समावेशिशिक्षायाः समस्याः सम्भावनाश्च | डॉ. सचिनकुमारः | |
| 26. | द्व्यर्थो धातुः | ब्र. अजयः | |
| 27. | कारकत्वं प्रातिपदिकार्थत्वञ्च | डॉ. माधवदत्तपाण्डेयः | |
| 28. | Terrorism in South Asia | Dr. Suman Singh | |
| 29. | धर्मशास्त्रोक्तदृशा अशौचनियमाः | डॉ. जितेन्द्रकुमाररायगुरुः | |
| 30. | 'अक्षरवैदर्भी' या नियतकालिकाचे वाङ्मयीन योगदान | डॉ. मिनाक्षी बर्‍हाटे | |
| 31. | वास्तुशास्त्रदृष्ट्या गृहदोषनिरूपणम् | डॉ. अनिरुद्धनारायणशुक्लः | |
| 32. | शारीरिक स्वास्थ्य एवं योग, एक अध्ययन | डॉ. शंकर बाबुराव आंधळे | |
| 33. | नागेशरीत्या तार्किकभूषणकृतोर्मतनिरसन-पूर्वकः स्फोटविमर्शः | सुश्रीविदुषीबोल्ला | |
| 34. | Polymorphism and Overloading | Miss Vaishali Nivdunge | |
| 35. | शतरुद्रियस्य वैषयिकाधाराः | श्री. सत्यराजरेग्मी | |
| 36. | Contemporary Scenario of Sanskrit Education in Schools & its New Diamensions | Namrata Patel | |
| 37. | शास्त्रपठनदोषाणां निवारणे कूटचित्राणामनु-प्रयोगः | अमृता कौर | |

# लिप्सानीतिः सुखावहा

✍डॉ. कमलाकान्त त्रिपाठी

**(भगवतो जैमिनेर्लिप्सासूत्रं व्याचक्षाणैरेभिर्महापण्डितैः 'कृत्वर्थत्वं पुरुषार्थ वार्थोपार्जनस्य'ति मीमांसामानैरुपार्जनस्य पुरुषार्थत्वं संसाधयद्भिः, प्राकरणिकं विविधं मीमांसाशास्त्रीय विचारमुद्भावयद्भिः, 'ब्राह्मणस्य प्रतिग्रहादिना, राजन्यस्य जयादिना, वैश्यस्य कृष्यादिना, शूद्रस्य सेवादिना, सर्वेषां दाया-दिने'ति समर्थयमानैः, स्वेष्टसम्पादनाय जातिव्यवस्था गरीयसी, धर्मसम्पादनाय च सा वराकी कलङ्कभूतेत्यत्र निजामुद्वेजिकामापत्तिं प्रभाविशैल्योपस्थाप-यद्भिः, शास्त्रं लोकेऽवतारयद्भिः प्रस्तुतोऽयं गभीरो लेखो बलाद् विचारयितुं विवशीकरातीव लक्ष्यते ॥ - स.)**

सर्वोऽपिजनः सुखमेव सञ्चिनुते दुःखेभ्यश्च प्रोद्विजते । एवञ्च, सुखावाप्तिदुःखपरिहारावेव पुरुषार्थौ मुख्यतया, तत्साधनानि तु तद्व्याप्त्या तत्त्वेन परिगृह्यन्ते । फलं तत्साधनञ्च पुरुषार्थभूतमिति पार्थसारथिमिश्राः शास्त्रदीपिकायाम् । अत्र तावत् सूत्रयामास परमकारुणिको भगवाञ्जैमिनिः [1] – **यस्मिन् प्रीतिः पुरुषस्य तस्य लिप्साऽर्थलक्षणाविभक्तत्वात् ।** इति ।

इदं सूत्रं क्रत्वर्थपुरुषार्थयोर्लक्षणार्थमित्याचार्याः । किमर्थमिदं सूत्रमिति जिज्ञासायामुच्यते –

यस्मिन् पदार्थजातेऽनुष्ठिते पुरुषस्य प्रीतिः स्वर्गादिस्वरूपिणी जायते स सकलोऽपि धर्मः पुरुषार्थः, यतस्तस्य लिप्साऽनुष्ठानमर्थलक्षणम् । कुतः? पुरुषार्थस्य प्रीत्याऽविभक्तत्वात् । पुरुषार्थानामेव धर्मत्वमिति भावार्थाधिकरणे श्रीवार्तिककारमिश्राः । पुरुषार्थानां धर्मत्वकथनेन क्रत्वर्थानां धर्मत्वनिरासो वेदितव्यः । अत एव श्रीमदापदेवः स्वकीयधर्मलक्षणे प्रयोजनमुद्दिश्येत्याह । तत्पदा-प्रवशे तु क्रत्वर्थे धर्मलक्षणस्याति-व्याप्तिर्भवेत् । अत एव **'वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत'** इत्यत्र वाजपेयाङ्गत्वेन विहितस्याऽव्यक्तचोदनाचोदितत्वेऽपि जोतिष्टोमविकारभूतस्य बृहस्पतिसवस्य न धर्मत्वम् । वाजयपेयस्य तु **'वाजपेयेन स्वाराज्यकामे यजेत'** इति कामान्तपदबोध्यत्वम् । पुरुषार्थ-त्वञ्च फलोद्देशन विहितत्वम् । कथन्न बृहस्पतिसवस्याऽत्र न धर्मत्वं विश्वजिन्न्यायेन संभवति ? इष्ट्वेति त्वाप्रत्ययस्य कालार्थसंयोगेनापि गतिसंभवात् । नैवम् । वाजपेयश्रुतेरत्यन्तपरार्थत्वततप्रकरण-बाधप्रसङ्गात् । बृहस्पतिसवस्य वाजपेयबहिरङ्गत्वेन स्वीकारे तद्दोषाभावात् क्रत्वर्थत्वमेव बृह-स्पतिसवस्येत्युक्तं प्रयुक्तिलक्षणे तृतीयपादे ।[2] न चैवम् **'दशपूर्णमासाभ्यामिष्ट्वा ज्योतिष्टोमेन यजेत'** इत्यादिवाक्यबलेनाऽत्यन्तपारार्थ्यपरिहाराय दशपूर्णमासाङ्गत्वमपि ज्योतिष्टोमस्य भवेदिति वाच्यम् । उभयोर्भिन्नप्रयोगवचनेनाङ्गाङ्गित्वासंभवात् । यथोक्तम् –[3]

**'प्रकृतश्चाऽसौ फलार्थत्वान्नदर्शाङ्गतां प्रतिपद्यते । अतो न तावत् सोमस्य दर्शाङ्गत्वम् । नापि दर्शादेः सोमाङ्गत्वम् । अविधीयमानत्वात् । न ह्यविधीयमानमङ्गं भवति । तस्मात् सोमस्यायं कालविधिः ।'** इति ।

एवमुक्तवचनेन सोमयागस्यानुष्ठानं दर्शपूर्णमासाभ्यामुत्तरकाले भवति तथा चोभयोरेव फलसंयोगात् पुरुषार्थत्वमेव, नाङ्गाङ्गित्वं संभवति । द्वयोर्योगयोर्निर्ज्ञातप्रयोजनत्वेन नाङ्गाङ्गित्वं संभवतीत्युक्तम् - **'अग्निमारुतादूर्ध्वमनूयाजैश्चरन्ति'** इत्यत्र । अत्राऽऽग्निमारुतस्य सोमाङ्गत्वेन विधानन्तथाऽनूयाजानां पश्वङ्गत्वेनाऽतिदेशोऽस्ति, अतोनिर्ज्ञातप्रयोजनत्वेनाङ्गाङ्गित्वाभावात् कालार्थ-संयोग एव राद्धान्तितः ।[4]

**'अमावास्यामपराह्णे पिण्डपितृयज्ञेन चरन्ति'** इत्यत्राप्युत्पन्नस्य पिण्डपितृयज्ञस्य नामाव-स्यायागत्वम् । अपराह्ण इति कालविशेषोपादानान्नामावास्यापदस्य यागनामधेयत्वम्, अपि तु काल-विशेषवाचित्वमेव । एवञ्च, पिण्डपितृयज्ञस्यापि पुरुषार्थत्वेन धर्मत्वमेव, न तु क्रत्वर्थत्वम् ।

**'संस्थाप्य पौर्णमासीं वैमृधमनुनिर्वपति'** इत्यत्र तु पौर्णमासीसंयोगाद् वैमृधस्य पौर्णमास्य-ङ्गत्वमेव, न तु प्रकरणाद्दर्शपूर्णमासाङ्गत्वम् । यथोक्तम् -

**'पौर्णमास्या हि संयुक्तो वाक्यनानेन वैमृधः**
**तस्य प्रकरणं नेष्टं तद्ध्यसंयुक्तगोचरम् ॥'** इति ।

द्वयोरेव साधारणं विहितं दार्शपौर्णमासिकं तन्त्रं तद्युक्तां पौर्णमासीं समाप्यैवेदमङ्ग-मनुष्ठेयमति **'संस्थाप्य पौर्णमासीं वैमृधमनुनिर्वपति'** इति वाक्यात् प्रतीयते । संस्थाशब्दस्य समाप्तिवचनात्वात् । वाक्यशेषेणापि तदीयेन पौर्णमास्यङ्गत्वमेव वैमृधनामकयागस्य निश्चीयते । तथा हि तत्र वाक्यशेषः - **'वैमृधः पौर्णमासे तु निर्वापो भवति तेन पौर्णमासो सेन्द्रो भवति ।'** इति।

अमावास्यायागे **ऐन्द्रं दध्यमावास्यायामैन्द्रं पयोऽमावास्या**मितिवाक्यविहित ऐन्द्रयागः सान्नाय्यापरपर्यायोऽस्ति । पौर्णमासीयागे तु आग्नेयोपांशुयाजाग्नीषोमहयपुरोडाशयागत्रयं सामाम्नातं वर्तते। इन्द्रदेवताकयागोऽत्र नास्तीत्यपूर्णतां पौर्णमासीयागस्य मन्वानो भगवान् वेदस्तदङ्गत्वेनेन्द्र-देवताकवैमृधयागं विदधत् परिपूर्णतां कथयति । अहो ! भगवतो वेदस्येदृशी लोकोत्तरैव निरूपणविधा चकास्ति यत्र समाजिनस्तथा पाश्चात्यास्तच्चरणनलिनसौरभाघ्राणपरायणा आधुनिकाश्च यथासञ्जात-जना अन्यथाभावं वेदाप्रामाण्यसंसाधनायैव प्रकटयन्ति । एवञ्च, ते प्रकारान्तरेण भगवते वेदाय द्रुह्य-न्त्येव । ते यथा कथयन्ति न तथा वेदस्य तात्पर्यमस्ति । ब्रह्मणि धर्माधर्मयोरव च तस्य तात्पर्या-वधारणात् । एवञ्च, सिद्धं भवति य क्रत्वर्थाः पदार्था न तेषां धर्मत्वम् । पुरुषार्थानामेव धर्मत्वात् । अत एव क्रत्वर्थेषु धर्मलक्षणस्यातिव्याप्तिवारणाय न्यायप्रकाशकारो धर्मलक्षणे प्रयोजनमुद्दिश्येत्याह ।

उक्तं पुरुषार्थत्वं किमिति लिप्सासूत्रेण क्रत्वर्थत्वं किमिति चेति जिज्ञासायामाह तत्रैव तावदाचार्यः - **'यदभावनाकथंभावपूरणं विधीयते तत् क्रत्वर्थम् ।'** इति ।

भावनैवांशत्रयोपेता वाक्यार्थो वाक्यार्थ एव च धर्म इति मीमांसकमतम् । अंशविकला भावना न प्रतीयते, अतः साध्यसाधनेतिकर्तव्यताविशिष्टा भावना फलेच्छाजनितयागादिधात्वर्थव्यापारविषयक-

व्यापाररूपा प्रथमत आख्यातेन प्रतीयते । स च व्यापार: किंरूप इत्यपेक्षायां तस्या एवेतिकर्तव्य-ताकाङ्क्षयां दर्शपूर्णमासादौ प्रकरणप्रमाणनुगृहीताग्न्यान्वाधानप्रभृतिब्राह्मणतर्पणपर्यन्तो विविधरूपो विशेषेणावगम्यते । इत्थञ्च, प्रकरणप्रामाणेनोभयाकाङ्क्षारूपेण प्रयाजादिसकलपदार्थजातं यागादि-करणानुग्राहकत्वेनेतिकर्तव्यतारूपं क्रत्वर्थत्वेन स्वीक्रियते । तद्भिन्नं फलं तत्करणञ्च पुरुषार्थत्वेनेति स्थिति: ।

अत्र यस्मिन् कृते प्रीतिरुत्पद्यते स पुरुषार्थ इति सौत्रलक्षणे प्रीतिशब्देनेच्छाविषयमात्रकथने क्रत्वर्थेऽतिव्याप्तिस्तथा स्वारसिकेच्छाविषयकथने पश्वादिफलकर्मण्यतिर्व्याप्तिर्भवेदिति सूत्रानुपात्तमपि क्रत्वर्थभिन्नत्वमेव पुरुषार्थलक्षणं स्वीचक्रिर आचार्या: । **'गोदोहनेन पशुकामस्य प्रणयेत्'** इत्यादौ गोदोहनादिकस्य वस्तुत: क्रतूपकारकत्वेऽपि क्रतूपकारोद्देशेन विधानाभावेन भावनाकथंभावपूरणार्थ-विधानस्याभावान्न क्रत्वर्थत्वम्, अपि तु पशुफलाद्देशेन विधानात् पुरुषार्थत्वमेव । **'चमसेनाप: प्रणयेदि'**ति वाक्यविहितस्य चमसस्यैव क्रत्वर्थत्वम् । एवमेव **'स्वाध्यायोऽध्येतव्य'** इतिवाक्य-विहितस्याऽध्ययनस्य तथा **'वसन्ते ब्राह्मणोऽग्नीनादधीत'** इति वाक्यविहितस्याधानस्याऽथज्ञानार्थ-त्वेनाऽग्न्यर्थत्वेन च विधीयमानतया क्रत्वपूर्वसाधनत्वोद्देशेन विधानाभावेनाऽवघातादेरिव कथं भाव-पूरणार्थत्वाभावान्न क्रत्वर्थत्वं भवति । एवञ्च, तत्तच्छ्रास्त्रानपेक्षेच्छाविषयभाव्यकभावनांशत्वे सति क्रत्वर्थभिन्नत्वं पुरुषार्थलक्षणं पर्यवसितं भवति । तथा च, नाधानाध्ययनयोरतिप्रसङ्ग: । तयोरग्न्यर्थ-ज्ञानभाव्यकभावनाकरणत्वेऽप्यग्नेरर्थज्ञानस्य च **'आहवनीये जुहोति'** इत्यादिशास्त्राधीनेच्छाविषयत्वेन तदनपेक्षेच्छाविषयात्वाभावेन तादृग्भाव्यकभावनांशत्वाभावात् ।

विचारशास्त्रमीमांसायां सूत्रेण लक्षणकरणमात्रमयुक्तमिति मत्वा वर्णकान्तरेणान्यदपि विचारि-तमाचार्यै: । फलांशस्य विधि: प्रयोजको भवति नेति विचार: । विधेयभावनाया विशेषणत्वात् करणादिवत् फलमपि विधेयं भवेदित्याशङ्का समुदेति यस्या निरास: फले रागत: प्रवृत्तिसिद्धेर्न विधेयत्वमिति सिद्धान्तप्रतिपादनेन भवति । न ह्यज्ञातज्ञापनमात्रं विधि:, किन्त्वप्रवृत्तप्रवर्तनमपि । तेन यत्र प्रथमं पुरुषो विधिबलेन प्रवर्तते तदेव विधेयं भवति । फले तु निसर्गरमणीये समेषामेव रागात् प्रवृत्ति: स्वान्ते संजायते । न हि फले मानसप्रवृत्तेरन्या काचन चेष्टारूपा प्रवृत्तिर्विध्यायत्तापि संभवति । यद्यपि भावनायां विधिर्विशिष्टविषयो भवति तथापि यस्मिन् विशेषणे प्रवृत्तिरन्यतो न लभ्यते तत्रैव स प्रवर्तको भवति नान्यत्रादग्धदहनन्यायेन । एवञ्च, फलस्य न कथञ्चिद् विधेयत्वम्। तत्र रागादेव प्रवृत्तिसिद्धे: । अत एवात्र प्रजातन्त्रप्रसूतप्रणालीषु रासभबुद्धिवैभवसंपन्ना अपि केनापि प्रकारेणच्छलच्छद्मादिना योग्यतापदवीमुपलभ्य महाभाष्यनयविवकध्वन्यालोकलाचनस्पन्दकारिकाप्रभृ-तिप्रौढग्रन्थिगूढतमग्रन्थाध्यापनकर्मस्वपि पदविशेषं चिकीर्षन्ति । किं प्रयोजनमुक्तविचारस्येत्यपेक्षाया-मुच्यते -

पूर्वपक्षे **'श्येनेनाभिचरन् यजेत्'** इतिवाक्यविहितस्य श्येननामकस्य यागस्य यत् फलं प्राणहरणानुकूलशस्त्रघातरूपाभिचारात्मकहिंसा तस्या अपि विधेयत्वन **'मा हिंस्यात् सर्वा भूतानि'** इति निषेधशास्त्रस्य तत्राऽप्रवृत्ति: । तथा च, श्येनयागस्य फलमधर्म एव भवेत् ।

पूर्वोक्तलिप्सासूत्रमाश्रित्य द्रव्यार्जननियमस्य क्रत्वर्थत्वमुत पुरुषार्थत्वमिति प्राधान्येन विचारो दृश्यते । कथन्तावद् द्रव्यार्जनस्य क्रत्वर्थसम्भावना यावत् पामरा अपि दलेषु स्वसुदृढस्थितिं विधाय तत्र साभिलाषं प्रवर्तन्ते । राष्ट्रसेवाव्याजेन लगुडिनोऽपि बभ्रुवर्णार्धाधोवसनरसिका मातृभूमौ सर्वाधिकां स्वप्रीतिं प्रदर्शयन्तस्तिष्ठन्मूत्रादिकार्यजातं सस्पृहं चरन्त: साट्टहासं हसन्त: श्वगृद्धकाककङ्का इव सहभोजनप्रियतापुञ्जभाज: समलिङ्गिविधां समर्थयन्ता धर्मशास्त्रमुपहसन्त: सनातनपथजुषस्तर्जयन्त-स्तरुणजनान् पुरुषार्थविधुरान् विदधत: क्षणवर्तिनीं तडितकान्तिं दधतो यथावसरं पदजातं चिन्वन्त: प्राणनिर्गमनत: प्राक्कालेऽपि विषयेषु सस्पृहस्वान्ता: भारतभुव: कलङ्का इव परोपकारविषये रङ्का इव वर्षासु विचलनाय संजातपिच्छिलपङ्का इव भोगिजनपर्यङ्का इव परस्वापहरणे लङ्का इव स्वीकृतातङ्का इव चन्दमसि कालकलुषिताङ्का इव सादरं स्वविभुताविवर्धनाय यदा द्रव्यार्जनविषये सस्पृहा भवन्ति तदा क्रत्वर्थसम्भावनाऽपि तस्य न दूरतो विलोक्यते । समाजसेवां न कुर्वन्ति, अपि तु केवलं प्रदर्शयन्ति । एवं सर्वमाकलय्य पोक्तं श्रीसोमनाथेन[6] –

'न तादवत्र द्रव्यार्जनमुदाहरणम् । तस्याविहितत्वेन विध्येकगम्यक्रत्वर्थत्वायोग्यत्वात् । नापि तन्नियम: । वक्ष्यमाणदोषदुष्टत्वात् ।' इति ।

अत एव पृच्छत्याचार्य **'एवं वा किमिहोदाहरण'**मिति ।[7] यद्यपि द्रव्यार्जनं न विहितन्तथापि तदुपाय: प्रतिग्रहादिर्विहितोऽस्ति । तद्विधेश्च प्रतिग्रहादिनाऽर्जितस्य द्रव्यस्यैव क्रतूपकारकत्वमिति पर्यवसानात् तस्य क्रत्वर्थताऽपि सम्भवतीति भवत्युत्तरमाचार्याणाम् – **द्रव्यार्जनमेव द्रव्यस्य प्राप्ति-रित्यर्थ: ।** पुरुषस्य तेन तेन नियमेन द्रव्यस्य प्राप्तिराम्नायते – 'ब्राह्मणस्य प्रतिग्रहादिना राजन्यस्य जयादिना वैश्यस्य कृष्यादिना शूद्रस्य सेवादिना सर्वेषां दायादिनेति ।' नि:श्रेयसमूलकोऽयं नियमो न जातिव्यवस्थामनादृत्य संभवतीति साऽऽद्रियते शिष्टै: । अशिष्टा एव ते सहभोजिनो ये स्वस्वार्थ-संपोषणाय तत्तत्पदेषु वर्तमानाय जातिव्यवस्थां मन्यते, न धर्मविषयेषु । स्वेष्टसंपादनाय जातिव्यवस्थैव गरीयसो तेषां महामूर्खाणां जनतासु भेदभूधरं जनयताम् । धर्मसम्पादनाय सा वराकी भारतभूमे: कलङ्कभूतेति तेषां क्षुद्रधिषणासु । एवञ्च, समेषामेव धर्मं प्रति द्रोह एव प्राधान्येन जागरितो दरीदृश्यते । एवं वा तेषां शष्पाभधियां गलगर्जितम् –

**दलिता नादिता धूर्तै राजभिर्वञ्चिताश्च ये ।**
**सर्वेष्वेव पदेष्वत्र तेषामेवाऽधिकारिता ॥१॥**
**ब्राह्मणा: क्षत्रियाश्चापि भूमिहारादयोऽपि च ।**
**सर्वे ते क्रूरकर्माणो गच्छन्तु यममन्दिरम् ॥२॥**
**मन्दिरेष्वपि विप्रांस्तान् प्रलण्डय्य सधिक्कृति ।**
**वञ्चिता: शोषिता: सर्वे प्रपद्यन्तामधिक्रियाम् ॥३॥**
**भारतं वञ्चितानां वै जायतां दलितात्मनाम् ।**
**वञ्चका धूर्तराजा वै सवर्णा यान्तु संक्षयम् ॥४॥** इति ।

इत्येवमादि वचनजातं यन्नेतृभ्य: संश्रूयते तत् कियत् संविधानानुकूलमिति विभावयन्तु दरमुकुलितलोचनं नेतारो जना विपश्चितोऽपि समे ।

अयमुक्तरूपो द्रव्यार्जननियमो यद्यपि न साम्प्रतिकधर्मनिरपेक्षशासनविषय: । सर्वथा वेद-विरुद्धक्रियाजातसमर्थनात् साम्प्रतिकशासनतन्त्रस्य धर्मनिरपेक्षता । अत एव केचनात्मनामधर्मनिर-पेक्षतामापादयन्ति शिष्टतल्लजा: । हन्त ! तन्त्रमिदं धर्मशास्त्रविषयेष्ववरोधं जनयति । तत्तु निगम-बाहीकानां निर्मूलक्रियाजातं बहुगुणगुम्फितमिव नेत्रे निमील्य समर्थयति । इयमेवास्माकं हतदैष्टिकता-ऽऽर्यावर्तापरनामधेयेऽनन्तराजर्षिपरिपालिते भारतवर्षे । अर्जननियमपरिपालने धार्मिकभावनाविशेषवि-स्फूर्तेरपराधनियन्त्रणमपि भवेत् तथापि न शासका: किमिति । तन्न समर्थयन्तीति तावदत्र हेतुं न पश्याम: । यद्यारक्षणपरिपोषाय जातिव्यवस्थाऽऽद्रियते तर्हि समाजसौष्ठवापादनाय धर्मविवर्धनाय च कथं न समाद्रियते? वेदमूला सेत्यत एव न समाद्रियते तर्हि हता वयं राष्ट्रञ्चापि हतमेव । वेदानुसारिणी व्यवस्था भारते न भविष्यति तत्किं म्लेच्छानां विषयेषु भविष्यति ? अस्तु ! अलमन्यथाऽन्यथा परिकल्पनव्यसनेन? प्रकृतमनुसरामि । अर्जननियम: क्रत्वर्थ उत पुरुषार्थ इति । अत्र पूर्वपक्षी क्रत्वर्थतामेव मनुते । कथम्? नियमस्य प्रयोजनवत्त्वाय । यदि स नियम: पुरुषार्थो भवेत् तर्हि तस्यानर्थक्यमेव भवेत् । द्रव्यलाभाय ब्राह्मणादीनामर्जननियम विधीयत इति तदङ्गमेव स्वीकरणीयम् । विहितस्याऽङ्गत्वात् । कर्मापि विहितं यदि तदपि फलस्याङ्गं भवत्येव । अङ्गस्य चोपयोगिता स्वरूपे कार्ये च भवति । अयमर्जननियमो न तावत् स्वरूप उपयुज्येत । विनाऽपि नियममर्जनस्य संभवात् । कुत इदानीं नियमेनाऽर्जनं भवति । लोकतन्त्रस्यानियतत्वादनियमेनैव तद् दरीदृश्यते । आभीरादयोऽपि गवादिमवाप्य ब्राह्मणच्छात्राणां चरणस्पर्शं मनसा कामयन्ते कृते च तस्मिन्नाशीराशासते । यथा संताने जातिभेदाद् वर्णसाङ्कर्यं भवति तथैव जीविकासाङ्कर्यादपि तद् भवतीति धर्मशास्त्रविद: । बहव: साङ्कर्यापादका विशेषा: सन्तीति धर्मशास्त्रान्निश्चेतुं सुशकमेव । एवञ्च, कार्योपयोगी नियमोऽयं वाच्य: । नियमस्य पुरुषार्थत्वे क्षुत्प्रतिघातादि दृष्टमेव तत्कार्यं स्यात् तच्च नियमेन विनाऽपि संपादयितुं शक्येत । तथा च, तादृशनियमविध्यन्यथानुपपत्त्या द्रव्यप्राप्ति: क्रत्वर्थाऽस्तीति निश्चीयते । एवं स्वीकारे नियमविधेरानर्थक्यमपि परिहर्तुं शक्येत । क्रत्व-पूर्वस्यादृष्टत्वेन नियतोपायमेवार्जनं तन्निष्पादनायालमिति कल्पनात् । एवञ्च, पुरुषेणार्जितं सकलमेव द्रव्यजातं क्रत्वर्थमिति समायातम् । '**यज्ञार्थं पशव: सृष्टा**' इति स्मृतिस्तथा '**यज्ञेन कल्पता-मित्यादिश्रुतिरप्यत्र प्रमाणम् ।**' सर्वं द्रव्यं क्रत्वर्थमिति सर्वैरेव द्रव्यैर्धर्मजातमेव कर्तव्यमिति नास्ति तद्भोगायाऽवकाश: ।

एवं पूर्वपक्षे प्राप्ते तावदयं सिद्धान्त: - प्रत्यक्षेण तावदर्जनस्य पुरुषार्थत्वं गम्यत इति आनुमानिकक्रत्वर्थतायै नास्त्यवकाश: । न हि प्रत्यक्षसिद्धमनुमानेन बाधमर्हति । अनुमानस्य प्रत्यक्षाद् दुर्बलत्वात् । कथमर्जनस्य प्रत्यक्षत्वमिति न वाच्यम् । अर्जनस्य रागाप्राप्तत्वाच् शास्त्रीयत्वाभावात् । रागतश्च प्राप्तिस्तस्य पुरुषार्थत्वेनैव । यथाहुराचार्या:[8] -

**'प्रत्यक्षेण चार्जितं द्रव्यं पुरुषं प्रीणयत् पुरुषार्थं विज्ञायते, न तदनुमानेन क्रत्वेक-शेषतया शक्यं विज्ञातुम्'** इति । एवञ्च, यथाशास्त्रमर्जितं द्रव्यं पुरुषार्थमेव भवति यस्य यथेष्टं विनियोगः कर्तव्यः । विनियोगोऽपि कथमिव भवतीति शास्त्रमेव नः समादिशति । न शास्त्रविपरी-तपथेन गणिकादौ तत्सब्रह्मचारिलोकतन्त्रप्रतिष्ठाप्राप्तदलादौ च यथाशास्त्रप्राप्तस्य द्रव्यस्य विनियोगो निःश्रेयसाय भवेत् । प्रत्युत तदनर्थायैव भवेत् । एवञ्च, पुरुषार्थस्यैव द्रव्यस्य क्रतावपि शक्य एवोप-योगः । अर्जितस्य द्रव्यस्य पुरुषार्थत्वे तावदियमपरा युक्तिर्यद् द्रव्योपलब्धिमात्रादेव क्रतोरुपक्रमाज्जी-वनलोपेन क्रत्वनुष्ठानमेव न सिध्येदिति । क्रत्वर्थस्य द्रव्यस्य क्रतुबहिरुपयोगे जनः प्रत्यवेयादपि ।

दृष्टार्थत्वबलादपि पुरुषार्थतैवाऽर्जनस्य मन्तव्यम्, अन्यथा क्रत्वपूर्वलक्षणमदृष्टार्थत्वं प्रसज्येत। यस्तु नियमोऽस्ति ब्राह्मणः प्रतिग्रहादिनैव द्रव्यमर्जयेदिति तस्य दृष्टकार्याभावाद् भवेददृष्टार्थत्वम् । अदृष्टमपि स्वीकृतं पुरुषार्थार्जनविषयत्वान्नियमस्य पुरुषार्थत्वमेव भवति, न क्रत्वर्थत्वम् । एवन्तर्हि किमायातमत्र? इदमायाताम् । पश्यतु तावद् भवान् । ये खलूपाया द्रव्यार्जनाय तत्तज्जातिविशेष-पुरस्कारेण शास्त्रेषु विहिताः सन्ति तानाश्रित्यैव द्रव्यसंचये निःश्रेयसगामिता, तानन्यथा कृत्वा साम्प्रतिकप्रकारेण द्रव्यसञ्चये तु प्रत्यवायः पदे पदे प्रसज्येत ।

इमामेव सुखावहां लिप्सानीतिमङ्गीकृत्य धर्मशास्त्रे व्यवहारकाण्डः प्रवर्तते । व्यवहार-काण्डविषयास्तु लोकतन्त्रेऽस्पृश्या इव प्रत्यवायापूरितापघना इव सञ्जाताः । अत एव महासमस्या-दवाग्निः प्रसरति नो राष्ट्रमेवाघ्रातुम् । असमाधेयावस्थायामिदानीं संप्राप्तमस्माकं राष्ट्रमिति शिष्टाः प्रदूयन्ते खलाः प्रसीदन्ति ।

**सन्दर्भाः**

1. मीमांसा 4/1/2 ।
2. मीमांसा 4/3/13 अधि. ।
3. शास्त्रदीपिकायाम् - 4/3/16 ।
4. मीमांसादर्शनम् - 4/3/14 ।
5. शा. - 4/3/14 ।
6. मयूखमालिकायां तत्रैव ।
7. तत्रैव शास्त्रदीपिकायां श्रीपार्थसारथिमिश्रः ।
8. तत्रैव ।

**बी-३ न्यु टीचर्स कॉलोनी,**
**एस्. एस्. वी. वी. जगतगंज,**
**वाराणसी - २२१००२ (उत्तरप्रदेश)**
**ई-मेल** - kktripathi010@gmail.com

★★★

# नामार्थविमर्शः

✍प्रो. प्रकाशचन्द्रः

**( नाम इत्युक्ते शब्दशास्त्रे स्वादिप्रत्यययोग्योऽर्थवान् शब्दो बुध्यते । यास्केन प्रदर्शितानां पदजातानां विभागेष्वन्यतमोऽयं शब्दः । एतस्य जातिव्यक्तिलिङ्ग-संख्याकारकात्मकाः पञ्च वाच्यार्थाः प्रसिद्धाः । विशिष्य व्याकरणे शब्दोऽपि नामार्थत्वेनाभिमतः । सत्यम् । 'रामेति द्व्यक्षरं नाम मानभङ्गः पिनाकिनः' इत्यादौ सवेषां तथा बोधात् । परमत्र विशेषतोऽवसेयम् - अनुकरणानुकार्य्य-योर्भेदपक्षे शब्दस्य नामार्थत्वं मन्तव्यम् । लेखेऽस्मिन् सन्दर्भपुरस्सरं षोढा नामार्थः प्रत्यपाद्यत । प्राचीनार्वाचीनाप्रामाणिकग्रन्थानां प्रामाण्यमत्र पुरस्कृत्य महाभाष्यसन्दर्भञ्चाश्रित्य विद्वाँल्लेखको नामार्थविषयकं शाब्दिकसिद्धान्तं निपुणं प्रस्तौति ॥ - स. )**

लोके वेदे च सर्वत्र शब्दस्य माहात्म्यं विद्यते । शब्दः नित्यो ब्रह्मस्वरूपश्चास्तीति व्याकरणशास्त्रसिद्धप्रसिद्धसिद्धान्तो वरीवर्ति । शब्दज्ञानस्य व्यवहारस्य प्रत्यवमर्शस्य च आधारभूता 'वाग्' भवति, यदि सा अपगच्छेत् तदा ज्ञानं न प्रकाशेत प्रकाशकं विना, सा वागेव शब्दार्थप्रकाशिका व्यवहारसिद्धौ समर्था शाश्वती सत्तात्मिका चास्ति । यथोक्तं वाक्यपदीये भर्तृहरिणा -

**वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती ।**
**न प्रकाशः पकाशेत सा हि प्रत्यवमर्शिनी ।**[1]

स च नित्यशब्दो लोके वेदे च नामाख्यातोपसर्गनिपातेष्विति । चतुर्षु स्वरूपेषु प्रयुक्तो दृश्यते ।

निरुक्तकारेण महाभाष्यकारेण चैतेषां प्रामाणिकं विवेचनं प्रस्तुतम् । निरुक्तस्य प्रारम्भ एवैतेषां स्वरूपमुक्तं दृश्यते 'तद्यान्येतानि चत्वारि पदजातानि नामाख्यातं चोपसर्गनिपाताश्च'[2] । यास्काचार्येणैतेषां चतुर्णां वेदमन्त्रैः सह नित्यसम्बन्धोऽपि प्रतिपादितः । यथा कथयति ग्रन्थकारः

**तेषां मनुष्यवद्देवताभिधानम् । पुरुषविद्याऽनित्यत्वात्कर्मसम्पत्तिर्मन्त्रो वेदे ।**[3]

एतन्निरुक्तवचनं साशयं स्पष्टयन् टीकाकारो लिखति । 'मनुष्याणामशिक्षितत्वाद्विस्मरणशील-त्वाद्वा अयथावत्प्रयुक्ताः यथास्थितमर्थं नाभिदध्युः ।' ततश्च सर्वार्थप्रत्यक्षदृशो देवाः स्वल्पमप्य-यथावदभिधानममर्षन्तः कर्मणि न समीयुः । ततश्च देवताविहीनं कर्माफलं संपद्येत । न केवलं फलासंपत्तिरेवाऽपितु दुरिष्टहेतुको दोषोऽपि स्यात् । तथाचोक्तम् 'दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्' । 'तस्मादेत

एव नामाख्यातोपसर्गनिपाता: प्रयोगानुगतपरिपाटीविनियमार्थं मन्त्रत्वेन वेदे समाम्नाता: । नहि नामाख्यातोपसर्गनिपातान्परित्यज्य मन्त्रा: सन्ति । तदेव हि चतुर्विधं पदजातं प्रयोगानुगतपरिपाट्या कयाचिदवस्थितं मन्त्रा इत्युच्यन्त इति ।'[4] अनेन निरुक्तप्रामाणिकचिन्तनेन एतेषां नामादीनां वेदमन्त्रै: सह नित्योऽभेदसम्बन्धश्च सिद्धो भवति । महाभाष्यकारेणापि पस्पशाह्निके एतेषां सत्ता, प्रामाणिकता च चत्वारि शृङ्गा......., चत्वारिवाक्परिमिता पदानि .........[5] इत्यादिमन्त्रद्वयेन स्वीकृता ।

न केवलं वेददृष्ट्या अपितु लोकदृष्ट्यापि एतेषां माहात्म्यं विद्यते । लोके एतेषां प्रयोगज्ञानं विना सम्यग् वाक्यार्थज्ञानं न भवितुमर्हति । सम्पूर्णे वाङ्मये एषां नित्यसत्ता दरीदृश्यते । प्रस्तुत-प्रकरणेऽत्र नामार्थविषयो विचार्यते ।

**नामशब्दलक्षणम्**

निरुक्ते यास्काचार्यो नामशब्दस्य तात्त्विकं लक्षणं प्रस्तौति । **'सत्त्वप्रधानानि नामानि'**[6] अर्थाद् येषु शब्देषु सत्त्वस्यार्थाद् द्रव्यस्य प्राधान्यं भवति । तानि स्त्रीपुंनपुंसकलिङ्गाद्यन्वितानि नामानि नामपदवाच्यानि भवन्ति । निरुक्तकारविहितनामलक्षणं स्पष्टयन् टीकाकारो लिखति । 'सीदति गच्छति (अन्वेति) लिङ्गसंख्यादिकमस्मिन्निति सत्त्वं (द्रव्यम्) षद्लृविशरणगत्यवसादनेष्वित्य-स्मादधिकरणे औणादिक स्त्वन्प्रत्यय: ।' तद्येषु प्रधानं (सत्त्वम्) गुणभूता च क्रिया तानीमानि सत्त्वप्रधानानि । कानि पुनस्तानि? नामानि । नमन्त्याख्यातशब्दे गुणभावेनेति नम(य)न्ति वा स्वमर्थ-माख्यातशब्दवाच्ये गुणभावनेति नामानि । णम् प्रह्वत्वे (शब्दे च) इत्यस्य शुद्धस्यान्तर्भावितण्यर्थस्य वा नामन्सीमन्नि'त्यादिनौणादिको निपात: । यथैव ह्याख्याते विद्यमानमपि द्रव्यमविवक्षितमेवमिहापि क्रिया अविवक्षिता, द्रव्यपरत्वात्सत्त्वशब्दस्य तद्विक्रियाजनितमुत्तरकालं क्रियाशेषभूतमभिधाय धात्वर्थो-ऽसौ व्यावर्तते । स्त्रीपुंनपुंसक भेदं, निपातोपसर्गाणामपि क्वचिन्नामत्वमपेक्ष्य बहुवचननिर्देशो नामानि एक इत्याहु: ।[7]

सत्त्वप्रधानानि नामानि इति स्वरूपलक्षणप्रसङ्गे निरुक्तकार: नामशब्दस्य सामान्यविशेषरूपे निर्दिशन् निगदति ।

**'अद इति सत्त्वानामुपदेश:'**[8] टीकाकार: दुर्गाचार्यो यास्कसिद्धान्तं विमृशन् कथयति सामान्यत इति शेष: । सामान्यत: सामान्यरूपेण सत्त्वानां द्रव्याणामुपदेशोऽद इति । उपलक्षणमेतद- न्येषामपि लिङ्गसामान्यवचनानामिति ।[9] सामान्यत: सत्त्वयुक्तानि द्रव्याणि नामपदवाच्यानि भवन्ति । अस्ति किञ्चिद्द्रव्यमिति अज्ञातसंज्ञमपि वस्तुमात्रावगाहि सामान्यत: सत्त्वसामान्याद् नामपदवाच्यं भवतीत्यभिप्राय: ।

नाम्नो विशेषस्वरूपं विवृण्वन् निर्दिशति यास्काचार्य: 'गौरश्व: पुरुषो हस्तीति ।'[10] अत्र सत्त्वानामिति पूर्वस्मात्खण्डसूत्रान्तवाक्यादनुवर्तते । विशेषोपदेश इति शेष: । सोपाधिकनिरुपाधिकोप-प्रदर्शनार्थमनेकोदाहरणम् । इति शब्द: आद्यर्थ: ।[11] इति दुर्गाचार्य: । यथा गौरित्यत्र द्रव्यत्वसामान्य-ज्ञानदृष्ट्या निरुपाधिकद्रव्यत्वं ज्ञायते, सास्नादिमत्त्वप्राण्यर्थविशेषार्थदृष्ट्या गोत्वमिति सोपाधिकद्रव्य-त्वमपि ज्ञायत इति नाम्न: निरुपाधिकसोपाधिकरूपं सर्वेषु सत्त्वप्रधानपदार्थेषु चेतनाचेतनबोधकशब्देषु

ज्ञातुं शक्यत इति भाव: । महाभाष्यकारेणापि **'द्रव्यप्रधानं नाम'**[12] इति नामलक्षणमङ्गीकृतम् । नाम द्रव्यप्रधानं कथं भवतीति प्रश्ने नामाख्यातयो: तात्त्विकस्वरूपभेदं प्रश्नोत्तरमाध्यमेन निर्दिशति ।

**'कथं पुनर्ज्ञायते क्रियाप्रधानाख्यातं भवति, द्रव्यप्रधानं नामेति? यत्क्रिया पृष्टस्तिङाचष्टे - किं देवदत्त:? 'य: कारको हारक इति ।'**[13] द्रव्यप्रधानं नाम इति भाष्यवचनं विमृशन् नागेशभट्ट: कथयति 'द्रव्यप्रधानं नामेति । नामशब्देन सुबन्तम्, तस्य सत्तालिङ्गसङ्ख्याकारकद्रव्यार्थकत्वेन तदपेक्षया द्रव्यस्य प्राधान्यम् । तस्य विभक्त्यर्थसम्बन्धं प्रति विशेषणत्वेन काण्डे इत्यादौ विभक्त्यर्थ-प्रधानत्वोक्तिरविरुद्धा'[14]

महाभाष्यपस्पाशाह्निकोद्योते नागेशभट्ट: नामशब्दस्य लक्षणमेभि: शब्दै: प्रस्तौति 'नामशब्देन सुबन्तं नमत्याख्यातार्थं प्रति विशेषणीभवतीति व्युत्पत्ते: ।'[15] अत्र नामशब्दस्य नागेशभट्टद्वारा प्रदत्तलक्षणे 'नामशब्दे सुबन्तमित्यभिप्राय: नामपदमर्थवत्त्वात् सुप्त्वादियोग्यं भवतीति स्वीकार्य: अन्यथा -

**सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां ।**

**तिङा सुबन्तेनेति विज्ञेय: समास षड्विधो बुधै:'**[१६] इति

भूषणनिर्दिष्टकारिकोक्तसिद्धान्तेन विरोध: स्यात्, यतोहि नामशब्देन सुबन्तमिति स्वीक्रिय-माणे सति 'सुपां सुपा' इति प्रथमसमासभेदे एव नाम्नोऽपि अन्तर्भाव: सम्भवेत् 'सुपां नाम्ना इति कथञ्च विरुध्येत । अत: नामशब्द: स्वादिप्रत्यययोग्य इति नागेशभट्टस्याभिप्राय इति वक्तुं युज्यते ।' स्वादिप्रत्यययोग्यस्यैवार्थवतश्शब्दस्य 'अर्थवदधातुरप्रत्ययप्रातिपदिकम्'[17] इति सूत्रेण प्रातिप- दिकसंज्ञा विधीयते, तत्फलञ्च स्वादिप्रत्ययप्रसक्ति: ।

उभयोर्नामप्रातिपदिकयो: संज्ञासंज्ञिभावोऽभेदरूपेण वर्तत इति स्पष्टं ज्ञातुं शक्यते । शब्द-शक्तिप्रकाशिकाकार: तथ्यमेतत् प्रकाशयन् कथयति -

**'निरुक्ता प्रकृतिर्द्वेधा नामधातुपभेदत: ।**

**यत् प्रातिपदिकं प्रोक्तं तन्नाम्नो नातिरिच्यते ॥'**[18]

**नामार्थविवेचनम्**

नामार्थविचारप्रसङ्गे सत्त्वप्रधानोऽर्थाद् द्रव्यप्रधानो नामशब्द: प्रयोगकाले कस्मिन् रूपे उपस्थितो भवतीति महाभाष्यादिग्रन्थप्रामाण्येन भट्टोजिदीक्षित: पञ्च नामार्थान् एकया कारिकया प्रस्तुतवान्, येषामर्थानां विमर्श: कौण्डभट्टेन वैयाकरणभूषणसारे नागेशभट्टेन च परमलघुमञ्जूषायां विहित: ।

कारिकाऽस्ति - **एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा ।**

**नामार्थ इति सर्वेऽमी पक्षा: शास्त्रे निरूपिता: ॥**[१९]

अत्र एकमिति पदेन जाति: नामार्थ: भवतीति स्वीक्रियते, जातिपदमाकृतिशब्दपर्यायत्वेन प्राय: प्रयुज्यते, व्यक्तिपदञ्च द्रव्यपदार्थे प्रयुज्यते । कारिकाया व्याख्याने यथा भूषणकार: कथयति 'एकम्-जाति: लाघवेन तस्या एव वाच्यत्वौचित्यात्, अनेकव्यक्तीनां वाच्यत्वे गौरवात् ।'[20] जाते: पदार्थत्वे मानन्तु 'जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्' इति सूत्रे सवर्णेऽण्ग्रहणमपरिभाष्यम्, आकृतिग्रहणात् सिद्धम् इति वार्तिकम्, आकृतिं वाजप्यायन: इति सरूपसूत्रस्थं भाष्यञ्च ।[21]

केवलजातिपक्षसमर्थकानां मीमांसकानां मतं प्रदर्शयन् नागेशभट्ट: कथयति 'अत्र मीमांसका: शब्दानां जातौ शक्तिर्लाघवात् । व्यक्तीनामानन्त्येन तत्र शक्तौ गौरवात् नागृहीतविशेषणा बुद्धिर्विशेष्य उपजायते' इति न्यायस्य विशेषणे शक्तिर्विशेष्ये लक्षणेति तात्पर्यात् । किञ्च एकस्यां व्यक्तौ शक्त्युपदेशे व्यक्त्यन्तरे तद्बोधप्रसङ्गात् । गामानयेत्यादावन्वयानुपपत्त्या तदाश्रयलक्षकत्वेन निर्वाह-श्चेत्याहु: ।[22] अर्थाल्लाघवकारणाज्जाता शक्तिं स्वीकृत्य व्यक्तौ लक्षणया बोध: स्वीकरणीय इति मीमांसकानां मतं विद्यते । मीमांसादर्शनस्य प्रथमाध्यायस्य तृतीयपादे 'आकृतिरधिकरणे' विषयोऽयं विस्तरेण विचारितोऽस्ति । शबरस्वामिना तत्र भाष्ये आकृतिव्यक्त्योरुभयोरपि पक्षयोर्विषयं विमृश्य आकृतिवादपक्ष: सिद्धान्तरूपेण संसाधित: । अस्याधिकरणस्य प्रमुखं सूत्रं वर्तते – 'आकृतिस्तु क्रियार्थत्वात्' ।[23] अर्थात् क्रियार्थमाकृति: पदार्थो विद्यते । सूत्रं स्पष्टयन् भाष्यकर्ता लिखति 'तु शब्द: पक्षं व्यावर्तयति । आकृति: शब्दार्थ: ।' कुत:? क्रियार्थत्वात् । 'श्यनचितं चिन्वीत' इति वचनमाकृतौ सम्भवति, यद्याकृत्यर्थ: श्येनशब्द: । व्यक्तिवचनं तु न चयनेन श्येनव्यक्तिरुत्पादयितुं शक्यते । इत्यशक्यार्थवचनादनर्थक: । तस्माद् आकृतिवचन: ।[24]

कुमारिलभट्टोऽपि श्लोकवार्तिके आकृतिं जातिपर्यायत्वेन स्वीकृत्य जातिमेव पदार्थत्वेन निरूपितवान् – **'जातिमेवाकृतिं प्राहुर्व्यक्तिराक्रियते यया ।**
**समानरूपभावश्चेज्जाति: सास्नाभिरिष्यते ।'**[25]

तदेवं मीमांसका जातिवादिन: जातिशक्तिसमर्थका: सन्तीति मीमांसाग्रन्थपर्यालोचनेन ज्ञातुं शक्यते ।

एकं द्विकमित्यादिकारिकायामेकमिति कथनेन केवलव्यक्तिपक्षोऽपि स्वीक्रियते यथा भूषणसारे कौण्डभट्टो निगदति । 'यद्वा केवलव्यक्तिरेव एकशब्दार्थ:, केवलव्यक्तिपक्ष एवाण्ग्रहणस्य, एकशेषस्य चारम्भेण तस्यापि शास्त्रसिद्धत्वात् ।'[26] अर्थात् केवलव्यक्तिपक्षोऽपि शास्त्रसम्मपक्षोऽस्ति 'अणुदित्सवर्णस्य चाप्रत्यय:' इति सूत्रेऽण्ग्रहणेन 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेणैक-शेषोपदेशेन च केवलव्यक्तिपक्षोऽपि शास्त्रनिर्दिष्टपक्षो विद्यत इति भाव: ।

व्यक्तिपक्षे युक्तिं प्रदर्शयन् गौरवञ्च निराकुर्वन् भूषणकार: कथयति 'युक्तञ्चैतद् व्यवहारेण व्यक्तावेव तद्ग्रहणात् । सम्बन्धितावच्छेदकस्य (सम्बन्धितावच्छेदिकाया:) जातेरैक्याच्छक्तिरप्येकैवेति न गौरवमपि ।'[27]

तदेवमेकमित्यनेन केवलजातिपक्ष: केवलव्यक्तिपक्षो वा गृह्यते । किन्तु केवलेनैकेन पक्षेण इष्ट नामार्थबोधो न सम्भवति, मीमांसका अपि द्रव्यत्वबोधाय लक्षणां स्वीकुर्वन्ति । अत: नागेश-भट्टेन मीमांसकानां केवलजातिपक्ष: सयुक्तिभि: प्रमाणैश्च सम्यगालोचित: । यथा केवलजाति-पक्षस्वीकारे 'गोत्वमस्तीत्यर्थेऽन्वयानुपपत्त्यभावेन गौरस्तीति प्रयोगे व्यक्तिभानापत्ति: स्यात् । शक्ति-ग्राहकशिरोमणिर्व्यवहारो व्यक्तावेव शक्तिं ग्राहयति गवादिपदेन लोके व्यक्तरेव बोधादित्याद्यभिप्रायेण नागेशभट्ट: मीमांसकानां केवलजातिपक्षं निराकृतवान् ।'[28]

वैयाकरणा न केवलाकृतिपदार्थं न केवलद्रव्यपदार्थं स्वीकुर्वन्ति, तेषां मते उभयोः पदार्थता शास्त्रसम्मताऽस्ति, आकृतिविशिष्टं द्रव्यम्, द्रव्यविशिष्टा चाकृतिः पदार्थो भवति । अस्मिन् विषये कौण्डभट्टेन नागेशभट्टेन च 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रभाष्यं प्रमाणत्वेनोदधतम् –

'वस्तुतस्तु न ह्याकृतिपदार्थस्य द्रव्यं न पदार्थः इति भाष्याद्विशिष्टं वाच्यम् ।'[29] नागेश-भट्टोऽपि कथयति 'वस्तुतस्तु न ह्याकृतिपदार्थकस्य द्रव्यं न पदार्थः' इति सरूपसूत्रभाष्य-द्विविशिष्टमेव वाच्यम्, तथैवानुभवात् । अनुभवसिद्धस्यापलापानर्हत्वाच्च ।[30]

'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रभाष्य भाष्यकारविहितविवेचनं द्रष्टुं शक्यते 'न ह्याकृतिपदार्थकस्य द्रव्यं न पदार्थो द्रव्यपदार्थकस्य चाकृतिर्न पदार्थः, उभयोरुभयं पदार्थः, कस्यचित्तु किञ्चित् प्रधानभूतं किञ्चिद्गुणभूतम् । आकृतिपदार्थकस्याकृतिः प्रधानभूता द्रव्यं गुणभूतम् । द्रव्य-पदार्थकस्य द्रव्यं प्रधानभूतमाकृतिर्गुणभूता ।'[31] अनेन भाष्यनिर्दिष्टसिद्धान्तेन उभयोः पदार्थत्वं स्वीकृतं विद्यते । सूत्रवार्त्तिकभाष्यकाराः त्रयोऽपि मुनयः उभयपक्षसमर्थकाः सन्तीति भाष्यादिपर्या-लोचनेन स्पष्टतया ज्ञातुं शक्यते ।

भाष्यकारः पस्पशाह्निके पाणिनिमतोल्लेखपूर्वकं कथयति 'किं पुनराकतिः पदार्थः, आहोस्विद् द्रव्यम्? उभयमित्याह । उभयथा ह्याचार्येण सूत्राणि पठितानि । आकृतिं पदार्थं मत्वा जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यामित्युच्यते । द्रव्यं पदार्थं मत्वा सरूपाणाम्........ इत्येकशेष आरभ्यते ।'[32] अनेन भाष्यप्रमाणेन सूत्रकारपाणिनेर्मतमुभयपक्षानुसारि विद्यत इति ज्ञातं भवति । वार्त्तिककारोऽपि उभयपक्षसमर्थकोऽस्तीति भाष्यवार्त्तिकपरिशीलनेन ज्ञातुं शक्यते । यथा जात्या-ख्यायामिति सूत्रे एकेन वार्त्तिकेन जातिद्रव्ययोरभेदत्वेन निरूपणं क्रियते वार्त्तिककारेण –

**जातिशब्देन हि द्रव्याभिधानम्**[३३] अस्य वार्तिकस्य तात्त्विकं विवेचनं प्रस्तुवन् भाष्यकारो जातिद्रव्ययोरैक्यभावं लौकिकोदाहरणपुरस्सरं दर्शयति – 'जातिशब्देन हि द्रव्यमप्यभिधीयते, जातिरपि। कथं पुनर्ज्ञायते जातिशब्देन द्रव्यमप्यभिधीयत इति? एवं हि कश्चिन्महति गोमण्डले गोपालकमासीनं पृच्छति अस्त्यत्र काञ्चिद् गां पश्यसीति स पश्यति 'पश्यति चायं गाः' पृच्छति च काञ्चिदत्र गां पश्यसीति । नूनमस्य द्रव्यं विवक्षितम् ।'[34]

भाष्यकारोऽपि पस्पशाह्निके 'सिद्धे शब्दार्थसम्बन्धे' इति वार्तिकस्य उभयपक्षदृष्ट्या विग्रहं स्वीकृत्य उभावपि पदार्थौ नित्यौ इति मत्वा विमृशति ।

'अथ कं पुनः पदार्थं मत्वा एष विग्रहः क्रियते – सिद्धे शब्देऽर्थे सम्बन्धे चेति । आकृतिमित्याह । कुत एतत् । आकृतिर्हि नित्या द्रव्यमनित्यम् । ......... अथवा द्रव्य एव पदार्थे एष विग्रहो न्याय्यः – सिद्धे शब्दे अर्थे सम्बन्धे चेति । द्रव्यं हि नित्यमाकृतिरनित्या । ......... अथवा किं न एतेन इदं नित्यमिदमनित्यमिति । यन्नित्यं तं पदार्थं मत्वैष विग्रहः क्रियते – सिद्धे शब्देऽर्थे सम्बन्धे चेति ।'[35] अस्मिन् प्रसङ्गे तत्रैवाकृतिद्रव्ययोः भाष्यकारेण तात्त्विकं विवेचनं लौकिक-दृष्टान्तप्रदानपुरस्सरं प्रस्तुतं येन भाष्यकारमतेऽपि उभयोर्नित्यत्वं पदार्थत्वञ्च स्वीकृतं दृश्यते ।

भर्तृहरिरपि त्रिमुनिस्वीकृतसिद्धान्तमनुसृत्य वाक्यपदीये पक्षद्वयमपि यथाशास्त्रं निरूपितवान् । यथा वाक्यपदीयस्य तृतीयकाण्डे भर्तृहरिणा जातिसमुद्देशद्रव्यसमुद्देशयो: शास्त्रीयं विवेचनं प्रस्तूय उभयोरपि नित्यता स्वीकृता । अस्मिन् सन्दर्भे जातिसमुद्देशस्य द्वितीया कारिका प्रमाणत्वेन द्रष्टुं शक्यते -

**पदार्थानामपोद्धारे जातिर्वा द्रव्यमेव वा ।**
**पदार्थौ सर्वशब्दानां नित्यावेवोपवर्णितौ ॥**[३६]

कारिकाव्याख्याने हेलाराज: कथयति । 'सर्वेषामपि शब्दानां नामाख्यातादिस्वभावानां जाति-वादिमते जातिरेवार्थो न द्रव्यम् । द्रव्यवादिमते तु द्रव्यमेव न जाति: । द्वितीयेन वा शब्देन पदार्थान्तरं सूचितं जातिविशिष्टद्रव्याभिधानमिति । अत एव तदेव संकलनारूपं पदार्थाविति स्फुटीकृतम् ।'[37] तत्रैवाग्रे विषयं स्पष्टयन् कथयति 'यद्वा प्राधान्येनैव भिन्नविषयतया पाणिनिदर्शने जातिद्रव्ये शब्दे-नाभिधीयेते इत्ययमत्र पक्ष: 'पदार्थौ' इत्युक्त: । तत्र नामपदस्य गौरित्यादे: गात्वादिजाति: । नित्य-क्रियाविषयसाधनैकार्थसमवेतसंख्या (ख्यया) जातिविशेषभावमापन्ना अभिधेया, अनाश्रयाया जातेरनुप-पत्ते: । सामर्थ्यात् प्रतीतं द्रव्यम् ।'[38] तदेवं जातिविशिष्टं द्रव्यं द्रव्यविशिष्टा च जाति: सर्वेषु शब्देषु नित्यत्वेन भवत:, उभावपि पदार्थौ नित्यौ इति पाणिनिकात्यायनपतञ्जलिभर्तृहर्यादिभि: स्वीकृत: सिद्धान्तो वैयाकरणानां विद्यत इति 'द्विकम्' इति पदेन स्वीक्रियते । तदेतदभिप्रत्याह द्विकम् । जातिव्यक्ती इत्यर्थ: ।'[39]

'त्रिकम्' इति पदेन 'जातिव्यक्तिलिङ्गानीत्यर्थ:'[40] नामार्थ इति पक्ष: स्वीक्रियते, अर्थाद् यथा जातिव्यक्तो नामार्थस्तथैव लिङ्गमपि नामार्थो भवति । अत्र पाणिने: 'ह्रस्वो नपुंसके प्राति-पदकस्य'[41] स्वमोर्नपुंसकात्[42] इत्यादिसूत्राणि प्रमाणभूतानि सन्ति । लिङ्गस्य प्रकृत्यर्थत्वे स्वीकरणे सूत्रार्थसङ्गतिर्भवति । महाभाष्यकारेण लिङ्गस्वरूपं 'सरूपाणामेकशेष एकविभक्तौ'[43], 'स्त्रियाम्'[44], 'तस्यापत्यम्'[45] इत्यादिसूत्रेषु विस्तरेण प्रतिपादितम् ।

नागेशभट्टेन प्रत्ययानां द्योतकत्वाल्लिङ्गं नामार्थो भवतीति समीक्षितम्, यथा कथयति 'लिङ्गमपि नामार्थ:, प्रत्ययानां द्योतकत्वात् । अन्यथा वागुपानदादिशब्देभ्य: इयं तव वागिति स्त्री-त्वानापत्ते: । अयमितिव्यवहारविषयत्वं पुंस्त्वम्, इयमिति व्यवहारविषयत्वं स्त्रीत्वम्, इदमितिव्यवहार-विषयत्वं क्लीबत्वमिति विलक्षणं शास्त्रीयं स्त्रीपुंनपुंसकत्वम् । अत एव खट्वाशब्दवाच्यस्य स्तन-केशादिमत्त्वरूपलौकिकस्त्रीत्वाभावेऽपि तद्वाचकाट् टाबादिप्रत्यय: ।'[46]टाबादय: प्रत्यया: स्त्रीत्वे द्योत्ये भवन्ति, अजा, एडका, खट्वादिशब्देषु स्त्रीत्वमजादिप्रकृतेरेव वाच्यो भवति । टाबादिप्रत्ययस्तु तत्र स्त्रीत्वस्य द्योतको भवति, अर्थाल्लिङ्गस्यापि प्रकृत्यर्थत्वात् तदपि नामार्थ: सिध्यतीति भाव: ।

वाक्यपदीये लिङ्गसमुद्देशस्यावतरणे हेलाराज: कथयति 'क्रियाकालपुरुषोपग्रहास्तिङन्तैक-नियता:, लिङ्गं तु नामपदानामधिकं वाच्यम्'[47] लिङ्गं नामपदानामधिकं वाच्यं भवत्यर्थात् 'संख्या-साधने सुबन्ततिङन्तोभयाभिधेये, क्रियाकालपुरुषोपग्रहास्तिङन्तैकनियता वाच्यतया तिङन्तमात्रवर्तिन:,

लिङ्गं तु संख्यासाधनाभ्यां प्रवृत्तिनिमित्ततदाश्रयाभ्याञ्चाधिकं वाच्यम्'[48] भवतीति भाव: । वाक्य-पदीये लिङ्गसमुद्देशे लिङ्गस्य विस्तृतं चिन्तनं प्रस्तुतं भर्तृहरिणा ।

वाक्यपदीयकारो लिङ्गं शब्दसंस्कारमात्रमिति मन्यते यथा लिङ्गसमुद्देशे कारिकाऽस्ति –

**इदं वेयमयं वेति शब्दसंस्कारमात्रकम् ।**
**निमित्तदर्शनादर्थे कैश्चित् सर्वत्र वर्ण्यते ।।**[४९]

कारिकाभिप्रायं विवृण्वन् टीकाकार: कथयति 'इदं वस्तु, इयं व्यक्तिरयमर्थ इति त्रि-लिङ्गानां सर्वत्र वस्तुमात्रे बहिर्निमित्तानपेक्षा प्रवृत्तिर्न व्याहन्यत इति अस्मान्निमित्तदर्शनाच्छब्दान्वा-ख्यानमात्रं लिङ्गमभ्युपगन्तव्यम्'[50]

लिङ्गस्य शब्दसंस्कारात्मकं स्वरूपं भवत्यर्थाल्लिङ्गं शब्दे स्वभावेनैव भवति प्रत्ययादिना च संस्क्रियते द्योत्यत इति भाव: ।

भट्टोजिदीक्षितेन शब्दकौस्तुभे सरूपाणामेकशेष एकविभक्तौ इति सूत्रव्याख्याने लिङ्गविषयो निरूपित:, यथोक्तं तत्र –

'तत्र कश्चिच्छब्द एकस्मिन्नेव लिङ्गे शक्त:, कश्चित्तु द्वयो: कश्चित् त्रिष्विति लिङ्गानुशासनादिभ्यो निर्णयम् ।'[51]

तदेव शब्दे लिङ्गस्य स्वाभाविकी स्थिति: शक्तिश्च भवतीति लिङ्गमपि नामार्थत्वेन स्वीक्रियते ।

चतुष्कमिति पदेन किं ज्ञायत इति प्रश्ने भूषणकार: कथयति 'चतुष्कम् – संख्यासहितं त्रि-कमित्यर्थ:'[52] अर्थाज्जातिव्यक्तिलिङ्गै: साकं संख्याऽपि नामार्थ: भवति । संख्यापेदनात्र एकद्विबहु-वचनानि गृह्यन्ते । संख्याऽपि नाम्नि स्वभावेन भवति । विभक्त्यादिबोधकप्रत्यया विवक्षानुसारं तां संख्यां प्रकाशयन्ति । विभक्तीनां द्योतकत्वात् संख्याऽपि नामार्थ इति सिध्यति, यथा कथयति भूषण-कार: 'प्रत्ययवर्जिते दधि पश्य' इत्यादौ प्रत्ययमजानतोऽपि बोधात् प्रकृतेरेव वाचकत्वं कल्प्यते ।[53]

नागेशभट्टोऽपि संख्याया नामार्थत्वं स्वीकुर्वन् कथयति 'संख्याऽपि नामार्थ: । विभक्तीनां द्योतकत्वात् ।'[54] तत्र प्रमाणमपि प्रस्तुवन् वदति । अत एव 'आदिर्ञिटुडव:' (पा. सू. 1/3/5) इति सूत्रे आदिरिति बहुत्वे एकवचनम् । वाच्यत्वेऽन्वयव्यतिरेकाभ्यां जसं विना नामार्थबहुत्व-प्रतीत्यभावापत्ते: ।[55]

अर्थाद् यद्यपि अन्वयव्यतिरेकाभ्यां विभक्तीनां वाचकत्वपक्षोऽपि स्वीक्रियते किन्तु संख्याबोच्चे तु तासां द्योतकत्वमेव सम्भवति तत्र प्रमाणभूतं सूत्रम् 'आदिर्ञिटुडव:' विद्यते, अत्र अन्वयव्यतिरकाभ्यां तर्हि जसं विना 'आदि:' इत्यत्र बहुवचनप्रतीतिर्न स्यात्, भवति सा प्रतीति: । अतो व्यतिरेकव्यभिचारसत्त्वादत्र संख्याबोधे प्रकृतेरेव संख्यादेर्वाचिकत्वपक्षस्वीकरणात् संख्याऽपि नामार्थ: भवतीति भाव: ।

पञ्चकमित्यनेन किं विवक्षितमिति जिज्ञासायां कथयति भूषणकार: 'पञ्चकम्' कारकसहितं चतुष्कमित्यर्थ: ।[56] अर्थाज्जातिव्यक्तिलिङ्गसंख्यासमन्वितं कारकमपि नामाथा भवति । नागेशभट्टो-

ऽपि कौण्डभट्टमनुसृत्य कारकस्य नामार्थत्वं स्वीकुर्वन् कथयति 'कारकमपि प्रातिपदिकार्थ इति पञ्चकं प्रातिपदिकार्थ:[51] कारकस्य नामार्थत्वमपि प्रत्ययानां द्योतकत्वादेव स्वीक्रियते, यथा नागेश-भट्टो विवृणोति 'नन्वन्वयव्यतिरेकाभ्यां प्रत्ययस्यैव तद्वाच्यमिति चेत्, न । दधि तिष्ठति दधि पश्ये-त्यादौ कर्त्रादिकारकप्रतीति: प्रत्ययं विनापि सिद्धत्वात्। न च लुप्तप्रत्ययस्मरणात्तत्प्रतीतिरिति वाच्यम्, प्रत्ययलोपमजानतोऽपि नामत एव तत्प्रतीति: ।'[58] अर्थात् प्रत्ययादर्शनेऽपि नामशब्दशक्तिकारणात् कर्तृकर्मत्वरूपकारकबोधात् कारकमपि नामार्थत्वेन स्वीक्रियते ।

यद्यपि एते पञ्च नामार्था एकं द्विकं त्रिकमित्यादिकारिकानिर्दिष्टा: स्वीक्रियन्ते तथापि शब्दोऽपि शाब्दबोधे भासते अत: शब्दस्यापि नामार्थत्वमङ्गोक्रियते, यथा एतत्तथ्यं प्रकाशयन् कौण्डभट्टो लिखति 'शब्दस्तावच्छाब्दबोधे' भासते ।

**न सोऽस्ति प्रत्ययो लोके य: शब्दानुगमादृते ।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥ (वा. प.)**

इत्याद्यामियुक्तोक्ते: । विष्णुमुच्चारय । इत्यादावर्थोच्चारणासम्भवेन, विनाशब्दविषयं शाब्द-बोधासङ्गतिश्चेति सोऽपि प्रातिपदिकार्थ: षोढापि क्वचित् प्रातिपदिकार्थ इत्याह -

**शब्दोऽपि यदि भेदेन विवक्षा स्यात् तदा तथा**
**नोचेच्छोत्रादिभि: सिद्धोऽप्यसावर्थोऽवभासते ॥**

यद्यनुकार्यानुकरणयोर्भेदविवक्षा तदा शब्दोऽपि प्रातिपदिकार्थ: । यदि न भेदविवक्षा तदा श्रोत्रादिभिरुपस्थितोऽप्यर्थवद् भासते । अपि हेतौ । उपस्थितत्वाद् भासत इत्यर्थ: ।[59]

अनुकार्यानुकरणयोर्भेदविवक्षायां शब्दोऽपि नामार्थो भवतीति अभिप्राय: ।

नागेशभट्टोऽपि कौण्डभट्टानुसारं शब्दस्यानुकार्यानुकरणस्वरूपप्रतिपादनपूर्वकं तस्य प्राति-पदिकार्थत्वं निरूपितवान्, यथा परमलघुमञ्जूषायां कथयति - 'विशेषणतया शब्दोऽपि शाब्दबोधे भासते । युधिष्ठिर आसीदित्यादौ युधिष्ठिरशब्दवाच्य: कश्चिदासीदिति बोधात् ।'

न सोऽस्ति ........ इत्यभियुक्तोक्ते: ।

**ग्राह्यत्वं गाहकत्वं च द्वे शक्ती तेजसो यथा ।**
**तथैव सर्वशब्दानामेते पृथगवस्थिते ।**
**विषयत्वमनादृत्य शब्दैर्नार्थ: प्रकाश्यते** । इति वाक्यपदीयाच्च ।

अत एव विष्णुमुच्चारयेत्यादावर्थोच्चारणासम्भवाच्छब्दप्रतीति: । अत एवानुकरणेनानुकार्य-प्रतीति: । तथा हि स्वसदृशशब्दमात्रबोधतात्पर्यकोच्चारणविषयकत्वमनुकरणत्वम् । स्वशब्दप्रतिपाद्यत्वे सति शब्दत्वमनुकार्यत्वम् । तत्रानुकार्यादनुकरणं भिद्यत इति तयोर्भेदविवक्षाया मनुकार्यस्वरूपप्राति-पदिकत्वेनार्थवत्त्वात् प्रातिपदिकत्वात् स्वादिविधि: । भेदपक्षज्ञापक: 'भुवो वुग्लुङ्लिटो:' (पा. 6/4/88) इत्यादिनिर्देश: । अनुकार्यादनुकरणमभिन्नमित्यभेदविवक्षायां चार्थवत्त्वाभान्न प्रातिपदिकत्वम्, न वा पदत्वम् । अभेदपक्षज्ञापकस्तु 'भू सत्तायाम्' इत्यादिनिर्देश: प्रातिपदिकत्वपदत्वाभावेऽपि 'भू' इत्यादि साधु भवत्येव ।[60]

तदित्थमनुकार्यानुकरणयोर्भेदविवक्षायां शब्दोऽपि नामार्थत्वेन स्वीक्रियते शब्दतत्त्वज्ञैः । अनेन प्रकारेण शब्दस्यापि नामार्थत्वमङ्गीकृत्य षोढा नामार्थ इत्यपि पक्षः नामार्थनिर्णये शास्त्रसम्मतो विद्यत इति वैयाकरणैः सप्रमाणं संसाध्यत इति शास्त्रपरिशीलनेन ज्ञातुं शक्यते ।

नामार्थविषयका एते सर्वेऽपि पक्षाः मूलरूपेण महाभाष्ये 'कुत्सित' इति सूत्रभाष्ये द्रष्टुं शक्यन्ते यथा तत्र भाष्यकारो निर्दिशति – 'स्वार्थमभिधाय शब्दो निरपेक्षो द्रव्यमाह समवेतम् । समवेते च वचने लिङ्गं वचनं विभक्तिञ्च । अभिधाय तान् विशेषानपेक्षमाणश्च कृत्स्नमात्मानम् । प्रियकुत्सनादिषु पुनः प्रवर्ततेऽसौ विभक्त्यन्तः ।'[61] प्रदीपकारः भाष्याशयं स्पष्टयन् कथयति 'स्व-शब्दोऽत्रात्मीयवचनः, अर्थशब्दोऽभिधेयवचनः । स्वोऽर्थः स्वार्थः, स चानेकप्रकारो जातिगुणक्रिया-सम्बन्धस्वरूपलक्षणः गौः शुक्लः पाचकः राजपुरुषः डित्थ इति । तं स्वार्थमभिधाय तेन स्वार्थेन समवेतं सम्बद्धं द्रव्यमाह शब्दो निरपेक्ष इत्यनेन दर्शयति यथा द्रव्येऽभिधातव्येऽर्थगतं निमित्तान्तरमपेक्ष्यते । 'द्रव्यम्' शब्देन च इदं तदिति परामर्शयोग्यं वस्त्वभिधीयते । तत्र जातिशब्दो यदा जातौ वर्तते तदारोपितस्वरूपां स्वरूपेणैकीकृतां जातिमाहेति तदा तेषां स्वरूपं स्वार्थः, जातिस्तु द्रव्यम् । यदा तु जातिविशिष्टं द्रव्यमाह तदा जातिः स्वार्थः । शुक्लादयो यदा गुणजातौ वर्तन्ते तदा तेषां स्वरूपं स्वार्थः, जातिर्द्रव्यम् । यदा तु गुणे वर्तन्ते तदा गुणसामान्यं स्वार्थः, गुणो द्रव्यम् । यदा द्रव्ये वर्तन्ते तदा गुणः स्वार्थः । समवतस्य द्रव्यस्याभिधाने सति लिङ्गं वचनं विभक्तिञ्चाह सम्बन्धः । तान् विशेषानिति – लिङ्गादीनामेव परामर्शः । लिङ्गं – स्त्रीत्वादि, वचनं संख्या, विभक्तिः कारकं कर्मादि । ......... एतान् विशेषानभिधाय स्वार्थादिपञ्चकवृत्तं कृत्स्नमात्मानम-पेक्षमाणः शब्दः प्रियकुत्सनादिषु विभक्त्यन्तः पुनः प्रवर्तते ।[62]

उपर्युक्तभाष्यप्रदीपादिपर्यालोचनेन स्पष्टतया ज्ञायते यज्जातिव्यक्तिलिङ्गसंख्याकारकादयः स्वार्थाः शब्दे गुणप्रधानभावेन स्वभावेन समवेता भवन्ति । शब्दे च स्वार्थबोधिका शक्तिः स्वभाव-सिद्धा भवति, तेनैव सर्वो लोकव्यवहारः सिद्धो भवति यथा भाष्यकारः निर्दिशति । '**शब्दैरपि शब्दा व्याक्रियन्ते तद्यथा गौरित्युक्ते सर्वे सन्देहा निवर्तन्ते नाश्वो न गर्दभः**'[63] इति । तदित्थं नामार्थविषये येऽपि पक्षा भट्टोजिदीक्षितकौण्डभट्टनागेशभट्टादिभिः स्वस्वग्रन्थेषु विमृष्टाः ते सर्वेऽपि भाष्यादिव्याकरणशास्त्रसम्मताः सन्तीति यथा मूलकारिकायामपि तथ्यमेतत् स्वीकृतं वर्तते –

**'सर्वेऽमी पक्षाः शास्त्रे निरूपिताः ।'**

**सन्दर्भाः**


1. वाक्यपदीयम् 1/124 ।
2. निरुक्तम् 1/1/1 ।
3. निरुक्तम् 1/1/2 ।
4. तत्रैव दुर्गवृत्तिः ।
5. द्र. महाभाष्यपस्पशाह्निकम् ।

6. निरुक्तम् 1/1/1 ।
7. तत्रैव दुर्गवृत्तिः ।
8. निरुक्तम् 1/1/2 ।
9. तत्रैव दुर्गवृत्तिः ।
10. निरुक्तम् 1/1/2 ।
11. तत्रैव दुर्गवृत्तिः ।
12. महाभाष्यम् 5/3/66 ।
13. महाभाष्यम् 5/3/66 ।
14. तत्रैवोद्योतः ।
15. महाभाष्यपस्पशाह्निनोद्योतः ।
16. वैयाकरणभूषणसारः, समासशक्तिनिर्णयः का. 28 ।
17. अष्टाध्यायी 1/2/45 ।
18. शब्दशक्तिप्रकाशिका, नामनिरूपणम्, श्लोकसंख्या 14 ।
19. वैयाकरणभूषणसारः नामार्थनिर्णयः का. 25 ।
20. वै. भू. सा. नामार्थनिर्णयः ।
21. तत्रैव दर्पणटीका ।
22. परमलघुमञ्जूषा, नामार्थनिरूपणम् ।
23. मीमांसादर्शनम् 1/3/33 ।
24. तत्रैव शाबरभाष्यम् ।
25. श्लोकवार्तिकम्, आकृतिवादः श्लोकसंख्या 6, 66 ।
26. वैयाकरणभूषणसारः नामार्थनिर्णयः ।
27. वैयाकरणभूषणसारः नामार्थनिर्णयः ।
28. द्र. प. ल. म. नामार्थनिरूपणम् ।
29. वैयाकरणभूषणसारः नामार्थनिर्णयः ।
30. प. ल. म. नामार्थनिरूपणम् ।
31. महाभाष्यम् 1/2/64 ।
32. महाभाष्यपस्पशाह्निकम् ।
33. महाभाष्यवार्तिकम् 1/2/58 ।
34. महाभाष्यम् 1/2/58 ।
35. महाभाष्यपस्पशाह्निकम् ।
36. वाक्यपदीयम्, जातिसमुद्देशः का. 2 ।
37. तत्रैव प्रकाशव्याख्या ।

38. तत्रैव प्रकाशव्याख्या ।
39. वैयाकरणभूषणसारः नामार्थनिर्णयः ।
40. वैयाकरणभूषणसारः नामार्थनिर्णयः ।
41. अष्टाध्यायी 1/2/47 ।
42. अष्टाध्यायी 7/1/23 ।
43. द्र. महाभाष्यम् 1/2/64 ।
44. द्र. महाभाष्यम् 4/1/3 ।
45. द्र. महाभाष्यम् 4/1/92 ।
46. प. ल. म. नामार्थनिरूपणम् ।
47. वा. प. लिङ्गसमुद्देशावतरणम् ।
48. तत्रैव अम्बाकर्त्री ।
49. वा. प. लिङ्गसमुद्देश का. 30 ।
50. तत्रैव प्रकाशव्याख्या ।
51. शब्दकौस्तुभः 1/2/64 ।
52. वै. भू. सा. नामार्थनिर्णयः ।
53. वै. भू. सा. नामार्थनिर्णयः ।
54. प. ल. म. नामार्थनिरूपणम् ।
55. तत्रैव ।
56. वै. भू. सा. नामार्थनिर्णयः ।
57. प. ल. म. नामार्थनिरूपणम् ।
58. तत्रैव ।
59. वै. भू. सा. नामार्थनिर्णयः ।
60. प. ल. म. नामार्थनिरूपणम् ।
61. महाभाष्यम् 5/3/74 ।
62. तत्रैव प्रदीपः ।
63. महाभाष्यपस्पशाह्निकम् ।

**आचार्यचरः, व्याकरणविभागः,**
**राष्ट्रियसंस्कृतसंस्थानम्,**
**क.जे.सोमैयासंस्कृतविद्यापीठम्,**
**विद्याविहारः, मुम्बई-७७**

★★★

# नैषधे पञ्चनलीसर्गस्य वैशिष्ट्यम्

प्रो. राजन् ई. एम्

**( को न जानाति संस्कृत कविताकामिन्या हर्षं नैषधकारम् । श्लेषः पञ्चमुखोऽपि भवतीति प्रमाणयन्नयं लेखो नैषधस्य, चतुस्त्रिंशं पद्यमाश्रित्य प्रवृत्तः पूर्वं 'नैषधं विद्वदौषधमि'त्यत्र व्याकृतिविद्यां वेदयन् 'पञ्चनली'त्यत्र च समासमुपपादयन् इन्द्रपक्षे, वह्निपक्षे, यमपक्षे, वरुणपक्षे, नलपक्षे च वाग्धेनुं दोहयन्, सर्गस्य पञ्चनलीतिं संज्ञां प्रश्नोत्तरमुखेन संसाधनम् कमपि विशिष्टं व्युत्पत्तिवैभवं तन्तनीतीति अहो ! विदुषां वाचस्पत्यम् ।। - स. )**

निषधस्यायं नैषधो नलमहाराजस्तमवलम्ब्य कृतं काव्यं नैषधम् । इदं विद्वदौषधमिति विदुषां मतम् । विदुषां हितकरं विद्वद्धितकरम् औषधमिति विद्वदौषधम् । शाकपार्थिववत्समासः । तत्र प्रमाणं शाकपार्थिवादीनामुपसंख्यानमुत्तरपदलोपश्चेति वार्तिकम् ।[1] यथा - देवपूजको ब्राह्मणः - देवब्राह्मणः । यथा नीरोगिणो हितकरमौषधमायुर्वेदेऽस्ति । तद्वन्नैषधं विदुषां हितकरमिति भावः । न तु विदुषामौषधमिति षष्ठीतत्पुरुषः संबन्धस्वीकारे गौरवाद्विदुषां वैदुष्यापादने प्रयोजनाभावाच्च । नैषध-कर्ता महाकविः श्रीहर्षः स्वयं वदति यन्मय काव्यं न सामान्यसंस्कृतज्ञवेद्यमिति बहुत्र - यथा -

**ग्रन्थग्रन्थिरिह क्वचित्क्वचिदपि न्यासि प्रयत्नान्मया**
**प्राज्ञम्मन्यमना हठेन पठिती मास्मिन् खलः खेलतु ।**
**श्रद्धाराद्धगुरुश्लथीकृतदृढ ग्रन्थिस्समासदय-**
**स्त्वेनत्काव्यरसोर्मिमज्जनसुख व्यासज्जनं सज्जनः ।।[2]**

यथा - **यूनस्तद्वत्परमरमणीयापि रमणी कुमाराण ।**
**मन्तःकरणहरणं नैव कुरुते ।।**
**मदुक्तिश्चेदन्तर्मदयति सुधीभूय ।**
**सुधिपः किमस्या नाम स्यादरसपुरुषानादरभरैः।।[3]**

नैषधे द्वाविंशतिस्सर्गा उपलभ्यन्ते, यत्र नलवर्णनादि नलदमयन्त्योः क्रीडापर्यन्तकथोपवर्णिता । एतदनन्तरमपि पुराणे नलोपाख्यानमनुवर्तते परं कविना प्रायेण न कृतं स्यात् तत्र प्रमाणं द्वाविंश-सर्गान्तपद्यान्येव । तत्र त्रयोदशस्सर्गो लघीयान् केवलैः षट्पञ्चाशता पद्यैर्विभूषितः । एतस्मिन् पञ्चनली वर्तते । पञ्चानां नलानां समाहारः पञ्चनली[4] । प्रकृतसर्गे दमयन्तीस्वयंवरे समागतान् उप-वर्ण्योपवर्ण्य देवी सरस्वती पञ्चनलरूपधारिणः पुरुषान् उपगच्छति वर्णयति च । तत्रोपस्थिता इन्द्र-वरुणाग्नियमनलाः । सरस्वती एतान् श्लेषेण वर्णयति । तत्र किं वैशिष्ट्यमस्तीत्यत्र प्रतिपाद्यते ।

तत्र चतुस्त्रिंशत्तमपद्येभ्यः प्राक् पद्येषु क्वचिदिन्द्रनलयोः क्वचिदग्निनलयोः क्वचिद्यमनलयोः क्वचिद्वरुणनलयोः विहितन्तत्र प्रवेशो न विधीयते । परमेकस्मिन् चतुस्त्रिंशे पद्ये पञ्चानामपि श्लेषेण वर्णनमस्ति । तत्र किं वैशिष्ट्यमस्तोत्यत्र प्रतिपाद्यते । तत्रेदं पद्यं यथा -

**देवः पतिर्विदुषि नैष धराजगत्या**
**निर्णीयते न किमु न व्रियते भवत्या ।**
**नायं नलः खलु तवातिमहानलाभो**
**यद्येनमुज्झसि वरः कतरः परस्ते ॥**
**अत्र प्रत्येकस्मिन् कथं व्याख्येत्यत्र प्रतिपाद्यते ॥**

अत्र धराजगत्या अतिमहानलाभ इत्युभयत्र इन्द्रादिपक्षे श्लेषेण व्याख्या विधेया ।

**इन्द्रपक्षे**

विदुषि ! एष पुरोवर्ती देवोऽमरः धरा चासौ जगती भूलोकस्तस्य पतिर्न । धरा धरित्री धरणीत्यमरः ।[5] अपि तु इन्द्रः किमु न निर्णीयते काकुबलात् निर्णीयत एव । भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते[6] एवं किमु न क्रियते ।-

धराजगत्य इत्यत्रार्थान्तराणि - धराणां पर्वतानां क्ष्मामृदाहायधरपर्वता इत्यमरः[7] । आजः क्षेपणं तत्र गतिरुपायो वज्रस्तेन कृत्वा (जगत्या इति तृनीयान्तम्) ना पुरुष एषः । अथवा धराजगत्याः वज्रस्य पतिरिन्द्रः । अथवा धरान् पर्वतान् अजतीति क्षिपतीति । धराज इन्द्र एव गतिश्शरणं यस्याः सा प्राची (ऐन्द्री दिक्) दिक्तस्याः पतिरिन्द्रः ।

**इन्द्रो वह्निः पितृपतिः नैरृतो वरुणो मरुत् ।**
**कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात् ॥**

उत्तरार्धं व्याचष्टे - अयमग्रवर्ती न नलः किन्तु नलाभो नलसदृशः कुत अतिमहाऽतिशयितं महस्तेजो यस्य सः । महस्तूत्सवतेजसो इति अमरः ।[8] अथवा नलस्तृणविशेषस्तद्वल्लक्षणया दुर्बलो नास्ति । अथवाऽस्य वरणे महसामुत्सवानामनानां प्राणानाञ्च च लाभो भवति । यद्येनमित्यत्रापि श्लेषः - अस्य विष्णोः इनं स्वामिनं ज्येष्ठत्वात् इन्द्रं यदि त्वम् उज्झसि चेत्, अक्षराणामकारोऽस्मि।[9] अकारो विष्णुरिति स्मरणात्[10] इति लोचनम् । उपेन्द्र इन्द्रावरज[11] इनस्सूर्ये प्रभौ[12] इत्युभयत्रामरः । अथवा एनम् उज्झाति चेत् कतरः केन वायुना तरति प्लवते केन जलेन तीयते शान्तिं प्राप्नोति इति वा कतरोऽग्निस्ते पतिर्भवति । कं वारिणि च मूर्धनि इत्यमरः[13] । एवं देवी सरस्वतीन्द्रं वरीतुं भैमीं प्रेरयति । अथैतान् वरीतुमिति क्रम उच्यते ।

**वह्निः**

धराजगत्या इति पदस्य व्याख्यानम् । धरतीति धरो वाहनं धरश्चासौ अजो मेषश्च धराधिराजः[14] । अथवा धरपर्वत इव अजः पर्वततुल्योऽजः तेन कृत्वा गतिर्धरायाम् अथवा अजेन कृत्वा या

गतिस्तयोपलक्षितः इत्थं भूतलक्षणेति[15] तृतीया । अथवा धरो वाहनमजो यस्य सः धराजो वह्निस्स एव शरणं पतिर्यस्याः सा साऽऽग्नेयी दिक्, तस्याः पतिरग्निः ।

**तृतीयपादार्थः**

अतिमहाऽतितेजस्वी । नलस्याभ इवाभ यस्य सः नलसदृश इति इति यावत्, अत एव नलो न ।

**यमपक्षे**

धराजगत्या इत्यस्य तात्पर्यम् । धरान् पर्वतान् शृङ्गाभ्यां खुरैर्वा अजतीति क्षिपतीति धराजो महिषस्तस्य गत्या तेन वा या गतिस्तयोपलक्षितः पतिः धर्मरूपत्वात् पालयिता देवा यमः । धराजगत्याः दक्षिणदिशः पतिर्यमः ।

**तृतीयपादार्थः**

अतिमहा अतितेजस्वी अयं नलो गहनो नेति काकुः – गहन एव । नल गहन इति धातोः पचाद्यच् । अयं नलो न अतिमहतामनानां प्राणानां लाभो यस्मात्सोऽति – महानलाभो देवा यमः । सर्वेषां प्राणा यमाधीना इति भावः । महः पूजा यस्य सः सचासौ अनलाभः अनलवत्तेजस्वीत्यर्थः । मह पूजायामिति भ्वादिगणधातुः । मह अदन्तोऽपोति मुकुटः[16] कतरो वरो भविता भविष्यति । के जले तरति वा कानि जलानि तरन्त्यस्मिन्निति वा कतरो वरुणः ते वरो भविष्यति, एनं त्यजसि चेत्।

**वरुणपक्षे**

धराजगत्या इति पदस्यार्थः । धराजगत्याः भूलोकस्य पतिर्न, नासौ राजा । अथवा धरायां भूमौ जायन्त इति धराजानि, स्थावरजङ्गमवस्तूनि तेषां जीवनोपायो जलन्तस्य गतिवरुणः । अथवा धरतीति धरो धर्ता जगत इति शेषः स चासावजश्च विष्णुः आदिशेषस्य विष्णोरंशावतारत्वात् जगद्धारकत्वं । तदुक्तं सौन्दर्यलहर्यां'[17] वहत्येनं शौरिः कथमपि सहस्रेण शिरसाम्' इति । अथवा पोषकत्वात् अजो विष्णुः तस्य गतिः प्रथममयनमाधारो जलन्तस्य पतिर्वरुणः । विष्णुर्नारायणो नारः जलमयनं यस्य स इति व्युत्पत्तेः । तृतीयपादार्थः अतिमहस्यातिपूज्यस्यानलस्याभेवाभा यस्य सः ।

**नलपक्षे**

नैषधराजस्य निषधदेशसंबन्धिनो राज्ञः निषधदेशोद्भवानां लोकानां राज्ञो वा गत्या ज्ञानेन कृत्वा पतिस्स्वामी, गतेः ज्ञानार्थकत्वं प्रसिद्धम् । धराजगत्याः भूलोकस्य ना नरो पतिः राजा। नैषधराज एव गतिर्यस्याः सा, अर्थान्नैषधराजगत्या त्वया मनुष्योऽयं नलो राजा पतिः भर्ता । अथवैष धराजगत्याः भूलोकस्यातिसौन्दर्यादजो कामः अजो हरे हरौ कामे[18] इति गत्या बुद्ध्याः । धरायां जायन्त इति धराजाः मनुष्यास्तेषां गत्या प्रकारेण मानुषचिह्नेन निमेषादिनैष देवो न । तृतीयपादार्थः – अतिमहान्

अस्य विष्णोः लाभः अतिमहानलाभः ना विष्णुः पृथिवीपतिश्चेति स्मरणात् । नलस्य विष्णुत्वं ग्राह्यम् । अथवाऽतिमहतोऽनस्य प्राणस्य लाभः ।

नन्वत्र पञ्चनलीति सर्गस्य संज्ञा कथं सङ्गच्छते, एकस्यैव नलस्य सद्भावात् । अत्रोच्यते- दमयन्त्यां पञ्चस्वपि नलत्वबुद्धिरविद्यावशाज्जायते । अत एव दमयन्त्याह -

**किं वा तनोति मयि नैषध एव काय-**
**व्यूहं विधाय परिहासमसौ विलासी ॥**
**विज्ञानवैभवभृतः किमु तस्य विद्या-**
**सा विद्यते न तुरगाशय वेदितेव ॥**[१९]

नानाविधैः व्युत्पत्तिप्रदविषयैः परिपूर्णं नैषधं तथापि त्रयोदशस्सर्गः श्लेष इति एतस्य सर्गस्य सर्गान्तरापेक्षया वैशिष्ट्यम् । अत एव व्युत्पित्सूनामुपकारायालिखम् ॥

**सन्दर्भाः**


1. क्तेन नञ्विशिष्टेनानञ् (अ.सू.2-1-60) इति सूत्रस्थम् ।
2. नैष. 22/152 ।
3. नैष. 22/150 ।
4. संख्यापूर्वो द्विगुः (अ. सू. 2/1/52) ।
अकारान्तोत्तरपदो द्विगुः स्त्रियाम् (वार्तिकम् - द्विगोः) इति सूत्रसंबन्धि, द्विगोः (अ. सू. 4-1-21)।
5. अ. को. 2/1/2 ।
6. सा. द. ।
7. अ. को. 2/3/1 ।
8. अ. का. 3/3/231 ।
9. भग. गीता. 2-10/33 ।
10. ध्व.ला. पृ. 234 ।
11. अ. को. 1/1/20 ।
12. अ. को. 3/3/111 ।
13. अ. को. 3/4/240 ।
14. अग्नेर्वाहनमज इति प्रसिद्धिः अग्निपुराणे पृ. सं. 41 पुराणिक एन्सैक्लोपीडिया - पृ. सं. 21 ।
15. अष्ट. सू. 2/3/21 ।
16. अ. को. 3/3/232 टिप्पणी पृ. 438 ।
17. सौ.ल. 02 ।

18. अ. को. 3/3/30 टिप्पणी ।

19. नैष. 13/43 ।

**ग्रन्थसूची**


1. अष्टाध्यायी सूत्रपाठः ।
2. अमरकोशः ।
3. नैषधम् ।
4. भगवद्गीता ।
5. साहित्यदर्पणः ।
6. सौन्दर्यलहरी ।
7. ध्वन्यालोकः ।



**साहित्यविभागः,**
**राष्ट्रियसंस्कृतसंस्थानम्,**
**गुरूवायूर् परिसरः**
**त्रिचुरः, केरलम्**


★★★

# CURIOSITY : A SOURCE OF RESEARCH

✍Prof. D. N. Pandeya

**( Curiosity is an important trait of a genious and indeed, a source of research as rightly said by Prof. Pandey is this paper. It is a natural feature of the human mind that leads intellect to deep into the matter and to acquire new knowledge. it makes our mind active and observant of new ideas. Here, in this chapter, Prof. Pandey has deliberately made his attempts to propose the research curiosity defined by the Vedic and Post Vedic lit.- Ed. )**

Curiosity is a natural feature of mind which motivates human beings to go in to deep of the matter to find its basic structural ground. This very curiosity is a type of an intent that leads human intellect to understand the natural but unnoticed substance which strikes the mind of an aspirant. This curiosity exists in every creature but most fortunate are human beings who have power to express this in refined and defined words. Curiosity flows into various streams of thoughts coming out from the knowledge faculty of human mind. Sometimes it becomes suppressed by the strong opposite emotional elements standing nearby somewhere in mind and sometimes it stands firmly in the shed of strong intuitive faculty of brain that sees the matter as a new star of light to reflect new world. These all activities of curiosity work on the matters and subjects brought to the **critical wave** of mind by all senses and organs. It is all truth that Nature alone is an eternal store house of all thoughts. It is the curiosity that discovers the multi angled areas of exploration in the house of Nature. Although there are so many reasons assumed by the scholars belonging to different disciplines of study for research propensity but the modern scholars of research methodoloty, who have borrowed their theory of research mechanism or it would be better to say that they are not capable to find out the elements of **research curiosity** defined in the Vedic literature and classical Sanscrit literature. The reason behind this ignorance is of their incapability of proper comprehension of the Sanskrit language, self made image of Sanskrit in the terms of non productive orthodoxy and out dated subjects of the Sanskrit literature or the blind support of the existing theories of the research methodoloty fabricated by some so-called stall wart scholars of the day. Whatever it may be but today this subject seems worthy to mention that accordance with change of time and pace of progress of society the skill of the quest of anything evolves with new vibration. This vibration inkles to see the real state of inquisitive mind in the light of our traditional **knowledge books of the Veda** and the classical

Sanskrit literature that includes Indian philosophical schools and when this is done in this matter we find that first of all our Vedic seers come fore to lead the perfect and straight way of research methodology that rises from the core of inside body nearer to perfect soul. For this purpose the scaling, limitation, and imaginative intelligence part of mind to run after the defined problem of research are necessary to be examined. It means these all elements shown above are being conditioned by received knowledge of the concerning subject. For that purpose also as our Indian past seers of the Vedas and scriptures drop indication that the spiritual practice and the deliberative force of educated mind may be an instrument of sure result giving. To develop it, our Vedic literature instructs an asprirant of research work to make his mind most productive through the practice of meditation. Meditation brings calmness to mind and also it successfully washes out unproductive and lingering negativity stored in, of human mind. The obstacle, that block natural instinct of inquisitive mind, once washed out-the natural light of individual soul moves towards its researching subject and turns its way as per the signal of research mechanism. When we apply our mind to an infant to show him moon-the other useless stuff or common natural substances-such as the top portion of a tree and the like that come in his sight shot we make them just as magnet rout or circuit to steer up the vision of the infant to send it out to the targeted orbit of the moon and ultimately he sees the moon and smiles. The same technique of research is deliberated in the **Upanishadic** literature. For instance the **chandogyopanishad** of the Samveda branch shedding light on meditation says- स यो ध्यानं ब्रह्मेत्युपास्ते यावद्ध्यानस्य गतं तत्रास्य यथा कामचारो भवति (7,6) It means an appropriate and rightly practiced meditation itself makes appearance of Supreme soul available for an aspirant as we find mentioned in **vyas bhasya** of **Patanjal yoga sootra** in the terms of योग: समाधि: - to mean **yoga** itself may be called-**Spiritual Absorption.** Here it denotes that meditation is a complete and right track to have the glimpse of self that exists in each human beings. The constructive role and contribution of **Yoga,** are for having the bliss of Brahma, that also proves the intuitive process of research methodology hinted by the **upanishadic** teachings. It directs us to understand that mind, intellect and super ego or deciding faculty of mind make room for intuition to have the unseen substance searched out. Now the inquisitive mind's process and the mutual relation of these three (mind, intellect and ego) that work together are taken here in, in account for delineation. Our Vedic literature teaches us very clearly that super is the mind that thinks to do negative or positive works to make fulfilled the internal projected works of human beings. Our Vedic seers and the consummate religious teachers of the past, who lived their whole life very peacefully in Nature's inn that was secluded place of woods studied the art of understanding the voice of Nature, the wave signal of wind and the code words of Nature coming out from the

unseen world through trees, forest and through the healthy breeze and soft sound of the currents of constant flowing of rivers. This all skill developed by them through Nature's lesions of yoga made them ideal masters of practical philosophy-a prime source of all science, what we call to-day by the name of Natural science. Though this technique or skill of new findings to day may face bad criticism but the fact is that this is the main way of the structuring of the inquisitive and creative mind needed for our youth of research society. This is the indigenous research device not only for the Sanskrit scholars but for all aspirants of the science and technology of India, to bring about the specific but reaction less scientific researches for real prosperity of world society. If this type of research mechanism is developed the researchers will be qualified to judge the bad impact of findings during the period of research through intuition. This has been clarified by Acharya Patanjali in his treaty-Yoga Sootra as- **यथाभिमतध्यानद्वा १/३९ परमाणुपरममहत्वान्तोस्य- वशीकारः १/४० it means as says revered sage Vyaas यथाभिमतध्यानाद्वा । यदेवभिमतं तदेव ध्यायेत् । तत्र लब्धस्थितिकमन्यत्रापि स्थितिपदं लभत इति।**

**परमाणुपरममहत्त्वान्तोस्य वशीकारः । सूक्ष्मे निविशमानस्य परात्परमाण्वन्तं स्थितिपदं लभत इति । स्थूले निविशमानस्य परममहत्वान्तं स्थितिपदं चित्तस्य । एवं तामुभयीं कोटिमनुधावतो योस्याप्रतीघातः स परो वशीकारस्तद्वशीकारात्परिपूर्णं योगिनश्चित्तं च पुनरभ्यासकृतं परिकर्मापेक्षत इति ।**

**IT means, as translates Bangalibaba 'The Yogi should meditate upon whatever may be his choice'.**

**The mind, attaining steadiness there, attains the position of steadiness in other places also.**

**The (Yogi's) mind, entering into the subtle, attains the position of steadiness in to the last extremity of the minutest of minutes. When entering into the gross, the position of the steadiness into the last extremity of the highest expansiveness comes to his mind. Thus this irresistible power following both these extremities, is the highest control. The Yogi's mind entirely full of that Control, does not depend any more upon other embellishments produced by practice.**

**Though** the first approach of the aphorisms applies to the Yogis- involved in spiritual practices but the suggestive signals of the purprt of these aphorisms coming out of the commentary of the great **Vyas,** is enough to understand its use for research work's technique.

Though today majority of scholars belonging to psycho-religious schools and world philosophers more or less embrace the theory of curiosity to proceed towards the research field, but ours scriptures of the most antiquarian class have been expressing the thing some differently due to their close connectivity with spiritual or Natural truth. The Indian scriptures

though have given, the real feature of mind and intellect, but today we fail to understand that and consequently it seems not applicable to the Modern research process in practice. To have this mechanism, in fact, we have to practice the spiritual business of mind to recognize the thing so far has not come to mundane affairs of research work. Thoug, it is easier to pass it over than to feel its potency for a common aspirant of research that influences his inquisitive block of mind that leads him to the qualitative approach of the research works. In my view today our great thinkers belonging to science, technology and the arts faculty directly or indirectly believe in super natural force of creative activities and discovery. It is other thing that they, in public give credit to extrinsic environmental condition in matter of research work. To some extent it may be true but the concept of genes, the concept of God particle and the concept of life related with soul principle, are ample factors that give grounds us to retrieve the metaphysical factors of research.

**Philosophical seed coat of the curiosity-**

**Curiosity** is a natural operating instinct that comes from the nature or Supreme Being. It is here noticeable that Nature or in the theistic language of the Upanishadic literature the creation comes first from the supreme soul or Brahma. Then it comes that its subtle property of creative factors also sifts into human beings from that of soul as well as it penetrates its vast vista in other Nature's substances for the further development and spreading of a few created things. Because of that central energy, in the viewpoint of scientists is developed variously according to the scientific process of Nature. It ultimately happens under the topological structure and time specified point of the changing system of energy. It is very easy to comprehend. For instance when flood comes and its natural flux keeps the water to one extent clean. This is happens under a point of meteorological time limits. Here wind, sunlight and the topological under a point of meteorological time limits. Here wind, sunlight and the topological structure of the land somewhat are responsible to keep the flowing water clean. But the same thing when gets changed the water becomes stagnant that becomes deformed and polluted under the same organic status of climate. Here chemistry of the climate becomes reactive that makes the same water out of use or makes it useful in different way. As a Nepali poet says- बहदो पानी निर्मल हुंछ, बांध वधाए गन्दा हंछ to mean-the flowing water remains purified while the stored water becomes impure. In both cases the rainy water may be supposed as development of the energy of water.

This is the case also applicable to the creative system of the Nature or Supreme soul. The seed of curiosity we find first in the supremebeing and that very seminal element becomes the part and parcel of human beings also. By that way even the curiosity of supreme soul or Nature finds amplification and growth. Now the curiosity of supreme soul comes to be developed into the

forms of various curiosities of Human beings. For instance we can observe scientifically the concept of genesis depicted in **Brihadaranyakopanishad,** as such- स वै नैव रेमे, तस्मादेकाकी न रमते । स द्वितियमैच्छत् ।(1,4,3) here the word, ऐच्छत् = Desired or intended (or Prajapati was curious) to know the way how to expand himself into another form. He was wistful to find himself created and was curious to know the way to make himself multiplied that ultimately brings to light the method for the same. Here it is noticeable that this is the curiosity by which **Prajapati** developed the method of discovery of the world creation and development of the world into many fold. This very impression further developed in human beings also to explore the existing substance through the metaphysical research mechanism that is counted today a superstitious hypothesis by many a thinker in the field of research methodology. But in our Indian culture scientific research potency is very authentic and fruitful that needs proper way of practice of Yoga in terms of concentration, mediation and deliberation.

Because of that trinity of indigenous research methodology of India our fore fathers could develop so many scientific disciplines in the forms of Indian philosophies and other allied sciences in Sanskrit language. If the Vedic seer says that sun moves always alone then it shows that the sun is the first light of wisdom that reflects all things. This is also an example of the curiosity of our ancient seers. Debating on the conjectural matters of the Nature they adopted the way of austere penance and austere practice of Yoga. Because of that the seers of the Vedic literature are called the on lookers of the Vedic Mantras in which all the substances of Nature and Universe are stored. The word Mantra used conventionally for the Vedic cryptic stanzas are very significant for understanding the analytical wit of the Vedic seers. Swami Karpatri ji says 'ऋषीणां नितिशयमननव्यापारफलं मन्त्राः' that menas the Vedic Mantras are the resultant fruit of the mental exercise of the Seers. But it is here not to be confused about the eternity of the Vedic Mantras. Here ¨ÉxÉxÉ means experimental exercise of the Received Vedic Mantras by the seers to bring the research mechanisms of the Vedic Mantras to light. Here it is noticeable that the **system theory** that has been a new paradigm in the field of scientific research stands with the cardinal ideology of the word-Mantra apart from its religious and liturgical phenomenon. The liturgical science is for the experimental study of the **vedic** literature that denotes the height of research mechanism developed by our ancient seers.

**Progenitors of curiosity-**

It has been mentioned above that the curiosity is a natural exercise of the intellect that arises in appropriate condition. But **न तज्चलति कर्हिचित् that** suggests the comprehensive study of the Veda. It is worthy to mention that the

simple study of the Vedas prepares mere a road map of curiosity to know something more from received crude materials. Until the engagement of the mind and heart and inquisitive faculty of the brain in the subjective and objective analysis the curiosity finds no occasion to show the positive outcome. Hence to keep these factors of mind intact and united the following points are worthy attention.

**Perfection in subject knowledge-**

Perfection in subject knowledge means here grasping the basic sense and its variation in the light of exposition. The Sanskrit subject that has been streamed out multi dimensionally touches, near about all wings of literary aspect and human life system, today has been a typical subject of studies that need its full comprehension on the ground of the study of other subjects associated with it. The perfection of subjective knowledge is a very systemic process of study that draws attention of the students or aspirants their related subject. Perfection of knowledge is deeply rooted in systematic way of study and the system of practice of the subject of discipline.

People generally ignore the system of study depicted in our Shastra. For instance the **शिक्षा** manuals of the Vedas and the other associated books on moral conducts throw profuse light on this matter. There are prescribed rules of daily routine that boosts the grasping power of the students. Another thing is that a particular subject is found interlinked with other subject also. **वैशेष्यात्तद्वादस्तद्वाद:** is a popular maxim which indirectly suggests that though the all gross elements or **पञ्चभूता** are partly connected with each other but maximum quantity of their causes their particular identity, addressed by particular names. Such is the case of a sincere study applicable to the specific subject. Today our students hardly understand this important clue of the receiving subjective knowledge. For instance a Vedic student hardly pays attention on the etymological and grammatical awareness, consequently, he fails to understand the real approach of a Vedic Mantra. In the same way a student of Sanskrit Grammar ignore the Vedic word formation technique depicted in **Pratishakhyas** and the other Vedic etymological learning.

**Practice for getting embedded the received subjective knowledge**

The 2nd factor of the perfect knowledge is an art of study that embeds the received knowledge in one's heart. Generally class teaching of today helps no students much in this crucial mission of grasping attitude. We know that variety mechanism of grasping subject. Today this is not minutely considered. For instance the semester system running today has been a common obligatory rule that brings not the expected result in the arts subject. Especially for the Sanskrit literature it is not useful. The Sanskrit literature

needs three stages of study that has been indicated by **Acharya Yaska** in his **Nirukta** in the context of the Vedic studies. For more clearance some Sanskrit manuals are necessarily to have been taken by heart by the students, such as Sanskrit lexicon and the like.

**Good Narrative skill**

**Good narrative skill** derives from critical power of the deliberative faculty of mind developed through careful observation of the subject received through regular study. The Narrative skill stands with the enlightened subjective understanding that blossoms automatically to flash out the new findings. The process and sequence of that of Narrative skill has been termed as ज्ञानाधीना इच्छा, इच्छाधीना क्रिया सर्वा, क्रियाधीनं फलमुच्यतो It means the soul, associated with received knowledge generates a desire to find something a new light of knowledge to enjoy a new phenomena from the inhered knowledge. Then to know the process for the same mind travels further more on its circuit getting the assistance of device available nearby and then activities (mental and physical, in the field of science and technology the experimental business starts to see the action nand reaction of the substance taken for study). When this process is fully furnished with facts, the tasting of outcome in the terms of fact found, starts to bring to light it as an authentic idea or perception. Here it is notable that this is the Narrative process of mind that flashes in upgraded mind subjectively. This is the thing that has been reflected by **Mahabharat** as it reads- ज्ञानविज्ञानमास्तिक्यं ब्रह्मकर्मस्वभावजम् । विज्ञानं यज्ञादिकर्मकौशलम् । That leads us towards the new phenomenon of the scientific Narrative skill beyond the perceptive knowledge of Dharma.

Here the stanza of **Mundakopanishad** discloses the theory of good Narrative skill associated with the curiosity for invention and discovery that reads thus-

**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।**
**तयोरन्यः पिप्पलंस्वाद्वत्तयनश्नन्नान्यो अभिचाकशीति ॥ ( ३.१ )**

Translating it **Mr. ROBERT ERNEST HUME** says-

**Two birds fast bound companions,**
**Clasp close the self-same tree.**
**Of these two, the one eats sweet fruit;**
**The other looks on without eating.**

Though the Mantra of the Rigveda mentioned in Mundakopanishad, reveals the metaphysical height to teach illusive business of the material life and the way out of that but also it, in our synthesis of the research methodology reveals the keen sight of a deliberate researcher to see the matter with a particular angle of research. For more clearance it is here noticeable that the bird who has been shown uninterested in eating the fruit

stands as a great wisdom bearing individual soul and is wistful to know the fact of the material fruit that is transitory. He thinks if it (the eating fruit) is the permanent satiation of hunger? Here hunger means the material enjoyment that, in view of Veda, Upanishad, Geeta and Indian philosophies based on the **Prasthantrayi** = trinity of (philosophical journey) is a like the fetter to bind human beings with the impermanent or transitory material world. The first bird who eats fruit represent the illusive world's creatures who have no sense of spiritual fact of life and satiates his sensual needs, while his counterpart bird represent a community of spiritually perfect human beings who knows the result of the material enjoyment.

He stands for the finding out the reason of it that binds us with the material enjoyment though transitory. This may be called the practice of narrative skill by which he is qualified to discover the philosophical truth in order to show way out of agony. The form of this Narrative process tought in the great Geeta as such

**यथोल्बेनावृतोगर्भस्तथातेनेदमावृतम् ।**
**आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।**
**कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥ ( ३, ३८-३९ )**

Translating and commenting upon the stanza says श्रीधराचार्य –

इदं विवकज्ञानतेतेनावृतमज्ञस्य कलु भागसमये काम:सुखहेतुरेव परिणामे तु वैरितां प्रतिपद्यते, ज्ञानिन: पुनस्तत्काले मरणानर्थानुसन्धानाद्दुखहेतुरेवेतिनियवरिणेत्युक्तम् । it means knowledge becomes convered by the illusion hence rises not the deliberation in human mind. It denotes that in the wanting of accomplishment in subject the creatinve power does not arise and in this case the narrative skill stays in silent mode. Hence it comes that to have the narrative skill for a good research work in the want of proper meditation and deep thought the qualitative finding and the permanent solution of the problem as has been depicted in Samkhya could not be expected. Skill development is an art assisted by metaphysical exercise. Therefore the skill development also depends on the deep sense of study and metaphisycal practices. The modern research trend in India is not as couducive as we need. The another stanza of the Geeta clarifies that, attempt to find new thing fails not if properly initiated as it reads-

नेहाभिक्रमनाशोस्ति प्रत्यवायो न विद्यते ।
**स्वल्पमप्यस्यधर्मस्य त्रायते महतो भयात् ॥२,४० ॥**
**व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ।**
**बहुशाखाह्यनन्ताश्च बुद्धयोव्यवसायिनाम् ॥२,४१॥**

Translating the stanza says Swamiswaroopananda-

In this, there is no waste of the unfinished attempt, nor is there production of contrary results. Every very little of the Dharma protects from the great terror.40

In this, O scion of Kuru, there is but a single pointed determination. The purposes of the undecided are innumerable and many branching.41

Though these mottoes of the Geeta in fact reflect some grave spiritual terse but its significant sense travels variously and in this way also it may be taken as a theory of narrative skill that helps in research work being connected with curiosity. For more clearance these stanzas are indirectly encouraging for the research scholars to do their sincere effort to find a fresh finding by the help of spirituality.

The purport is that though, through the modern mechanism of the research, the qualitative research may be produced but the Indian technique of the research depicted in our scripture based on metaphysics would be more lucrative and reaction less.

There for it is concluded here that in the field of research work curiosity developed through received subjective knowledge, meditation, concentration and narrative skill pays a significant role in the arising sun of research.

**Place of curiosity in Sanskrit literature**

From vedic literary stock, up to the classical Sanskrit corpus have emerged out from curiosity of the great Vedic seers and the posterior Sanskrit poets of higher rank. Here the higher rank quality of poets means the merits and deep deliberating and understanding mental power of the consummate poets of the Vedic literature and the classical Sanskrit literature. As we know that Indian literary tradition shows ample examples of that curiosity. Especially our Indian philosophies starts their voyage from multifarious diversions of curiosity. As we see that the mosrt of the Indian philosophical schools talk about CURIOSITY in the terms of JIGNYASA=desire to know something special inherent property of substance moving around us. A few instances are laid down here under-

1. The **Sankhya karika** is a compendium on the oldest **sankhya** treaty that starts from curiosity such as-

दुखत्रयाभिघातज्जिज्ञासा तदपघातक होतौ ।

दृष्टासापारथाचेन्नैकान्तात्यन्ततोभावात् ।

DUKHATRAYABHIGHATJJIGNYASA TADAPAHGHATAKEHETAU
DRISHTAA SAAPARTHAACHENNAIKANTAATYANTATOBHAVAT

Translating the stanza most revered Dr. Ganganath Jhaa sayas-

There being (in the world) on impediment caused by the three kinds of pain (there arises) a desire for enquiry in to the means of alleviating them and if (it be urged that) the enquiry is superfluous on

account of (the existence of) obvious means, -- we reply that it is) not so; because these (latter) are neither absolute nor final.

Here it is remarkable that the curiosity turns its rout when falls in material delivering of tragedy or pain arises. At that time it takes the form of desire differing from the natural curiosity of feeling like streak of the natural scene. So here DUKHATRAYABHIGHATAJJIGNYASA-has been mentioned. This very special type of curiosity frames map road for the detailed study of the Indian Philosophy-nearer to the study of Natures activities. Another important thing here is to realize that the Upanishads are the main source of Indian philosophies, so the discussion on the very point of the role of mind and speech regarding metaphysics there in sheds light on the Nature's philosophy of Sankhya.

The metaphysical and epistemological phenomena of the Upanishads are the main current of the grounds of the Indian philosophies. Hence the human psychology on the height which we see today is also a branch of Upanishadic metaphysics. In the eyes of the seers of the Upanishads psychology, metaphysics and logic are very closely connected internally. Why do we say 1+1=2, and 1-1=0 are the sum up-are also the subject of curious mind that may be calculated by the contextual circuit of human mind in the light of metaphysical pregnant remarks of the upnishds only. this all thing has been pointed out by the sentence एकान्तात्यन्ततोभावात् । it also suggests that all calculation based on the modern scientific or mathematical aphorisms are neither permanent nor final. The Samkhya Sootra's commentary also reveals the same view thus **अथ जगदुद्दिधीषुर्महामुनिः कपिलः फलसौन्दर्यज्ञानस्यफलेच्छाद्वारा साधनप्रवृत्तौकारणत्वम्प- श्यन्फलसा- न्य्रमाह** – rending this passage, the commentator J. R. Ballantyne says-"well, the great says, Kapila desirous of raising the world [from the Slough of Despond in which he found it sunk], perceiving that the knowledge of the excellence of any fruit, through the desire [which this excites] for the fruit, is a cause of people's betaking themselves to the means [adopted to the attainment of the fruit], declares [as follows] the excellence of the fruit [which he would urge our striving to obtain]:

Therefore it comes that the curiosity is a main source of all research work. The word- जिज्ञासत in Sanskrit also drops the same hint being in the state of Aatmanepada.

2. Meemansa Sootra-Meemansa Sootras of the sage Jaimini is a most valuable book on the treaty of Indian epistemology. After getting a great toil of Vedic study by the past seers, in which all things related to domestic life routine (described by the Dharmshastra in detail) Vedic

rites' utility is established as a treaty of practical philosophy by the jaiminy. The main subject of the Meemansa is Dharma. Dharma is a multi semantic word but as an Indian philosophical school it is fixed as the practical life philosophy of human beings and gives direction to our time immemorial Indian cultural heritage. This is the philosophy that, in my view, gives an eternal link of the business of spiritual knowledge with the business of human life system.

It also protects the view poit of the Vedas and its each word's significance. Hence it lays down the first aphorism thus **अथातो धर्मजिज्ञासा** = Now, after the detail study of the Vedas the concept of Yajna = Vedic rituals and dharma existing in Vedic literature comes to the human mind to know in detail. This desire or curiosity propels mind to figure out the real image of Dharma. It is here worthy to mention that even curiosity of Dharma is also examined-that whether this type of curiosity if meaningful or futile? Today instead of criticizing the Dharma we should follow the idea of dharma given by our sages and prophets, because the points against Dharma are raised today in our society-have been already discussed and examined properly by the past seers and prophets and ultimately they found its utility lucrative out come for society. But here the main thing is to see the seminal strong hold of curiosity in the discovery of the great idea of Dharma. Dharma streams out mainly in to three channels to keep the world on right track and that are-Brahma=to know the Supreme Soul, to know the Jeva=individual soul and its relation with Brahma and world and thirdly to know the right nature of world. These all elements are studied by the Vedant Philosophy.

**3. Brahmasootra-**

Brahmasootra of Badarayana also intends to start out its mission of philosophical study from the same very seminal treaty of Jignasa=curiosity or desire to have something about Brahma what is not described systematically ye by the Meemansaphilosophy. It is very significant to note that the **Vedant** philosophy also goes ahead with the same torch to clear the way of Brahma. It rejects not the suit of Meemansa or purva meemansa philosophy initially, hence it prescribes the study of Vedic literature for the admission or initiation in to the Vedant philosophy. The scholars of the Vedant philosophy knows the obligatory value of the Vedas ant their ritual subjects. Also it is true that karma and jnan both are equally important for the human beings. The moral conducts prescribed in Dharmashastra for human beings pave the proper way to emancipation through the practice of Vedantic elements. Lt it be so, here main purpose of all this is mere to prove that Even the Vedant philosophy accepts the main role of Jignasa for the

study and practice of the Vedant philosophy. As it mentions **अथातोधार्मजिज्ञासा.** Commentary of Sankar takes it as- **यथाजिज्ञासापूर्वत्तं वेदाध्ययनं नियमेनापेक्षत एवं ब्रह्मजिज्ञासापि यत्पूर्ववृत्तं नियमेनापेक्षत तद्वक्तव्यम् । (शांकर भाष्यम्).** Hence it is here remarkable that here also in Brahmsootra to find out the existence of Supreme Soul in first hand rising of curiosity is essential in aspirant of the Vedant Philosophy.

It is here worthy to draw the attention of readers that the main building of research is erected on curiosity which develops logic and other mechanism in research work. The Arth Sangrah of Laugakshibhaskar indicates the process of research in the light of curiosity as such- **किं भावयेत्, केन भावयेत्, कथं भावयेत्.** It means if once curiosity arises it generates triplet of logic, device or means and process indicated by the Artha Sangrah. This triplet of research mechanism develops in to various methods of research.

There are so many instances of the curiosity in the Sanskrit literature but here a few only have been presented to avoid prolixity.

**Head,**
**Vedic-Studies,**
**S.S.S. University,**
**Veraval-Gujarat**

❖❖❖

# 'कर्त्तुरीप्सित०' सत्रशास्त्रार्थः

✍प्रो. बोधकुमारझाः

**( शास्त्रस्य योगाय क्षेमाय च शास्त्रार्थपरम्परा भारतेऽतीव प्राचीना वर्त्तते । व्याकरणन्यायमीमांसावेदान्तादिशास्त्रेषु शास्त्रान्तरेण, स्वस्मिंश्चाद्यापि भवतु नामाल्पतयैव, परं तदसौ शास्त्रार्थः तत्र विलोक्यते । अत्राल्पताहेतुः विजिगीषाभावः । भावेना नेनैव शैथिल्यं प्राप्तेयं परम्परा । व्याकरणे वाग्देवतावताराणां शिवकुमारशास्त्रिणां तेषामन्तेवासिनां च समये शास्त्रार्थपरम्परा प्रौढतां प्राप्ताऽऽसीत् । बहवः शास्त्रार्थरत्नावल्यादयोऽपि ग्रन्थाः परम्परारक्षायै तदानीं, ततः परञ्च लिखिताः । किन्तु साम्प्रतं विदुषां लेखनप्रवृत्तिरस्यां दिशि नास्ति । समयानुरूपं शास्त्रार्थसरणौ किञ्चित्परिवर्त्तय संवादशैल्या शास्त्रोपस्थापनाय प्रवृत्तः एष शास्त्रार्थलेखो नूनमादरणीयः प्रेरणाकारकश्च । अस्मिन् एकोनपञ्चाशत् ( ४९ ) कोटयः सन्ति ॥ - स. )**

**प्रस्तावना -**

'कर्त्तुः' 'ईप्सिततमं' 'कर्म्म' इति पदत्रयात्मकमिदं सूत्रम् । तत्र घटितज्ञाने घटकज्ञानस्य कारणत्वात् सूत्रार्थज्ञानाय तत्पदार्थज्ञानमावश्यकम् । फलाश्रयः कर्म्म, व्यापाराश्रयश्च कर्त्तेत्युच्यते । फलत्वञ्च व्याकरणशास्त्रे तद्धात्वर्थजन्यत्वे सति तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारता- वत्तवम्। यथा - 'तण्डुलं पचती'त्यत्र पच्धात्वर्थविक्लित्तौ पच्धात्वर्थफूत्कारादिव्यापारजन्यत्वम्, अथ च पच्धात्वर्थफूत्कारादिव्यापारनिष्ठविशेष्यतानिरूपितप्रकारतावत्त्वञ्च अस्तीति विक्लित्तेः फलत्वम् । तत्र 'पत्लृ' इत्यादिधातोः विभागजन्यसंयोगादिरूपे धात्वर्थे स्वीकृते सति विभागे फलातिप्रसङ्गवारणाय लक्षणे विशेषणदलम् । एवमेव संयोगे फलातिव्याप्तिवारणाय लक्षणे विशेष्यदलम् । तथाहि संयोगस्य विभागस्य च फलत्वाभावात् 'वृक्षात् पत्रं भूमौ पतति' इत्यत्र विभा रूपफलाश्रयत्वाद् वृक्षस्य, संयोगरूपफलाश्रयत्वाच्च भूमेः न कर्म्मत्वम् । व्यापारत्वञ्च धात्वर्थफलजनकत्वे सति धातुवाच्यत्वम्। पचतीत्यादौ विक्लित्त्यादि धात्वर्थफलजनकत्वाद् धातुवाच्यत्वाच्च फूत्कारादेः व्यापारत्वम् । तत्र 'धातुवाच्यत्वम्' इत्येतावन्मात्रोक्तौ विक्लित्त्यादिफलस्यापि धातुवाच्यत्वाद् व्यापारत्व प्रसङ्गः, अतो धात्वर्थफलजनकत्वे सतीत्यन्तं विशेषणदलम् । धात्वर्थफलजनकत्वमित्येतावन्मात्रमित्युक्तौ 'काष्ठैस्तण्डुलं पचती'त्यादौ काष्ठतण्डुलादिगतक्रियाणां प्रज्वलनावयवमार्दवादीनामपि धात्वर्थफलविक्लित्तिजनकत्वात् व्यापारत्वप्रसङ्गात् व्यापाराश्रयस्य काष्ठतण्डुलादेः कर्त्तृत्वापत्तिः, अतो धातुवाच्यत्वमिति विशेष्यदलम् । तन्त्रान्तरप्रसिद्धं 'तज्जन्यत्वे सति तज्जन्यजनकत्वं व्यापारत्वम्', यथा दण्डव्यापारः

चक्रस्य भ्रमि: । भ्रमे: दण्डजन्यत्वस्य, दण्डजन्यघटजनकत्वस्य च सत्त्वात् - इति न शाब्दिकसम्मतम्, अस्तिभवतीत्यादिस्थले लेशतोऽफलांशस्यादर्शनात् । न चैवं मञ्जूषोक्तलक्षणस्यापि अस्त्यादिव्यापारेऽव्याप्तिरिति चेत् सत्यम्, वस्तुतस्तु पदान्तरसमभिव्याहाराप्रयोज्यसाध्यत्वप्रकारकाभिधानविशेष्यत्वमेव व्यापारत्वमिति । एतादृशव्यापारत्वस्य अस्त्यादिव्यापारेऽप्यक्षुणत्वात् । एवञ्चात्र शास्त्रे न लौकिकं फलं क्षुन्निवृत्त्यादि, न वा तन्त्रान्तरप्रसिद्धो व्यापार: । एवंहि फलाश्रय: कर्म्म, तथा व्यापाराश्रयश्च कर्त्तेति बोध्यम् ।

**आक्षेप:** - यदि फलाश्रयत्वं कर्म्मत्वमित्युच्यते तदा यदा पुष्ट्यर्थं माषभक्षणाय माषक्षेत्रे एवाश्वबन्धनम्, तदा 'माषेष्वश्वं बध्नाती'त्यादौबन्धनप्रयोज्य भक्षणरूपफलाश्रयत्वात् माषाणां कर्म्मत्वापत्ति: ।

**समाधानम्** - फले प्रकृतधात्वर्थविशेषणं देयम् । तेन भक्षणफलस्य प्रकृतधातुबध्नात्यर्थत्वाभावात् न कर्म्मत्वं माषाणाम् ।

**आक्षेप:** - एतावता प्रकृतधात्वर्थफलाश्रयत्वं कर्म्मत्वमित्यागतम् । एवमपि 'अग्नेर्माणवकं वारयती'त्यत्र माणवकस्य कर्म्मत्वानापत्ति: । यतो हि वारिधात्वर्थे संयोगानुकूलव्यापाराभावानुकूलव्यापाररूपे अर्थे फलद्वयस्य सत्त्वात् संयोगरूपफलाश्रयत्वात् अग्नौ, व्यापाराभावरूपफलाश्रयत्वाच्च माणवके कर्म्मत्वप्राप्तौ 'वारणार्थानामि' ति सत्रं निरवकाशं सत् 'कर्त्तुरीप्सित' इत्यस्यापवाद: स्यात्, एवञ्च माणवकस्य कर्म्मत्वं न स्यात् ।

**समाधानम्** - फले व्यापारप्रयोज्यत्वविशेषणमपि देयम् । तथाहि संयोगाभावस्य व्यापारप्रयोज्यत्वेऽपि संयोगरूपफलस्य कर्त्तृवारकवृत्तिव्यापारप्रयोज्यत्वाभावात् व्यापाराऽप्रयोज्यफलाश्रये अग्नौ 'कर्त्तुरीप्सित.' सूत्रेण कर्म्मत्वाऽप्राप्तौ 'वारणार्थानामि'त्यस्य चरितार्थतया माणवके एतेन सावकाशेन प्राप्तमप्यपादानत्वं परत्वात् कर्म्मसंज्ञया बाध्यते।

**आक्षेप:** - ननु जन्यत्वमपहाय गुरुशरीरस्य प्रयोज्यत्वस्य निवेश: किमर्थ:?

**समाधानम्** - 'गां पयो दोग्धि' इत्यत्र पयस: कर्म्मत्वार्थम् । जन्यत्वनिवेशे तु पयोनिष्ठविभागस्य प्रधानीभूतव्यापारप्रयोज्यत्वेऽपि तदजन्यत्वात्कर्म्मत्वं न स्यात् । प्रयोज्यत्वञ्च साक्षात्परम्परासाधारणमिति न काप्यनुपपत्ति: ।

**आक्षेप:** - एवमपि गम्धात्वर्थसंयोगानुकलव्यापारप्रयोज्यवारिधात्वर्थसंयोगरूपफलाश्रयत्वात् अग्ने: कर्म्मत्वापत्त्या 'वारणार्थानामि'त्यस्यानवकाशत्वम् स्यात्, स्याच्च माणवकस्यापादानत्वम् ।

**समाधानम्** - व्यापारे प्रकृतधात्वर्थविशेषणं देयम् । तेन 'अग्नेर्माणवकं वारयतो'त्यत्र व्यापारेण प्रकृतधात्वर्थव्यापार: वारिधात्वर्थव्यापार एव धर्त्तुं शक्य: । तादृशवारकव्यापारप्रयोज्यत्वाभावात् संयोगरूपफलाश्रयत्वेऽपि नाग्ने: कर्म्मत्वापत्ति:, न चाऽनवकाशत्वात् माणवकेऽपादानत्वापत्ति: ।

**आक्षेप:** - एवञ्च किमायातं लक्षणम् - प्रकृतधात्वर्थव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वं कर्म्मत्वमिति । एवं लक्षणे सत्यपि 'अग्नेर्माणवकं वारयती'त्यत्र प्रकृतधात्वर्थव्यापार: संयोगानुकूलव्यापारोऽपि, तत्प्रयोज्यप्रकृतधात्वर्थसंयोगरूप-फलाश्रयत्वात् अग्नेरपि कर्म्मत्वापत्त्या 'वारणार्थानामि'त्यस्याऽनकाशत्वमेव ।

**समाधानम्** - व्यापारे प्रधानीभूतेति विशेषणमपि देयम् । तथा च प्रधानीभूतव्यापारपदेन वारक-वृत्तिव्यापार एव ग्राह्य:, न तु अप्रधानमाणवकवृत्तिसंयोगानुकूलव्यापार: । तथा हि अग्ने: कर्म्मत्वाऽनापत्त्या न 'वारणार्थानामि'त्यस्याऽनवकाशत्वप्रसङ्ग: ।

**आक्षेप:** - नन्वेतावद्विशेषणसमूहदानेऽपि 'काशीं गच्छन् पथि मत:' इत्यत्र गम्धात्वर्थव्यापार-प्रयोज्यसंयोगरूपफलाश्रयत्वं काश्यां नास्ति, गच्छतश्चैत्रस्य मध्य एव मृतत्वात् । कुत: काश्यां कर्म्मत्वम्?

**समाधानम्** - एतदर्थमुद्देश्यत्वनिवेशो लक्षणे कार्य्य: । तथाहि काश्या: संयोगरूपफलाश्रय-त्वाभावेऽपि 'काशी संयोगाश्रयो भवतु' इति गन्तु: इच्छाविषयत्वरूपस्य फलाश्रय-त्वप्रकारकोद्देश्यत्वस्य सत्त्वात् कर्म्मत्वसिद्धि: ।

**आक्षेप:** - ननु काशीं गच्छति सति चैत्रे 'चैत्र: काशीं गच्छति न प्रयागम्' इति वाक्ये प्रयागस्य फलाश्रयत्वेन उद्देश्यत्वाभावात् 'प्रयागम्' इति कर्म्मप्रयोगानुपपत्तिरिति ।

**समाधानम्** - मैवम् 'कर्त्तुरीप्सिततमं कर्म्म' इति सूत्रघटकस्य ईप्सिततमपदस्य लक्षणया स्वार्थविशिष्टयोग्यताविशेष: अर्थो ग्राह्य: । तथा च परिष्कृतं लक्षणम् - प्रकृत - धात्वर्थप्रधानीभूतव्यापारप्रयोज्यपकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वयोग्यताविशेषशालित्वं कर्म्मत्वमिति । एवञ्च तादृशोद्देश्यत्वाभावेऽपि तादृशोद्देश्यत्वयोग्यताविशेषशालि-त्वात् प्रयागस्य कर्म्मत्वं सूपपादम् । योग्यताया: फलस्य आश्रये, अनाश्रये चोभयत्र विद्यमानत्वात् । एतेन परिष्कारेण अन्यकार्य्ये संलग्ने चैत्रे 'किं ग्रामं गच्छति, अथवा ओदनं पचति?' इति प्रश्ने 'न ग्रामं गच्छति, न ओदनं पचति' इति उत्तरे च ताद-शोद्देश्यत्वयोग्यताविशेषस्य ग्रामे, ओदने च प्रश्नोत्तरघटके विद्यमानत्वात् कर्म्मत्व-मुपपन्नम् ।

**आक्षेप:** - ननु 'कशाभिहत: कारागारं गच्छति' इत्यत्र कारागारस्य फलाश्रयत्वेन उद्देश्य-त्वाभावात् कथं कम्मत्वम् ? न हि कस्यचिज्जनस्य कारागारम् उद्देश्यं भवितुम-र्हति । एवमेव 'विषं भुङ्क्ते' इत्यत्रापि विषस्यानुद्देश्यत्वात् कर्म्मत्वानापत्ति: ।

**समाधानम्** - ताडनादिना पराधीनस्य विषभोक्तु: विषम्, कशाभिहतस्य गन्तुश्च कारागारं फलाश्रयत्वेन उद्देश्यमेव । कथं हि कारागारे गते कशाभिहननमुक्ति:, विषे भुक्ते च ताडनादितो मुक्ति: स्यात् । वर्त्तमानदु:खम् अनागताद् दु:खाद् बलीय इति कृत्वा विषं कारागारञ्च कर्त्तु: ईप्सितमेव, तस्मात् न कर्म्मत्वहानि: । तदुक्तं भाष्यकृता - 'आतश्च विषमीप्सितं यद्भक्षयति ताडनात्' इति ।

**आक्षेप:** – भवद्भि: 'स्वार्थविशिष्टयोग्यताविशेषे' अर्थे लक्षणेति उक्तम् । तत्र विशेषपदोपादानं किमर्थम् ?

**समाधानम्** – अतीतानागतवर्त्तमानानां कालानां त्रये काशीगमनशून्ये रोगादिना अशक्ते चत्रे 'काशी संयोगाश्रयो भवतु' इति इच्छया काश्या: फलाश्रयत्वप्रकारकोद्देश्यत्वयोग्यतासत्त्वेऽपि योग्यताविशेषाभावात् विशेषपदोपादानात् न 'काशीं गच्छति चैत्र:' इति कर्म्मप्रयोग: ।

**आक्षेप:** – स विशेष: कुतो बोध्य: ?

**समाधानम्** – अयञ्च योग्यताविशेष: कर्त्तु: व्यापारकाले तद्व्यापारं पश्यता जनेन अनुमानबोध्य:। स तटस्थजन एवानुमातु समर्थ: यदस्य कर्त्तु: फलाश्रयत्वप्रकारकोद्देश्यत्वयोग्यतावती काशी अस्ति वा न वेति । तथाहि विशेषो नामात्र कस्मिंश्चिदपि काले कर्त्तु: फलाश्रयत्वप्रकारकोद्देश्यत्वसम्भावनारूपो बोध्य: ।

**आक्षेप:** – एवं कालत्रये काशीगमनशून्ये चैत्रे 'चैत्र: काशीं न गच्छति' इत्येवानुभवसिद्ध: प्रयोग:, न तु 'चैत्र: काशीं गच्छति' इति । एवञ्च निषेधस्यैव अनुभवसिद्धत्वात् काश्यां योग्यताविशेषसत्त्वस्वीकारेऽपि न तादृश: प्रयोग:, अनुभवविरुद्धत्वात् । एवञ्चोक्तप्रयोगवारणाय विशेषग्रहणं न कर्त्तव्यम् । अस्तु । इदानीमपि 'अन्नं भक्षयन् विषं भुङ्क्ते' 'ग्रामं गच्छंस्तृणं स्पृशति' इत्यादौ विषस्य तृणस्य च 'विषं गलबिलाध: – संयोगाश्रयो भवतु' 'तृणं स्पर्शजन्यसंयोगाश्रयो भवतु' इति उद्देश्यत्वाभावात् कुत: कर्म्मत्वम् ?

**समाधानम्** – 'तथायुक्तं चानीप्सितम्' इति लक्षणान्तरात् । 'च' पदमत्र 'अपि' इत्यर्थपरम् । 'अनीप्सितम्' इत्यत्र नञ्समास: । नञा च ईप्सिततमलक्षणे निविष्टस्य 'उद्देश्यत्व'स्य प्रतिषेध: । तस्मादनीप्सितकर्म्मत्वं नाम 'प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वम् ।' तथा च क्रियाजन्यफलाश्रयत्वाद् यथा उद्देश्यत्वविशिष्टस्य अन्नस्य ग्रामस्य च कर्म्मत्वम् तथैव क्रियाजन्यफलाश्रयत्वात् उद्देश्यत्वाभावेऽपि विषस्य तृणस्य च अनीप्सितस्यापि कर्म्मत्वं बोध्यम् ।

**आक्षेप:** – द्वेष्योदासीनसंग्रहार्थं लक्षणमिदं प्रसिद्धम् । तत्र द्वेष्यं नाम उद्देश्यविरुद्धं हेयम् । उदासीनं च नाम उपेक्षाबुद्धिविषय: । तथाहि 'नदी कूलं कषति' इत्यादौ उपेक्षाबुद्धे: अचेतने तीरादौ बाधात् कूलमित्यत्र कर्म्मत्वाऽनापत्ति: ।

**समाधानम्** – उदासीनत्वञ्चात्र नोपेक्षाबुद्धिविषयत्वम्, अपितु शिष्टप्रयोगानुरोधेन अनुपादेयत्वम्, अनेपक्षितत्वमेव । तस्मात् कूलादौ उदासीनकर्म्मत्वस्य न हानि:, अनुपादानविषयत्वस्य तत्र सत्त्वात् ।

**आक्षेप:** – ननु अन्त:स्थितद्रवद्द्रव्यविभागानुकूलव्यापारानुकूलव्यापारद्वयस्य दुह्धात्वर्थे स्वीकृते विभागरूपफलाश्रयत्वात् पयस:, विभागानुकूलव्यापाररूपफलाश्रयत्वाच्च गो: कर्म्म-

त्वम् । किन्तु एकव्यापारबोधकत्वपक्षे अर्थात् विभागानुकूलैकव्यापारवाचकत्वे दुह्-धात्वर्थे स्वीकृते विभागरूपफलाश्रयत्वेन पयसः कर्म्मत्वसिद्धावपि 'गाम्' इत्यस्य कुतः कर्म्मत्वम् ?

**समाधानम् -** 'अकथितं चे' ति लक्षणान्तरात् । तथाहि 'कर्मसम्बन्धित्वे सति आपादानादि-विशेषाविवक्षितकथितकर्म्मत्वमि'ति तृतीयं लक्षणमप्यङ्गीकार्य्यम् । तथा चात्र कर्म्म पयः, तस्य कर्म्मणः पयसः सम्बधिनी गौः, सम्बन्धित्वं गवि अस्ति, अस्ति चापादनत्वादिविशेषकारकैः अविवक्षिता गौः, अविवक्षितत्वं च गवि, अतोऽनेन लक्षणेन गोः कर्म्मत्वमेकव्यापारवाचकत्वपक्षेऽपि सूपपादम् ।

**आक्षेपः -** नन्वेवं गोः अकथितकर्म्मत्वे शाब्दबोधः कः?

**समाधानम् -** प्राचीनमते सम्बन्धत्वेन विवक्षायामपि षष्ठीं बाधित्वा कर्म्मसञ्ज्ञायाः प्रवृत्तये लक्षणमिदं स्वीकृतम् । तथा चैतन्मते पयःकर्म्मकं गोसम्बन्धि दोहनमिति बोधः । किन्तु नागेशमते समवायसम्बन्धेन विभागरूपफलाश्रयस्य पय आदेः कर्म्मत्वेऽपि अवधित्वरूपसम्बन्धेन तादृशविभागरूपफलाश्रयस्य गवादेः कर्म्मत्वार्थम् 'अकथित-ञ्चे' ति लक्षणम् । तथाहि अत्र मते गोकर्म्मकं पयःकर्म्मकं च दोहनमिति बोधः ।

**आक्षेपः -** ननु 'वृक्षात् पत्रं पतती'त्यत्र विभागानुकूलव्यापारः पत्धात्वर्थः । तत्र विभागरूप-फलाश्रयत्वात् पत्रस्य कथं न कर्म्मत्वम् ?

**समाधानम् -** 'अपादानमुत्तराणि कारकाणि बाधन्ते' इति भाष्ययुक्तेः ।

**आक्षेपः -** नैयायिकैः धात्वर्थतावच्छेकफलशालित्वं कर्म्मत्वमिति स्वीक्रियते । धात्वर्थतावच्छे-दकत्वञ्च धातुजन्योपस्थितीयविशेष्यतावच्छेदकत्वम् । तद्यथा गम्धातुज्ञानजन्या संयोगानुकूलव्यापारोपस्थितिः, तत्रोपस्थितौ या विशेष्यता सा व्यापारनिष्ठा, तस्याः अवच्छेदकं फलं संयोगः, तच्छालित्वात् ग्रामादेः कर्म्मत्वम् । एवञ्च इदं नैयायि-कोक्तं कर्म्मलक्षणमेवास्तु । का नो हानिः ?

**समाधानम् -** स्वीकृतेऽस्मिन् लक्षणे गम्धात्वर्थतावच्छेदकसंयोगरूपफलाश्रयत्वात् यथा ग्रामस्य कर्म्मत्वम्, तथा गन्तुः चैत्रकर्त्तुरपि तादृशसंयोगरूपफलाश्रयत्वात् कर्म्मत्वे 'चैत्रश्चैत्रं गच्छती' त्यापत्तिः स्यात् ।

**आक्षेपः -** लक्षणे व्यापारानधिकरणत्वे सति - इति विशेषणदलस्यापि आदानात्, विशेष्यदल-सत्त्वेऽपि विशेषणदलस्य असत्वात् न 'चैत्रश्चैत्रमि'त्यापत्तिः । तथाहि - व्यापारानधिकरणत्वे सति इत्यस्य प्रकृतधातुवाच्यव्यापारस्य यदधिकरणं तद्भिन्ना-धिकरणत्त्वे सति इति भावः । अत्र प्रकतधातुः गम्धातुः, तद्वाच्यव्यापारः गमनम्, तदधिकरणं कर्त्ता चैत्रः, तद्भिन्नमधिकरणं न कर्म्म चैत्रः । अतो न कर्म्मत्वस्य अतिव्याप्तिः ।

**समाधानम्** - तन्न । तार्किकोक्तलक्षणे कर्म्मत्वार्थं फलशालित्वमावश्यकम् । परं फलशालित्वाभावेऽपि बहुत्र कर्म्मत्वं भवति, तत्र-तत्र लक्षणस्य अव्याप्तेः । तद्यथा - 'काशीं गच्छन् पथि मृतः' इत्यत्र काश्याः, 'काशीं गच्छति न प्रयागम्' इत्यत्र प्रयागस्य, 'ग्रामं न गच्छति' इत्यत्र ग्रामस्य च फलशालित्वाभावात् एतस्य लक्षणस्य सर्वत्राव्याप्तेः नेदं लक्षणं नः सम्मतम् ।

**आक्षेपः** - अस्तु । न मन्यतान्तावत् नैयायिकोक्तं लक्षणम् । परं भवदुक्तलक्षणेऽपि 'भूमिं पतति', 'भूमौ पतति' इत्युभयप्रयोगः कुतः ? भूमेः पत्धात्वर्थफलाश्रयत्वं वा तद-नाश्रयत्वं वा, एकमेव सम्भवम् । तर्हि एकस्यामेव भूमौ कर्म्मत्वमधिकरणत्वञ्च न सम्भवतीति ।

**समाधानम्** - अत्रेदमवगन्तव्यम् । अधोदेशसंयोगरूपे पत्धात्वर्थे स्वीकृते कर्म्मणः अधोदेशस्य धात्वर्थनिविष्टत्वात् अकर्म्मकत्वात् 'भूमौ पतती'ति प्रयोगः । अथ च संयोगमात्र-फलपक्षे 'भूमिं पतती'ति प्रयोगः ।

**आक्षेपः** - भाष्यकारो ब्रवीति 'यो ह्युत्सूत्रं कथयेन्नादो गृह्येत' इति । तस्मात् ये विचाराः कर्म्मत्वप्रसङ्गे सम्प्रति समागताः, ते पाणिनिसूत्रसन्दर्भमनुसृत्य नूनं प्रेक्षणीयम् । तत्र तावत् पाणिनिना कर्म्मसंज्ञाविधायकत्वेन 'कर्त्तुरीप्सिततमं कर्म्म' इत्युदीरितम् । सूत्रघटके कर्त्तुरिति पदे 'क्तस्य च वर्तमाने' इति सूत्रेण कर्त्तरि षष्ठी । परमेवं षष्ठ्याः कर्त्रर्थकतया प्रकृतिप्रत्ययार्थयोः कर्त्रोः 'घटो घट' इतिवदभेदान्वयो न स्यात् 'तद्धर्मावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासम्बन्धेन शाब्दबुद्धित्वा-वच्छिन्नं प्रति तद्धर्मभेदः कारणमि'ति व्युत्पत्तेः ।

**समाधानम्** - प्रश्नस्यास्य त्रिधा समाधानमत्र प्रस्तूयते । करोतेस्तृचि अनुद्भूतकर्त्तृत्वस्य बोधः, ङस्पदेनोद्भूतकर्त्तृत्वस्य बोध इति तयोर्वैरूप्येणाभेदबोधे बाधकाभावः । अथवा, वैयाकरणनय पदमपि नामार्थः । तथाहि, कर्त्तृपदाभिन्नो यो व्यापाराश्रयः तदभिन्नो यो ङस्पदाभिन्नो व्यापाराश्रयः - इत्येवं विधेयकोटावधिकावगाहिशाब्दबोधस्य स्वी-कारात् 'नीलघटो घट' इतिवदुपपत्तेः । अथवा 'सार्थाद्धीयते' इत्यादौ कर्म्मणि लकारसिद्धये अत्र कर्त्तृपदस्य स्वतन्त्रोपलक्षकतया स्वतन्त्राभिन्नो यः कर्त्ता इत्यर्थः । अत्रेदमवधेयम् - 'सार्थाद्धीयते देवदत्त' इत्यादौ सार्थो नाम मनुष्य' समुदायः, स एनं त्यजति, अयञ्च देवदत्तः सार्थाद्धीयते इति वाक्यादस्मात् सम्प्रत्ययः । अस्यां स्थितौ सार्थस्य धात्वर्थप्रधानीभूतत्यागरूपव्यापारस्याश्रयत्वेऽपि कर्त्तृसंज्ञास्थाने 'अपादाने चाहीयरुहोः' इति ज्ञापकात् कर्म्मप्रत्ययान्त 'ही' धातु-प्रयोगे अपादानत्वम् । एवञ्च कर्म्मऽसंज्ञायां कर्त्तृपदस्य स्वतन्त्रोपलक्षणत्वात् कर्त्तृसंज्ञाभावेऽपि धात्वर्थप्रधानीभूतव्यापाराश्रयत्वरूपस्वातन्त्र्यस्य सार्थेऽक्षतत्वात् स्वतन्त्रस्य क्रियया आप्तुमिष्टतमे कर्म्मणि लकारः सिद्ध्यतीति ।

**आक्षेप: -** ननु सूत्रे कर्त्तृग्रहणमेव न कर्त्तव्यम् । तदभावेऽपि केनाप्तुमित्याकाङ्क्षायां कारकाधिकारात् कारकवृत्तिव्यापारप्रयोज्यफलाश्रयत्वपकारकैच्छोद्देश्यं कर्म्मेत्यर्थ: स्यादेव।

**समाधानम् -** माषेषु प्रसक्तमश्वं माषनाशो मा भूदित्यन्यत्र बध्नातीत्यर्थे 'माषेष्वश्वं बध्नाती'त्यत्र माषेषु इत्यत्र कर्म्मसंज्ञाव्यावृत्त्यर्थं कर्त्तृग्रहणमावश्यकम् । अत्र कर्म्मण: अश्वस्य एव ईप्सिता माषा: न तु कर्त्तु: इति कर्त्तृवृत्तिव्यापारप्रयोज्यफलाश्रयत्वप्रकारकेच्छोद्देश्यत्वाभावात् न माषाणां कर्म्मत्वापत्ति: । कर्त्तृग्रहणाभावे च कारकाधिकारात् कारकपदेन कर्म्मण: अपि ग्रहीतुं शक्यत्वात् कर्म्मण: अश्वस्य च माषाणामीप्सितत्वात् कर्म्मत्वापत्ति: ।

**आक्षेप: -** कर्त्तृग्रहणेऽपि दोष: । भक्षणक्रियाकर्त्तृत्वात् कर्त्तृपदेन अश्वोऽपि ग्रहीतुं शक्य: । तथाहि अश्वरूपकर्त्तृवृत्तिव्यापार: भक्षणव्यापार:, तत्प्रयोज्यफलाश्रयोद्देश्यत्वात् माषाणां कर्म्मत्वमापद्येत ।

**समाधानम् -** कर्त्तृग्रहणसामर्थ्यात् प्रकृतधात्वर्थकर्त्तुरेव ग्रहणान्न दोष: । प्रकृतधात्वर्थश्चात्र बन्धधात्वर्थरज्जुशङ्कुसंयोगानुकूलव्यापार:, तदाश्रयस्य बन्धकस्यैव तस्मात् कर्त्तृपदात् ग्रहणात् दोषाभाव: ।

**आक्षेप: -** एवमपि यत्र पुष्ट्यर्थं माषक्षेत्रेऽश्वबन्धनम्, तत्र भक्षणस्यापि बन्धनप्रयोज्यतया चैत्रकर्त्तृकबन्धनानुकूलव्यापारप्रयोज्यभक्षणरूपफलाश्रयत्वेन माषाणां कर्म्मत्वं दुर्वारम्।

**समाधानम् -** कर्त्तृग्रहणसामर्थ्यात् फलव्यापारयोरुभयोरपि प्रकृतधातुवाच्ययोरेव ग्रहणेनादोष: । प्रकृते बन्धनप्रयोज्यस्यापि भक्षणस्य प्रकृतधातुबध्नात्यर्थत्वाभावात् तादृशफलाश्रयत्वाभावान्न कर्म्मत्वाऽऽपत्ति: ।

**आक्षेप: -** अस्तु कर्त्तृपदोपादानम् । शेखरे 'तमब्ग्रहणं किमि'ति परममूलस्य प्रतीकमादाय उच्यते - 'अवयवद्वारा समुदाये प्रश्न:' इति एतादृशस्य व्याख्यानस्य किन्तावत् प्रयोजनम् ?

**समाधानम् -** 'पयसा ओदनं भुङ्क्ते' इत्यत्र 'पयस:', 'अग्नेर्माणवकं वारयतो'त्यत्र अग्ने: इति पयोऽग्न्युभयव्यावर्त्तकस्यैकस्य प्रकर्षस्य दुर्वचत्वेनेदं न तमव्यावर्त्त्यमिति यथाश्रुतासङ्गतेराह - 'अवयवद्वारा समुदाये प्रश्न:' इति ।

**आक्षेप: -** अयि भो: । 'कर्त्तुरीप्सिततमं कर्म्म' इति सूत्रस्थाने 'कर्त्तुरुद्देश्यं कर्म्म' इत्येव न्यासोऽस्तु । उद्दिशेरिच्छार्थत्वात् यत्प्रत्ययस्य चोद्देशताख्यविषयताश्रयार्थकत्वात् 'कर्त्तृवृत्तीच्छीयोद्देश्यताश्रय: कर्म्म' इत्यर्थलाभे सम्भवे कथं न लघून्यास एव आश्रेय:?

**समाधानम् -** एवं न्यासे यदा कृतभोजनोऽपि पयोलाभेनौदनभोजने प्रवर्त्तते तदा तत्क्रियाया: पयउद्देश्यकत्वात् 'पयसा ओदनं भुङ्क्ते' इत्यत्र पयस: कर्म्मत्वापत्ति: । यतो हि ईप्सितग्रहणाभावे यत्किञ्चित्प्रकारकेच्छोद्देश्यस्य कर्म्मत्वं दुर्वारम् । तत्सत्त्वे तु

तस्य क्रियाशब्दात् फलाश्रयत्वप्रकारकच्छोद्देश्यस्यैव कर्म्मत्वम् । एवञ्च 'पयः स्वत्वाश्रयो भवतु' इतीच्छायाः पयसः उद्देश्यत्वेऽपि अर्थात् यत्किञ्चित्प्रकारके-च्छोद्देश्यत्वेऽपि फलाश्रयत्वप्रकारकेच्छोद्देश्यत्वाभावान्न दोषः । फलाश्रयत्वेने-च्छायान्तु 'पयो भुङ्क्ते' इतीष्यत एव ।

**आक्षेपः -** 'ईप्सिततमम्' इति घटकतमस्य किम्फलम्? सम्बन्धार्थकादाब्धातोः सनि ईप्सित-शब्दस्य निष्पन्नतया सम्बन्धेच्छाविषयपरस्य ईप्सितस्य स्वीकारादेवेष्टसिद्धौ तम-ग्रहणं किमर्थम्?

**समाधानम् -** तमस्य फलम् - अग्नर्माणवकं वारयतीत्यत्र माणवकस्य कर्म्मत्वम् । कुत इति चेत् तमग्रहणाभावे हि 'वारणार्थानामीप्सितः' इति सूत्रमस्यापवादः स्यात् । एवञ्च माणवकस्य कर्म्मत्वं न स्यात् । न चाग्नौ तच्चरितार्थम्, तस्यापि वारयत्युपस्थाप्य-संयोगरूपफलाश्रयत्वात् । वारयतेश्च संयोगानुकूलव्यापाराभावानुकूलव्यापारोऽर्थ : । न च संयोगो न तत्कर्तृव्यापारजन्य इति तत्र कर्म्मत्वाप्राप्तिरिति वाच्यम्, कर्तृव्या-पारवाचकधातूपात्ततत्फलाश्रयत्वमित्यर्थस्यैव ईप्सितमात्रपदेन लाभात् । तमग्रहणे तु ईप्सितमात्रे सावकाशस्य 'वारणार्थानामि'त्यस्य परत्वादीप्सिततमेऽनेन बाधः ।

**आक्षेपः -** तमबर्थः अतिशयः इति प्रसिद्धः । अत्र कीदृशस्य अतिशयत्वस्य लाभः?

**समाधानम् -** आब्धातोः सम्बन्धोऽर्थः । स च व्यापारविशिष्टफलाश्रयत्वरूपः । वैशिष्ट्यञ्च स्वप्रयोज्यत्वस्ववाचकधातुवाच्यत्वोभयसम्बन्धेन । तमप्रत्ययात् उभयसम्बन्धेन वैशि-ष्ट्यरूपातिशयलाभः । तत्र द्वितीयसम्बन्धनिवेशात् प्रयागात् काशीं गच्छति चैत्रे 'प्रयागं गच्छती'ति न प्रयोगः । अन्यथा गम्धात्वर्थप्रयोज्यो यथा काशीसंयोगस्तथा प्रयागविभागोऽपि, तदाश्रयत्वेनेच्छोद्देश्यत्वस्यापि प्रयागे सत्त्वात् । सम्बन्धस्यास्य निवेशे च विभागस्य गम्धातुवाच्यत्वाभावात् न तत्र 'प्रयागं गच्छति'ति प्रयोगापत्तिः।

**आक्षेपः -** प्रथमसम्बन्धनिवेशस्य फलमनुक्त्वा द्वितीयसम्बन्धस्य फलमुक्तम् । तस्माद् वक्तव्यम् स्वप्रयोज्यत्वनिवेशेन को लाभः?

**समाधानम् -** प्रयोज्यत्वनिवेशाच्च अग्नेर्न कर्म्मत्वापत्तिः । तत्र संयोगस्य व्यापारवाचकवारिधातु-वाच्यत्वात् संयोगाश्रयत्वेन अग्नेरिच्छोद्देश्यत्वात् कर्म्मत्वापत्तिः । तन्निवेशे च तस्य संयोगस्य तादृशव्यापारविशिष्टफलत्वाभावात् न दोषः ।

**आक्षेपः -** ननु वारयितुः माणवकस्यैव व्यापारजन्यफलाश्रयत्वन इच्छोद्देश्यत्वम्, न तु वह्नेः। विरोधात् । कथं कर्म्मत्वापत्तिः ?

**समाधानम् -** यदा दुष्टो भृत्यः तदा वारयितुः भृत्यस्य संयोगाश्रयत्वेन वह्नेः इच्छाविषयत्व-सम्भवात् ।

**आक्षेप:** - तन्न सम्भवम् । एकदा वह्नि: माणवकव्यापारजन्यसंयोगाश्रयो भवतु, माणवकश्च वह्निसंयोगानुकूलव्यापाराभाववान् भवत्वितीच्छाद्वयस्य एकस्मिन् पुरुषे विरोधाद-सम्भवेन दुष्टस्यापि वारयितुस्तादृशेच्छाया असम्भवात् ।

**समाधानम्** - ननु तर्हि एवं सति इच्छोद्देश्यत्वाभावे 'वारणार्थानामि'त्यनेन ईप्सितस्य विहितम-पादानत्वमपि न स्यात् ।

**आक्षेप** - कर्म्मसंज्ञायां कर्तृग्रहणात् कर्त्तुरीप्सिततमत्वमपक्षितम् । अपादाने च कर्तृग्रहणा-भवात् कारकाधिकारात् वारयित्रोप्सितत्वाभावेऽपि माणवकस्येप्सितत्वस्य सत्त्वेन अपादाने बाधकाभावात् ।

**समाधानम्** - अत्रेदं बोध्यम् - कर्त्तुरिति सूत्राप्रवृत्तावपि तथायुक्तमिति लक्षणान्तरात् अग्ने: कर्म्मत्वापत्तिदोषग्रस्तत्वमेव । 'अनीप्सिते'ति नञा पूर्वसूत्रे सन्प्रत्ययक्तप्रत्ययाभ्यां लब्धस्य इच्छोद्देश्यत्वस्य व्यवच्छेदात् कर्तृवृत्तिप्रकृतधात्वर्थप्रधानीभूतव्यापारविशि-ष्टफलाश्रयत्वं हि अनीप्सितकर्म्मत्वम् । तथाहि कर्तृवारकवृत्तिवारणव्यापारप्रयोज्य-संयोगरूपफलाश्रयत्वात् अग्ने कर्म्मत्वस्य प्राप्तिरेव ।

**आक्षेप:** - ननु यावत् अग्निमाणवकसंयोगो न जात:, तावदेव संयोगाय उद्यतस्य माणवकस्य वारयित्रा वारणं कृतम् । अस्यां स्थितौ संयोगरूपफलस्य अग्ने: आश्रयत्वाभावात् न अग्ने: अनीप्सितकर्म्मत्वमपि ।

**समाधानम्** - सम्भाविते संयोगाश्रयेऽपि अनीप्सितकर्म्मत्वं स्वीक्रियते । अत एव 'ग्रामं गच्छंस्तृणं स्प्रक्ष्यति' इत्यादिप्रयोग: उपपन्न: । प्रकृते यदि वारको न वारयेत् तर्हि माणव-कोऽग्निसंयुक्त: स्यादिति सम्भावितेन संयोगाश्रयत्वेन संयोगाभावेऽपि अग्नौ कर्म्म-त्वप्राप्तिरेव । तथा च 'वारणार्थानामि'ति सूत्रमनवकाशत्वात् कर्म्मसंज्ञाया बाधकं स्यात् । तथा च बाध्यसामान्यचिन्तया कर्म्मसंज्ञायामपादानसंज्ञीयोद्देश्यतावच्छेद-कावच्छिन्नातिरिक्तत्वेन संकोचापत्त्या 'अग्नेर्माणवकं वारयती'त्यादौ माणवकादेरपि कर्म्मत्वानापत्ति: । अत: प्रयोज्यत्वनिवेश: आवश्यक: । एवं हि प्रथमसम्बन्ध-निवेशात् संयोगरूपफलस्य वारकवृत्तिवारणव्यापारप्रयोज्यत्वाभावात् संयोगरूपफला-श्रयस्य अग्ने: न पूर्वसूत्रेण कर्म्मत्वप्राप्ति: । अथ च 'इच्छासत्त्वे कर्त्तुरि'त्यनेन यस्य कर्म्मत्वम् तथायुक्तानीप्सितम् अपि कर्म्म इत्यक्षरस्वारस्यात् 'तथायुक्त'मित्य-नेनापि न अग्ने: कर्म्मत्वप्राप्ति: । इति सावकाशाऽपादानसंज्ञा स्वविषये कर्त्तुरि' त्यनेन परत्वाद् बाध्यते ।

**आक्षेप:** - ननु भवद्भि: स्वप्रयोज्यत्व-स्ववाचकधातुवाच्यत्वोभयसम्बन्धेन व्यापारविशिष्ट-फलाश्रयत्वं कर्म्मत्वमिति स्वीकृत्य वारकवृत्तिव्यापारप्रयोज्यसंयोगरूपफलाश्रयत्वा-भावात् अग्ने: कर्म्मत्वं वार्य्यते । परम् संयोगे वारकवृत्तिव्यापारप्रयोज्यत्वं कुतो न?

**समाधानम्** - यो हि यस्य कारणाभावं सम्पादयति न स तत्सम्पादक: । यथा घटकारणाभावसम्पादकश्चक्रभञ्जको नासौ घटसम्पादकोऽपितु घटस्य विघटक: । एवं वारकस्य वारणव्यापारो माणवकाग्निसंयोगकारणभूतमाणवकव्यापारस्याभावं प्रयोजयति - इति तत्प्रयोत्यत्वं संयोगे नास्तीति स्फुटमेव ।

**आक्षेप:** - ननु वारयते: संयोगानुकूलव्यापाराभावानुकूलव्यापाराऽर्थो भवद्भि: प्रोक्त: । परं व्यापाराभावानुकूलत्वं व्यापारे बाधितम् । यतो हि अत्यन्ताभावस्यान्योन्याभावस्य च नित्यत्वात् । प्रागभावस्याप्युत्पत्तेरभावात् । तदनुकूलत्वं बाधितम् । व्यापारे पध्वंसाभावानुकूलत्वसम्भवेऽपि सोऽयमभाव: प्रकृते ग्रहीतुं न शक्यते, उत्पन्नस्यैव ध्वंसात्, पूर्वमग्निसंयोगस्य माणवकेऽवश्यमपेक्षितत्वात् ।

**समाधानम्** - मैवम् । अभावानुकूलत्वं प्रकृते नाभावजनकत्वम्, किन्त्वभावप्रयोजकत्वमित्युच्यते, यथा घटाभावप्रयोजकत्वं दण्डाभावे । अत एव 'माणवकं वारयती'त्यत्र माणवकस्य न कर्म्मत्वानुपपत्ति: । तत्राभावरूपे फले व्यापारजन्यत्वस्य बाधितत्वेऽपि व्यापारप्रयोज्यत्वसत्त्वात् ।

**आक्षेप:** - भो: । पूर्वं लक्षणपरिष्कारप्रसङ्गे जन्यत्वमपहाय गुरुशरीरस्य प्रयोज्यत्वस्य निवेशफलत्वेन 'गां पयो दोग्धि' इत्यत्र पयस: कर्म्मत्वमित्युक्तम् । इदानीं तत्परित्यज्य अन्यथा प्रयोजनं व्याचष्टे । तत्रापि कर्तृव्यापारजन्यो गवादिव्यापार:, तादृशव्यापारजन्यश्च विभाग: इति पात्रे इव स्वजन्यजन्यविभागे स्वजन्यत्वं वक्तुमशक्यमेव ।

**समाधानम्** - एवमस्ति - मध्यव्यापारेण व्यापारिणो नान्यथासिद्धि: अर्थात् जनकत्वमेवेति पक्ष: सम्प्रदाये प्रसिद्ध: । अत एव यागस्य स्वजन्यापूर्वजन्यस्वर्गं प्रति हेतुतया यागात् स्वर्गो भवतीति संगच्छते, संगच्छते च पदज्ञानस्य स्वजन्योपस्थितिजन्यशाब्दधियं प्रति कारणत्ववाद: । एवञ्च कर्तृवृत्तिदोहनव्यापारस्यापि गवादिव्यापारद्वारा दुग्धादिविभागजनकत्वं भवत्येव । पितामहस्तु न पुत्रद्वारा पौत्रोत्पादक:, अनपेक्षितत्वात् । तथा च विभागस्य दोहनकर्तृव्यापारजन्यत्वान्नोक्तदोष इत्यपि वक्तुं शक्यम् । अत: प्रयोज्यसम्बन्धनिवेशस्य वस्तुत: 'माणवकं वारयती'त्यत्र माणवके कर्म्मत्वम्, अग्नेश्च कर्म्मत्वानापत्तिरूपं फलं बोध्यम् ।

**आक्षेप:** - ननु 'अधिशीङ्स्थासां कर्म्म' इति सूत्रात् कर्म्मत्यनुवृत्तौ पुन: कर्म्मग्रहणं किमर्थम्?

**समाधानम्** - 'अधिशीङि'त्यत्र हि आधार: इत्यनुवर्त्तते । तथा च तत्रत्यं कर्म्म आधारकर्म्म । इहापि तादृशस्य कर्म्मणोऽनुवृत्तिर्माभूदिति कर्म्मग्रहणमावश्यकम् । अन्यथा 'गेहं प्रविशति' इत्यत्रैव कर्तृद्वारा क्रियाधारतया कर्म्मत्वं स्यात् । 'हरिं भजती'त्यादौ च तादृशाधारत्वाभावात् कर्म्मत्वं न स्यात् ।

**आक्षेप:** - आधारपदानुवृत्तिर्मास्तु इत्येतदर्थं कर्म्मग्रहणमिति भवतामाशय: । परम् 'कर्म्मणि हन:' (कर्म्मण्युपपदे हनो णिनिप्रत्ययो भवति, भूते । पितृव्यं हतवानिति पितृ-

व्यघाती) इति सूत्रम् आधारत्वाविशिष्टकर्म्मोपपदत्वानुपलब्धेः व्यर्थं सत् अत्र आधारपदाननुवृत्तौ ज्ञापकं भवितुर्महति । तस्मात् कर्म्मोपादानं व्यर्थमेव ।

**समाधानम्** - मैवम्, 'पितृव्यं हतवान् - पितृव्यघाती'त्यादौ यत्र हन्ता पितृव्योपरि स्कन्धे उपविश्य तं हतवान्, तत्र हननकर्त्तृद्वारा क्रियाधारतया पितृव्ये कर्म्मत्वस्य सत्त्वात् तस्य चारितार्थ्यसम्भवात् न 'कर्म्मणि हनः' इत्यस्य ज्ञापकत्वं सम्भवम् ।

**आक्षेपः** - ननु यदा चैत्रः कालिकसम्बन्धेन मद्वृत्तिव्यापारजन्यफलाश्रयः कालो भवत्विती-च्छया व्यापारं करोति, तदा कर्त्तृव्यापारप्रयोज्यफलाश्रयत्वप्रकारकेच्छोद्देश्यत्वेन कालस्य कर्म्मसंज्ञाया निर्बाधात् 'कालं गच्छती'त्यापत्तिः । एवमेव कालिक-सम्बन्धेन विक्लित्त्याश्रयः पाषाणं भवत्वितीच्छामादाय 'पाषाणं पचती'त्यापत्तिश्च स्यात् ।

**समाधानम्** - समवायसम्बन्धेन फलाश्रयत्वनिवेशे सति नैष दोषः । कालस्य, पाषाणस्य च तत्र तत्र कालिकसम्बन्धेनैव फलाश्रयत्वात् ।

**आक्षेपः** - नन्वेवं समायसम्बन्धेन फलाश्रयस्य कर्म्मत्वस्वीकारे 'घटं नाशयति' इत्यत्र घटस्य प्रतियोगितासम्बन्धेन नाशरूपफलाश्रयत्वे, 'घटमिच्छति' इत्यत्र 'घटं जानाति' इत्यत्र च विषयतासम्बन्धेन घटस्य फलाश्रयत्वे कर्म्मत्वाऽनापत्तिः ।

**समाधानम्** - अस्यां स्थितौ कालिकान्यसम्बन्धेन फलाश्रयत्वनिवेशे निस्तारः । तेन न कालं पचति - इत्याद्यापत्तिः । न च 'घटं नाशयती'त्याद्यनापत्तिः ।

**आक्षेपः** - एवमपि विषयितासम्बन्धेन मद्वृत्तिव्यापारजन्यविक्लित्त्याश्रयो ज्ञानं भवत्वितीच्छा-मादाय 'ज्ञानं पचती'त्यापत्तिः ।

**समाधानम्** - वस्तुतस्तु फलतावच्छेदकसम्बन्धेन फलाश्रयत्वनिवेशः । फलतावच्छेदकश्च फल-निष्ठाधेयतावच्छेदकतया यो धात्वर्थतावच्छेदकस्स एव । सर्वेषाञ्च धातूनां फलविशिष्टव्यापारे शक्तिः । वैशिष्ट्यञ्च स्वजनकत्व - स्वाधिकरणवृत्तित्वोभय-सम्बन्धेन । तत्तद्धातुस्थले फलनिष्ठाधेयतावच्छेदकतया तत्तत्सम्बन्धो निवेशनीयः। तथा च पच्धातोर्विक्लित्तिविशिष्टो व्यापारोऽर्थः । वैशिष्ट्यञ्च स्वजनकत्व - स्वनिष्ठसमवायसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतावद्वृत्तित्वोभयसम्बन्धेन । तथा च तत्र फलतावच्छेदकस्समवाय एव न तु कालिकादिः । तेन सम्बन्धेन फलाश्रयत्वप्रकारकेच्छाविषयस्तण्डुलाद्येव, न कालपाषाणादिः । यदि च समवायेन विक्लित्त्याश्रयः कालः, पाषाणं वा भवत्वितीच्छा, तदा कालं पचतीत्यादिप्रयोगो भवत्येव । एवं नाशयतीत्यत्र फलतावच्छेदकः प्रतियोगितासम्बन्धः, इच्छतीत्यादौ च विषयतासम्बन्धः । तत्र तत्र तेन तेन सम्बन्धेनैव फलाश्रयस्य कर्म्मत्वम्, न तु तदतिरिक्तसम्बन्धेन फलाश्रयस्य कालादेः कर्म्मत्वम् ।

**आक्षेपः -** अर्थात् यद्यद्धातुसमभिव्याहारे यस्य यस्य कर्म्मत्वमिष्टन्तत्तन्निष्ठकर्म्मत्वोप-योगितत्तत्सम्बन्धान्तर्भावेण धातोरर्थो वाच्यः ।

**समाधानम् -** आम्, प्रतीत्यनुसारेणैव शब्दार्थस्य कल्पनात् ।

**आक्षेपः -** परमेवमपि 'स्तोकं पचती' त्यादौ विक्लित्त्यभिन्ने स्तोकादौ समवायसम्बन्धेन विक्लित्त्याश्रयत्वाभावात् कथं कर्म्मत्वम् ? व्यपदेशिवद्भावेन तु स्वस्मिन् स्वघटि-तत्वस्वघटकत्वयोरेवातिदेश इत्यर्थस्यैव सिद्धान्तितत्वेन समवायसम्बन्धेन स्वाश्रय-त्वस्य स्वस्मिन्नतिदेशेनाप्यभावात् ।

**समाधानम् -** फलतावच्छेदकतादात्म्यान्यतरसम्बन्धेन फलसम्बन्धिन एव कर्म्मत्वमित्यर्थेनादोषात् ।

**आक्षेपः -** अस्तु । 'तण्डुलं न पचती'त्यादौ कथं तण्डुलादेः कर्म्मत्वम्, कर्त्तृवृत्तीच्छाया अभावेनेच्छीयोद्देश्यत्वाश्रयत्वस्य तण्डुलादावभावेन कर्म्मसंज्ञाविधायकसूत्रस्या-प्राप्तेरिति ।

**समाधानम् -** अस्य समाधानमाचार्य्यैः पञ्चधा कृतम् । तथाहि - नञ्समभिव्याहारे फलाभावा-नुकूलो व्यापारो धात्वर्थः । तथाहि फलाभावरूपफलाश्रयत्वात् तण्डुलस्य कर्म्मत्व-मिति प्रथमं समाधानम् ।

**आक्षेपः -** एतन्न सम्यक् । फूत्कारादीनामेव पच्धातुवाच्यतया तेषां विक्लित्तिं प्रत्येव जनक-त्वात् पचतीत्यादेः विक्लित्त्यभावानुकूलव्यापारवाचकत्वाभावात्, असमस्तनञः क्रियाभावबोधकत्वस्यैव इष्टत्वाच्च ।

**समाधानम् -** अस्तु, यथा कर्त्तुरध्याहारेण सूत्रार्थसमन्वयात् 'तण्डुलं पचती' त्युच्यते तथा प्रकृतेऽपि कर्त्तारमध्याहृत्य तद्वृत्तीच्छामादाय कर्म्मत्वोपपत्तिं कृत्वा अन्यस्मिन् चैत्रादौ तण्डुलनिष्ठविक्लित्त्यनुकूलव्यापाराभावो नञा बोधनीयः इति द्वितीयं समा-धानम् ।

**आक्षेपः -** कर्त्रन्तराध्याहारस्तु न युक्तः, ग्रामं गच्छन्ति न चैत्र इत्यापत्तेः । कर्त्रन्तराध्याहारे तेनैव सह तिबर्थकर्त्तुरन्वयेन चैत्रेण सह समानवचनत्वानियमात् ।

**समाधानम् -** परमलघुमञ्जूषायाम् उद्देश्यत्वयोग्यस्य कर्म्मसंज्ञेत्यर्थकरणेन ग्रामं न गच्छतीत्यादौ कर्म्मत्वोपपत्तिः कृतेति तद्वत् अत्रापि भवितुं शक्यमिति तृतीयं समाधानम् ।

**आक्षेपः -** इदमपि न सम्यक्, लघुमञ्जूषायामभावात्, योग्यताया अनुगमासम्भवाच्च ।

**समाधानम् -** पदार्थो द्विविधो बौद्धो बाह्यश्च । तत्र नञ्समभिव्याहारे बौद्धस्यैव बोधः । नञ्-पदं तात्पर्य्यग्राहकमिति बौद्धाथमादायैव कर्म्मत्वं सूपपादम्-इति चतुर्थं समाधानम् । अथवा, विवक्षातः कारकाणि भवन्तीति चिरन्तनोक्तेः चैत्रवृत्तिव्यापारप्रयोज्य-फलाश्रयत्वेन तण्डुलस्य विवक्षितत्वात् कर्म्मत्वम् । अत एव 'रथो ग्रामं गच्छती' त्यादौ ग्रामस्योद्देश्यताया आरोपेण कर्म्मत्वमिति लघुमञ्जूषायामुक्तम् ।

**आक्षेपः** - आम्, तर्हि प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेन वक्त्रा विवक्षितत्वं कर्म्मत्वम् एव मन्तव्यम् । अत एव विषयतासम्बन्धेन फलाश्रयत्वं यदा विवक्षितम्, तदा 'पुष्पाणि स्पृहयति' इति, फलतानवच्छेदकसमवायसम्बन्धेन फलाश्रयत्वं यदा विवक्षितं तदा कर्म्मसंज्ञाया अप्राप्त्या 'स्पृहेरीप्सितः' इति सम्प्रदानत्वे 'पुष्पेभ्यः स्पृहयति' इति प्रयोगः । अपि च, विपूर्वकभजधातोः त्यज-धातोश्च विभागानुकूलव्यापारवाचकत्वाविशेषेऽपि 'वृक्षं त्यजति खगः' इत्यत्र वृक्षस्य कर्म्मत्वम् प्रतियोगित्वविशिष्टसमवायं फलतावच्छेदकं मत्वा । अथ च 'वृक्षाद् विभजते शाखा' इत्यत्र अनुयोगित्वविशिष्टसमवायं फलतावच्छेदकं मत्वा न वृक्षस्य कर्म्मत्वमिति ।

**समाधानम्** - वस्तुतस्तु येन सम्बन्धेन फलाश्रयत्वमादाय कर्म्मसंज्ञा अनुभवसिद्धा स एव फलतावच्छेदको बोध्यः । तथापि कदाचित् कालिकसम्बन्धं स्वीकृत्य कालं पचतीति, समवायं स्वीकृत्य न च तादृशः प्रयोगः । आत्मा जानाति, आत्मानं जानाति, आत्मना जानाति । स्थाल्यां पचति, स्थाल्या पचति, स्थाली पचति । अपादानत्वेन गवादेः विवक्षायां पञ्चमी, कर्म्मत्वेन विवक्षायां द्वितीया, क्षीरान्वयित्वेन सम्बन्धप्रतियोगित्वेन यदा विवक्षा तदा षष्ठ्येव । इत्थं भाषायाः व्यवहाराधीनतया तत्र यथा यथा प्रयोगः उपलभ्यते, तेषु प्रयोगेषु विवक्षानुसारं वक्त्रा कर्मादीनां प्रयोगः कर्त्तुं शक्यः ।

**आक्षेपः** - नन्वेवं यदि व्यवहाराश्रिता भाषा स्यात् तदा अन्यथाऽपि प्रयोगो भवितुं शक्यः ।

**समाधानम्** - व्यवहारेण शिष्टव्यवहारो ग्राह्यः । तथाहि कारकं विवक्षाधीनम्, विवक्षा च शिष्टव्यवहाराधीना । शिष्टव्यवहारश्चात्र मुनित्रयसंमतो बोध्यः ।

**आक्षेपः** - अयि भोः । व्यवहारे 'ओदनं पचती'ति प्रयोगः । स च अनुपपन्नः । 'तण्डुलं पचती'ति प्रयोगेण भाव्यम् ।

**समाधानम्** - अत्र भाष्यकृतोक्तम् - तादर्थ्यात्ताच्छब्द्यम् इति । ओदनार्थाः तण्डुलाः, तस्मात् तण्डुला एवात्र ओदनपदव्यपदेश्यः । न च निष्प्रयोजन एष प्रयोगः, 'तण्डुला-न्पचती'त्युक्ते भर्जनादिरूपं विकारान्तरमपि प्रतीयेत ।

**आक्षेपः** - साधु । अन्तिमा जिज्ञासा । 'तण्डुलानोदनं पचति' आहोस्वित् 'तण्डुलानामोदनं पचती'ति ।

**समाधानम्** - उभयथापि भवितव्यम् । द्व्यर्थः पचिः, विक्लेदनं निर्वर्त्तनञ्च । विक्लेदनक्रियापेक्षं तण्डुलानां कर्म्मत्वम्, प्रधानभूतनिर्वर्त्तनक्रियापेक्षं त्वोदनस्य । तत्र तण्डुलानां कर्म्मत्वे 'तण्डुलान् पचन्नोदनं निर्वर्त्तयती'ति अर्थः । पचेर्विकारौदनयोगे षष्ठी । तथाहि 'तण्डुलविकारमोदनं निर्वर्त्तयती'त्यर्थः ।

**प्रथमः** - साधु ! साधु! जयतु संस्कृतम् ॥

**अपरः** - जयतु शास्त्रार्थः ।।

**व्याकरणविभागाध्यक्षः,**
**राष्ट्रियसंस्कृतसंस्थानम्,**
**क.जे.सोमैयासंस्कृतविद्यापीठम्,**
**विद्याविहारः, मुम्बई-७७**

★★★

# रसानां सुखदुःखात्मकत्वं

✍प्रो. अर्चना दुबे

**( रसस्तावत्त्रिविधः । काव्यरसो ( मनोनिष्ठः ) विषयरसो ( अन्तःकरणनिष्ठो ) ब्रह्मरसश्च ( आत्मनिष्ठः ) । तेषु काव्यरसोऽत्र प्रतिपाद्यः । तत्रायं रसः सुखात्मक एवेति बहवः । उभयात्मकः, तत्र केषुचित्कस्यचित् प्राधान्यं गौणत्वं वेत्यभिनवगुप्राचार्याः । केषाञ्चिद् दुःखात्मकत्वं, केषाञ्चिच्च सुखात्मकत्वमिति नाट्यदर्पणकृतोर्मतम्, अन्यौरपि कैश्चित् समर्थितम् । शोधपत्रमिदं तेषां समेषां मतं सम्यगुपपाद्य नाटयदर्पणकृन्मते श्रद्दधातीति लेखादस्मात् प्रत्येति । तत्रेदं विभावनीयम् - काव्यरसस्य लोकोत्तरत्वं ब्रह्मानन्दसहोदरत्वञ्चेति कश्चन सम्प्रदायः । तस्माद् विषयरसदर्शनाद् ब्रह्मरसदर्शनाच्चस्य भेदो नूनं विज्ञेयः । न च सहोदरत्वमित्युक्ते ब्रह्रसकाव्यरसयोः अभेद इति वाच्यम्, सर्वथा स्वीकृतेऽभेदे सहोदरत्वानुपपत्तेः, एकत्वादिपदानुक्तेश्च । सहोदरे स्वजनकजन्यत्वम् एकोदरशायित्वं वा सम्बन्धः । स च भेदे सति सम्बन्धः, सहोदरे रूपस्वभावादीनां तुल्यत्वानुभवात् । तस्मात् काव्यरसः किमात्मकः इति विचारे तत्र विषयरसस्य, ब्रह्मरसस्य च वासना उच्छेया । सत्येवमुच्छेदे एव तद्रसपरिचयोऽवाप्तुं शक्यः । तथाहि - न हि सुखं दुःखैर्विना लभ्यते इति, दुःखमिश्रितत्वात् सुखमपि दुःखमेवेति वाचस्पतिमिश्रवचोऽनुरोधाच्च यद्यपि सुखात्मकस्यापि रसस्योभ्यात्मकत्व वक्तुं शक्यम्, तथाप्युत्तरदशायां यदनुभवः तेनैव सर्वो रसो व्यपदेश्यः । आनन्दः सुखं वा अन्तःकरणे अनुभूयते । शृङ्गारहास्यादयो भवन्तु, करुणरौद्रादयो वा भवन्तु, तत्तद्रसोद्भवेन निर्मलान्तःकरणे याऽनुभूतिः सा सुखात्मिकैवेति सर्वोः रसः सुखात्मकः इति प्रतीमः, सुखस्यानुकूलवेदनीयत्वात् तदानीञ्चानुकूल्यानुभूतेः ॥ - स. )**

"रसभावाभिनयगाः" अर्थात् वृत्तयः रसानां भावानाम् अभिनयानाञ्च अनुसरणं कुर्वन्ति । तत्र तावत् रसानां वर्णनम् आवश्यकम् अस्ति । रसानां स्वरूपनिरूपणे नाट्यदर्पणकारो ब्रूते यत् -

**स्थायिभावः श्रितोत्कर्षो विभावव्यभिचारिभिः ।**<br>
**स्पष्टानुभावनिश्चेयः सुखदुःखात्मको रसः ॥**<br>
**कायहेतुः सहचारी स्थाय्यादेः काव्यवर्त्मनि ।**<br>
**अनुभावो विभावश्च व्यभिचारी च कीर्त्यते ॥**[1]

तात्पर्यमस्ति ललनादिरूपात् आलम्बनविभावात् उद्यानाद्युद्दीपनविभावाच्च आविर्भूतैः व्यभिचारिभावैः रसिकानां मनःस्थितैः हर्षमदगर्वादिभावैः परिपुष्टैः कटाक्षभुजक्षेपादिरूपैः कार्यभूतैरनुभावैः उपचितो निर्णीतो वा रत्यादिस्थायिभावः यदा भावैः एभिः उत्कर्षमाप्नोति अर्थात् प्राधान्येन अभिव्यक्तो भवति तदा सामाजिकैरनुभूयमानां दशां प्राप्तः सुखदुःखात्मकः स्थायिभावः एव रसः इति पदेन व्यवह्रियते । भरतमुनेरारभ्य सर्वैरप्याचार्यैः सर्वेऽपि रसाः सुखात्मकाः एव स्वीकृताः परमाभ्यामुच्यते यत् न हि सर्वे रसाः सुखस्वरूपाः ।

द्विविधाः रसाः – सुखात्मकाः दुःखात्मकाश्च अवगन्तव्याः । तदुक्तम् विवृत्यां यथा – "सुखदुःखस्वभावो रस्यते आस्वाद्यत इति रसः । तत्रेष्टविभावादिप्रथितस्वरूपसम्पत्तयः शङ्गारहास्यवीराद्भुतशान्ताः पञ्च सुखात्मानः, अपरे पुनरनिष्टविभावादि-उपनीतात्मानः करुणरौद्रबीभत्सभयानकाः चत्वारः दुःखात्मानः । यत् पुनः सर्वरसानां सुखात्मकत्वमुच्यते तत् दुःखात्मकप्रतीत्या बाधितम्" ।[2]

परमेतद्विचारणीयं यद् दुःखात्मकेषु रसेषु कथं सहृदयानां प्रवृत्तिः स्यादिति शङ्कायां ताभ्यामुच्यते यत् कवेः अभिनेतुर्वा नैपुण्येन चमत्कृताः सहृदयाः तान् रसान् प्रति प्रवर्त्तन्ते । यथोक्तं नाट्यदर्पणकाराभ्यां अनेनैव च सर्वाङ्ग-आह्लादकेन कविनटशक्तिजन्मना चमत्कारेण विप्रलब्धाः परम् आनन्दरूपतां दुःखात्मकेष्वपि करुणादिषु प्रतिजानते । एतदास्वाद-लौल्येन प्रेक्षका अपि एतेषु प्रवर्त्तन्ते ।[3]

नाट्यदर्पणे एव एतदप्युक्तं यत् नाट्यम् अभिनयन्तः अभिनेतारः तं रसम् अनुभवितुं शक्नुवन्ति यं रसं ते सहृदयान् अनुभावयितुं प्रवर्तन्ते यथा गणिकारतिसुखमनुभवति तथैव ते तद्रसम् अनुभवन्ति । यथोक्तं विवृत्याम् –

"पण्यस्त्रियो धनलोभेन पररत्यर्थं रत्यादि विपञ्चम-यन्त्यः कदाचित् स्वयम् अपि परां रतिम् अनुभवन्ति । गायकाश्च परान् रञ्जयन्तः स्वयम् अपि रज्यन्ते । एवं नटोऽपि रामादिगतं विप्रलम्भादि-अनुकुर्वाणः कदाचित् स्वयमपि तन्मयीभावम् उपयाति इत्येव ।

रसानाम् अलौकिकतया सह तेषां सुखदुःखतायाः प्रश्नोऽपि साहित्यिकानां कृते एकः विवेचनीयः विषयः अस्ति । अस्मिन् विषये प्रायः त्रीणि मतानि सन्ति । मम्मट-धनिक-धनञ्जय-विश्वनाथ-जगन्नाथाः तु रसाः नितान्तं सुखरूपाः आनन्दमयाः सन्ति इति ब्रुवते । एतैस्तु करुणरसस्यापि सुखात्मकत्वम् एव उच्यते । यथोक्तं विश्वनाथेन साहित्यदर्पणे –

**करुणादावपि रसे जायते यत्परं सुखम् ।**
**सचेतसामनुभवः प्रमाणं तत्र केवलम् ॥**
**किञ्च तेषु यदा दुःखं न कोऽपि स्यात्तदुन्मुखः ।**
**तथा रामायणादीनां भविता दुःखहेतुता ॥**[4]

विश्वनाथादयः रसस्य सुखात्मकतावादिनः ते हि तर्कत्रयं समुपस्थापयन्ति तद्यथा – काव्यस्य रसात्मिका अनुभूतिः आनन्दमयी भवति । सा च अलौकिकी अस्ति । सहृदयानान्तु शृङ्गारादीनाम्

इव करुणादिषु अपि आनन्दानुभूति: जायते । लोके कारणानि कार्याणि सहकारीणि यानि च तत्त्वानि भवन्ति, तानि (समाश्रित्य) नाट्ये अलौकिकविभावानुभावव्यभिचारिभावा: सम्पद्यन्ते । तेषां च व्यक्तिगत: अंश: तिरोहितो जायते तेन तेषां दु:खप्रदता न भवति ।[5]

काव्यगतरसानाम् अनुभूति: सत्त्वप्रधाना भवति रस: इतरान् सर्वान् अपि वेद्यान् तिरोधत्ते । रस: ब्रह्मास्वादसहोदरो भवति ।[6] रसानुभूति: तु इतराभ्योऽनुभूतिभ्य: विलक्षणा भवति ।

पाश्चात्यकाव्यशास्त्रिण: अपि रसान् आनन्दरूपान् प्रतिपादयन्ति । अस्मिन् सम्बन्धे अरस्तू इत्यभिधस्य काव्यशास्त्रिण: विरेचनसिद्धान्त: प्रसिद्ध: । तदनुसारं सन्त्रासानन्तरम् उत्तेजनया मनोवेगा: उपशान्ता: भवन्ति अर्थात् विरेचिता: भवन्ति । करुणत्रासादिभावानां कटुत्वं व्यपगच्छति तेन च मनसो वैशद्यं शान्तिश्च जायते । तस्मात् सहृदया: प्रसन्नमनस्का: भवन्ति । तथैव बुचर: कथयति यत् शोकादिस्थायिभावानां कटुत्वं तावत्कालपर्यन्तम् एव भवति, यावत् ते वैयक्तिकभौतिकसीम्नि निबद्धा भवन्ति । सीम्नो नाशानन्तरं कटुत्वम् अपि नष्टं भवति । तेन च आनन्दावाप्ति: भवति ।

प्रसिद्धो दार्शनिक: काण्ट:, कलावादिनौ समीक्षकौ रोजरफ्राइक्लाइववेल् इत्येतौ कलागताम् अनुभूतिं सर्वथा अलौकिकीं मन्वाते । तेन अलौकिकत्वात् रसानां सुखात्मकत्वम् अस्तीति वदत: ।

आधुनिकभारतीयसमीक्षक: डॉ. नगेन्द्र: अपि सुखदु:खात्मकत्वे विशिष्टं मतम् अतिष्ठिपत्। तस्य अनुसारं सर्वेषु अपि रसेषु आनन्दात्मिका अनुभूतिर्भवति । अनभूतिर्द्विविधा भौतिकी आध्यात्मिकी चेति । आध्यात्मिकी अनुभूति: भौतिक्या: अनुभूते: भिन्ना अतिपरिष्कृता सती केवलम् आनन्दात्मिका एव भवति ।

किन्तु अभिनवगुप्तेन रस: उभयात्मक: मन्यते अर्थात् प्रत्येकस्मिन् रसे सुखस्य दु:खस्य चेत्युभयोरपि समावेशो भवति किन्तु एतेषु शृङ्गारहास्यवीराद्भुतेषु सुखस्य प्राधान्यं भवति सहैव दु:खस्य अनुबोध: भवति । एतद्विपरीतं रौद्रभयानककरुणबीभत्सेषु दु:खस्य प्राधान्यं भवति सुखस्य चानुबोध: भवति । शान्त एव एकाकी रस: य: सुखात्मक एव । एष विषय: अभिनवगुप्तेन अभिनवभारत्या: प्रथमे अध्याये विस्तरेण प्रतिपादित: ।

नाट्यदर्पणकारयो: रामचन्द्रगुणचन्द्रयो: मतम् एतयो: द्वयारपि मतयो: भिन्नम् अस्ति । मतमिदं वयं विभाज्यवादिन: मतम् इति वक्तुं शक्नुम: । विश्वनाथादय: सर्वानपि रसान् सुखात्मकान् कथयन्ति, अभिनवगुप्तश्च सर्वान् अपि रसान् उभयात्मकान् ब्रूते, किन्तु रामचन्द्रगुणचन्द्रयो: मत न तु सर्वे रसा: सुखात्मका: न वा सर्वे सुखदु:खोभयात्मका: सन्ति । अपितु तेषां रसानां द्विधा आभ्यां विभाग: कृत: । केचन रसा: तत्र केवलं सुखात्मका: केचन च केवलं दु:खात्मका: सन्ति । यथा शृङ्गारहास्यवीराद्भुतशान्ता: रसा: केवलं सुखात्मका:, करुणरौद्रबीभत्सभयानका: चत्वार: रसा: सर्वथा दु:खात्मका: सन्ति । यथोक्तं ताभ्याम् –

**तत्रेष्टविभावादिप्रथितस्वरूपसम्पत्तय: शृङ्गारहास्यवीराद्भुतशान्ता: पञ्च सुखा-त्मानोऽपरे पुनरनिष्टविभावाद्युपनीतात्मान: करुणरौद्रबीभत्सभयानका: चत्वार: दु:खात्मान: इति ।**[7]

न केवलम् एतावता एव, आभ्याम् अभिनवगुप्तस्य उभयात्मकतावादस्य अथ च विश्वनाथादीनां सुखात्मकतावादसिद्धान्तस्य अपि स्पष्टतया खण्डनं विहितम्, एकान्तसुखात्मकता-वादस्य खण्डनं कर्तुम् ऊचतु: यत् –

"यत् पुन: सर्वरसानां सुखात्मकत्वम् उच्यते तत् प्रतीतिबाधितम् । आस्तां नाम मुख्यविभावोपचित: काव्याभिनयोपनीतविभावोपचितोऽपि भयानको बीभत्स: करुणो रौद्रो वा रसास्वादवताम् अनाख्येयां कामपि क्लेशदशामुपनयति । अत एव भयानकादिभि: उद्विजते समाज:। न नाम सुखास्वादात् उद्वेगो घटते"।[8]

तात्पर्यमस्ति यत् सर्वेषाम् अपि रसानां कैश्चित् सुखात्मकत्वम् एव उच्यते तत्तु प्रत्यक्षम् अनुभूयमानया दु:खात्मकप्रतीत्या बाधितम् एव । एतच्चिन्तनीयं यत् भयानककरुणरौद्रबीभत्सेभ्य: रसेभ्य: सामाजिका: अवर्णनीयां काञ्चित् क्लेशदशाम् अनुभवन्ति । क्लेशदशावशात् एव भयानकादिभ्यो रसेभ्य: समाज: उद्विजते । सुखास्वादात् कथम् उद्वेगस्य सिद्धि: भवति । उद्वेगस्तु दु:खास्वादात् एव तेन न एतेषां चतुर्णां रसानां सुखात्मकत्वम् इति ।

इत्थमेताभ्याम् आचार्याभ्यां केषाञ्चन रसानां सुखात्मकत्वं केषाञ्चन च दु:खात्मकत्वमस्तीति उपस्थापितम् । रसानां सुखदु:खात्मकत्वस्य मतं केवलं नाट्यदर्पणकारयोरेव न अपितु ततोऽपि पूर्वम् अभिनवगुप्तेन अभिनवभारत्यां कस्यचित् प्राचीनस्य आच्चार्यस्य मतत्वेन उल्लिखितम् । तस्य मतस्य अनुसारम् अपि रसानां सुखदु:खात्मकत्वम् आसीत् । रुद्रभट्टोऽपि रसकलिकायाम् एतस्य मतस्य समर्थनं कृतवान् । भोजश्च शृङ्गारप्रकाशे रसानां सुखदु:खात्मकत्वं स्व्यकार्षीत् । वामनोऽपि करुणरसवत्सु नाटकेषु जनानाम् उभयात्मिका अनुभूति: भवति इति ब्रूते । प्रसिद्ध: अद्वैतवदान्ती आचार्यमधुसूदनसरस्वती अपि नाट्यदर्पणकारयो: मतं समर्थयामास । इत्थं रसानां सुखदु:खात्मकत्वे केवलम् एतयोर्नाट्यदर्पणकारयोरेव मतं नास्ति इत्यपि विदितं भवति ।

**सन्दर्भा:**

1. नाट्यदर्पण: 3.7-8
2. स्वोपज्ञनाट्यदर्पणविवृति: 3.7
3. नाट्यदर्पणविवृति: 3.7
4. साहित्यदर्पण: 3.4-5
5. काव्यप्रकाश: - 4.27-28
6. सत्वोद्रकादखण्डक्ष्वप्रकाशानन्दचिन्मय: ।
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदर: ।। साहित्यदर्पण: 3.2
7. स्वोपज्ञनाट्यदर्पणविवृति: 3.7
8. स्वोपज्ञनाट्यदर्पणविवृति: 3.7

**अनुस्नातकभवनाध्यक्षा,**
**श्रीसोमनाथसंस्कृतविश्वविद्यालयः,**
**वेरावलम् ( गुजरातम् ) ।**

★★★

# वर्णान्तरत्व के सिद्धान्त

✍ आचार्य उदयन मीमांसक

**(भाषा का मूल वर्ण है । वही पदत्व, वाक्यत्व और महावाक्यत्व हो प्राप्त करता है । वर्ण, व्यक्त ध्वनि का नाम है । अव्यक्तध्वनि जब तत्तत्स्थान एवं करण के आघात को सहती है तो वही व्यक्त होती हुई वर्णत्व को प्राप्त करती है । वर्णों के तिरेसठ भेद होते हैं । वहीं प्लुतलृकार भी मानने पर चौंसठ वर्ण होते है । पारम्परिक मान्यता के अनुसार स्वर - २१ (अ, इ, उ, ऋ का ह्रस्व-दीर्घ-प्लुत होने से - १२, ए, ओ, ऐ, औ का दीर्घप्लुत भेद से ८, ह्रस्व लृकार - १) स्पर्श - २५, यादि - ८, (य, व, र, ल, श, ष, स, ह), यम - ४, अनुस्वार-विसर्ग-जिह्वामूलीय-उपध्मानीय - ०४, दुःस्पृष्ट (दो स्वरों के मध्य रहनेवाला लकार) - १, ये तिरेसठ वर्णों का विवरण है । विद्वान् लेखक ने प्राचीन ग्रन्थों को आधार मानकर और अपनी मेधा का प्रयोग कर वर्णों के कौन-कौन से ६३ भेद होने चाहिए - इसका गवेषणापूर्ण विवेचन यहाँ किया है । मतान्तर का प्रमाणों के आधार पर खण्डन कर इन्होंने वर्णान्तरत्व के सिद्धान्त का जो प्रतिपादन किया है - वह ध्वनिविज्ञान और वर्णविज्ञान में रुचि रखनेवाले पाठकों के लिए अत्यन्त उपादेय है ॥ - स.)**

वाक्तत्त्व (भाषा) एक ऐसा अलौकिक साधन है, जिससे मनुष्य को मानवता प्राप्त होती है, ज्ञानवर्धन होता है, मोक्ष की प्राप्ति होती है, देवत्त्व, ऋषित्व एवं वैदुष्य आदि उपलब्ध होते हैं, एक श्रेष्ठ समाज व राष्ट्र का निर्माण हो सकता है या संगठित हो सकता है । वाणी की महिमा का अधिक वर्णन क्या करें, इसमें तो सम्पूर्ण संसार समाया हुआ है। इस दिव्य ज्योति के विना निखिल जगत् घोर अन्धकारमय दीखता है । ऐसी महिमा मण्डित वाणी वाक्यों के रूप में प्रकट होती है । वे वाक्य शब्दों में एवं शब्द वर्णों में विभाजित होते हैं, यह वाक्तत्वविद् मनीषियों का निर्णीत सिद्धान्त है । वाक्य के अन्दर शब्दों तथा शब्दों में वर्णों की जो परिकल्पना की जाती है, उस के पीछे बहुत बड़ा मनोविज्ञान एवं भाषाविज्ञान छिपा हुआ है । यहाँ हम यह विचार करने का प्रयत्न करते हैं कि एक वर्ण अन्य वर्णों से भिन्न वा वर्णान्तर किस नियम से बना अर्थात् वर्णों की परिगणना के मूलभूत सिद्धान्त क्या हैं?

वर्णों के वर्णान्तरत्व को समझने के लिए शब्दोत्पत्ति के प्रकार को पहिले समझना होगा । महर्षि कणाद कहते हैं कि-**"संयोगाद् विभागाच्च शब्दाच्च शब्दनिष्पत्तिः"** (वैशैषिक. 2.2. 31) अर्थात् भेरी-दण्ड, कुठार-काष्ठ आदि पदार्थों के संयोग से एवं काष्ठ, वस्त्र आदि के विभाग से भी ध्वनि निष्पन्न होती है और वीचीतरंगन्याय[1] से शब्द से शब्द की उत्पत्ति होती है । यहाँ यह ध्यातव्य है संयोग, विभाग जिन पदार्थों में घटित होते हैं, उन पदार्थों के गुण, धर्म और आघातादि के बल के भेद से शब्दों (अव्यक्त ध्वनियों) में भी विभिन्नता आती है । ध्वनियाँ दो प्रकार की होती हैं-1. अव्यक्तध्वनि, 2. व्यक्तध्वनि (वर्णात्मकध्वनि) । भेरीदण्डादि के आघात से उत्पन्न ध्वनियाँ अव्यक्तध्वनियाँ हैं । वर्णात्मकध्वनि मुखप्रदेश में उत्पन्न होती है । अव्यक्तध्वनियों के भेद के समान ही व्यक्तध्वनियों में भी स्थान एवं करणों के भेद से, संयोगभेद से तथा वायु के आघात आदि के भेद से भिन्नता उत्पन्न होती है । इस भिन्नता के कारण ही उन व्यक्तध्वनियों को वर्ण कहते हैं । क्योंकि 'उ+अ+ऋणः' के संयोग से 'वर्ण' शब्द बनता है [उ+अ+ऋणः=व+ ऋणः (गतः, प्राप्तः)=वर्णः][2] । इसका भाव यह है कि जो ध्वनि (नाद) अ, उ....इस प्रकार की भिन्नता (ध्वनिविशेषता) को प्राप्त कर लिया है, वही 'वर्ण' कहलाता है । इस प्रकार ध्वनिसामान्य (नाद) का ध्वनिविशेष में परिवर्त्तित होना ही वर्णों का वर्णत्त्व है । यहाँ उकार एवं अकार वर्णमात्र के उपलक्षक हैं । उपलक्षणत्व एक वर्ण से भी सिद्ध हो सकता है । अतः अकारमात्र को सभी वर्णों का उपलक्षक मानेंगे तो अ+ऋणः='अर्णः' शब्दः बनता है, जो कि वर्णवाची है (द्र. वाचस्पत्यम्-अर्णः) । वर्णशब्द में अकार के साथ उकार का उल्लेख उपलक्षणत्व का व्याख्यान जानना चाहिए ।

वर्णविभाजन का स्पष्ट उल्लेख सर्वप्रथम हमें ऐतरेयारण्यक में मिलता है-**"यो वै तां वाचं वेद यस्या एष विकारः स सम्प्रतिवित् । अकारो वै सर्वा वाक्, सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूप भवति"** (ऐ. आ. 2.3.6) । एक ही अवर्णरूपी वाणी[3] स्पर्श, ऊष्मादि से व्यक्त होती हुई भिन्न-भिन्न रूपों में परिवर्त्तित होती है । यहाँ स्पर्श शब्द से कण्ठादि स्थान एवं जिह्वादि करणों का परस्पर संयोग-विभागरूप अन्तःप्रयत्न (आस्यप्रयत्न) रूपी अर्थ ग्राह्य है । ऊष्मशब्द बाह्ययत्नों का उपलक्षक है । अब उस वचन का तात्पर्य यह हुआ हि एक ही ध्वनि (नाद) स्थान, करण और उभयविधप्रयत्नों की भिन्नता से विभिन्न ध्वनिविशेषों (भिन्न-भिन्न वर्णों) में परिवर्त्तित होती है । इसे ही महर्षि पाणिनि ने कहा - **"आकाशवायुप्रभवः शरीरात् समुच्चरन् वक्त्रमुपैति नादः । स्थानान्तरेषु प्रविभज्यमानो वर्णत्वमागच्छति यः स शब्दः"** (पाणिनीयशिक्षा-1) ।

भर्तृहरि ने भी कहा है कि-

**लब्धक्रियः प्रयत्नेन वक्तुरिच्छानुवर्त्तिना ।**
**स्थानेष्वभिहितो वायुः शब्दत्वं प्रतिपद्यते ॥**

(वा.प्र.ब्रह्म.108)

जो भेदरहित नाद (अनानाभूत ध्वनिसामान्य) स्थानादियों में प्रविभक्त होकर वर्णत्व (नानात्त्व अर्थात् ध्वनिविशेषत्व) को प्राप्त होता है, वही वर्ण (व्यक्तध्वनि) कहलाता है । अर्थात् अव्यक्तध्वनि का अत्व, इत्व, उत्व, कत्व, गत्व आदि व्यक्तध्वनि के रूप में परिवर्तित होना ही वर्णों का वर्णत्व है ।

**तस्य प्राणे[4] च या शक्तिर्या च बुद्धौ व्यवस्थिता[5] ।**
**विवर्तमाना स्थानेषु सैषा भेदं प्रपद्यते ॥** (वा.प.ब्रह्म.117)

**शब्दः[6] प्रकृतिः सर्ववर्णानाम्, तस्य रूपान्यत्वे वर्णान्यत्वम्[7]**
(तैत्तिरीयप्रातिशाख्य-22.1,2)

**तत्तद्वर्णोत्पादकत्वेनाभिमतवायुसंयोगनिष्ठं तत्तद्वर्णजनकताया व्यञ्जकताया वा च्छेदकं वैजात्यम् (कत्वादिविरुद्धधर्मम्) आदायैव ककारो गकार इत्यादिप्रतीतिवैलक्षण्यसंभवात्**
(वैयाकरणभूषणसारः, अखण्डस्फोटनिर्णयः)

इन वचनों में और ऐतरेय आरण्यक (2.3.6) में कथित वर्णविभाजन के सिद्धान्त को ही अपना कर पाणिनि मुनि ने सूत्रप्रणयन किया है कि-**''स्थानकरणप्रयत्नपरेभ्यो वर्णास्त्रिषष्टिः, चतुःषष्टिरित्येके''** (पा.शि. 4,5) । स्थान, करण और उभयविध प्रयत्नों के भेद से ही वर्णों में भिन्नता आती है । उसी भिन्नता के कारण वर्णों का परिगणन होता है । जिससे वे वर्ण तेरसठ (63) या चौंसठ (64) बनते हैं । श्लोकात्मक पाणिनीयशिक्षा में भी कहा गया है - **तेषां विभागः पञ्चधा स्मृतः ॥ स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः । इति वर्णविदः प्राहुर्निपुणं तन्निबोधत** (9,10) ।। यहाँ स्पष्टतया कहा गया है कि वर्णविभाजन के नियम पांच प्रकार के हैं-1. स्वर, 2. काल, 3. स्थान, 4. (अन्तः) प्रयत्न और 5. अनुप्रदान (बाह्ययत्न) ।

वर्णों का विभाजन मुख्यतया दो प्रकार से किया गया है-1. स्वर (अच्), 2. व्यञ्जन (हल्) । इस विभाजन के कारण ये हैं कि - (अ) स्वर किसी अन्य वर्ण की सहायता के विना ही स्वयं स्वतन्त्र रूप से उच्चरित होने में पूर्ण समर्थ है जबकि व्यञ्जन स्वरों की सहायता से ही उच्चरित होते हैं । (आ) दूसरा कारण यह भी है कि स्वरों के उच्चारण में स्थान एवं करणों का परस्पर स्पर्श नहीं होता, जबकि व्यञ्जनों के उच्चारण में उनका स्पर्श होता है । (इ) इन दो वर्गों में तीसरा भेद यह है कि स्वर उदात्तादि गुणों से युक्त होते हैं, जबकि ये गुण व्यञ्जनों में नहीं रहते । इस प्रकार के विभेदों के कारण सभी वर्णों को सर्वप्रथम स्वर तथा व्यञ्जन के रूप में विभक्त किया गया है । स्वर वर्णों को पुनः द्विधा विभाग किया गया है-1. समानाक्षर (=शुद्धस्वर, सिम्), 2. सन्ध्यक्षर (मिश्रितवर्ण) (द्र.ऋ.प्राति. 1.1,2; वा. प्राति. 1.44,45; तै. प्रा. 1.2; ऋक्तन्त्र 1.2) । समानाक्षर वर्ण वे हैं जो किसी अन्य वर्ण की सन्धि से उत्पन्न न होकर समान (एक) स्वर से उत्पन्न होते हैं (द्र. तै. प्राति. 1.2 पर वैदिकाभरण भाष्य) । ए, ऐ, ओ, औ, वर्ण दो-दो शुद्ध स्वर वर्णों की सन्धि से उत्पन्न होते हैं, अतः इन्हें सन्ध्यक्षर कहा गया है । पहिले समानाक्षरों (शुद्धस्वरों) को स्थान दिया गया है, तत्पश्चात् सन्ध्यक्षरों को ।

अब **'स्थानकरणप्रयत्नपरेभ्यो वर्णास्त्रिषष्टिः'** **(४)** के आधार पर क्रमशः वर्णविभाजन का अवलोकन करते हैं-

**स्थानभेद से वर्णविभाजन**-नाभिप्रदेश से उत्थित वायु कण्ठप्रदेशीय स्वरयन्त्र में आघात करने के पश्चात् नादयुक्त होकर जब मुख में पहुँच जाता है, तब जिह्वादि करणों की सहायता से वह कण्ठ, तालु आदि स्थानों को प्राप्त होता है । इस प्रकार स्थान भेद से एक ही नादध्वनि में भिन्नता आती है । उस भिन्नता से युक्त वर्णों को कण्ठ्य, तालव्य, मूर्धन्य, दन्त्य और औष्ठ्य आदि के रूप में विभाग किया गया है । इत्थं वह नादध्वनि स्वरों में कण्ठादि के भेद में क्रमशः अ, इ (ए, ऐ), ऋ, ऌ, उ (ओ, औ) के रूप में परिवर्त्तित हुई । व्यञ्जनों में भी क्रमशः कवर्ग-ह-विसर्ग, चवर्ग-य-श, टवर्ग-र-ष, तवर्ग-ल-स-व और पवर्ग के रूप में विभाजित हुई ।

**करणभेद से वर्णविभाजन**-स्थानतः वर्णविभाजन के अन्तर्गत ही करणतः वर्णविभाजन आ जाता है, यह कोई पृथक् रूप से वर्णविभाजन का कारक नहीं है । क्योंकि केवल कण्ठादि स्थानों से या केवल जिह्वादि करणों की चेष्टा से वर्ण उत्पन्न नहीं होते, अपितु दोनों के सम्मिलित प्रयत्न से ही वर्ण उत्पन्न होते हैं । कण्ठादि स्थानों में जिह्वामूलादि[8] करणविशेषों के सम्मिलित प्रयत्न (स्पर्शादि) से ही कण्ठ्यादि वर्ण उत्पन्न होते हैं, अतः कण्ठ्यादि विभाजन में दोनों की पात्रता है । इसीलिए सम्भवतः श्लोकात्मक पाणिनीयशिक्षा में करणतः विभाजन का उल्लेख नहीं है । स्वतन्त्ररूप में करणों के आधार पर वर्णविभाजन न होने पर भी वर्णों का क्रमविन्यास करणों के क्रम से ही निर्णीत किया गया है । इस के लिए मद्विरचित शिक्षाशास्त्र-शिक्षातत्त्वालोकभाष्य के 113-114 पृष्ठ विशेषतः द्रष्टव्य हैं ।

**प्रयत्नतः वर्णविभाजन**-शिक्षासूत्रस्थ (4) प्रयत्न शब्द स अन्तःप्रयत्न एवं बाह्ययत्न दोनों ही ग्राह्य हैं । अन्तःप्रयत्न मुख में होते हैं तो बाह्ययत्न नाभि से स्वरयन्त्र तक होते हैं। ये दोनों भिन्न-भिन्न देशीय होने के कारण इनमें भेद किया गया है । इनकी भिन्नता से वर्णों में भी भिन्नता आ जाती है । अत एव श्लोकात्मक शिक्षा में दोनों का पृथक्-पृथक् उल्लेख है-1. प्रयत्नतः (=अन्तःप्रयत्नतः), 2. अनुप्रदानतः (यह बाह्ययत्नों का उपलक्षक है) ।

**१. अन्तःप्रयत्नतः वर्णविभाजन** -

यहाँ अन्तःशब्द का अर्थ अन्दर नहीं है, अपितु समीप है । जो यत्न वर्णोत्पत्ति के समीप में रहते हैं, उन्हें अन्तःप्रयत्न कहते हैं अर्थात् जिन यत्नों के समनन्तर ही वर्णोत्पत्ति होती है या जो यत्न वर्णोत्पादन में साक्षात् कारण बनते हैं, वे ही अन्तःप्रयत्न कहलाते हैं । वे पांच हैं-1. स्पृष्टता, 2. ईषत्सृष्टता, 3. ईषद्विवृतता, 4. विवृतता, 5. संवृतता ।

अवर्ण, कवर्ग, हकार और विसर्जनीय ये सभी कण्ठ्य वर्ण समान स्थान (कण्ठ-1.2) और समान करण (जिह्वामूल-2.3) से उच्चरित होते हुए भी इनका

अन्त:प्रयत्न भिन्न-भिन्न होने के कारण इनमें भिन्नता आती है । ह्रस्व अवर्ण का अन्त:प्रयत्न संवृत (3.12) है तो दीर्घ और प्लुत अवर्ण का विवृत (3.11) है, वैसे ही कवर्ग स्पृष्टप्रयत्न वाले (3.4) हैं, हकार विवृत प्रयत्नक है, विसर्जनीय अस्पृष्ट स्थितप्रयत्न[9] वाला है । तालव्य (इवर्ण, चवर्ग, यकार, शकार-1.8) वर्णों का भेदत्व भी दिखाते हैं-इवर्ण का अन्त:प्रयत्न विवृत है (3.8), चवर्ग स्पृष्टप्रयत्नक है (3.4), यकार ईषत्स्पृष्टता (3.5) वाला है तो शकार ईषद्विवृतता (3.6) वाला है । इसीप्रकार मूर्धन्य, दन्त्य आदि वर्णों में भी भेद जानना चाहिए ।

यहाँ यह भी ध्यान देने योग्य है कि कवर्गादि पच्चीस वर्णों का अन्त:प्रयत्न स्पृष्टता (3.4) ही है पुनरपि स्थान एवं करणों के भेद से उनमें भिन्नता आई है अर्थात् वर्गात्मक भेद उत्पन्न हुआ है । ह्रस्व अवर्ण को छोड़कर शेष सभी स्वरों (अचों) का अन्त:प्रयत्न विवृत है, पर स्थान, करणों के भेद से ही इनमें वर्णान्तरता आई है । इसीप्रकार अन्त:स्थ एवं ऊष्मादि में भी समझलेना चाहिए ।

**२. बाह्ययत्नत: वर्णविभाजन-**

शब्दोत्पत्ति की प्रक्रिया बाह्ययत्न से आरम्भ होती है,[10] तत्पश्चात् अन्त:प्रयत्न और उसके बाद शब्दोत्पत्ति होती है अर्थात् बाह्ययत्न शब्द का साक्षात् कारण नहीं है, अपितु परम्परया कारण है । बाह्ययत्न अन्त:यत्नों के कारण हैं तो अन्त:यत्न शब्द के कारण हैं। बाह्ययत्न एवं शब्दोत्पत्ति के मध्य में अन्त:यत्न का व्यवधान है । इसी व्यवधान के कारण ये यत्न शब्द से दूर व बाह्य कहलाते हैं । यहाँ बाह्य का अर्थ बाहर नहीं, अपितु दूर है । बाह्ययत्न बारह (12) प्रकार से विभक्त है- 1. विवार, 2. संवार, 3. श्वास, 4. नाद, 5. घोष, 6. अघोष, 7. अल्पप्राण, 8. महाप्राण, 9. उदात्त, 10. अनुदात्त, 11. स्वरित, 12. काल[11] । उदात्तादि स्वर और काल बाह्ययत्नों के अन्तर्गत होने से वर्णविभाजन के निमित्तों में इनकी पृथक् गणना करने की आवश्यकता नहीं है, जैसे कि श्लोकात्मक पाणिनीयशिक्षा (9,10) में की गई है ।

प्रत्येक वर्ग के प्रथम, द्वितीय वर्ण विवृतकण्ठ, श्वासानुप्रदान और अघोष बाह्ययत्न वाले हैं (4.2) जब कि तृतीय, चतुर्थ एवं पञ्म वर्ण संवृतकण्ठ, नादानुप्रदान और घोष बाह्ययत्न वाले हैं (4.4) । इसप्रकार प्रत्येक वर्ग के प्रथम-द्वितीय तथा तृतीय, चतुर्थ एवं पञ्चम वर्ण भिन्न हो गये । पुन: प्रथम, द्वितीय तथा तृतीय, चतुर्थों में भी क्रमश: एक अल्पप्राण तथा दूसरा महाप्राण (4.3.5) बाह्ययत्नों के कारण वर्णान्तरता आई । तृतीय एवं पञ्चम वर्णों के उक्त सभी बाह्ययत्न समान होने पर भी आनुनासिकक्यधर्म (4.6,7) से पञ्चम वर्ण तृतीयों से वर्णान्तर हुए । अन्तस्थ तथा ऊष्मवर्णों के भेदक तो स्थान और करण ही है । क्योंकि अन्त:स्थ वर्णों का अन्त:प्रयत्न (ईषत्स्पृष्टत्व - 3.5) और बाह्ययत्न (संवृतकण्ठ, नादानुप्रदान, घोषत्व - 4.4) समान

ही है । ऊष्म वर्णों में भी श,ष, स वर्णों का बाह्ययत्न विवृकण्ठादि (4.2) हैं, तो हवर्ण के संवृतकण्ठादि (4.4) हं । इस प्रकार सभी वर्णों के वर्णान्तरत्व को स्पष्टतया समझने के लिए शिक्षाशास्त्र के परिशिष्ट - 6 में दी गई तालिकाओं का अवलोकन करें।

## कालादि से वर्णविभाजन

काल एवं उदात्तादि के कारण प्राप्त वर्णान्तरता को केवल स्वर (अच्) वर्णों में ही देखी जाती है । सानुनासिकत्व तथा निरनुनासिकत्व धर्म से प्राप्त वर्णान्तरत्व अज्वर्णों और य, ल, व वर्णों में देखा जाता है । वह इसप्रकार - अ, इ, उ आदि वर्ण स्थान की भिन्नता से ही वर्णान्तरत्व को प्राप्त होते हैं । अकारादि अज्वर्ण ह्रस्व, दीर्घ और प्लुत के रूप में काल की भिन्नता से भिन्न-भिन्न हो जाते हैं - **ऊकालोऽज्झ्रस्वदीर्घप्लुतः** (अष्टा. 1.2.27) । और प्रत्येक अज्वर्ण उदात्त, अनुदात्त, स्वरितरूप बाह्ययत्न के कारण पुनः तीन प्रकार से विभक्त होते हैं । इसप्रकार अ, इ, उ, ऋ ये चार वर्ण अठारह वर्ण बनते है (6.1.2.3) और शेष लृ एवं सन्ध्यक्षर बारह-बारह वर्ण बनते हैं (6.4.5.7.8) ।

नाभि से उत्थित वायु नाद के रूप में परिवर्त्तित होकर वह एक ही अव्यक्तध्वनि भिन्न-भिन्न वर्णों (व्यक्तिध्वनियों) के रूप में परिवर्त्तित होती है, इसे हमने जान लिया । यहाँ और एक महत्वपूर्ण विषय विचार करने योग्य है कि महर्षि पाणिनि के द्वारा उक्त 'वर्णास्त्रिषष्टि' तेरसठ वर्णों की वर्णमाला में ऊपर वर्णित वर्णों में से किन-किन का ग्रहण होता है ? अर्थात् वर्णमाला का स्वरूप क्या हो ? यह विवेचनीय विषय है ।

प्रसिद्ध वर्णमाला के अनुसार अ, इ, उ, ऋ इन चार स्वरवर्णों के ह्रस्व, दीर्घ, प्लुत भेद से बारह वर्ण बनते हैं, लृ-स्वर के स्वर और प्लुत भेद से दो वर्ण तथा ए, ऐ, ओ, औ इन सन्ध्यक्षरों के दीर्घ एवं प्लुत भेद से आठ वर्ण बनते हैं । कुल मिलाकर स्वर (अच्) वर्ण (12+2+8) बाईस (22) हो जाते हैं । इस संख्या में 25 स्पर्श वर्ण तथा चार अन्तस्थ, चार ऊष्म, आठ अयोगवाह (विसर्ग, जिह्वामूलीय, उपध्मानीय, अनुस्वार और चार यम) को मिलाकर (22+25+4+4+8) 63 (तेरसठ) वर्ण पूरे हो जाते हैं ।

यह वर्णमाला परम्परा से लोक में एवं सभी प्रामाणिक आचार्यो, शिष्टपुरुषों के द्वारा स्वीकृत होने पर भी कुछ सुधी विचारकों के मन में यह आशंका बनी रहती है कि बाल रूपी गुण को भेदक मानकर अज्वर्णों के ह्रस्व, दीर्घ एवं प्लुतों की गणना की गई है, परन्तु सानुनासिक, निरनुनासिक और संवृत आदि गुणों के आधार पर वर्णों की गणना क्यों नहीं की जाती ? इसमें कुछ लोगों का आग्रह भी रहता है । उनके अनुसार इसप्रकार होनी चाहिए -

अ, इ, उ, ऋ, लृ, ए, ऐ, ओ, औ इन नौ वर्णों के सानुनासिक और निरनुनासिक भेद से 18 हो जाते हैं । निरनुनासिक अ तथा आ वर्णों के क्रमशः संवृत और विवृतरूपी अन्तःप्रयत्न से भिन्न-भिन्न होने के कारण 'अ' से आ वर्ण की पृथक् गणना करने से स्वर वर्ण 19 हो जाते हैं

। इस संख्या में 25 स्पर्श वर्ण मिलाने से (19+25) 44 वर्ण बनते है । अन्त:स्थ वर्णों (य, र, ल, व) में से रेफ को छोड शेष तीनों का सानुनासिक एवं निरनुनासिक भेद से (य्, यँ्, ल्, लँ्, व्, वँ् + र्) अन्त:स्थ वर्ण सात (7) हो जाते है । श, ष, स, ह, विसर्जनीय, जिह्वामूलीय, उपध्मानीय और अनुस्वार इन 8 ऊष्म वर्णों को एवं चार यमों को मिलाकर (44+7+8+4) 63 वर्ण पूर्ण हो जाते हैं ।

उनका तर्क यह है कि पाणिनि ने **स्थानकरणप्रयत्नपरेभ्यो वर्णास्त्रिषष्टि:** सूत्र में स्थान, करण एवं प्रयत्न (अन्त: व बाह्य) को ही वर्णों के भेदक माने हैं, न कि काल को । इसलिए ह्रस्वादि की अपेक्षा सानुनासिक आदियों का परिगणन ही उचित है । अब इस मत की समीक्षा की जाती है ।

इसप्रकार के परिगणन की परम्परा किसी भी संस्कृतादि भारतीय भाषाओं में नहीं है । लोकप्रमाण के सामने पाणिन्यादि सभी आचार्य नतमस्तक हो जाते हैं । ऐसी स्थिति में यह पक्ष अपने आप निरस्त हो जाता है । साथ में इस वर्णमाला को प्रमाणित करने के लिए किसी प्रामाणिक आचार्य का पुष्टीकरण भी प्राप्त नहीं होता । पुनरपि इसप्रकार का विभाजन प्रचलित न होने में क्या कारण रहें होंगे । उन पर विचार तो करना ही पडेगा, नहीं तो विषय सभी के लिए सन्दहास्पद बना ही रहता है ।

पाणिनि के द्वारा उक्त स्थान, करण और प्रयत्न रूपी वर्णविभाजन के हेतुओं में जो प्रयत्नशब्द है वह उभयविध प्रयत्नपरक है । काल भी बाह्ययत्नों के अन्तर्गत स्वीकृत है । इस के लिए पाणिनीयशिक्षा के 8.30.31 सूत्र और इन सूत्रों का शिक्षातत्त्वालोकभाष्य विशेषतया द्रष्टव्य है । तो यहां 'काल को पाणिनि ने भेदक नहीं माना' यह कहना महती भूल होगी ।

पहले कह चुके हैं कि स्वर वर्णों को समानाक्षर एवं सन्ध्यक्षरों में विभक्त किया गया है। समानाक्षरों का परिगणन करते हुए प्रातिशाख्यों में कहा गया है कि 'अ इति आ इति आ3 इति, ई इति, ई इति, ई3 इति......' (वा. प्राति. 8.3, अपि च द्र. ऋ. तं. 1.2 आदि) । यहाँ स्पष्टरूप से ह्रस्वादि कालों को भेदक माना गया है । प्रातिशाख्यों के इस वर्णन से यह भी स्पष्ट है कि पाणिनि से पूर्व ही स्वरवर्णों में ह्रस्वादि वर्णों की गिनती होती थी ।

इस विषय में आचार्य पाणिनि की भी पूर्ण अभिमति थी । वह इसप्रकार है – लोक में एकमात्रा आदि कालों को भेदक मान कर ह्रस्व, दीर्घ, प्लुत वर्णों का प्रचलन था । इस भेदकत्व से व्याकरण का कार्य चल नहीं सकता, इसलिए व्याकरण में अकारादि वर्णों को जाति निर्देश माना जाता है । इस जातिनिर्देश के कारण जहाँ-जहाँ अतिव्याप्ति दोष आता है, वहाँ-वहाँ आचार्य तपरकरणरूपी विशेषयत्न कर तत्कालों का ग्रहण कराते हैं, और भिन्न कालों का वारण । तपरनिर्देश स्थलों पर सर्वत्र सानुनासिक एवं उदात्तादि गुणियों का ग्रहण अभीष्ट है, वे गुण वर्णों के भेदक नहीं हैं ।

व्याकरणशास्त्र में उदात्तादि गुणों को भेदक एवं अभेदक दोनों पक्ष स्वीकारे गए है, पर अन्त में अभेदक पक्ष ही न्याय्य माना है – 'उभयमिदं गुणेषूक्तम् – भेदका:, अभेदका इति । किं न्याय्यम्? अभेदका गुणाः इत्येव न्याय्यम् । कुत एतत् ? यदयम् – 'अस्थिदधि-सक्थ्यक्ष्णामनङुदात्त:' इति उदात्तग्रहणं करोति । यदि भेदका गुणाः स्यु:, उदात्तमेवोच्चारयेत् (म. भा. 1.1.1, पृ. 171) ।' इसीप्रकार सानुनासिक विषय में भी समझ लेना चाहिए – 'अणोऽप्रगृह्यस्याँण्' सूत्र न बनाकर 'अणोऽप्रगृह्यस्यानुनासिक:' (8.4.56) बनाया गया है । अनुनासिक गुण अभेदक होते हैं, उनके अभेदकत्व में हेतु यह भी है कि – लोक प्रचलित भाषा में सानुनासिक वर्णों का प्रयोग न के बराबर । जिन वर्णों का प्रयोग ही नहीं होता, उनका परिगणन वर्णमाला में करने का क्या प्रयोजन है ? अर्थात् सर्वथा निरर्थक । प्रातिशाख्य, शिक्षा आदि ग्रन्थों में सर्वत्र अन्त:स्थ वर्ण चार ही स्वीकारे गए हैं (द्र. ऋ. प्राति. 1.9, तै. प्राति. 1.8, वा. प्राति. 8.15, ऋ. तं. 1.2, वर्णरत्नप्रदीप शिक्षा – 13 आदि) । इसमें किसी भी आचार्य का मतभेद नहीं है । अन्त:स्थों को सानुनासिक, निरनुनासिक भेद मानकर सात मानना अशास्त्रीय एवं परम्परा से भी विरूद्ध है । साथ में अव्यवहारिक भी है ।

'किं पुनरिदं विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्याते, आहोस्वित् संवृतस्य.... (म.भा. अइउण्)' की व्याख्या करते हुए प्रदीपकार कहते हैं कि – 'दुरवधारणत्वादुपदिष्टो विवतो व्याख्यानेन विना न शक्यते ज्ञातुमिति प्रत्यक्षेऽप्यकारे प्रश्नोऽयं नासमञ्जस: ।' इस पर उद्योतकार लिखते हैं कि – 'विवृतत्वादीनां श्रोत्रेन्द्रियग्राह्यत्वाभावादिति भाव: ।' अर्थात् संवृत, विवृत आदि आस्यप्रयत्न (गुण) वक्ता के अनुभूत विषयक तो हैं, पर श्रोता के लिए वे गुण गृहीत ही नहीं होते । जो गुण अभिव्यक्त ही नहीं होते, उनके आधार पर वर्णमाला में 'अ, आ' के रूप में कैसे गणना कर सकते हैं? सर्वथा असम्भव । हाँ । कालभेदत्व को लेकर अवर्णादि सभी स्वरों को ह्रस्व, दीर्घादि के रूप में अवश्य विभाजित कर सकते । इस के लिए भाष्य की ये पंक्तियाँ भी अवलोकनीय है –

'अकारस्य विवृतोपदेश: कर्तव्य: ......... किञ्च कारणं न गृह्णीयात् ? विवारभेदात् । किमुच्यते विवारभेदादिति, न पुन: कालभेदादपि । यथैव ह्ययं (आकार:) विवारभिन्न:, एवं कालभिन्नोऽपि ? सत्यमेवमेतत् । वक्ष्यति – तुल्यास्यप्रयत्नं सवर्णम् इत्यत्रास्य ग्रहणस्य प्रयोजनम् – आस्ये येषां तुल्यो देश: प्रयत्नश्च, ते सवर्णसंज्ञा भवन्तीति । बाह्यश्च पुनरास्यात् काल: । तेन स्यादेव कालभिन्नस्य ग्रहणम्, न पुनर्विवारभिन्नस्य' (म. भा. अइउण्) । यहाँ कहा गया है कि विवृत आकार के ग्रहण के लिए अकार को विवृत उपदेश करना पड़ेगा । अन्यथा संवृत आकार से विवृत आकर भिन्न होने से गृहीत नहीं हो पायेगा । यह भेद (विवारभेदात्) कथन केवल सवर्णसंज्ञा के परिप्रेक्ष्य में ही है, न कि वर्णभेद के लिए । हां 'सत्यमेवमेतत्' कहकर भाष्यकार ने स्पष्टरूप से काल को भेदक माना है । कालभेद सवर्णसंज्ञा का बाधक नहीं है, क्योंकि वह बाह्ययत्न है । कालभेद के कारण ह्रस्व वर्णों से दीर्घादियों का ग्रहण नहीं हो सकता था, जिससे

बहुत सारे दोष उत्पन्न होंगे । इन्हीं दोषों के निवारण के लिए पाणिनि को सवर्ण संज्ञा करनी पडी। जिससे कि कालभेद होने पर भी ह्रस्व वर्णों से दीर्घादियों का ग्रहण हो सके । इसलिए काल को भेदक न मानकर संवृत, विवृतों को भेदक मानना सर्वथा अपाणिनीय है । अपाणिनीयत्व से स्वयं पतञ्जलि भी भयभीत होते हैं – 'सिध्यति, अपाणिनीयं तु भवति ।'

जिसप्रकार संवृत, विवृत आदि गुण श्रोत्रेन्द्रिय के द्वारा गृहीत नहीं होने से वर्णान्तरत्व के कारक नहीं हो सकते, उसी प्रकार उदात्तादि गुण भी श्रोत्रेन्द्रिय के द्वारा गृहीत न होने से वर्णान्तरत्व के कारक नहीं हा सकते । वर्णों के कालभेद (ह्रस्व, दीर्घ, प्लुत आदि) में तो वक्ता एवं श्रोता दोनों को ही भेद स्पष्ट प्रतीत होता है, इसीलिए काल को भेदक माना गया है और संस्कृत, हिन्दी आदि भाषाओं की वर्णमालाओं में कालभिन्नों को ही स्थान दिया गया है । वार्त्तिककार एवं महाभाष्यकार ने भी श्रुतिकृत् भेद को ही वर्णान्तरत्व में कारण माना है – 'श्रुतिश्चापि न भिद्यते (वार्त्तिक) – श्रुतिकृतश्चापि न कश्चिद् भेदो भवति' (म. भा. 8.2.25) । अर्थात् चकाद्धि, चकाद्द्धि इत्यादि में व्यञ्जन परे रहते एक हल् या दो हलों के होने से कोई श्रुतिकृत् भेद नहीं होता । यदि भेद होता तो वर्णान्तर हो जाता, जिससे 'चकाद्धि', 'चकाद्द्धि' शब्दों को भिन्न-भिन्न मानने की आपत्ति आती है । अर्थात शब्दान्तर के लिए वर्णभेद चाहिए, वर्णभेद के लिए श्रुतिभेद चाहिए । इसी प्रकार अन्यत्र भी कहा गया है 'श्रुतिभेदेऽसति किं प्रतिज्ञाभेद: करिष्यति ?' (म. भा. 7.1.72) इसका तात्पर्य है – प्रतिज्ञात कार्य कहीं पर होने वा न होने में कोई श्रुतिभेद नहीं होता तो वहां उस प्रतिज्ञात कार्य को नहीं करना चाहिए । इससे यदि प्रतिज्ञाभंग होता है, तो होने दो उससे क्या दोष होगा ? कुछ नहीं । निष्कर्ष यह है कि प्रतिज्ञात कार्य वहीं होता है, जहां कार्य सम्पन्न होने पर श्रुतिभेद हो । श्रुतिभेद न होन पर प्रतिज्ञात कार्य ही नहीं होता तो श्रुतिभेद के अभाव में वर्णान्तरत्व कैसे सम्पन्न होगा ? अर्थात वर्णान्तरता के लिए श्रुतिभेद (रूपान्यत्व) अनिवार्य है ।

**श्रोत्रोपलब्धिर्बुद्धिनिग्राह्य: प्रयोगेणाभिज्वलित आकाशदेश: शब्द: (म.भा. अइउण्)**

जो प्रयोग (ध्वनि) के द्वारा अभिव्यक्त होता है, श्रोत्रेन्द्रिय के द्वारा उपलब्ध होता है, बुद्धि के द्वारा (अर्थ सहित) ग्रहण करने योग्य है और जिसका स्थान आकाश है, वही शब्द कहलाता है । यहाँ भी कहा गया है कि शब्द (वर्ण) वही है, जिसके गुण वक्ता के द्वारा अभिव्यक्त होते हों और श्रोता के द्वारा गृहीत होकर बुद्धि से भी गृहीत होते हों । जिसके गुण अभिव्यक्त नहीं होते अथवा श्रोता के द्वारा गृहीत नहीं होते वे शब्दत्व (वर्णत्व) को प्राप्त ही नहीं करते । वाक्यपदीयकार भर्तृहरि ने भी कहा –

**विभजन् स्वात्मनो ग्रन्थीन् श्रुतिरूपै: पृथग्विधै: ।**
**प्राणो वर्णानभिव्यज्य वर्णष्वेवोपलीयते ॥**

(वा. प. ब्रह्म. 155)

(नादसहित) प्राणवायु पृथक्-पृथक् प्रकार के श्रुतिरूपों से अर्थात् ह्रस्वादि कालकृत, स्थानकृत, प्रयत्नकृत भेदों के द्वारा अपनी ग्रन्थियों (विकारों) को विभक्त करता हुआ वर्णों को अभिव्यक्त कर वर्णों में ही विलीन हो जाता है । यहाँ वाक्यपदीयकार ने भी स्पष्ट शब्दों में कहा है कि (पृथग्विधैः श्रुतिरूपैः) वर्णान्तरता श्रुतिभेद (रूपान्यत्व) से ही उत्पन्न होती है ।

साक्षात् महर्षि पाणिनि ने भी कहा है कि, – 'स्थानाभिघाताद् ध्वनिरूत्पद्यत आकाशे, सा वर्णश्रुतिः, स वर्णस्यात्मलाभः' (8.1) । कत्व, गत्वादि भेदरहित अव्यक्त नादध्वनि के कण्ठाादि स्थानों में अभिघात होने से मुखाकाश में कत्व, गत्वादि भेदयुक्त (वर्णान्तरत्व के कारणभूत गुणों से युक्त) ध्वनि उत्पन्न होती है । वही वर्ण श्रुति है अर्थात् श्रुतिकृद्भेद से युक्त ध्वनिविशेष अभिव्यक्त होता है, जो कि वर्णत्व का आत्मा है अर्थात् श्रुतिकृद्भेद वर्णान्तरत्व का मूलभूत कारण है । अतः श्रुति कृत् भेद के अभाव में वर्णान्तरत्व की कल्पना कदपि नहीं हो सकती ।

तैत्तिरीय प्रातिशाख्य में काल को स्पष्टशब्दों में भेदक माना गया है ।

**अनुप्रदानात् संसर्गात् स्थानात् करणविन्ययात् ।**
**जायते वर्णवैशिष्यं परीमाणाच्च पञ्चमादिति ॥** (23.2)

नादादि अनुप्रदान (बाह्ययत्न) भेद से, संसर्ग भेद से, स्थानभेद से, करणविन्यासभेद से और मात्रादि परिमाणभेद (कालभेद) से वर्णवैशिष्ट्य अर्थात् वर्णान्तरत्व उत्पन्न होता है ।

यू स्त्र्याख्यौ नदी (1.4.3) – किं पुनरिदं दीर्घयोर्ग्रहणमाहास्विद्ध्रस्वयोः ? (म. भा. वहीं)। यदि काल अभेदक होता तो ह्रस्व के ग्रहण से दीर्घ का, दीर्घ के ग्रहण से ह्रस्व का ग्रहण हो ही जाता, अतः यहा प्रश्न भी उत्पन्न नहीं होता । प्रश्न करने से ही स्पष्ट हो जाता है कि भाष्यकार भी काल को भेदक मानते हैं । काल को भेदक न मानने से ङिति ह्रस्वश्च, शेषो घ्यसखि इत्यादि सूत्रों में अनेकत्र ह्रस्व, दीर्घ आदियो के भेद व्यवहारों में अनेको दोष और विसंगतियाँ उपस्थित होंगी । अतः काल को भेदक मानने की परम्परा शास्त्रीय एवं बुद्धिसंगत है।

**पदक्रमविशेषज्ञो वर्णक्रमविचक्षणः ।**
**स्वरमात्राविभागज्ञो गच्छेदाचार्यसंसदम् ॥**

तै. प्राति. 24.6

**सन्दर्भाः**

1. निश्चल जल में जब हम किसी वस्तु को फेंक देते है, तब जल में तरंग उत्पन्न हाता है । वह तरंग दूसरे तरंग को उत्पन्न कर स्वयं विलीन हो जाता है, और वह तीसरे तरंग को उत्पन्न करता है । वैसे ही तीसरा-चौथों को उत्पन्न करता हुआ तरंगो का क्रम बनता जाता है । इसे वीचीतरंग न्याय कहते हैं । प्रकृत में उत्पन्न शब्द दूसरे शब्द को उत्पन्न कर स्वयं नष्ट हो जाता है । वैसे ही आगे क्रम चलता जाता है ।
2. 'उ + उ' के यणादेश से 'व' बनता है, 'व' का 'ऋण' के साथ गुणैकादेश से वर्ण बनता है ।

3. एकाक्षरा वै वाक् (जै. ब्रा. 2.392,422,3,294, ताण्ड्यब्रा. 4.33) ।

4. प्राणे - नादे ।

5. मध्यमा वागिति भाव: ।

6. शब्द: - नाद:, अव्यक्तध्वनि: ।

7. तस्य - नादस्य स्थानगुणधर्मान्यत्वे वर्णान्यत्वं भवतीति भाव: ।

8. कण्ठ्य-जिह्वामूल, तालव्य-जिह्वामध्य, मूर्धन्य-ऊर्ध्वजिह्वोपाग्र, दन्त्य-जिह्वाग्र (व वर्ण का स्थान और करण-दन्त्य-अधरोष्ठ), उत्तरोष्ठ्य-अधरोष्ठ, नासिक्य-नासामूल ।

9. द्र. शिक्षाशास्त्र 3.13 का शिक्षातत्त्वालोकभाष्य (पृ. 121) ।

10. यह एक व्यवहार के अनुभूत विषयक सामान्य कथन है, यथार्थत: शब्दोत्पत्ति की प्रक्रिया आत्मा से आरम्भ होती है ।

11. काल के बाह्ययत्नत्व के लिए शिक्षातत्त्वालोकभाष्य (8.31, पृ. 162-163) द्रष्टव्य है ।

12. एते स्वरा: (ऋक्प्राति.1.3) की व्याख्या करते हुए आचार्य उव्वट लिखते हैं - 'ननु कथं वर्णसमाम्नायमनुपदिश्यैव - 'अष्टौ समानाक्षराण्यादित:' इति (उच्यते)? उपदिष्टस्य हि एवमुपद्यते 'आदित:' इति, नानुपदिष्टस्य...... नैष दोष: । उपदिष्टो वर्णसमाम्नायमुररीकृत्याह - 'अष्टौ समानाक्षराण्यादित:......(उवटभाष्यम् - तत्रैव)' इन शब्दों से स्पष्ट है कि लोक में प्रचलित वर्णसमाम्नाय को ही ऋक्प्रातिशाख्यकार ने स्वीकार किया था । इसी प्रकार अन्यप्रातिशाख्यकार एवं पाणिन्यादि के विषय में भी जानें ।

13. आकृतिग्रहणात्सिद्धम् - एवं च कृत्वा तपरा: क्रियन्ते - आकृतिग्रहणेनातिप्रसक्तमिति । (म. भा. अइउण्) पृ. 99 ।

14. ननु चैङ: सस्थानतरावर्ध एकारोऽर्ध ओकार: । न तौ स्त: । यदि हि तौ स्यातां तावेवायमुपदिश्येत् । ननु च भोश्छन्दोगानां सात्यमुग्रिराणायनीया अर्धमेकारमर्धमोकारं चाधीयते....... प्रार्षदकृतिरेषा तत्रभवताम् । नैव हि लोके नान्यस्मिन् वेदऽर्ध एकारोऽर्ध ओकारोऽस्ति (म. भा. एओङ्) । इस प्रसंग से भी स्पष्ट है कि जिन वर्णों का लोकादि में प्रचुरमात्रा में प्रयोग नहीं होता, उनका परिगणन वर्णमाला में नहीं हो सकता । हाँ ! जिन तेलुगु आदि दक्षिणभारतीय भाषाओं में अर्ध एकार और अर्ध ओकार का प्रयोग प्रचुर मात्रा में होता है, अत: उन भाषाओं की वर्णमाला में एकार एवं ओकार की अर्धमात्राएँ (ह्रस्वमात्राएँ) भी स्वीकृत हैं । अत: प्रचुर मात्रा में प्रयुक्त ह्रस्वादि कालभिन्नों को त्यागकर, अत्यधिक स्वल्प मात्रा में (न के बराबर) प्रयुक्त सानुनासिक वर्णों का वर्णमाला ग्रहण करना सर्वथा अनुचित एवं अशास्त्रीय परिकल्पना मात्र है ।

15. इस के लिए लेखक का 'उदात्तादि स्वरों का स्वरूपविवेचन' लेख द्रष्टव्य है ।

16. इसी को तैत्तिरीय प्रातिशाख्य में 'रूपान्यत्वे वर्णान्यत्वम्' (22.2) कहा गया है ।

17. न चैव वायुसंयोग एव वाचकोऽपि किं न स्याद् (तस्मिन् कत्वगत्वादिविजातीयधर्मा विद्यमानत्वद्) इति वाच्यम्, प्रत्यक्षोपलभ्यमानककारादेरेव वाचकत्वस्यानुभवसिद्धत्वात् (वैयाकरणभूषणसारः अखण्डस्फोटनिर्णयः)।

**सन्दर्भग्रन्थाः**


1. वैशेषिकदर्शनम्, महादेव शर्मा, व्यास प्रकाशन, वाराणसी ।
2. वाचस्पत्यम्, डॉ. सी. गिरि, राष्ट्रिय संस्कृत संस्थान, नई दिल्ली ।
3. ऐतरेय आरण्यक, डॉ. मुनीश्वर, विश्वेश्वरानन्द वैदिक शोध संस्थान, होशियारपुर ।
4. पाणिनीय शिक्षा, आ. उदयन मीमांसक, रामलाल कपूर ट्रस्ट, सोनीपत ।
5. वाक्यपदीयम्, डॉ. भगीरथ प्रसाद त्रिपाठी, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी ।
6. तैत्तिरीयप्रातिशाख्य, श्री आर्. रामशास्त्री, मोतीलाल बनारसीदास, वाराणसी ।
7. वैयाकरणभूषणसारः, चन्द्रिका प्रसाद द्विवेदी, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली ।
8. जैमिनि ब्राह्मण, डॉ. बे. रामचन्द्र शर्मा, केन्द्रीय संस्कृत विद्यापीठ, तिरूपति ।
9. ताण्ड्य ब्राह्मण, श्री आनन्द चन्द्र वेदान्तवागीश, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली ।
10. ऋक्प्रातिशाख्य, वीरेन्द्र कुमार वर्मा, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली ।
11. वाजसनेय प्रातिशाख्य,वीरेन्द्र कुमार वर्मा, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली ।
12. ऋक्तन्त्र, डॉ. सूर्यकान्त, मेहरचन्द लक्ष्मणदास, नई दिल्ली ।
13. अष्टाध्यायी, ब्रह्मदत्त जिज्ञासु, रामलाल कपूर ट्रस्ट, सोनीपत ।
14. महाभाष्यम्, गुरुप्रसाद शास्त्री, प्रतिभा प्रकाशन, दिल्ली ।
15. प्रदीप, गुरुप्रसाद शास्त्री, प्रतिभा प्रकाशन, दिल्ली ।
16. उद्योत, गुरुप्रसाद शास्त्री, प्रतिभा प्रकाशन, दिल्ली ।



**निगमनीडम्,**
**वेदगुरुकुलम्, पिडिचेड,**
**गज्वेल, सिद्धिपेट,**
**तेलंगाणा - ५०२२७८ ।**


★★★

# संस्कृतशास्त्रशिक्षणे अन्वयविधेरनुप्रयोगः

✍डा. रा.गा.मुरलीकृष्णः

**( संस्कृतशब्देषु विभक्तीनां प्रयोगोऽतीव वैज्ञानिकः । एतद्योगेन शब्देषु. विलक्षणा प्रादुर्भवति । शक्त्या अनयैव पदत्वं शब्देषु भवति, भवति च तादृशस्य पदस्य प्रयोक्तुमर्हता । तदुक्तम् - अपदं न प्रयुञ्जीत' इति । तथाहि विभक्तिः नाम अर्थबोधयित्री । सा यथायोग्यमर्थं योग्यमर्थम्प्रति आकर्षति । स चाकर्षणव्यापारो नामैव अन्वयः । स चान्वयो दण्डान्वय-खण्डान्वयनाम-भ्यां शिक्षणेऽधगमे च प्रसिद्धः । नैकग्रन्थियुक्ते एकस्मिन् दण्डे इव साका-ङ्क्षार्थबोधकनैकपदानाम् एकवाक्ये सम्बन्धौ दण्डान्वयः । एवञ्च एकस्य दण्डस्य अनेकानां ग्रन्थिखण्डानामिव एकस्य वाक्यस्य अनेकेषां पदखण्डानां साकाङ्क्षाणामन्वयो नाम खण्डान्वयः । शोधपत्रप्रस्तोत्राऽत्र अन्वयसम्बन्धि-भूमिकामारचय्य, अन्वयोद्देश्यं तत्स्वरूपञ्च विज्ञाप्य सोदाहरणं दण्डान्वयं खण्डान्वयञ्च निरूप्य उभयोः गुणदोषान् विविच्य तयोः तुलनात्मकमध्ययन-ञ्च पुरस्कृत्य अनयोरन्वययोः परम्परायां प्राचीनकालादेवास्तित्वं साध्यते, साध्यते च कक्षाध्यापनदृष्ट्या खण्डान्वयस्य श्रेष्ठत्वम् । सत्यम् परमिदमपि न विस्मर्त्तव्यं यत्काव्यादीनां मुख्यं यत् प्रयोजनमानन्दः तस्य खण्डान्वयविधौ विलम्बेन सिद्धिरिति । अत्रापीदं विभावनीयम् - अल्पमेधावतां खण्डानव्य-विधिना अनुप्रयोगे हितकरः, हितकरश्च मेधाविनां दण्डान्वयविधिनाऽनुप्रयोगः। तस्मात् प्रारम्भे खण्डान्वयः, पश्चात् प्रतिभायां समुद्भूतायां दण्डान्वयः संसेव्य इति मे प्रतिभाति ॥ - स. )**

**इहान्वयमुखेनैव सर्वं व्याख्यायते मया।**
**नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते ॥[१]**

रमणीयार्थप्रतिपादकानां[2] शब्दानामन्वयेन समुद्भूतं वाक्यं रसात्मकं[3] भवति । अतः अपारे काव्यसंसारे कविः प्रजापतिः भूत्वा यथा अस्मै रोचते विश्वं तथा शब्दान् परिवर्तयति । तेन इष्टार्थ-व्यवच्छिन्ना पदावली[4] वाक्यरूपं सन्धार्य काव्यत्वमाप्नोति । अत एव अर्थयुक्तानां लोकोत्तराह्लाद-जनकानां शब्दानां सुसंहतिरेव काव्यमित्युदीरयेत् [5]।

काव्यशास्त्राध्ययनेन चतुर्वर्गफलप्राप्तिः अल्पधियामपि सुखेन सम्भवति[6] । विशिष्य विश्रान्तिजननं, विनोदजननं, हितोपदेशजननम् इति लौकिकप्रयोजनानि काव्यशास्त्रस्य दृश्यन्ते । अथ

रसोत्पादकं काव्यं गद्यं पद्यं चम्पूरूपात्मकं त्रिधा दृश्यते । तर्हि छन्दोबद्धं पदं पद्यमिति, वृत्तबन्धरहितं वाक्यं गद्यमिति, गद्यपद्यमयं काव्यं चम्पूः इत्यभिधीयते । परमाधुनिककाले पाश्चात्त्यरीतिमाश्रित्य लिखितं सरलं सरसं व्यावहारिकं वाक्यं गद्यम् इति व्यवहारः सुप्रसिद्धः ।

काव्यस्य प्रमुखं लक्ष्यं तावत् रसोत्पत्तिरेव । किन्तु बहुत्र शिक्षाशास्त्रपुस्तकेषु पद्यसाहित्यस्य लक्षिताधिगमविशेषः रसोत्पत्तिरिति तथा गद्यसाहित्यस्य प्रमुखम् उद्दश्यं भाषाज्ञानमिति लिखितं विद्यते। परं गद्यं वा पद्यं वा भारतीयसाहित्ये काव्यमेव भवति । काव्यस्य प्रमुखम् उद्देश्यं तु रसोत्पत्तिरेव । कदाचित् पाश्चात्त्यानां पुस्तकानामनुवादभ्रमकारणतः गद्यशिक्षणस्य प्रमुखम् उद्देश्यं भाषाज्ञानसम्पादन-मिति, पद्यशिक्षणस्य रसोत्पत्तिरिति कथितं स्यात् । अन्यथा माध्यमिकविद्यालयेषु संस्कृतपाठ्यपुस्तकेषु कादम्बरी, दशकुमारचरितम् इत्यादीनां विशिष्टग्रन्थानाम् समावेशः सुतरां न भवति परं केवलमुपन्या-सरूपात्मककथाः एव स्थाप्यन्ते इति धिया भाषाज्ञानसम्पादनमिति उक्तवन्तः स्युः । संक्षेपतः पद्यं वा गद्यं वा भाषाज्ञानं रसोत्पादनं विषयानुभूतिं च कारयत्येव । विशिष्य पद्यस्य गानशैल्या विशेषानन्दः जायते इति धिया पद्यस्य लक्षिताधिगमविशेषः रसोत्पत्तिः इति कथितं स्यात् । किन्तु यावत्पर्यन्तं काव्ये विद्यमानानां शब्दानामर्थज्ञानं न भवति तावत् पर्यन्तम् अनुभूतिः न जायेत इति कारणतः शब्दार्थज्ञानावबोधने विशिष्य पद्यसाहित्ये अन्वयस्य प्राधान्यं वरीवर्ति । अतः शास्त्रशिक्षणे अन्वयः कथं कर्तव्यः ? अन्वयस्य लक्षणं किम् ? अन्वयविधेः उद्देश्यानि कानि ? अन्वयः कतिप्रकारकः? अन्वयविधेः स्वरूपं किम् ? अन्वयविधेः कक्षाप्रयोगः कथम् उत कदा करणीयः? इत्यादीनां प्रश्नानां समाधानमत्र क्रियते ।

**अन्वयविधेः उद्देश्यानि** -

- काव्यगतसौन्दर्याभिज्ञापनम् ।
- काव्याध्ययनेन काव्यरसास्वादस्य तन्मयीभावस्य च सम्पादनम् ।
- शास्त्राध्ययने अध्यापने वा काठिन्यस्य दूरीकरणपुरस्सरं सारल्यसम्पादनम् ।
- अध्येतृषु काव्याध्ययने कुतूहलजागरणम् ।
- काव्यमर्माभिज्ञानार्थं काव्यगतशब्दानां वैज्ञानिकक्रमनिर्धारणम् ।
- अध्येतृषु जिज्ञासाप्रवृत्तेः चिन्तनशक्तेः सर्जनात्मकतायाः वाक्यार्थसामर्थ्यस्य च सम्पादनम् ।
- प्रश्नकरणे कौशलसम्पादनम् ।
- शब्दानां व्याकरणप्रक्रियायाः अवगमनम् ।
- विभिन्नकाव्यशैलीनां स्वरूपावगमनम् ।
- बालकेन्द्रितशिक्षणतत्वानुष्ठानम् ।

**अन्वयविधेः स्वरूपम्** -

लेखकः यदा भावाविष्टः भवति तदा तस्य मुखतः/लेखनीतः निस्सृतानां शब्दानां कश्चन लयः काव्यत्वम् आप्नोति । सः लयः एव छन्दः इति व्यवह्रियते । गद्ये प्रायः कर्ता कर्म क्रिया इति पदानि क्रमशः भवन्ति । परं पद्ये न तथा । यावत्पर्यन्तं पद्यगतशब्दानां क्रमः नावगम्यते तावत् पर्यन्तं काव्यसौन्दर्यं नाभिज्ञायते । अत एवोच्यते यत् -

**दृष्टपूर्वा ह्यपि ह्यर्थाः काव्ये रसपरिग्रहात् ।**
**सर्वे नव इवाभान्ति मधुमास इव द्रुमाः ॥** [७]

अतः नव इव भासितानां दृष्टपूर्वाणां पृथक्-पृथक् स्थितानां शब्दानाम् अर्थानां च अनु-अयः अन्वयः इति कथ्यते । अनु + अयः (अनु+इण्+भावे अच्) अन्वयः इति व्युत्पत्त्या पद्यात् गद्यक्रमम् प्रति अनु अयते इति अन्वयः । पद्यशिक्षणमाध्यमेन काव्यशिक्षणपर्यन्तं नयतीति धिया काव्यशिक्षणपद्धतिरिति अस्य अपरं नाम । प्रश्नोत्तरसंवादादिपद्धतिभिः साधर्म्यं भजते इति कारणतः आकाङ्क्षापद्धतेः एव अपरं स्वरूपम् अन्वयविधिः इति केचन कथयन्ति । प्रश्नानां माध्यमेन शब्दार्थस्य अवबोधनम् अन्वयविधेः लक्ष्यं विद्यते । अन्वयस्य स्वरूपं विभिन्नैः इत्थं कथितं -

- पदानां परस्पराकाङ्क्षा योग्यता च अन्वयः भवति इति दुर्गादासः ।
- पदानां परस्परसम्बन्धः अन्वयः भवतीति रामतर्कवागीशः ।
- परस्परनिरपेक्षाणामेकस्मिन्नन्वयः समुच्चयः इति सिद्धान्तकौमुद्यां भट्टोजीदीक्षितः ।
- शब्दानां परस्परमर्थानुगमनम् अथवा तात्पर्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने इति विश्वनाथः (logical connection of the words) ।
- वाङ्मञ्जुलपदबन्धः प्रथितालङ्कारसुन्दरावयवः ।
  विदितान्वय अद्रियते श्लोकः पुरुषोऽपि सदसि सताम् ॥ इति ओंकारदासः ।[8]
- का त्वमेकाकिनी भीरु ! निरन्वयजने वने इति भट्टिः । अर्थात् न कोपि शब्दः अन्वयरहितः भवतीति आशयः ।
- हेतुसाध्ययोर्व्याप्तिरन्वयः इति न्यायशास्त्रम् । Statement of the Nyaya the constant and invariable concomitance of the Hetu (middle term) and Sadhya (Major term) of Indian syllogism ।

अतः उपरि प्रोक्तानां विभिन्नानां लक्षणानां स्वरूपावगमनेन अन्वयः नाम परस्परनिरपेक्षाणां शब्दानाम् एकस्मिन् क्रमे संस्थाप्य समुचितम् अर्थसम्पादनम् इत्यर्थः स्वीक्रियते । विधिः नाम अभीष्टोद्देश्यसाधनानुकूलव्यापारवान् उपायः। तस्मात् सङ्क्षेपतः इदं वक्तुं शक्यते यत् परस्पर-निरपेक्षाणां शब्दानाम् अर्थयुक्तक्रमनिर्धारणे कश्चन वैज्ञानिकः व्यापारः अन्वयविधिः भवति । वाक्यार्थज्ञाने आकाङ्क्षा (expectancy or curiosity), योग्यता (consistency), सन्निधिश्च

(contiguity) हेतवः भवन्तीति तर्कसङ्ग्रहकारः । अतः काव्यगतभावस्य अवगाहनार्थं श्लोके विद्यमानप्रधानवाक्यस्यान्वेषणमेव अन्वयः । प्रधानवाक्यस्यान्वेषणानन्तरं कर्तृ-कर्म-क्रियापदानि क्रमशः स्थापनीयानि । पश्चात् क्रियाविशेष- णानि अन्यानि वा विशेषणानि यथाक्रमं योजनीयानि । अत्र अन्वयस्य लक्षणं शास्त्रीयैः इत्थं प्रोक्तम् -

**आदौ कर्तृपदं वाच्यं द्वितीयादिपदं ततः ।**
**क्त्वातुमुँल्ल्यप् च मध्ये कुर्यादन्ते क्रियापदम् ॥**
**विशेषणं पुरस्कृत्य विशेष्यं तदनन्तरम् ।**
**कर्तृकर्मक्रियायुक्तमेतदन्वयलक्षणम् ॥**

श्लोके प्रोक्तरीत्या कर्तृकर्मादीनि पदानि क्रमशः स्थापनीयानि । वस्तुतः अत्र कर्तृ-कर्म-प्रयोगानुगुणं विशेषण-विशेष्यभावयोः अपि स्वरूपज्ञानमवगन्तव्यम् । अतः एतेषां लक्षणं सारल्येन प्रोच्यते -

**विशेषणं विशेष्यम्** -

**भेद्यं विशेष्यमित्याहुर्भेदकं तु विशेषणम् ।**
**प्रधानं तु विशेष्यं स्यादप्रधानं विशेषणम् ॥**
**पदार्थे स्वार्थनिरपेक्षादप्रधानं विशेषणम् ।**
**विशेष्यं तु प्रधानं स्यात्स्वार्थस्यैव समपणम् ॥**
**लिङ्गसङ्ख्याविभेदेऽपि विशेषणविशेष्यता ।**
**विभक्तिः पुनरेकैव विशेषणविशेष्ययोः ॥**[९]
**यल्लिङ्गं यद्वचनं या च विभक्तिर्विशेष्यस्य ।**
**तल्लिङ्गं तद्वचनं सा च विभक्तिर्विशेषणस्यापि ॥**

**कर्तरि कर्मणि इति प्रयोगयोः स्वरूपम्** -

**यदा कर्तरि प्रथमा स्यात् कर्मणि द्वितीया तदा ।**
**यदा कर्तरि तृतीया स्यात् कर्मणि प्रथमा तदा ॥**
**कर्तृकर्मक्रियायुक्तः प्रयोगः स्यात्सकर्मकः ।**
**अकर्मकः कर्मशून्यः कर्मद्वन्द्वो द्विकर्मकः ॥**

इत्थं प्रोक्तस्य अन्वयस्य प्रयोगः कक्षायां दण्डान्वयः खण्डान्वयः इति प्रकारद्वयेन क्रियते इति शास्त्रे कथितम् ।

**दण्डवत् खण्डवच्चैव द्विभेदोऽन्वय उच्यते ।**[१०]

वस्तुतः अन्वयः कक्षायां कदा कर्तव्य इति जिज्ञासायां केचन वदन्ति सर्वादौ अन्वयः कर्तव्य इति । केचन पाठान्ते इति कथयन्ति । अतः सन्देहनिवृत्यर्थं शास्त्रप्रमाणमित्थं वर्तते -

**पदच्छेद: पदार्थोक्ति: विग्रहो वाक्ययोजना ।**
**आक्षेपोऽथ समाधानं व्याख्यानं षड्विधं स्मृतम् ॥**

इति शास्त्रप्रमाणेन अन्वय: पदच्छेद-पदार्थोक्ति-विग्रहाणामनान्तरं कर्तव्य: इति अभिज्ञायते । अधुना अन्वयप्रकारयो: सम्पूणं स्वरूपं सोदाहरणं विव्रियते -

**दण्डान्वयविधे: स्वरूपम्** -

दण्डवत् अन्वेति इति दण्डान्वय: । दण्डान्वये नैयायिकमतानुसारेण वाक्यगतं कर्तृपदम् आदौ गृहीत्वा तदनुक्रमेण वाक्यस्थपदानि अन्वयपूर्वकं स्थाप्यन्ते । अत: कर्तृपदात् क्रियापदपर्यन्तम् अन्वय: दण्डान्वय: भवति । दण्डान्वयस्य लक्षणम् ओंकारदासेन अन्वयप्रबोधिन्याख्ये ग्रन्थे इत्थं प्रोक्तम् -

**आद्ये विशेषणं योज्यं विशेष्यं तदनन्तरम् ।**
**क्त्वाणमुल्ल्यप्प्रभृत्येवं पूर्वं दण्डान्वयो भवेत् ॥**

दण्डान्वये प्रत्येकस्मिन् श्लोके विद्यमानं प्रधानं वाक्यम् अन्वेष्टव्यं भवति । वाक्यं नाम कर्तृ-कर्म-क्रियापदानाम् यथाक्रमं योजनम् । पश्चात् विशेषणपदानि पूर्वं संयोज्य तदनन्तरं विशेष्यपदानि योजनीयानि ।

अथ प्रधानक्रियापदेन सम्बद्धानि कृदन्तक्रियापदानि पूर्वं संयोज्य प्रधानक्रियापदमन्ते स्थापयेत्। अथात् प्रथमं कर्तृपदस्य विशेषणानि तत: परं कर्तृपदं । पश्चात्, कर्मपदस्य विशेषणानि तदनन्तरं कर्मपदम् । तत्पश्चात्, क्त्वान्तपदानि, णमुल्प्रत्ययान्तानि, ल्यबन्तानि वा यदि भवेयु: तर्हि यथास्थानं योजनीयानि । तथैव प्रधानक्रियापदेन सम्बद्धानि कृदन्तक्रियापदानि पूर्वं संयोज्य प्रधानक्रियापदमन्ते स्थापनीयम् । सर्वान्ते प्रधानक्रियापदं योजनीयम् । अत: कर्तृपदात् क्रियापदपर्यन्तम् प्रश्नानां माध्यमेन अन्वयं सम्पादयतीति कारणत: दण्डान्वय इति नाम । अत्र साङ्केतिकपदानाम् उदाहरणानि इत्थं सन्ति ।

**क्वान्तस्य उदाहरणानि** - गत्वा, पठित्वा, लिखित्वा, ज्ञात्वा इत्यादीनि ।

**णमुल्प्रत्यान्तस्य उदाहरणानि** - ध्यायं ध्यायम् । कारं कारम् । दर्शं दर्शम् । पाठं पाठम् । स्मारं स्मारं नमति शिवम् । स्मृत्वा स्मृत्वा । पायं पायम् । भोजं भोजम् । श्रावं श्रावम् । अस्वादुं स्वादुं कृत्वा भुङ्क्ते स्वादुङ्कारं भुङ्क्ते । सम्पन्नङ्कारम् । लवणङ्कारम् । सम्पन्नलवणशब्दौ स्वादुपर्यायौ । वासरूपेण क्त्वापि । स्वादुं कृत्वा भुङ्क्ते । अन्यथाकारम् । एवङ्कारम् । कथङ्कारम् । इत्थङ्कारं भुङ्क्ते । इत्थं भुङ्क्ते इत्यर्थ: ।

**ल्यबन्तस्य उदाहरणानि** - प्रक्षाल्य । नेत्रे निमील्य जपं करोति । उत्थाय, उपविश्य, विज्ञाय इत्यादीनि ।

अत्र एक: विषय: अवगन्तव्य: श्लोकगतपदानां वाक्यरूपेण संस्थापनावसरे सम्पूर्णश्लोकस्य रमणीयताया: सौन्दर्यस्य मूलार्थस्य च संरक्षणं यथा स्यात् तथा योग्यवाक्यक्रमस्य निर्माणं कर्तव्यं भवति । अत: श्लोके पृथक् स्थितै: पदै: समुचितवाक्यनिर्माणमेव दण्डान्वये भवति ।

**दण्डान्वयस्य उदाहरणम् - कक्षायामनुप्रयोगश्च** - कक्षायाम् अध्यापकः कर्त्रादीनां तद्विशेषणानाञ्च अन्वयं प्रश्नद्वारा सम्पाद्य छात्रेषु सक्रियतामानयति । ततः पूर्वं सम्पूर्णश्लोकस्य भावं ज्ञापयति । यथा -

**वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ 1.1 ॥**

**पदच्छेदः** - वागर्थौ इव संपृक्तौ वागर्थप्रतिपत्तये जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ।

**पदार्थोक्तिः** - (शब्दानां विग्रहसहितम्)

**वागर्थाविव** - शब्दार्थाविव । वागर्थाविव इत्येकं पदम् । (इवेन सह समासः विभक्त्यलोपश्च पूर्वपदप्रकृतिस्वरत्वं चेति वक्तव्यम् )।

**सम्पृक्तौ** - नित्यसम्बद्धौ इत्यर्थः । (नित्यसम्बद्धयोरुपमानत्वेनोपादानात् । "नित्यः शब्दार्थसम्बन्धः" इति मीमांसकाः) ।

**जगतः** - लोकस्य ।

**पितरौ** - माता च पिता च पितरौ । (पिता मात्रा इति द्वन्द्वैकशेषः । मातापितरौ पितरौ मातरपितरौ प्रसूजनयितरौ इत्यमरः) ।

**पार्वतीपरमेश्वरौ** - पार्वती च परमेश्वरश्च पार्वतीपरमेश्वरौ । परमशब्दः सर्वोत्तमत्वस्य द्योतनार्थः । (पर्वतस्यापत्यं स्त्री पार्वती । तस्यापत्यम् इत्यण् । टिड्ढाणञ् ....... इत्यादिसूत्रेण ङीप् प्रत्ययः । मातुरभ्यर्हितत्वादल्पाक्षरत्वाच्च पार्वती-शब्दस्य पूर्वनिपातः) ।

**वागर्थप्रतिपत्तये** - शब्दार्थयोः सम्यग्ज्ञानार्थम् ।

**वन्दे** - अभिवादये ।

**दण्डान्वयः** -

श्लोके कर्तृवाचकं पदं किम् ? - अहम् (क्रियापदेन कर्तुः अन्वयः )
कर्मवाचकं पदं किम् ? - पार्वतीपरमेश्वरौ
कर्मपदस्य विशेषणानि कानि ? - वागर्थौ इव सम्पृक्तौ, पितरौ
पार्वतीपरमेश्वरौ कस्य पितरौ? - जगतः पितरौ
हेत्वर्थद्योतकं सम्प्रदानपदं किम् ? - वागर्थप्रतिपत्तये
श्लोके क्रियापदं किम् ? - वन्दे

**अन्वयः** - (अहम्) वागर्थौ इव सम्पृक्तौ जगतः पितरौ पार्वतीपरमेश्वरौ वागर्थप्रतिपत्तये वन्दे ।

**द्वितीयम् उदाहरणम्** - कुमारसम्भवस्य प्रथमश्लोकस्य मल्लिनाथटीकानुगुणमन्वयमवलोकयामः -

**अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।**
**पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः ॥ १.१ ॥**

**अन्वयः** - उत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाऽधिराजः पूर्वाऽपरौ तोयनिधी वगाह्य पृथिव्या मानदण्ड इव स्थितोऽस्ति ।

इत्थम् अन्वयं प्रश्नादिभिः सम्पाद्य पश्चात् श्लोके विद्यमानविशेषभावार्थं ज्ञापयति । दण्डान्वये यथाक्रमं प्रश्नाः पृष्टाः तेनैव क्रमेण अन्वयार्थं योजयितुं शक्यन्ते । अतः अस्य नाम दण्डान्वयः ।

### दण्डान्वयविधेः गुणदोषाः -

**गुणाः** - टीकाग्रन्थवाचने उत्तरोत्तरं कुतूहलम् उत्पाद्य छात्रान् स्वयमेव अर्थनिर्धारणक्षमान्, पूर्वशास्त्रशिष्यान् इव विदधाति अयं दण्डान्वयः । असौ विधिः सरलरूपेण व्याकरणज्ञानं छात्रान् बोधयति । छात्राः अनेन व्याकरणसहितं काव्यज्ञानमर्जयन्ति ।

**न्यूनताः** - यावत् पर्यन्तं कर्तृकर्मादीनां व्याकरणांशानां ज्ञानं न भवति तावत् पर्यन्तं प्रश्नस्य अवगमनमेव क्लेशकरं भवति । वाङ्मयाध्यापनापेक्षया अध्यापकः व्याकरणशिक्षणे बलं ददाति चेत् दण्डान्वये व्याकरणे दृष्टिं प्रसार्य रसमनुभोक्तुं न शक्नुयुः छात्राः । अतः प्राथमिकस्तरे अस्य प्रयोगः न रसोत्पादकः भवति । तस्मात् अयं विधिः यद्यपि पूर्णरूपेण वैज्ञानिकः परं व्याकरणज्ञानरहितानां सम्मुखे अमनोवैज्ञानिकः भवति ।

### खण्डान्वयविधेः स्वरूपम् -

प्राचीनकालादारभ्य पातञ्जलशाबरभाष्यादिरूपेण परिवृद्धिं गता इयं प्रश्नोत्तरप्रणाली किमो रूपं पुरस्कृत्य खण्डान्वयपद्धतित्वेन टीकाग्रन्थेषु उत्तरोत्तरं परिवृद्धिं गता । अतः टीकाग्रन्थगतायाः लिखितस्य व्याख्यानस्य मौखिकम् आद्यस्वरूपं दण्डान्वयपद्धतिः इति विज्ञेयम् । अस्मिन्वाक्यस्थ-पदानां खण्डशः अन्वयः प्रश्नोत्तररीत्या क्रियत । अस्यां पद्धत्यां मीमांसकमतरीत्या क्रियापदम् आदौ गृहीत्वा तदनु कारकानुरोधेन उत्थिताकाङ्क्षाद्वारा एव वाक्यस्थानाम् अवशिष्टपदानाम् अन्वयविवृती क्रियते । प्राचीनभारतीयदार्शनिकैः आकाङ्क्षायोग्यतासन्निधितत्त्वं पुरस्कृत्य इयं खण्डान्वयपद्धतिः समुद्भाविता । काश्मीरवल्लभदेवविरचितायां शिशुपालवधटीकायां नारायणविरचितायां नैषधीयचरित-टीकायाम् तथैव बहुषु टीकाग्रन्थेषु च विस्तरेण इयं प्रणाली अनुसृता।

खण्डान्वयपद्धत्यां क्रियापदं पुरस्कृत्य प्रश्नद्वारा कर्तृकर्मपदानि विशेषणाद्यवशिष्टपदानि च छात्राणां मुखात् प्रतिवचनरूपेण निष्कास्यन्ते । अध्यापकैः प्रश्नाः न कवलं विशिष्टबालकेभ्यः उत सर्वेभ्यः प्रदातव्याः येन छात्राः क्रियाशीलाः भवन्ति । यस्मिन् कस्मिन् अपि लघुपरिच्छेदे बहवः प्रश्नाः सम्भवन्ति । अतः परिच्छेदबोधनार्थम् अस्खलितोच्चारणार्थं च प्रारम्भिकाध्यापने प्रश्नकरण-प्रयोगः कर्तव्यः । पाठगतपदान्युपयुज्यैव प्रश्नाः भवेयुः तेन पाठगतपदानि कण्ठगतानि भवन्ति । सर्वेषु पाठेषु कर्तृकर्मक्रियाविशेषणानि अव्ययान्तपदानि भवन्ति एव । तानि किं कथम्भूतादि-

प्रश्नवाचकान् उपयुज्य बोद्धव्यानि । अमुमेव खण्डान्वयलक्षणम् ओंकारदासेन अन्वयप्रबोधिन्यां सङ्क्षिप्तरूपण प्रोक्तं यत् -

**कर्तृकर्मक्रियास्तावत् श्लोके योज्यास्ततः परम् ।**
**किमो रूपं पुरस्कृत्य तृतीयादि नियोजयेत् ॥**
**ल्यबन्तञ्च तुमन्तञ्च क्त्वान्तं कर्मविभूषितम् ।**
**खण्डान्वये पुन:प्रश्नं पूर्वमन्ते प्रयोजयेत् ॥**

**खण्डान्वयस्य उदाहरणम् - कक्षायामनुप्रयोगश्च-**

कक्षायाम् अध्यापक: पद्यगतानां पदानां पदच्छेदं पदार्थोक्तिं विग्रहवाक्यादिकं ज्ञापयित्वा अन्वयबोधनार्थं व्याख्यानं कर्तुं च खण्डान्वयपद्धतिम् आश्रयति । अत्र क्रियापदम् आदाय "किम्" शब्दस्य प्रश्नवाचकानि अथवा रूपाणि विशेष्यानुगुणं स्वीकृत्य क:, कं, केन, कस्मै, कस्मात्, कस्य, कस्मिन् इत्यादिभि: किमोरूपै: सप्तककारै: (किं/कुत्र/कति/कदा/कथं/कुत:/किमर्थम्) च कर्तृकर्मकरणादीनाम् आकाङ्क्षा कार्या । तथैव कीदृश:, कथम्भूत: इत्यादिभि: प्रश्नै: विशेष्याकाङ्क्षा: क्रियन्ते । कदाचित् एकाधिकानि विशेषणानि सन्ति चेत् पुन: प्रश्न: कर्तव्य: यथा - पुन: कथम्भूत:, पुन: कीदृश: इत्यादय:। तुमुन् - प्रत्ययान्तानि पदानि, क्त्वान्तपदानि, णमुल्प्रत्ययान्तानि, ल्यबन्तादीनि यदि भवेयु: तर्हि यथास्थानं योजनीयानि । कर्त्रादीनां तद्विशेषणानाञ्च अन्वयं प्रश्नद्वारा सम्पाद्य छात्रेषु सक्रियतामानयति । तत: पूर्वं सम्पूर्णश्लोकस्य भावं ज्ञापयति । अत्र खण्डान्वयस्य प्रयोग: कक्षायां कथं कर्तव्य इति प्रदीयते । यथा -

**खण्डान्वय: -**

**वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।**
**जगत: पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ 1.1 ॥**

श्लोके क्रियापदं किम् ? - वन्दे ।
कौ वन्दे ? - पार्वतीपरमेश्वरौ वन्दे ।
कीदृशौ पार्वतीपरमेश्वरौ ? - पितरौ ।
कस्य पितरौ ? - जगत: ।
पुन: कीदृशौ ? - सम्पृक्तौ ।
काविवसम्पृक्तौ ? - वागर्थाविव ।
किमर्थं वन्दे ? - वागर्थप्रतिपत्तये ।

अत्र अधस्तात् यथाक्रमं पदानि उपरि पर्यन्तं स्थापयामश्चेत् अन्वय: सम्भवति । यथा -

**अन्वय:** - वागर्थप्रतिपत्तये वागर्थाविव सम्पृक्तौ जगत: पितरौ पार्वती परमेश्वरौ वन्दे ।

**द्वितीयम् उदाहरणम्** -

अत्र अधः प्रदत्तस्य शिशुपालवधस्थश्लोकस्य पदच्छेदं पदार्थोक्तिं विग्रहवाक्यमिति सोपानानि विधाय अन्वयं सम्पादयति -

**श्रियः पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि ।**
**वसन्ददर्शावतरन्तमम्बराद्धिरण्यगर्भाङ्गभुवं मुनिं हरिः ॥ १.१॥**

**पदच्छेदः** - श्रियः, पतिः, श्रीमति, शासितुम्, जगत्, जगन्निवासः, वसुदेवसद्मनि, वसन्, ददर्श, अवतरन्तम्, अम्बरात्, हिरण्यगर्भाङ्गभुवम्, मुनिम्, हरिः।

**आकाङ्क्षा** is as follows - (प्रधानं वाक्यम् - हरिः मुनिं ददर्श)

| | | |
|---|---|---|
| श्लोके प्रधानं क्रियापदं किम् ? | - | ददर्श |
| कः ददर्श ? | - | हरिः ददर्श |
| कथं भूतः हरिः ? | - | श्रियःपतिः |
| पुनः कथं भूतःहरिः? | - | जगन्निवासः |
| किं कुर्वन् ददर्श? | - | वसन् |
| कस्मिन्/कुत्र वसन् ? | - | वसुदेवसद्मनि |
| कीदृशि वसुदेवसद्मनि ? | - | श्रीमति |
| किं कर्तुम् वसति? | - | शासितुम् |
| किं शासितुम्? | - | जगत् शासितुम् |
| कं ददर्श ? | - | मुनिं ददर्श |
| कथं भूतं मुनिं ददर्श ? | - | हिरण्यगर्भाङ्गभुवम् |
| पुनः कथं भूतं? | - | अवतरन्तम् |
| कस्माद् अवतरन्तम् ? | - | अम्बरात् |

**अन्वयः** - जगन्निवासः श्रियः पतिः हरिः जगत् शासितुं श्रीमति वसुदेवसद्मनि वसन् अम्बराद् अवतरन्तं हिरण्यगर्भाङ्गभुवं मुनिं ददर्श ।

After analyzing all words] re&arrange them such that the meaning of the verse is easier to comprehend-

**अन्वयविधेः गुणदोषविचारः** -

**गुणाः** - दण्डान्वयात् खण्डान्वयः बालबुद्धिबोधनविषये प्रशस्यतरः । पाश्चात्यानां संवादपद्धतिरिव अनुप्रयोगप्रतिवचनात्मकः प्रकारः भाषायाः दृढानुशीलनार्थम् अतीवोपयुक्तश्च । अतः अथ टीकाग्रन्थनिविष्टः प्रश्नोत्तररूपखण्डान्वयः मौखिकाध्यापने अध्यापकैः विस्तरेण प्रयोक्तव्यः । अनया मातृभाषायाः प्रयोगं विनैव छात्राः विषयमवगच्छेयुः । व्यवहार-सहकृतैषा खण्डान्वयपद्धतिः प्रतीच्यानां संवादपद्धतेः

(Dialogue Method) सुतरां साधर्म्यम् आपन्ना बालप्रौढानाम् अध्यापने अद्यत्वे परमहितकारित्वात् अनुसरणयोग्या इति । सर्वविधस्तरेषु अयम् उपयोक्तुं शक्य: अत: विधि: अयं पूर्ण: मनोवैज्ञानिक: विद्यते।

**न्यूनता:** - प्राय: न्यूनतानाम् अभाव: एव अस्य विधे: वैशिष्ट्यम् ।

**दण्डान्वयखण्डान्वयविधे: साम्यं वैषम्यं च -**

खण्डान्वये प्रधानक्रियापदस्य आधारेण प्रश्नकरणस्य आरम्भ: भवति परं दण्डान्वये कर्तृपदं स्वीकृत्य प्रश्नकरणस्य आरम्भ: भवति । दण्डान्वयपद्धतौ प्रश्ना: मातृभाषायामपि कर्तुं शक्यन्ते परं खण्डान्वये प्रश्ना: संस्कृतेनैव भवन्ति । दण्डान्वय: व्याकरणाधारितं पदान्वयं (Grammatical form of words) करोति तथैव खण्डान्वय: विषयाधारितं पदान्वयं (Subject form of words) करोति । खण्डान्वय: पूर्णमनोवैज्ञानिक: बालानां सुखबोधाय उपयुज्यते । दण्डान्वयविधि: वैज्ञानिक: विधि: भवति तथा व्याकरणज्ञानं द्रढयति । खण्डान्वय: वैयक्तिकशिक्षणापेक्षया सामूहिक-शिक्षणे अधिकोपयोगिविधि: भवति । दण्डान्वयेन वैयक्तिकशिक्षणे अधिकं साफल्यं भजते । मीमांसकै: एकदेशिभि: अन्विताभिधानवादिभि: वाक्यबोधपुरस्सरपदबोधत्वेन सकण्ठरवमुद्घोषित: दण्डान्वयस्य स्वरूपविशेष: । अभिहितान्वयवादिमीमांसकानां मतं तु खण्डान्वयस्वरूपतुल्यं पदबोध-पुरस्सरं वाक्यार्थे पर्यवस्यतोर्वाक्यशेषसिद्धिपदसान्निध्यरूपयो: शक्तिग्रहोपाययो: निलीनमितिप्रतीयते । इत्थं प्राचीनभारतीयशिक्षणपरम्परायाम् अन्वयविधे: वैशिष्ट्यं प्रतिपादितम् ।

**सन्दर्भा:**


1. कालिदासस्य कुमारसम्भवस्य संजीवनी नाम्नी मल्लिनाथटीका 1.1 ।
2. रमणीयार्थप्रतिपादक: शब्द: काव्यम् - जगन्नाथपण्डितराज: । (रसगङ्गाधर:)
3. वाक्यं रसात्मकं काव्यम् - विश्वनाथ: । (साहित्यदर्पणम्)
4. इष्टार्थव्यवच्छिन्ना पदावली काव्यम् - दण्डि: । (काव्यादर्श:)
5. शब्दाथा सहितौ काव्यम् - भामह: । (काव्यालङ्कार:)
6. चतुर्वर्गफलप्राप्ति: सुखादल्पधियामपि ।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते ।। (विश्वनाथ: - साहित्यदर्पण:)
धर्मार्थकाममोक्षाणां वैचक्षण्यं कलासु च ।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम् ।। (भामह: - काव्यालङ्कार: 1/12)
7. ध्वन्यालोक: 4.4 गीता ।
8. ओंकारदासस्य अन्वयप्रबोधिनी ।
9. उपयुक्तांशसङ्ग्रह: - श्रीताताचार्यसाहाय्यकेन विरचित: ।
10. ओंकारदासस्य अन्वयप्रबोधिनी ।

**सन्दर्भग्रन्थसूची**

1. संस्कृतशिक्षणं नवीनप्रविधयश्च, च. ल. ना. शर्मा ।
2. संस्कृतानुशीलनविवेकः, (1949) हूपरीकर् गणेशश्रीपत्, दि भारत् बुक् स्टाल्, कोल्हापूर, महाराष्ट्रम् ।
3. साहित्यशिक्षणविधयः, (2007) लता एन्., राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति, आन्ध्रप्रदेशः।



**सहायकाचार्यः**
**शिक्षाशास्त्रविभागः**
**राष्ट्रियसंस्कृतसंस्थानम्**
**नवदेहली ।**


★★★

# शास्त्रतत्त्वसुखबोधाय तन्त्रयुक्तयः

✍डॉ. देवदत्तसरोदे

(तन्त्रं नामात्र शास्त्रम् । युक्तिश्च वस्तुतः कार्य्यकारणभावज्ञानम् । प्रेक्षावतां प्रवृत्तये निवृत्तये च युक्तिरेव साधिका । तथा हि संस्कृतवाङ्मये शास्त्रं द्विविधम् - सयुक्तिकं शास्त्रम्, अयुक्तिकं शास्त्रञ्च । अयुक्तिकमित्यत्युक्ते सर्वथा युक्त्यभाव इति नाभिप्रायः, अपितु तदनुपलब्धिमात्रम् । यच्च शास्त्रं सयुक्तिकं तदेव लोके प्रथते । तस्मादेव ज्यौतिषसिद्धान्ते यथा जनानां श्रद्धा, न तथा फलितज्यौतिषे । तत्रापि समवधेयम् - प्रभुसम्मितवचस्सु प्रवृत्तये न युक्त्यपेक्षा । अतो वेदस्मृत्यादिविधिषु उपदेशमात्रेणैव प्रवृत्तिः । तस्माच्छब्दप्रमाणकावयमित्युद्घोषः । किञ्च, युक्तिप्रदर्शनं तदनुसन्धानञ्च लौकिके पदार्थे एव सम्भवम् । अलौकिके चासम्भवप्रायमेव । प्रदर्शितायामपि तादृश्यां युक्तौ तदधिगमाय लोकसामर्थ्याभावात् वेदादिषु युक्त्यप्रदर्शनम् । यद्यपि ब्राह्मणादिग्रन्थे युक्तयो बहुधोपलभ्यन्ते परन्तत्रासामर्थ्यात् सहसा न प्रवृत्तिः । सत्यपि एतदृशे वस्तुतत्त्वे युक्तीनामनुपयोगित्वमिति वक्तुं नैवशक्यम्, तथाननुभवात् । आचाण्डालं युक्तिं वीक्ष्यैव प्रवृत्तिनिवृत्ति भवत इति न तिरोहितं वचः । अत एव काकदन्तगवेषणे न मन्दमतेरपि प्रवृत्तिः । विद्वाँल्लेखकः तत्वमिदमनुभूयात्र लेखे युक्तिमहत्त्वं प्रतिपाद्य तत्र तत्रोद्धृतयुक्तीः संगृह्य ता विविच्य च शास्त्रीयपरम्पराह्रासं प्रति युक्त्यभावो युक्त्यनुपलब्धिर्वा कारणमिति निष्कर्षति ॥ - स.)

भारतीयपरम्परायां धर्माधर्मयोः सदसतोः कर्त्तव्याकर्त्तव्ययोः विवेकं कर्तुं श्रुतिस्मृतिशास्त्रप्रामाण्यमन्तरेण नास्त्यन्यच्छरण्यम् । अत एव भगवता कृष्णेन गीतायामुपदिष्टम् -

**तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।**
**ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥**

किञ्च सत्यं ज्ञानं अनन्तं ब्रह्म इति उपनिषद्वचनं ब्रह्मस्वरूपं विवृणोति । कथं नु वयं ब्रह्म विजानी महे एतदर्थमपि श्रुत्यादिशास्त्राणि प्रमाणानि । अतो हेतोः एवं जातीयकं प्रमाणभूतं शास्त्रम् अस्मत् संस्कृतेः जीवातुभूतं वरीवर्ति । किन्तु खलु शास्त्रम् इति जिज्ञासायामुच्यते शिष्यते अनेन इति शास्त्रम् । शास्त्रम् इति पदं शासुअनुशिष्टौ इत्यस्माद्धातोः करणे ष्ट्रन् प्रत्यये सति निष्पद्यते । शास्तीति शास्त्रम् अथवा शासनाद्वा शास्त्रम् । शास्त्रं परमतत्त्वप्रतिपादनपरं भवति । पुराकालाद्

आरभ्य ज्ञानं विज्ञानं च उत्तरवर्तिसन्तत्यै उपदेष्टुम् प्रदातुं च शास्त्राणि प्रणिन्यु: आचार्या:[१]। शास्त्राणां रचनापद्धति: स्वरूपं कथं स्यात ? शास्त्रसुखबोधो वा कथं भवेत् ? तदर्थं तै: भृशमनुसन्धानं विधाय कतिपयतन्त्रयुक्तय: प्रस्तुता: । तन्त्रयुक्ति: इति पदं पारिभाषिकम् । एतद्द्वयो: पदयो: समासेन सम्भूतं पदम् । तत्र आदौ तावत्तन्त्रमिति पदं तनुविस्तारे इत्यस्माद्धातो: औणादिके ष्ट्रन्प्रत्यये कृते सति तन्त्रम् इति पदं निष्पद्यते । तन्यते अनेन इति तन्त्रम् अथवा तनोतीति तन्त्रं शास्त्रमित्यर्थ: । तन्त्रम् अथवा शास्त्रं नाम सदसद्विवेकं करोति, संदहपदेषु वस्तुषु प्रमाणमिव राजते, सन्मार्गं नयति, बुद्धिं विशारदीं करोति, ज्ञाननेत्रमुन्मीलयति, मार्गदर्शनं विदधाति, विज्ञानं विकचीकरोति किञ्चजीवने पुरुषार्थचतुष्टयसम्पादनाय प्रामाणिकं ज्ञानं नियच्छति तच्छास्त्रं भवति । यद्यपि तन्त्रशब्दस्य बहव: अर्था: सन्ति परं प्रकृतप्रसङ्गे शास्त्रम् इत्यर्थ एव सङ्गच्छते । सुव्यवस्थित: सुनिश्चित: वैज्ञानिक: सिद्धान्त: नियम:, इत्यादिष्वर्थेषु तन्त्रशब्दस्य प्रयोग: वाराहीतन्त्रे दृश्यते । काशिकायां तन्त्रशब्दस्य अर्थ: एवमस्ति, तन्यते, विस्तार्यते, ज्ञानमनेनेति तन्त्रम्[२]। तन्त्रशब्दस्य व्याकरणसम्मतार्थ: विस्तृति: अस्ति । आचार्य: शङ्कर: शास्त्रशब्दस्य कृते तन्त्रपदं प्राह, तथा च साङ्ख्यकारिकाकार: ईश्वर-कृष्णोऽपिसाङ्ख्यशास्त्रं षष्टितन्त्रमाह,[३] अत एव उच्यते तनोति विपुलानर्थान्तत्त्वमन्त्रसमन्वितान् । त्रयं च कुरुते यस्मात्तन्त्रमित्यभिधीयते ॥ इति एवं विस्तरविवेचनस्पष्टीकरणात्परं तन्त्रं नाम क्रमबद्धं सुव्यवस्थितं परिपूर्णविषयप्रतिपादनपरं ज्ञानम् इति फलितम् ।

अथ का नु खलु युक्ति:? युक्ति: - युज्यन्ते सङ्क्ल्प्यन्ते सम्बध्यन्ते परस्परमर्था: सम्यक्तया प्राकरणिकेऽभिमतेऽर्थे विरोधव्याघातादिदोषमपास्यानया इति युक्ति:- युक्तिर्नाम उपाय:, हेतु:, कारणम्, क्रमबद्धता, रचना, न्यास:, समुचितादय:, बहव: अर्था: सन्ति । चरकस्तु युक्तिलक्षणमेवमाह -

**बुद्धि: पश्यति यान्भावान्बहुकारणयोगजान् ।**
**युक्तिस्त्रिकाला सा ज्ञेया त्रिवर्ग: साध्यते यया ॥ च. सू. 11.25**

ययाधर्म:, अर्थ:, काम: इति त्रिवर्ग: साध्यते अथवा विज्ञातेऽर्थे कारणोपपत्तिदर्शनाद् अविज्ञातेऽपि तदवधारणं युक्ति: ॥ युक्तिर्नाम ज्ञातार्थे कारणसङ्गतिं वीक्ष्य अविदितार्थे तत्समाधान विनिश्चय: युक्ति: ।

तन्त्रस्य युक्तयस्तन्त्रयुक्तय: । अथवा शास्त्रावगमनोपाया:, शास्त्ररचनोपाया: वा । तन्त्रयुक्तीनां ये अर्था: आयुर्वेदशास्त्रे प्रोक्ता: त एव अर्था: शास्त्रान्तरेषु यथायथं भवन्ति इति नियमो नास्ति, क्वचिद् शास्त्रान्तरे अर्थभेदो भवितुमर्हति ।

प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इत्युक्तदिशा तन्त्रयुक्तीनां किं प्रयोजनम् ? इति जिज्ञासायां सुश्रुताचार्य: तन्त्रयुक्तीनां प्रयोजनं द्वयमाह -

**वाक्ययोजनम्** - असम्बद्धवाक्यस्य सङ्गतीकरणम् यथा - योग:, उद्देश्य:, निर्देश:,[४]।

**अर्थयोजनम्** - अर्थयोजनं नाम अप्रकटितस्य अन्तर्लीनार्थस्य प्रकाशनम् अर्थयोजनम्, यथा - अधिकरणम्, पदार्थ:, ऊह्य:[५] इत्यादि । शास्त्ररचनाप्रसङ्गे, शास्त्रावगमनसन्दर्भे तन्त्रयुक्तय: मूलाधारत्वेन स्थीयन्ते ।

**तन्त्रयुक्तय:** – चरकसंहिता, सुश्रुतसंहिता, विष्णुधर्मोत्तरपुराणम्, अष्टाङ्गहृदयम्, अर्थशास्त्रम् इत्यादिषु ग्रन्थेषु तन्त्रयुक्तीनां वर्णनमुपलभ्यते परमस्य सर्वाधिकोपयोग: न्यायशास्त्रस्य भाष्ये दृश्यते तन्त्रयुक्तिर्नाम शास्त्रबोधाय उपायो य: शास्त्रस्य रचनाप्रसङ्गे व्याख्यानप्रसङ्गे अत्यन्तमुपकरोति।

**तन्त्रयुक्ते: महत्त्वम्** – निम्नलिखितश्लोक: तन्त्रयुक्ते: ज्ञानस्य महत्त्वं प्रतिपादयति, तद्यथा –

**अधीयानोऽपि तन्त्राणि तन्त्रयुक्त्यविचक्षण:।**
**नाधिगच्छति तन्त्रार्थमर्थं भाग्यक्षये यथा।।**[6]

(अर्थ: – यथा भाग्यक्षये सति जन: धनं प्राप्तुमप्रभु: असमर्थो भवति तद्वत् यदि कश्चित् शास्त्राण्यधीयान: तन्त्रयुक्ती: न जानाति चेत् अथवा तन्त्रयुक्ती: प्रयोक्तुं न प्रभवति तर्हि स तन्त्रार्थं ज्ञातुं न प्रभवति ।)

चरकाचार्योऽपि तन्त्रयुक्ते: महत्त्वम् एवमेव प्राह

**यथाऽम्बुजवनस्यार्क: प्रदीपो वेश्मनो यथा**
**प्रबोध (न) प्रकाशार्थास्तथा तन्त्रस्य युक्तय: ॥ ८.१२.४६**
**एकस्मिन्नपि यस्येह शास्त्रे लब्धास्पदा मति:**
**स शास्त्रमन्यदप्याशु युक्तिज्ञत्वात् प्रबुध्यते ॥ ८.१२.४७**

अर्थ: – यथा पङ्कजकदम्बोन्मीलननिमित्तं सूर्यो भवति, यथा च प्रदीप: गृहं प्रकाशयति तथा तन्त्रयुक्तय: शास्त्रस्य अर्थान् प्रकाशयन्ति । यस्य मति: एकस्मिन्नपि शास्त्रे तन्त्रयुक्तिभि: क्रमते, स अपरमपि शास्त्रं लीलया द्रुतमधिगच्छति । युक्तिज्ञत्वम्तत्र हेतु: ।

चरकाचार्य: स्वीयं तन्त्रं कथं विशिष्टं दोषरहितं विद्यते तदर्थं हेतुराह तन्त्रयुक्तिरिति । तथा च

**इदमन्यूनशब्दार्थं तन्त्रं दोषविवर्जितम् ।**
**षट्त्रिंशता विचित्राभिर्भूषितं तन्त्रयुक्तिभि:।। च.सि. 12.69**

चरकसंहितायाम् (८.१२.४१--४४)- ३६ तन्त्रयुक्तय:परिगणिता: सन्ति । तद्यथा –

**तत्राधिकरणं योगो हेत्वर्थोऽर्थ: पदस्य च ।**
**प्रदेशोद्देशनिर्देशवाक्यशेषा: प्रयोजनम् ।। 41**
**उपदेशापदेशातिदेशार्थापत्तिनिर्णया: ।**
**प्रसङ्गैकान्तनैकान्ता: सापवर्गो विपर्यय:।। 42**
**पूर्वपक्षविधानानुमतव्याख्यानसंशया: ।**
**अतीतानागतावेक्षास्वसंज्ञोह्यसमुच्चया:।। 43**
**निदर्शनं निर्वचनं संनियोगो विकल्पनम् ।**
**प्रत्युत्सारस्तथोद्धार: संभवस्तन्त्रयुक्तय:।। 44**

(१) अधिकरणम् (२) योग: (३) हेत्वर्थ: (४) पदार्थ: (५) प्रदेश: (६) उद्देश: (७) निर्देश: (८) वाक्यशेष: (९) प्रयोजनम् (१०) उपदेश: (११) अपदेश: (१२) अतिदेश: (१३)

अर्थापत्तिः (१४) निर्णयः (१५) प्रसंगः (१६) एकान्तः(१७) नैकान्तः (१८) अपवर्गः (१९) विपर्ययः (२०) पूर्वपक्षः (२१) विधानम् (२२) अनुमतम् (२३) व्याख्यानम् (२४) संशयः(२५) अतीतावेक्षणम् (२६) अनागतावेक्षणम् (२७)स्वसंज्ञा (२८) ऊह्यः (२९) समुच्चयः (३०) निदर्शनम् (३१) निर्वचनम् (३२) नियोगः(३३) विकल्पनम् (३४) प्रत्युत्सारः (३५) उद्धारः (३६) सम्भवः ।

अष्टाङ्गहृदयेऽपि ३६ तन्त्रयुक्तयः परिगणिताः सन्ति । सुश्रुतसंहितायाः ६५ तमे अध्याये ३२ तन्त्रयुक्तयः परिगणिताः सन्ति । अर्थशास्त्रस्य १५ तमे अधिकरणे चाणक्यः ३२ तन्त्रयुक्तीः परिगणयामास । कौटिल्येन वर्णिताः तन्त्रयुक्तयः प्रायः सुश्रुतेन परिगणिताभिः ३२ तन्त्रयुक्तिभिः साम्यं भजन्ते । विष्णुधर्मोत्तरपुराणेऽपि ३२ तन्त्रयुक्तयः परिगणिताः सन्ति । वासुदेवशरणः अग्रवालः एवं मनुते यत् पाणिनिव्याकरणेऽपि सूत्रकारः पाणिनिः २८ तन्त्रयुक्तीनां प्रयोगं चकार ताश्च युक्तयः – १) सङ्गतिः २) मङ्गलम् ३) विधानम् ४)हेत्वर्थः ५) उपदेशः ६) अपदेशः ७) अतिक्रान्तावेक्षणम् ८) अनागतावेक्षणम् ९) संशयः १०) वाक्याध्याहारः ११) अनुभवः १२) अतिशयवर्णनम् १३) निर्वचनम् १४) स्वसंज्ञा १५) पूर्वपक्षः १६) उत्तरपक्षः १७) अतिदेशः १८) विकल्पः १९) अधिकारः एताः अतिरिच्य ९ तन्त्रयुक्तीनामपि उल्लेखो विद्यते २०) प्रत्युत्सारः २१) अपवादः २२) समुच्चयः २३) पदार्थः २४) योगः २५) नैकान्तः २६) विपर्ययः २७) नियोगः २८) प्रदेशः इति ।

| अनु. क्र. | कौटिल्यः | चरकः | सुश्रुतः | विष्णुधर्मोत्तरपुराणम् |
|---|---|---|---|---|
| 1 | अधिकरणम् | अधिकरणम् | अधिकरणम् | अधिकरणम् |
| 2 | योगः | योगः | योगः | योगः |
| 3 | हेत्वर्थः | हेत्वर्थः | हेत्वर्थः | हेत्वर्थः |
| 4 | पदार्थः | पदार्थः | पदार्थः | पदार्थः |
| 5 | उद्देशः | उद्देशः | उद्देशः | उद्देशः |
| 6 | निर्देशः | निर्देशः | निर्देशः | निर्देशः |
| 7 | उपदेशः | उपदेशः | उपदेशः | उपदेशः |
| 8 | अपदेशः | अपदेशः | अपदेशः | अपदेशः |
| 9 | प्रदेशः | प्रदेशः | प्रदेशः | प्रदेशः |
| 10 | अतिदेशः | अतिदेशः | अतिदेशः | अतिदेशः |
| 11 | अपवर्गः | अपवर्गः | अपवर्गः | अपवर्गः |
| 12 | वाक्यशेषः | वाक्यशेषः | वाक्यशेषः | वाक्यशेषः |
| 13 | अर्थापत्तिः | अर्थापत्तिः | अर्थापत्तिः | अर्थापत्तिः |

| | | | | |
|---|---|---|---|---|
| 14 | विपर्यय: | विपर्यय: | विपर्यय: | विपर्यय: |
| 15 | प्रसङ्ग: | प्रसङ्ग: | प्रसङ्ग: | प्रसङ्ग: |
| 16 | एकान्त: | एकान्त: | एकान्त: | एकान्त: |
| 17 | उपमानम् | नैकान्त: | अनेकान्त: | अनेकान्त: |
| 18 | पूर्वपक्ष: | पूर्वपक्ष: | पूर्वपक्ष: | पूर्वपक्ष: |
| 19 | उत्तरपक्ष: | उत्तरपक्ष: | उत्तरपक्ष: | उत्तरपक्ष: |
| 20 | अनुमतम् | अनुमतम् | अनुमतम् | अनुमतम् |
| 21 | विधानम् | विधानम् | विधानम् | विधानम् |
| 22 | अनागतवेक्षणम् | अनागतवेक्षा | अनागमवेक्षणम् | अनागतवेक्षणम् |
| 23 | अतिक्रान्तावेक्षणम् | अतीतावेक्षा | अतिक्रान्तवेक्षणम् | अतिक्रान्तवेक्षणम् |
| 24 | संशय: | संशय: | संशय: | संशय: |
| 25 | व्याख्यानम् | व्याख्यानम् | व्याख्यानम् | अतिव्याख्यानम् |
| 26 | स्वसंज्ञा | स्वसंज्ञा | स्वसंज्ञा | स्वसंज्ञा |
| 27 | निर्वचनम् | निर्वचनम् | निर्वचनम् | निर्वचनम् |
| 28 | निदर्शनम् | निदर्शनम् | निदर्शनम् | दष्टान्त: |
| 29 | नियोग: | संनियोग: | नियोग: | नियोग: |
| 30 | विकल्प: | विकल्पनम् | विकल्प: | विकल्प: |
| 31 | समुच्चय: | समुच्चय: | समुच्चय: | समुच्चय: |
| 32 | ऊह्यम् | ऊह्यम् | ऊह्यम् | ऊह्यम् |
| 33 | | प्रयोजनम् | | |
| 34 | | प्रत्युसार: | | |
| 35 | | उद्धार: | | |
| 36 | | सम्भव: | | |

**शास्त्ररचनाया: मौलिकसोपानानि- Basic Structure of a Treatise**

शास्त्रं प्रामाणिकं, निर्दुष्टं, तत्त्वसमन्वितं, बोधसुकरं, क्रमिकं, सुव्यवस्थितं कथं स्यात् तदर्थं का पद्धति: के चोपाया: प्रयोक्तव्या: इति विचारवेलायां तन्त्रयुक्तय: तत्रोपकर्तुं प्रभवन्ति, आभि: तन्त्रयुक्तिभि: शास्त्रं सुव्यवस्थितं कृतं बोध्यञ्च भवति । शास्त्ररचनाप्रसङ्गे निम्नाङ्किता: तन्त्र-युक्तय: उपयुक्ता: भवन्ति तथा च -

1. **प्रयोजनम्** – प्रयोजनं नाम यदर्थं कामयमान: प्रवर्तते यथाधातु साम्यक्रिया चोक्ता तन्त्रस्यास्य प्रयोजनम् – इतिचरके च. सू. १/५३ अथवा प्रयोजनं नाम यदर्थं शास्त्रादि प्रवर्तते – यथा– रक्षोहागमलघ्वसंदेहा: प्रयोजनम्[5] –
2. **अधिकरणम्** – अधिकरणं नाम यमर्थमधिकृत्य प्रवर्तते कर्ता । यथा 'विघ्नभूता यदा रोगा:' (सू.१) इत्यादि । अत्र रोगादिकमधिकृत्य आयुर्वेद: महर्षिभि: कृत: इति 'रोगा:' इत्यधिकरणम् । – (च.सि.१२/४२)चक्रपाणि:।
3. **विधानम्** –विधानं नाम तन्त्रस्य कर्त्रा यस्मिन्विषये या विशिष्टा पदादिरचना कृतातद्विधानम् अथवा प्रकरणानुपूर्व्यभिहितं विधानम् – सु. सं. ६५/२९
4. **उद्देश**:– उद्देशो नाम सङ्क्षेपाभिधानम् । यथा हेतुलिङ्गौषधज्ञानम् । (सू.१) अनेन सर्वायुर्वेदाभिधेयोद्देश: । उद्देशलक्षणपरीक्षेति त्रितयं न्यायशास्त्रम् अत्र उद्देश: शास्त्रस्य प्रथमं लक्षणं सोपानं वा इहापि उद्देशोनाम संक्षिप्तकथनं समासवचनमुद्देश: ।
5. **निर्देश**: – निर्देशो नाम सङ्क्षेपोक्तस्य विस्तरेण विवरणम् यथा हेतुलिङ्गौषधस्य पुन: प्रपञ्चनम् ।सर्वदा सर्वभावानामित्यादिना इत्युक्तं कारणम् इत्यनेन कारणप्रपञ्चमित्यादि । च. सि.१२.४२

**विवरणम्** – उद्देशे नाममात्रेण विषयवस्तुन: सङ्कीर्तनम् भवति । एवं ये सङ्कीर्तिता: पदार्था: तेषां विस्तरेण विवेचनं निर्देशे भवति । अत: उद्देश–निर्देशौ एतौ परस्परापेक्षिकौ । 'अयम् उद्देशग्रन्थ:' इति वक्तव्यं चेत् अस्य निर्देशग्रन्थ: क: इति अवश्यं वक्तव्यम् । 'अयं निर्देशग्रन्थ:' इति वक्तव्यं चेत् कस्य अयं निर्देशग्रन्थ: इति अवश्यं वक्तव्यम् । अत: उद्देश–निर्देशयो: उदाहरणानि एकत्र एव वक्तव्यानि । चक्रपाणिना तथैव कृतम् । 'हेतुलिङ्गौषधज्ञानम्' इत्ययमुद्देशग्रन्थ: इति वदता तेन 'सर्वायुर्वेदाभिधेयम् अस्य निर्देश:' इति उक्तम् ।

### स्पष्टीकरणयुक्तय: Explanation of Concepts

शास्त्रनियमानां सम्प्रत्यायानां सिद्धान्तानां केवलं कथनम् असम्बद्धम् अस्पष्टं भवति तत्प्रतिपत्तये सोदाहरणं स्पष्टीकरणाय युक्तय: उपकुर्वन्ति, अधस्तात् एवंजातीयका: काश्चन युक्तय: उपन्यस्ता: सन्ति

1. **निर्वचनम्** – शास्त्रे प्रयुक्तपदानां निरुक्ति: अथवा व्युत्पत्तिपुरस्सरमर्थबोध:, निर्वचनम् इति कथ्यते, निर्वचनं पञ्चधा क्रियते वर्णागमो, वर्णविपर्ययो, वर्णविकारो, वर्णनाश:, धातूनाम् अर्थातिशय: इति यथा–पातीति पिता, हिनस्ति इति सिंह: ।
2. **पूर्वपक्ष**: – पूर्वपक्षो नाम आक्षेपयुक्तै: प्रश्नै: उक्तविषये आपत्तिप्रस्ताव: विप्रतिपत्ति: वा । प्रतिषेद्धव्यं वाक्यं पूर्वपक्ष: – कौटलीय अर्थशास्त्र 15/53 पूर्वपक्षो नाम प्रतिज्ञातार्थसंदूषक–

वाक्यम् - च. सं. सिद्धि स्थान 26 चक्रपाणि आक्षेपपूर्वकः प्रश्नः पूर्वपक्षः - सुश्रुत उत्तरतन्त्र 22

3. **अनुमतम्** - अनु + मन् + क्त = अनुमतम् । अनुमतं नाम सम्मतः अनुज्ञातः, स्वीकृतः इति अनर्थान्तरानि । परमतं प्रति सिद्धमनुमतम् । अनुमतं नाम एकीयमतस्यानिवारणेनानुमननम् ।

4. **उत्तरपक्षः** - उत्तरपक्षा नाम आक्षेपाणां तार्किकं समाधानम् ।

5. **दृष्टान्तः** - लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः[8] । शिक्षणावसरे विषयसुखबोधाय लोकप्रसिद्धोदाहरणं प्रस्तौति अध्यापकः, येनच्छात्राः त्वरितं पाठ्यविषयं, कठिनांशं वा जानीयुः ।

6. **व्याख्यानम्** - शास्त्राणां सम्यग् अर्थप्रतिपत्तये वृत्तिर्व्याख्यानमनिवार्यम् । भाष्यकारः महाभाष्ये प्राह व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणम्[9] इति । तथा च व्याख्यानस्य लक्षणम् - **पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना ।**

**आक्षेपोऽथ समाधानं व्याख्यानं षड्विधं मतम्[10]॥**

सूत्राणां पदच्छेदं विधाय पदार्थं संबोध्य समासविग्रहं विधाय अर्थप्रतिपत्तिं कृत्वा पदानि यथाक्रमं सार्थकं संयोज्य तद् गतार्थं प्रतिपाद्य तदुपरि पूर्वपक्षरूपेणाक्षेपं विधाय तस्य समाधानं कृत्वा निश्चितसिद्धान्तस्थापनम् अर्थनिष्पतिः व्याख्यानं भवति । एवं षड्भिरुपायैः साधनैः सूत्रार्थः सूत्रव्याख्यानं वा कार्यम् ।

अपरे केचन व्याख्यानस्य लक्षणमेवमाहुः

**सूत्रार्थश्च पदार्थश्च हेतुश्च क्रमशस्तथा।**
**निरुक्तमथविन्यासो व्याख्यायोगस्य षड्विधा ॥ वि.ध.पु. 3.4.11**

**शास्त्रतात्पर्यप्रतिपत्तये, शास्त्रव्याख्यानाय च युक्तयः Style of Expression and Diction**

शास्त्रतात्पर्यप्रतिपत्तये, शास्त्रव्याख्यानाय च कतिपया अन्याः तन्त्रयुक्तयः सन्ति याः शास्त्रतत्त्वावगमे, अर्थनिर्धारणे, व्याख्याने च उपकारकाः भवन्ति । तास्वन्यतमाः काश्चन एव स्थालिपुलाकन्यायेन प्रस्तूयन्ते अधस्तात्तद्यथा-

1. **वाक्यशेषः** - वाक्यशेषो नाम सूत्रस्य अर्थं पूरयितुं किमपि सूत्रे अविद्यमानं पदं सूत्रे गह्यते इति अस्याः तन्त्रयुक्तेः स्वरूपम् । यस्मिन सूत्रे लाघविकेन अर्थात् गम्यमानम् अनुक्तपूरणार्थम् अध्याह्रियते । यथा (अ.हृ.शा. ३/३) 'तत्र खात् खानि देहेऽस्मिन्' भवन्ति इति वाक्यशेषः । अथवा वाक्यशेषो नाम यल्लाघवार्थम् आचार्येण पदम् अकृतं गम्यमानतया पूर्यते । यथा प्रवृत्तिहेतुः भावानाम् (च.सू.१/६) इत्यत्र 'अस्ति' इति पदं पूर्यते । अन्येषु शास्त्रेष्वपि वाक्यशेष - तन्त्रयुक्तेः प्रयोगः दृश्यते यथा - उत्तरमीमांसायाम् अथातो

ब्रह्मजिज्ञासा । ब्र. सू. १.१.१ अत्र शाङ्करभाष्यमेवम् – ...यथोक्तसाधनसम्पत्त्यनन्तरं ब्रह्मजिज्ञासा कर्तव्या ।

2. **अर्थापत्ति:** – यत्रैकेनार्थेनोक्तेनापरस्यार्थस्यानुक्तस्यापि सिद्धि: यथा – नक्तं दधिभोजननिषेध: अर्थाद् दिवा भुञ्जीतेत्यापद्यते – च.नि. ८/४८, अथवा यदनुक्तमर्थादापद्यते साऽर्थापत्ति: – कौटिल्य–१५/१३

3. **समुच्चय:** – "अनेन चानेन चेति समुच्चय:", "समुच्चयो नाम यदिदं चेदं चेति कृत्वा विधीयते", "इदं चेदं चेति समुच्चय:", "समुच्चयो नाम एकस्मिन् विहिते तदविरोधेन तत्रैव द्वितीयस्य विधानं समुच्चय: ।

4. **अतिक्रान्तावेक्षणम्** – "पुरस्तादेकं विहितमित्यतिक्रान्तावेक्षणम् – अर्थात् पूर्वं विहितं यत्तद् अतिक्रान्तावेक्षणमस्ति । "अतीतावेक्षणं नाम यदतीतमेवोच्यते" अर्थाद् यथापूर्वोक्तस्य पुन: कथनम् अतीतावेक्षणमस्ति । "अतीतावक्षा नाम यत्रातीतं पदमवेक्ष्य सम्बन्धार्थता भवति सातीतावक्षा "अतीतं यदवेक्ष्योक्तमतीतावेक्षणम् हि तत् ।

5. **अनागतावेक्षणम्** – भवेदनागतावक्षा भावितार्थप्रदर्शनम् । अनागतं भविष्यद्यत्तस्यावेक्षा यथोच्यते ।

"पश्चादेवं विहितमित्यनागतावेक्षणम् – अर्थात् अग्रे एवं विधानं भविष्यति इति ईक्षणम् अनागतावेक्षणम् । "अनागतं विधिं प्रमाणीकृत्यार्थसाधनम्'' – च. सं.

इत्थं समासेन कतिपया: तन्त्रयुक्तय: उपन्यस्ता: व्याख्याताश्च ।

**उपसंहार:** –

भारतीयपरम्परायां प्राचीनकालादारभ्य अद्यावधि ऐहिकामुष्मिकफलावाप्तये मानवस्य मानव–मूल्यानि संरक्षितुं मानवत्त्वेन व्यवहर्तुं धर्मस्य दीपस्तम्भा: इव वेदा: शास्त्राणि च विराजन्ते । परन्तु गच्छता कालेन, वेदा: शास्त्राणि तेषां परम्परा च अनुदिवसं क्षीयमाणा परिलक्ष्यते । तद्यथा भाष्यकार: पतञ्जलि: वेदस्य शाखा: परिगणयति ''एकशतम् अध्वर्युशाखा: सहस्रवर्त्मा सामवेद: एकविंशतिधा बाह्वृच्यम्, नवधा आथर्वण:''[११] इति आसु वेदशाखासु अद्यत्वे कतिपया: एव उपलभ्यन्ते अन्ये नष्टा: क्षीणाश्च अभवन् । शास्त्रसंरक्षणं भवेत् इति भाष्यकार: व्याकरणप्रयोजनषु एवमाह ''आगम खल्वपि–ब्राह्मणेन निष्कारणो धर्म: षडङ्गो वेदोऽध्येयो ज्ञेयश्च[१२] । ब्राह्मण–ग्रन्थानामपि परम्परा नष्टा इव प्रतिभाति । शतपथब्राह्मणस्य कृत्स्नो विषयो वै तथा स्पष्टो न भवति यथा उपनिषदाम् । निरुक्तपरम्पराऽपि प्राय: नष्टा – यथा अष्टाध्यायीव्याकरणस्य परम्परा प्रथिता तथा निरुक्तपरम्परा नालक्ष्यते । उपवेदानां धनुर्वेद:, गान्धर्ववेद:, अर्थवेद: इत्यादीनां केवलं प्राकरणिका: विकीर्णा: ग्रन्था विलोक्यन्ते न तु साक्षात् उपवेदा:। श्रौतयागपरम्परा शास्त्रपरम्परा च दिने दिने क्षीयमाणा विद्यते । वैदिकविज्ञानपरम्परा भौतिकं, रसायनं, धातुशास्त्रं, जीवविज्ञानं, वनस्पतिविज्ञानं, कृषि विज्ञानम् ..... शिथिलीभूता, खण्डिता, विकीर्णा इवाभाति । यद्यपि

शास्त्रशिक्षणावबोधपरम्पराक्षये बहूनि कारणानि सन्ति तेषु अन्यतमं प्रधानं कारणं भवति, तन्त्रयुक्तीनां ज्ञानप्रयोगयोरभाव:, यावत्पर्यन्तं तन्त्रयुक्तीनां सुष्ठु ज्ञानं तत्प्रयोगकाशलम् आत्मसात् न भवति तावत्पर्यन्तं शास्त्रतत्त्वं बोद्धुं न शक्यते,अत: क्षीयमाणां शास्त्रपरम्परां संरक्षितुं संवर्धयितुं तन्त्रयुक्तीनां सुष्ठु ज्ञानं तत्प्रयोगकौशलम् इत्येतत् द्वयं समुपार्जनीयं तदर्थं कर्तव्य: कश्चन कल्प: । तन्त्रयुक्तयस्तु शास्त्रान्तरेषु क्वचित्[३२], क्वचित्[३६] क्वचिदन्यसंख्यासु सन्ति, सर्वासां तन्त्रयुक्तीनां विस्तरश: वर्णनमत्र मर्यादावशादकृत्वा केवलं सारसंक्षेपेण कतिपयानामेव शास्त्रावबोधशिक्षणदृशा वर्णनं विहितमित: एव सारभूतं तत्त्वं संगृह्य कोविदा: समादधीरन्विस्तरशो विज्ञातुं शास्त्राणि सभाष्याणि द्रष्टव्यानीति निवेद्य विरम्यते विस्तराद् ।

**सन्दर्भा: -**

1. पुरा साक्षात्कृतधर्माण ऋषयो बभूवु:। तेऽवरेभ्योऽसाक्षात्कृत-धर्मभ्य उपदेशेन मन्त्रान् सम्प्रादु: । उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदञ्च वेदाङ्गानि च ।। (निरु. 1।20)।
2. वृत्तौभाष्ये तथा धातुनाम परायणादिषु । विप्रकीर्णस्य तन्त्रस्यक्रियते सारसङ्ग्रह: ।। काशिका
3. सप्तत्यां किलयेऽर्थास्तेऽर्था: कृत्स्नस्यषष्टितन्त्रस्य । आख्यात्मिकाविरहिता: परवाद विवर्जिताश्चापि ।। सां.कारिका ७२
4. योगो नाम योजना व्यस्तानां पदानामेकीकरणम् । सूत्रस्थपदानां योजना । अनया योजनया शास्त्रसङ्गत: अर्थ: निष्पद्यते।उद्देश: नाम सङ्क्षेपाभिधानम्।निर्देशो नाम सङ्क्षेपोक्तस्य विस्तरेण विवरणम् ।
5. अधिकरणं नाम यमर्थमधिकृत्य प्रवर्तते कर्ता । अत्र रोगादिकमधिकृत्य आयुर्वेद: महर्षिभि: कृत: इति 'रोगा:' इत्यधिकरणम् । पदार्थ: - पदं नामपद्यतेगम्यते ज्ञायते अर्थोऽअनेन इति पदम् । पदस्यअर्थ: पदार्थ: । ऊह्यो नाम "अनुक्तकरणमुह्यम् ।", "ऊह्यो नाम यदनिषद्धं गन्थे प्रज्ञया तर्क्यत्वेनोपदिश्यते ।"। च. सं. वि. 8. सि. 12/44
6. सर्वाङ्गसुन्दरा । पृ. ९२
7. महाभाष्यपस्पशाह्निकम् ।
8. न्यायशास्त्रम् - १.१.२५ ।
9. महाभाष्यपस्पशाह्निकम् ।
10. महा. भाष्य. 2.1.1)।
11. महाभाष्यपस्पशाह्निकम् ।
12. महाभाष्यपस्पशाह्निकम् ।

**अनुशीलितग्रन्था:**

1. वाक्यपदीयम् ,पण्डितचारुदेवशास्त्री, मोतीलालबनारसीदास, १९९६,दिल्ली
2. अष्टाध्यायी ,सम्पादकः ब्रह्मदत्तजिज्ञासु, रामलाल कपूर ट्रस्ट रेवली, १९९८, हरियाणा
3. संस्कृत व्याकरण शास्त्र का इतिहास, लेखकः पं. युधिष्ठिर मीमांसक, रामलाल कपूर ट्रस्ट रेवली, १९९२, हरियाणा
4. प्रथमावृत्तिः, लेखकः – ब्रह्मदत्तजिज्ञासु, रामलाल कपूर ट्रस्ट रेवली, १९९०, हरियाणा
5. काशिका, सम्पादकः आचार्य विजयपाल विद्यावारिधि, रामलाल कपूर ट्रस्ट रेवली, १९९७, हरियाणा
6. पाणिनीय व्याकरण महाभाष्यम्, भार्गवशास्त्री, चौखम्बा संस्कृत प्रतिष्ठान, १९८७, दिल्ली
7. पाणिनिकालीन भारतवर्ष, वासुदेवशरण अग्रवाल चौखम्बा विद्याभवन १९९६, वाराणसी
8. पं. आशुबोधविद्याभूषणः, न्यायदर्शनम्, चौखम्बा संस्कृत प्रतिष्ठान, 2000
9. ढुण्डिराजशास्त्री, न्यायसिद्धान्तमुक्तावली, चौखम्बा संस्कृत प्रतिष्ठान, 1998
10. पं.उदयवीर,वैशेषिकदर्शनम्, गोविन्दराम हासानन्द, दिल्ली, 1995
11. सुश्रुतसंहिता, व्या. डा. अनन्तराम शर्मा, चौखम्बा सुरभारती प्रकाशन, वाराणसी, भाग – १, २०१५.
12. सुश्रुतसंहिता, व्या. डा. अनन्तरामशर्मा, चौखम्बा सुरभारती प्रकाशन, वाराणसी, भाग-२, २०१५,
13. सुश्रुतसंहिता, व्या. डा. अनन्तरामशर्मा, चौखम्बा सुरभारती प्रकाशन, वाराणसी, भाग-३, २०१५,
14. चरकसंहिता, महर्षि अग्निवेश प्रणीत, अनु. अत्रिदेवगुप्त, भार्गव पुस्तकालय गयाघाट बनारस, प्रथम खण्ड, द्वितीय संस्करण, १९४८,
15. चरकसंहिता, महर्षि अग्निवेश प्रणीत, अनु. अत्रिदेवगुप्त, भार्गव पुस्तकालय गयाघाट बनारस, द्वितीय खण्ड, द्वितीय संस्करण, १९४८,
16. ऋग्वेदसंहिता, अनु. डा. भीष्मदत्तशर्मा, चौखम्बा कृष्णदास अकादमी, वाराणसी, प्रथमभाग, २०१२,
17. डा. ब्रह्मानन्दत्रिपाठी, अष्टाङ्गहृदयम् ,चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली 1998 ।
18. विष्णुधर्मोत्तरपुराणम् : अनुक्रमणिकासहित, मूलमात्र । इस्टर्न बुक लिंकर्स,. दिल्ली ।

## References

1. W. K. Lele (2006) Methodology of Ancient Indian Sciences Varanasi Chaukhamba Surbharati Prakashan.
2. Mahadevan, Jayaraman (2008) Paper Presentation, The Doctrine of Tantrayukti at University of Hyderabad, Department of Sanskrit Studies.

3. The Role of Tantrayuktis in Indian Research Methodology by KomatineniSurendra and J.S. R. A. Prasad in Academia.
4. Singh, Anuradha (2003) TantraYukti Method of Theorization in Ayurveda] Ancient Science of Life] Vol XXII(3) January 2003.

**सहायकाचार्यः ( शिक्षाशास्त्रविभागः )**
**राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः,**
**क.जे. सोमैयासंस्कृतविद्यापीठम्.**
**विद्याविहारः, मुम्बई ।**

★★★

# भाषोत्पत्तिसिद्धान्ताः संस्कृतञ्च

✍डॉ. कुलदीपशर्मा

**(भाषाविज्ञानविद्भिः भाषोत्पत्तिविषये नानानामवादाः प्रस्तुताः । परम्, नैकोऽपि वा सर्वो मिलितोऽपि सर्वथा न तदुत्पत्तिविषये मनोगम्यः, तस्य तस्य वादस्य आंशिकप्रतिपादनविषयत्वात् । संस्कृते भाषाविज्ञाननिमतानां समेषामेवोदाहरणं लब्धुं शक्यम् । तथापि तदुदाहरणमात्रदर्शनात् सिद्धान्तं कर्त्तुं न शक्यते । तस्माद् ऋग्वेदोक्तमत्रादरणीयम् । तदनुसारम्, पूर्वमनुभूत्याधारेण पदार्थानां नामरकणम्, ततः परिष्करणम्, श्रेष्ठानां शब्दानां ततो व्यवहरणम्, ततश्च भाषायाः प्रसारः - इति कश्च क्रमोऽत्र सन्दर्भे विज्ञेयः । अत्रेदमवगन्तव्यम् - यथा बीजवृक्षयोः किं प्राचीनतरम्? इत्यस्योत्तरम् 'अनादि एवोभयम्' इति, तथैव भाषोत्तपत्ति-भाषाव्यवहारविषये ज्ञातव्यम् । तथाहि उत्पत्तिरत्र अभिव्यक्तिः । भाषायाः उत्पत्तिः न भवति अन्यथा अनित्यत्वापत्तिः स्यात् ॥ - स.)**

**अहमेव वात इव प्र वाम्या रभमाणा भुवनानि विश्वा ।**
**परो दिवा पर एना पृथिव्यै तावती महिना सं बभूव ॥[१]**

वाग्देवी समस्तलोकानां निर्माणं कुर्वती वायुरिव सर्वत्र सञ्चरन्त्यस्ति । अस्याः महिमा स्वर्गपृथ्वीलोकाभ्यामप्यधिको वर्तते । देवाः इमां वाग्देवीमसृजन् । वागेवेयं मानवसभ्यतायाः संस्कृतेश्च विकासाय महत्त्वपूर्णं योगदानं दत्तवती । सेयं वाणी लोके प्रतीकरूपशब्दव्यवस्थायां 'भाषे'ति पदेन व्यवह्रियते । भाषामहत्त्वविषये यथोक्तमाचार्यदण्डिना -

**इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम् ।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥[२]**

भाषायाः अभावे जगदिदं अन्धकारमयं स्यात् । मानवसभ्यतायाः विकासे भाषायाः अतुल्यं योगदानमस्ति । एतदङ्गीकृते स्वतः केचन प्रश्नाः उद्भवन्ति, यथा भाषा का भवति? भाषायाः उत्पत्तिः कथमभवत्? भाषायाः कानि अङ्गानि भवन्ति? भाषाणां परस्परं कः सम्बन्धः? इत्यादीनां प्रश्नानां समाधानान्वेषणे भाषाविज्ञानम् इत्येतस्य विषयस्य प्रादुर्भावः अजायत । अत्र प्रथमतः विचारः क्रियते यत् भाषायाः परिभाषा का? तदुत्तररूपेण पाश्चात्त्यजगति भाषाविदौ बी. ब्लॉगमहोदयः ट्रेगरमहोदयश्च अभाषेतां यत् -

**भाषा यादृच्छिक-वाचिक-ध्वनिसङ्केतानां सा पद्धतिरस्ति, यया मानवसमाजः परस्परं विचाराणाम् आदान-प्रदानं करोति ।**[3]

मानवसमाजः देश-कालादिभेदेन विस्तीर्णो वर्तते । तत्कारणात् विविधमानवीयसमाजेषु विविधभाषाणां प्रयोगो दृश्यते । भाषाणां पारस्परिकसम्बन्धस्य अध्ययनाय भाषाविज्ञानस्य समुदयोऽभवत् । भाषाविज्ञानं तद्विज्ञानमस्ति, यत्र विविधभाषाणां सर्वविधं विवेचनात्मकमनुशीलनं क्रियते ।[4] भाषाविज्ञाने भाषाणाम् अध्ययनं विधाय विविधाधारांश्च परिशील्य भाषाणां परिवाराणां कल्पना कृता वर्तते । मुख्यतया विश्वभाषाः १८ परिवारेषु विभक्ताः विद्यन्ते । एषु भाषापरिवारेषु भारोपीय-भाषापरिवारः बृहत्तमो वर्तते । ध्वनिसाम्यस्य दृष्ट्या १०० इति संख्यामाधृत्य अयं भाषापरिवारः द्विधा विभज्यते, यथा हि –

| **शतम्-वर्गः** | | | **केन्टुम्-वर्गः** | | |
|---|---|---|---|---|---|
| संस्कृतम् | – | शतम् | लैटिन | – | केन्टुम् |
| अवेस्ता | – | सतम् | इटालियन | – | केन्तो |
| फारसी | – | सद | फ्रेंच | – | सेन्ट |
| रूसी | – | स्तो | ग्रीक | – | हेकटोन |
| स्लाविक | – | स्तो | जर्मन | – | हुन्टर्ड |
| हिन्दी | – | सौ | अंग्रेजी | – | हंड्रेड |

भाषाविज्ञाने भाषायाः उत्पत्तिविषयेऽपि बहूनि मतानि प्राप्यन्ते, यथा दिव्योत्पत्तिमतम्, सङ्केतमतम्, रणनमतम्, ध्वन्यनुकरणमतम्, आवेगमतमित्यादीनि । अमीषां मतानामाधारेण भाषायाः समुत्पत्तिः अनुमीयते । सूक्ष्मेक्षिकया विचारे एवं प्रतिभाति यदेतानि सर्वाण्यपि मतानि संस्कृतभाषायाः अस्तित्वे न्यूनाधिकरूपेण समन्वितानि दृश्यन्ते । दैवीयमतानुसारेण भाषा ईश्वरप्रदत्ता अस्ति, यथा ऋग्वेदे उक्तम् – **देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति ।**[5]

अर्थात् देवैः वाचः (भाषायाः) निर्माणं कृतं, लोकश्च तां वदति । समाजे सामूहिकरूपेण लोकव्यवहाराय प्रयुक्तैः सङ्केतैः भाषायाः विकासः जातः इति सङ्केतसिद्धान्तवादिनामभिमतम् । वस्तूनां पदार्थानां वा ध्वनिः झंकृतिः वा भाषोत्पत्तिकारणमिति रणनसिद्धान्तमतिमतां विश्वासः, यथा नद-नद इति शब्देन नदीशब्दोत्पत्तिः । हर्षविषादादिभावानाम् आवेशे अहो, आह, ओह् इत्यादिक्रमेण भाषोत्पत्तिरिति आवेशसिद्धान्ते प्रतिपाद्यते। तथैव श्रमपूर्णकार्येषु हैया-हैया, हूँ-हूँ इत्यादिभिः ध्वनिभिः कालान्तरे भाषा विकसिता इति श्रम-ध्वनिसिद्धान्ते मन्यते। स्पष्टतः उक्तेषु सिद्धान्तेषु कश्चन एकः अपि सिद्धान्तः पूर्णरूपेण भाषायाः उत्पत्तौ कारणमिति स्वीकर्तुं नैव शक्यते, यतो हि एभिः सिद्धान्तैः एकाङ्गिरूपेणैव सीमितपदानाम् उत्पत्तिस्तु अनुमीयते, किन्तु; किमपि एकं सिद्धान्तमाधृत्य सर्वोऽपि शब्दराशिः जातः इति कथयितुं नैव शक्यते ।

तस्मात् प्रसिद्धः भाषाशास्त्रो हेनरीस्वीटमहाशयः सर्वान् एव सिद्धान्तान् सङ्कलय्य समन्वयसिद्धान्तं प्रतिपादितवान् । तन्मते अनुकरणात्मकरूपेण शब्दाः प्रचलने आगताः, यथा कुट्

कुट् इति ध्वनिकारणत: कुक्कुट:, कां कां इति ध्वनिकारणत: काक:, मेहो मेहो इति ध्वनिकारणत मयूर: इत्येवंरूपेण शब्दा: उत्पन्ना: स्यु: । एवमेव मनोभावानाम् अभिव्यक्त्यर्थं हा, धिक्, ओह इत्येतादृशानि पदानि भाषाव्यवहारे आदौ आगतानि । एवमेव अस्मात् शब्दात् अयमर्थ: बोद्धव्य: इत्यपि निर्णय: भाषाविकासे कारणत्वेन स्वीकर्तुं शक्यते ।

मानवीयेतिहासस्य प्राचीनतमभाषागतसाक्ष्यरूपेण संस्कृतभाषा मन्यते । सैषा भाषा आत्मन: प्राचीनताया: समृद्धतायाश्च कारणात् विश्वभाषासु अतिशयेन समाद्रियते । अस्या: भाषाया: महत्त्वम् अनेकेभ्य: दृष्टिकोणेभ्य: विज्ञापयितुं शक्यते । वैदिककालादारभ्य अद्यावधि यावत् संस्कृतभाषायाम् उपनिबद्धं सर्वविधमपि साहित्यं मानवकल्याणाय अद्वितोयं वर्तते । सेयं शाब्दी साधना सम्पूर्णविश्वाय भारतभूमे: अमूल्य: निधि: अस्ति, यतश्च ज्ञानम्, विज्ञानम्, नीति:, न्याय:, तर्क:, तन्त्रम्, दर्शनम्, जीवनकौशलम्, ललितकला:, उद्योग: इत्यादिभि: सह सर्वजनहिताय सर्वजनसुखाय च कर्तव्या-कर्तव्यविवेक: अत्रैव विलसति ।

**संस्कृतस्य भाषात्वम्**

अद्यत्वे आत्मगौरवशून्या: जना: संस्कृतस्य साहित्यिकभाषारूपेण अङ्गीकारं कृत्वा एतस्य व्यवहारयोग्यतायां शङ्कामुपस्थापयन्ति । तेषां शङ्का अस्ति यत् एतादृशी व्याकरणबद्धा भाषा कदापि लोकभाषा कथं भवितुमर्हतीति? किन्तु, तेषाम् इयं शङ्का आधारहीना एव । यतो हि बहुभि: प्रमाणै: संस्कृतस्य भाषात्वं सिद्धम् ।

वाल्मीकिरामायणे सुन्दरकाण्डे तावत् लङ्कायां संस्कृतस्य लोकव्यवहारं दृष्ट्वा हनुमान् अचिन्तयत् यत् यदि सीतया सह संस्कृतेन भाषे, तर्हि कदाचित् सीता मां छद्मरावणं मत्वा भीता भवितुमर्हति, अत: तया सह भाषितुं अयोध्यांचलस्य लोकभाषा वक्तव्या । यथोक्तम् -

**यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम् ।**
**रावणं मान्यमाना मां सीता भीता भविष्यति ॥**
**अवश्यमेव वक्तव्यम्, मानुषं वाक्यमर्थवत् ।**
**मया सान्त्वयितुं शक्या, नान्यथेयमनिन्दिता ॥**[६]

वैदिकसंस्कृतात् लौकिकसंस्कृतस्य भेदं ज्ञापयितुं 'भाषा' इत्यस्य शब्दस्य प्रयोग: प्राप्यते, यथा - निरुक्ते 'भाषायामन्वध्यायञ्च'[7], अष्टाध्याय्यां 'भाषायां सदवसश्रुव:'[8], 'प्रथमायाश्च द्विवचने भाषायाम्'[9] इत्यादिस्थानेषु अवलोकयितुं शक्यते । एवमेव दूरादाह्वाने प्लुतत्वम्, प्रत्यभिवादे अन्तिमस्वरप्लुतत्वमित्यादिविधानै: संस्कृतस्य भाषात्वं ज्ञायते ।

संस्कृतभाषोत्पत्तौ सर्वेऽपि सिद्धान्ता: कारणीभूता: दृश्यन्ते । यथा देवभाषा इत्ययमुपाधि: दैवीयसिद्धान्तं सूचयति । बुद्बुद:, पट्पटा इत्यादय: शब्दा: अनुकरणेन उत्पन्ना: इत्यपि सङ्गतं भाति । सङ्केत - निर्धारणस्य सिद्धान्तोऽपि संस्कृते अवलोक्यते, यथा हि आचार्यभामह: काव्यालङ्कारे प्रास्तौत् -

**इयन्त ईदृशा वर्णा ईदृगर्थाभिधायिनः ।**
**व्यवहाराय लोकस्य प्रागित्थं समयः कृतः ॥**[१०]

अर्थात् आदौ एव लोकव्यवहारदृष्ट्या एतन्निश्चितं यत् तत्तद्वर्णाः तत्तत्क्रमेण स्थापिताः, तत्तद्विशेषम् अर्थं ज्ञापयिष्यन्तीति । एवमेव प्रतीकसिद्धान्तः अपि संस्कृतभाषोत्पत्तौ दृश्यते । अस्मिन् सिद्धान्ते मन्यते यत् भाषायां प्रप्रथमतः परिजनानां सम्बन्धवाचकशब्दानाम् उत्पत्तिः सञ्जाता । एतादृशानां शब्दानां सङ्ख्या न्यूना भवति, किन्तु, परिजनानां सम्बन्धवाचनदृष्ट्या कश्चन अपि शिशुः आदौ एतान् एव शब्दान् जानाति । कस्यामपि भाषायां तावत् माता, पिता, भ्राता, स्वसा (भगिनी), दुहिता (पुत्री), सूनुः (पुत्रः) इत्यादयः शब्दाः प्रथमतः उत्पन्नाः भवन्ति इति मन्यते । बहुत्र सुदूरदेशेष्वपि परिजनसम्बन्धं विज्ञापयितुम् एते एव शब्दाः उच्चारणविकृतिं प्राप्य व्यवहारे वर्तन्ते, यथा –

| **संस्कृतम्** | **पितृ** | **मातृ** | **भ्राता** | **स्वसृ** |
|---|---|---|---|---|
| अंग्रेजी | Father | Mother | Brother | Sister |
| यहूदी | Fater | Mather | Bruder | Shvester |
| डेनिश | Far | Mor | Bror | Søster |
| इटालवी | Padre | Madre | Fratello | Sorella |
| लैटिन | Pater | Mater | Frater | Soror |
| फ्रेंच | Pére | Mère | Frère | Sœur |
| ग्रीक् | Patéras | Mitéra | Adelfós | Adelfí |
| ताजिक | Padar | Matematika | Barodar | Xohar |
| डच | Vader | Moeder | Broer | Zus |
| जर्मन् | Vater | Mutter | Bruder | Schwester |

एवमेव अन्येषामपि पारिवारिकशब्दानाम् उच्चारणसाम्यं तासु तासु भाषासु दृश्यते, यथा –संस्कृतस्य दुहितृ इति पुत्री–अर्थबोधकः शब्दः आङ्ग्ले Daughter भवति, अन्यभाषासु यथा जर्मन् Tochter डच Dochter डेनिश Datter यहूदी Tokhter इत्येवंरूपेण ज्ञायते । तथैव सूनुः इति पुत्र–अर्थबोधकः शब्दः आङ्ग्ले Son इत्येवं प्रकारेण उच्चार्यते, भाषान्तरे तावत् यथा – जर्मन् Sohn डच Zoon डेनिश Son यहूर्दी Zun इम्येवं व्यवह्रयते । अपि च एतासां वैदेशिकभाषाणां संस्कृतौ येषां शब्दानां पारिवारिकव्यवस्थायाम् आवश्यकता नासीत्, तेषां संस्कृतशब्दानां सङ्क्रमणं तत्र तासु भाषासु उपर्युक्तप्रकारण न जातमिति, यथा समधीः, श्यालः इत्यादयः शब्दाः तत्र अवान्तररूपेण एव प्रयुज्यन्ते । एतादृशैः बहुभिः आधारैः संस्कृतं सर्वासां भाषाणां जननी इति सर्वथा सङ्गतमेव ।

किन्तु, भाषायाः उत्पत्तिविषये भाषाविज्ञानस्य उक्तान् सर्वान् सिद्धान्तान् आधृत्य अपि सम्पूर्णभाषायाः उत्पत्तिः जाता इति स्वीकर्तुं नैव शक्यते । यतश्च उक्तैः सर्वैरेव सिद्धान्तैः केचन एव

आरम्भिकशब्दाः उत्पन्नाः भवितुमर्हन्ति, न तु सम्पूर्णभाषा । एतस्मिन् विषये ऋग्वेदः मार्गदर्शनं करोति, यथा हि –

**बृहस्पते प्रथमं वाचो अग्रं यत्प्रैरत नामधेयं दधानाः ।**
**यदेषां श्रेष्ठं यदरिप्रमासीत्प्रेणा तदेषां निहितं गुहाविः ॥**
**सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।**
**अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि ॥**
**यज्ञेन वाचः पदवोयमायन्तामन्वविन्दन्नृषिषु प्रविष्टाम् ।**
**तामाभृत्या व्यदधुः पुरुत्रा तां सप्त रेभा अभि सं नवन्ते ॥**[११]

अर्थात् ऋषिः (बृहस्पतिः) प्रत्यपादयत् यत् – प्रारम्भिकावस्थायाम् अनुभूत्याधारे पदार्थानां नामकरणं (नामधेयं दधानाः) जातम् । ततः यथा शूर्पप्रयोगेण सक्तूनां धान्यानां वा परिष्करणं (सक्तुमिव तितउना पुनन्तो) क्रियते, तथैव मेधाविजनाः स्वप्रतिभाबलेन अनुपयुक्तान् शब्दान् निराकृत्य उत्तमान् शब्दान् व्यवहारे (यदेषां श्रेष्ठं) आनीतवन्तः । ते च भाषायाः प्रसारम् (तामाभृत्या व्यदधुः पुरुत्रा) अकुर्वन् ।

सर्वजीवजन्तुषु मानवः एव सर्वाधिकरूपेण प्रतिभावान् वर्तते । प्रकृत्यैव तस्य मस्तिष्कस्य प्रातिभविकासः अन्येषां जीवानां तुलनायाम् अतिशयेन जातः । आचार्यभर्तृहरिणा सैषा प्रतिभा षड्विधरूपेण प्रतिपादिता –

**स्वभावचरणाभ्यासयोगादृष्टोपपादिताम् ।**
**विशिष्टोपहिताञ्चेति प्रतिभां षड्विधां विदुः॥**[१२]

अर्थात् प्रतिभा षट्प्रकारिका भवति, यथा हि–

1. **स्वाभाविकी** – यथा मीने तरणसामर्थ्यं जन्मनैव भवति ।
2. **चरणजन्या** – यथा बालसर्पे विषदन्ताः चरणानुक्रमेणायान्ति, ततः पूर्वं सत्सु विषग्रन्थिष्वपि तस्मात् भयं नास्ति ।
3. **अभ्यासजन्या** – यथा चटके उड्डयनसामर्थ्यं तस्य अभ्यासेन आयाति ।
4. **योगजन्या** – यथा योगसाधनया ऋषयः श्वासोच्छ्वासं नियन्त्रयन्ति ।
5. **अदृष्टजन्या** – पूर्वजन्मसंस्कारवशात् भगवत्कृपया वा केचन असाधारणप्रतिभावन्तः भवन्ति ।
6. **विशिष्टोपहिता** – विशिष्टपरिष्ठितौ केषुचित् विशेषप्रतिभायाः आविर्भावो भवति ।

एवं हि एतद्वक्तुं शक्यते यत् आभिः प्रतिभाभिः आवश्यकतायाम् सत्यां भाषायाः सम्प्रयोगः अजायत इति स्वीकरणे नास्ति आपत्तिः । तेन प्रतिभावता मनुष्येण हर्ष–शोक–भयादीनाम् अनुभूतौ अन्येऽपि मनुष्याः सूचनीयाः इति आवश्यकतायां कश्चन विशेषध्वनिः समुच्चारितः । ततश्च स्वप्रतिभाबलेन सः विशिष्टः ध्वनिः विशिष्टे अर्थे निश्चितः । अनेन धातुपदानाम् अर्थात् क्रिया–पदानाम् आविर्भावः अभवत् । भाषाविकासे धातु–पदानाम् महत् योगदानमस्ति । 'सर्वे शब्दाः

धातुजाः' इति यास्कमतं प्रसिद्धम् । आचार्यः वररुचिः स्वकीये निरुक्तसमुच्चयः इत्याख्ये ग्रन्थे धातु-पदानां महत्त्वम् उल्लिखितवान्, यथा हि -

**ब्रह्मनामानि सर्वाणि सामान्येन आख्यातजानि हि नैरुक्तसमयत्वात् क्रियायोगमङ्गीकृत्य प्रयोगः।**[१३]

धातुभ्यः एव अग्रे क्रमशः सञ्ज्ञापदानि क्रियापदानि च प्रकाशितानि । गणनायाः विकासक्रमे वचनस्य कालस्य च व्यवहारः भाषायां समागतः । संक्षेपतः एष विकासक्रमः अधोनिरूपितः -




यथा बीजवृक्षयोः किं प्राचीनतरमित्यस्य प्रश्नस्य किं वा उत्तरं देयं तथैव संस्कृतस्य प्राचीनताविषय वक्तुं नैव शक्यते । यदि कश्चिदपि बालः आत्मपित्रोः बाल्यकालं द्रष्टुं नैव शक्नोति, तर्हि कथं संस्कृतस्य उत्पत्तिः अन्यमातृभाषापालितैः जनैः अनुमातुं शक्यते? तस्मात् 'संस्कृतं देवभाषा' इत्युक्त्वा संस्कृतस्य सन्दर्भ तु दैवीयसिद्धान्तः विशेषतः उद्ध्रियते । अनेन संस्कृतस्य प्राचोनताविषये तु सर्वसम्मतिः भवति, किन्तु संस्कृतस्य विकासस्य विषये प्रकाशः न जायते । अत्र अयमपि विचारः विधेयः यत् के देवाः? इति । तदुत्तरत्वेन शतपथब्राह्मणस्य वचः द्रष्टव्यम् -

**विद्वांसो हि देवाः ।**[१४]

भाषाविज्ञानानुसारेण भाषा ईश्वरीया नास्ति, किन्तु नूनमेव प्रतिभा तु ईश्वरीया भवति । यथा प्रतिभायाः विविधरूपाणि भवन्ति, तथैव भाषायाः अपि विविधरूपाणि भवन्ति । देश-काल-परिष्ठितीत्यादीनां भेदेन भाषास्वपि भेदाः जायन्ते । भवतु कियान् अपि भेदः, किन्तु, संस्कृतमेव तादृशी भाषा प्रतीयते, यत्र भाषोत्पत्तेः प्रत्येकं सिद्धान्तस्य उदाहरणानि प्राप्यन्ते, अपि च तस्याः एव शब्दाः अन्यदैशिक-वैदेशिकभाषासु न्यूनाधिकोच्चारणभेदेन दृष्टौ आयान्ति । अनेन संस्कृतस्य सर्वभाषाजननीति गौरवोपाधिरपि प्रमाणितो भवतीति शम् ।

**सन्दर्भाः**

1. ऋग्वेदः 10/125/5 ।
2. काव्यादर्शः 1/4 ।
3. B.Bloch and G.L. Trager ; (1942) "A Language is a system of arbitrary vocal symbols by means of witch a social group cooperates." Outlines of Linguistic Analysis. (p.5); Published by Linguistic Society of America.
4. Gune, P.D.( 2005); "Comparative philology or simply Philology is the science of Language. Philology strictly means the study of a language from the literary point of view." An Introduction to Comparative Philology, (p.1.) ; Chaukhamba Sanskrit Pratisthan.
5. ऋग्वेदः 8/100/11 ।
6. वाल्मीकिरामायणम्, सुन्दरकाण्डः – 30/18-19 ।
7. निरूक्तम् 1/4 ।
8. पाणिनीयसूत्रम् 3/2/108 ।
9. पाणिनीयसूत्रम् 7/2/88 ।
10. काव्यालङ्कारः – 6/13 ।
11. ऋग्वेदः 10/71/1-3 ।
12. वाक्यपदीयम् – 2/152 ।
13. आचार्यवररूचिकृतनिरुक्तसमुच्चयः ।
14. शतपथब्राह्मणम् 3/7/3/10 ।

**सहायकाचार्यः, शिक्षाशास्त्रविभागः**
**राष्ट्रियसंस्कृतसंस्थानम्,**
**जयपुरपरिसरः,**
**जयपुरम् ।**

★★★

# शिक्षायां भूमण्डलीकरणस्य प्रभावः

✍डॉ. वि. एस्. वि. भास्कर रेड्डि

**( भूमण्डलीकरणमद्यत्वे वस्तुस्थितिः । न किमपि क्षेत्रं तादृशं यदिच्छताऽनिच्छता वा स्पृष्टमनेन न स्यात् । शोधप्रस्तोता निजेन नीरक्षीरविवेकेनास्य गुण दोष-ञ्चात्र निरूपयति । यद्यपि प्रस्तोतुः पक्षपातः क्वेति स्पष्टतया लेखे न दृश्यते, पाठका एव तदर्थं निर्णेतुमधिकृताः, तथापि लेखोत्तरभागे भूमण्डलीकरणस्य दोषप्रस्तावात् तत्रैव लेखकस्यापेक्षिकी सम्मतिरिति मे प्रतिभाति । अत्रेदं विभा-वनीयम् - भगवान् वेदः 'आ नो भद्राः क्रतवो यन्तु विश्वतः' इति सार्व-भौमिकं सार्वकालिकञ्च सिद्धान्तं न पुरस्तात् प्रस्तौति । तथा च भूमण्डली-करणस्य यत् किमपि भद्रं, तच्छिक्षाक्षेत्रमपि सामायातु । परं यदनिष्टम्, तस्य परिहारो विधेयः । मन्ये शोधप्रस्तोतुः इदमेव हार्दमिति ॥ - स. )**

भूमण्डलीकरणस्य प्रभावः शिक्षाक्षेत्रे कथं भवतीति अवबोधाय तेन सह सम्बद्धाः केचन सम्प्रत्ययाः सामान्यतया ज्ञातव्याः भवन्ति । ते च यथा - 1. सरलीकरणम् / उदारीकरणम् (Liberalization) 2. निजीकरणम् (Privatization) 3. भूमण्डलीकरणम् (Globalization). अस्यैव सम्प्रत्ययस्य वाणिज्यक्षेत्रे शिक्षाक्षेत्रे च संज्ञिप्ततया LPG इति नाम्ना व्यवहारो भवति ।

**सरलीकरणम् / उदारीकरणम् ( Liberalization ) L of LPG**

सरलीकरणं नाम राज्यसम्बद्धानां सामाजिक-आर्थिक-वाणिज्य-शिक्षादिक्षेत्रेषु सर्वकारेण प्राक्तनसमये निर्धारितेषु नीति-नियम-निबन्धनादिषु शैथिल्यसम्पादनं भवति । सर्वकारीयनियमानां निबन्धानाम् अनुज्ञप्त्यादीनाञ्च (Licenses) विषये काठिन्यं दूरीकृत्य उत्पादन-वाणिज्य-शिक्षादि क्षेत्राणां क्रियाकलापेषु निजक्षेत्रस्य सर्वकारीयक्षेत्रेण सह समस्तर-प्रकल्पनम् अर्थव्यवस्थायाम् अर्थ-शास्त्रे च सरलीकरणामित्यभिधीयते । 1991 तमवर्षादारभ्य भारते आर्थिकसंस्करणनाम्ना आरब्धं राजनैतिक-आर्थिक- वाणिज्य-सेवादि क्षेत्रेषु जातं परिणामक्रममेव सरलीकरणमित्यभिधीयते। सरली-करणस्य मूलं (धातुः) GATT भवति । अस्यानुसारं 160 सेवाः विश्वव्याप्ततया प्रसाराय प्रावधानावसराः प्रकल्पिताः । आर्थिक-वाणिज्य-व्यापार-आयात-निर्यात-शिक्षादि क्षेत्रेषु सर्वकारीय हस्तक्षेपस्य निष्कासनं, निजक्षेत्रस्य च प्रोत्साहश्च सरलीकरणेन एव जायते ।

## निजीकरणम् ( Privatization ) P of LPG

लोकसेवा-सर्वकारीयोपक्रम-वाणिज्य-वित्तकोशव्यवस्था-आयात-निर्यात-उत्पादन-निर्माण-परिवहनादि क्षेत्रेषु एतावता दृश्यमानस्य स्वामित्वस्य निजक्षेत्रेषु स्थानान्तरणाय अनुज्ञप्तिप्रदानमेव (Licenses) निजीकरणमित्यभिधीयते । निजीकरणेन विवधक्षेत्रषु सर्वकारस्य स्वामित्वं नाममात्रतया आंशिकतया वा विलसति । निजक्षेत्राणां वर्चस्वं विराजते । Barbar Lee & John Nelli महोदययो: मतानुसारं सर्वकारस्याधीनेषु विद्यमानक्षेत्रेषु अधिकार: / स्वामित्वम् / आधिपत्यं वा निज-व्यक्तिभ्यो (Private persons) निज-निकायेभ्यो (Private companies) वा प्रदानं / समर्पणं वा निजीकरणं भवति । निजीकरणेन आर्थिक-वाणिज्य-आयात-निर्यात-शैक्षिकादिक्षेत्रेषु सर्वकारस्य हस्तक्षेप: नैव दृश्यते । निजीकरणेन शिक्षाया: प्रसार: गुणवत्तात्मकतया जायते । परन्तु निजीकरणेन विद्यार्जनं न भवति, विद्याया: क्रयणमेव भवति । अर्थात् सम्पन्नानामेव गुणवत्तया शैक्षिकावसरा: समुपलभ्यन्ते, न तु निर्धनिनाम् ।

## भूमण्डलीकरणम् ( Globalization ) G of LPG

भूमण्डलीकरणं नाम एका प्रक्रिया भवति, यत्र क्षेत्रीय आर्थिक-सामाजिक-सांस्कृतिक-शिक्षणादय: भूव्याप्तविनिमयजालेन एकतां प्राप्नुवन्ति । भूमण्डलीकरणं नाम वाणिज्येन विदेशी-प्रत्यक्षनिवेशेन द्रव्यप्रवाहेन जनप्रवजनेन प्रविधे: प्रसारेण च राष्ट्रीयार्थव्यवस्थाया: अन्ताराष्ट्रिय-अर्थव्यवस्थारुपेण परिवर्तनं भवति । अन्ताराष्ट्रियद्रव्यनिधेरनुसारं (IMF) भूमण्डलीकरणं नाम विविधदेशानां मध्ये प्रतिदिनं वर्धमाना परस्पराधारिता आर्थिकस्थिति:, विविधदेशानां सीमाम् अतिक्रम्य सरलतया जायमाना विवधप्रकारकै: वस्तुभि: सेवाभिश्च प्रक्रिया भवति । अनेन मानवसंसाधनानां प्रयासा: विचारा: ज्ञानं, सूचनादय: राष्ट्रियसीमाम् अतिक्रम्य स्वेच्छारूपेण प्रवहिता: भवन्ति । विविधदेशानां मध्ये सूचना-सम्प्रेषण-प्रविधि-वस्तु-सेवादीनामाधारेण पारस्परिक-क्रियाकलापाय अवसरा: समुपलभ्यन्ते । परस्परसहयोगभावेन परस्परविकाससम्पादनं सरलतमं जायते । भूमण्डलीकरणेन बृहत् प्रपञ्चमिदं कुग्रामत्वेन परिवर्तनं प्राप्नोति ।

### भूमण्डलीकरणस्य लक्षणानि विशेषता वा -

1. भूमण्डलीकरणम् एका विश्वव्यापिभावना । इयं सामाजिक-आर्थिक-सांस्कृतिकादिक्षेत्रैस्साकं शिक्षाक्षेत्रमपि प्रभावयति ।
2. भूमण्डलीकरणे परस्परसन्धानं सम्पर्कश्च अत्यन्त-महत्वपूर्णं भवति । येन सीमाऽतीता एकता सिद्ध्यति ।
3. भूमण्डलीकरणेन ज्ञान-विज्ञान-प्रविधि ...इत्यादय: सूचनाक्षेत्रे क्रान्तिकारिपरवर्तनानि भवन्ति।
4. भूमण्डलीकरणे सर्वेषु क्षेत्रेषु निवेश-प्रवाह: प्रपञ्चव्याप्ततया वर्धते ।
5. भूमण्डलीकरणेन वस्तूनां सेवानाञ्च वाणिज्येन साकं मानवसेवानाञ्च वाणिज्यं वर्धते ।
6. भूमण्डलीकरणेन अन्ताराष्ट्रियसंस्था: विविधदेशेभ्य ऋणं प्रदातुं शक्नुवन्ति ।

7. जनाः एकस्मात् देशात् अपरदेशं प्रति प्रव्रजिताः भवन्ति । अनेन प्रतिभापलायनं बुद्धेः उपनिवेशश्च जायते ।
8. विविधदेशानां मध्ये वाणिज्य-आर्थिक-प्राविधिक-शिक्षादिक्षेत्रेषु परस्परसहयोगाय सहमति-पत्राणां संरचनाः क्रियन्ते ।

**शिक्षायां भूमण्डलीकरणस्य प्रभावः -**

भूमण्डलीकरणेन विविधदेशेषु उपविश्य छात्राः शिक्षकाश्च आभासीकरणस्य ई-अधिगमस्य चाधारेण अध्यापनाय अध्ययनाय च लब्धावसराः भवितुमर्हन्ति । भूमण्डलीकरणेन विविधदेशेषु उपलभ्यमानानां शैक्षिक-स्रोतसाम् उपयोगः अस्माकं गृहे उपविश्यैव कर्तुं शक्यते । शिक्षाक्षेत्रे भू-मण्डलीकरणस्य प्रभावः बहुषु आयामेषु दृश्यते । तेषां विवरणम् अधः प्रस्तूयते यथा -

**१. ज्ञानक्रान्तिः पाठ्यचर्या च -**

- भूमण्डलीकरणेन प्रत्येकं क्षेत्रे ज्ञातव्याः विषयाः प्रतिदिनं वर्धन्ते । एवमेव शिक्षाक्षेत्रेऽपि नूतनतमाः आविष्काराः जायन्ते ।
- साम्प्रतिक-विषयवस्तुषु सर्वदा परिवर्तनानि समायान्ति । अतः पाठ्यचर्या सर्वदा नवीन-तमैः विषयवस्तुभिः परिवर्त्य नूतनत्वं प्राप्नोति ।
- स्थानीय-क्षेत्रीय-राष्ट्रियभाषाणाम् अपचयः, विदेशिभाषाणाम् उपचयः जायते ।
- मानवीयशास्त्राणां प्राधान्ये ह्रासो जायते ।
- विज्ञान-प्राविधिक-सूचनाप्रविध्यादिशास्त्राणाम् अद्वितीय-प्राधान्यं प्रयच्छन्ति ।
- वाणिज्य-चिकित्सा-जीवप्राविधिक-जीवाण्वादीनां शास्त्राणाञ्च अद्वितीयप्राधान्यं प्रयच्छन्ति ।

**२. संगणकयन्त्रस्यानुप्रयोगस्य वर्धनम्**

संगणकक्षेत्रे प्रतिदिनं जायमानेन प्राविधिकक्रान्त्या शिक्षाक्षेत्रे शीघ्रतम - परिवर्तनानि समायान्ति । तेषां फलं वयम् अनुभवामः । यथा - 1. Multi media, 2. Computer simulation, 3. Digital library facility, 4.e-journals, e-books, 5. Computer network, 6. Satellite television, 7. E-mail & Internet 8. Video/Electronic conference, 9. Virtual learning.

**३. दूरस्थशिक्षायाः व्यावसायिकाध्ययनक्रमस्य च प्राधान्यवर्धनम्**

- परम्परागतशिक्षाव्यवस्था-दूरस्थशिक्षाव्यवस्थयोः अनुपातो महत्परिवर्तनमानयति ।
- मुक्तविद्यालयानां मुक्तविश्वविद्यालयानां स्थापनं, साधारणविश्वविद्यालयेषु दूरस्थशिक्षा-विभागानाञ्च आरम्भः क्रियते ।
- इदानीं तु अध्ययनसामग्र्यादयः One way audio, One way video उपलभ्यन्ते, भविष्ये तु Two way audio/two way video material उपलभ्यन्ते, सम्पर्कवर्गाः आभासीय- वर्गाश्च आयोज्यन्ते ।

- शैक्षिककार्यक्रमाणाम् आयोजनाय दरदर्शनानां शैक्षिकोपग्रहाणाञ्च प्रयोगाः क्रियन्ते ।

**४. अन्ताराष्ट्रियशिक्षासंस्थाभ्यो वित्तानुदानप्राप्तिः**

प्राथमिकशिक्षायाः वैश्वीकरणार्थं England सर्वकारस्य, UNESCO, UNICEF, World bank इत्यादीनां वित्तानुदानेन DPAP, सर्वशिक्षा अभियान योजनायाश्च क्रियान्वयनं क्रियते ।

**५. शिक्षकस्य स्थाने परिवर्तनम्**

गुरुमुखतः शिक्षा इति, अधिगमाय गुरुरेव स्रोत इति सम्प्रत्ययश्च नश्यति । यतः भूमण्डलीकरणेन अधिगमाय बहूनि संसाधनानि उपलभ्यन्ते । स्वीयरुचेः आवश्याकतायाश्च अनुसारं स्वाध्ययनाय समुचिताः अवसराः समुपलभ्यन्ते । गुरु-शिष्यसम्बन्धाः प्राविधिक-सम्बन्धत्वेन परिणमन्ति ।

**१. नूतनाध्ययनक्रमस्य आरम्भः**

विविधपाठ्यक्रमाणां सङ्करेण नूतन-पाठ्यक्रमाणां जन्म जायते । यथा - Economics, Mathematics, Statistics - विषयाणां सङ्करेण Econometrics इति नूतनपाठ्यक्रमः । Bio-techonology, Micro-biology विषयाणां सङ्करेण Bio-chemistry इति नूतनमपाठ्यक्रमः । Geography, Politics - विषयाणां सङ्करेण Geo-politics इति नूतनपाठ्यक्रमः।

**२. शिक्षाप्रशासने परिवर्तनम्**

- संगणकयन्त्रस्य अन्तर्जालस्य सूचनाप्रविधेश्च क्रान्त्या दैनन्दिनशिक्षाप्राशासनिकव्यवहारेषु सौविध्यप्रकल्पनम् ।
- अन्तर्जालीयसौविध्येन शिक्षाप्राशासनिकव्यवहारेषु अध्ययनक्रम-प्रवेश-परीक्षापरिणाम-छात्रवृत्ति-आवासीयसौविध्यादीनां सूचनावबोधे सर्वेषां भौगोलिकातीतसौविध्यं जनयति ।
- शिक्षासंस्थानां प्राशासनिकस्वामित्वाधिकारः निजव्यक्तिभ्यो निजसंस्थाभ्यो वा प्रदीयते ।

**३. विदेशी-शिक्षासंस्थानां स्थापनम्**

भारते प्राथमिक-माध्यमिक-उच्चशिक्षायाश्च प्रसाराय विविधदेशेषु अवस्थापितानां विदेशि-शिक्षासंस्थानां संस्थापनम् । भारते विदेशिविश्वविद्यालयाश्च संस्थाप्यन्ते ।

**४. सांस्कृतिकविकासः**

भूमण्डलीकरणेन अन्येषाम् इतिहासः, संस्कृतयः जीवनरीतयः भाषाश्च ज्ञेयाः भवन्ति । येन शान्तियुतस्य सहजीवनस्य बन्धुतायाश्च विकासो जायते । फलतः जनानां मध्ये एकताभावस्य अन्ताराष्ट्रियावबोधस्य वसुधैव कुटुम्बकभावस्य च विकासो जायते ।

### १० . प्रतियोगिता-भावस्य विकास:

जीवने अस्तित्वाय अधिगमाय च संघर्ष: अनिवार्य: भवति । स्पर्धया वर्धते इति आभाणकस्य विकास: जायते । अन्यैस्सह निरन्तरं स्पर्धाशीलै: भवितव्यम्, अस्या अभावेन अप्रगतिशोला: भवितुमर्हन्तीति ।

### शिक्षाया: भूमण्डलीकरणस्य गुणा: / उपयोगा:

1. भूमौ निवसतां समस्तमानवानां व्यवहारा: एकान्तराष्ट्रियग्रामत्वेन परिणमयन्ति ।
2. विकासमानेन प्रविधिना शिक्षासंस्थानानि सर्वेभ्य उपलभ्यन्ते । अर्थात् सर्वेषां वैविध्ययुतानां शैक्षिकावसराणां प्रकल्पनं कर्तुं शक्यते ।
3. प्रतिभाया: अत्युत्तमम् आदरणं समुपलभ्यते ।
4. गृहे उपविश्यैव राष्ट्रिय-सीमनाम् अतिक्रम्य ज्ञानस्य विज्ञानस्य च प्राप्तये अवसरा: समुपलभ्यन्ते ।
5. छात्राणां मध्ये प्रतियोगिताया: कारणेन गुणात्मकशिक्षाया: विकासो जायते ।
6. छात्राणां विविध संस्कृतीनां परिचयेन बन्धुताया: वसुधैव कुटुम्बकस्य भावनायाश्च विकासो जायते।
7. अल्पमूल्येनैव विविधसंसाधनानि उपलभ्यन्ते ।
8. ज्ञानस्य विज्ञानस्य कौशलादीनाञ्च अर्जने समयस्य शक्ते: प्रयासस्य च सदुपयोग: जायते ।
9. विविधप्रकारकाणाम् अन्ताराष्ट्रियसंस्थाभ्य: सहायतानुदानं प्राप्तुं शक्यते ।

### शिक्षाया: भूमण्डलीकरणस्य दोषा: / दुरुपयोगा:

1. शिक्षाया: भूमण्डलीकरणेन केवलं सम्पन्नानां छात्राणामेव लाभ: जायते । परन्तु निर्धनिनां छात्राणां हितकारकं न भवति । निर्धनिनां छात्राणाम् इदं केवलं आम्लं द्राक्षफलं भवति ।
2. एतवता स्वतन्त्रभारते शिक्षानीतीनां निर्धारणे परिवर्तने संशोधने च केवलं भारतसर्वकारस्य सर्वोच्चन्यायालयस्य च हस्ते अधिकारा: शक्तिर्वा आसन् । परन्तु भूमण्डलीकरणेन ते अधिकारा: शक्तयश्च विश्ववित्तकोशस्य (World bank) विपणकशक्तीनां (Market forces) हस्ते स्थानान्तरिता: भवन्ति । फलत: शिक्षाया: वाणिज्यीकरणं (Commercialisation of Education) जायते । अर्थात् शिक्षा नाम ज्ञानस्वरूपिणी नैव भवति, केवलं विपणे क्रयण-योग्य: काश्चित् वस्तुविशेषा जायते । स्वतन्त्रभारताय इदं हानिकारकं भवति ।
3. शिक्षाया: भूमण्डलीकरणेन सुसंस्कृति-शोभमाने भारते विदेशीयानां विष-संस्कृते: प्रभाव: जायते ।
4. अनेन भूमण्डलीकरणेन छात्राणां मध्ये अस्वास्थ्य-प्रतियोगिताया: कुविकासो जायते ।

5. ©बौद्धिकसम्पत्तेः अधिकारनाम्ना (Intellectual property rights) ज्ञानं विज्ञानं वा केषाञ्चन व्यक्तीनां निजनिकायानां निजसंस्थानां वा हस्तगतं भवति । अर्थात् ज्ञानं शिक्षा च केषाञ्चन जनानां वैयक्तिकसम्पत्तिः जायते ।
6. अनेन व्यक्तीनां देशानाञ्च मध्ये अंकीयविभाजनम् (Digital divide)इति नूतनताया असमानतायाः कुविकासो जायते ।
7. अनेन प्रतिभापालयनं (Brain drain) जायते, दास्यप्रवृत्तेश्च (Slavery) कुविकासो जायते ।
8. आर्थिक-मान्द्येन (Recession) शिक्षाव्यवस्था कुप्रभाविता भवति ।
9. अनेन मानवीय-सम्बन्धेषु ह्रासो जायते, पारिवारिक-सामाजिक-सांस्कृतिकादिमूल्येषु विषमपरिवर्तनानि समायान्ति ।
10. शिक्षा विपणिकवस्तुरूपेण परिवर्तिता भवति ।
11. एतावता निर्धनिनां छात्राणां शिक्षाप्रसाराय जायमानस्य एककव्ययस्य (Unit cost) पूर्तिः उपदानसम्प्रत्ययेन (Subsidy) अनुभरणं क्रियते स्म। परन्तु भूमण्डलीकरणेन सम्प्रत्ययोऽयं लुप्तो भवति ।

**सन्दर्भग्रन्थाः**


1. Joel Spring, Globalization of Education: An Introduction.
2. Telugu Academy, Education in Present Indian Scenario, Hyderabad, 2014.
3. Ghanta Ramesh, Foundations of Education, Hyderabad, 2009.
4. A S Ramakrishna, Foundations of Education, Hyderabad, 2004.
5. G P Reddy, Impact of Globalisation: Cultural relations, Guntur, 2010.
6. Sachin Goel, Financial growth through Globalisation, New Delhi, 2005.



**सहायकाचार्यः (शिक्षाशास्त्रविभागः),**
**राष्ट्रियसंस्कृतसंस्थानम्,**
**क.जे.सोमैयासंस्कृतविद्यापीठम्,**
**विद्याविहारः, मुम्बई-७७**


★★★

# नारायणीयकाव्ये[1] लक्ष्ये वस्त्वलङ्काररसानुमितिलक्षणानि

✍डा. नारायणन् ई. आर्.

**( श्रीमद्भागवतमुपजीव्यं समाश्रित्य विरचितं श्रीमन्नाराणीयं काव्यं सहृदयानां भक्तिरसैकप्राणानाञ्च श्रद्धास्पदम् । तत्र तत्रोपनिबद्धं पद्यगतं वस्त्वलङ्काररसतत्त्वं पद्योद्धरणपूर्वकमन्विष्यनृ वस्त्वलङ्कारयोर्वाव्यत्वमनुमेयत्वोभयं, रसस्य त्वनुमेयत्वमेवेति समुद्घोषयन् लेखकः सप्तसु पद्येषु वस्तुनोऽनुमेयत्वम्, तत्संख्याकेषु एवालङ्कारणामनुमेयत्वम्, नवसु पद्येषु च रसानामनुमेयत्वं सनामग्राहं प्रतिपादयति । तत्र प्रसङ्गनुरोधेन कुतो वा वाच्यत्वम् ? कुतो वाऽनुमेयत्वामित्याद्यपि पण्डितरीत्या निरूपितन्तस्मात् काव्यशासत्राधीतिनां वत्स्त्वलङ्काररसाँश्च गवेषयतां लेखोऽयमत्यन्तमुपकरोतीति ॥ - स. )**

श्रीमन्नारायणीयं नाम मेल्पुत्तूरनारायणभट्टपादविरचितं सहस्राधिकपद्यगुम्फितं सहृदयानां भक्तानां च हृदयावर्जकमेव । काव्यस्य तस्य हि श्रीमद्भागवतमहापुराणवृत्तान्तसंक्षेपरूपस्य वस्त्वलङ्काररसादिप्रधानस्य शब्दार्थालङ्काराडम्बनकल्पस्य काव्यमूल्यतत्त्वानि वाच्यानुमेयरूपार्थतत्त्वेनावलोकनीयानि । बाह्यान्तरचमत्काराभ्यां हि काव्यानामास्वाद्यताग्रहणे रसादीनुपकुर्वतां शब्दार्थालङ्कारादीनां वृत्तीनां च वृत्तयोऽपि प्रसिद्धा एव । ताश्च क्वचिदापदतः समग्रेषु हि दशकेषु क्वचिच्चैकदेशतया च क्वचित्क्वचित् पद्यभागेषु वा नारायणीये काव्येऽनुमीयन्ते । शब्दानामौचित्यम्, अर्थानां स्पष्टता, परिवृत्त्यसहिष्णुत्वम्, श्रवणमाधुर्यादि, रसभावादीनामङ्गाङ्गिसाङ्गत्यमित्यादयो बहवो विषयाश्चात्र दर्शनीयाः । विस्तरभयान्नात्र काचित्तादृशी प्रवृत्तिः ।

### वस्त्वलङ्काररसादीनाम् अनुमेयत्वम्

वाच्यानुमेयभेदेनार्थस्य द्वैविध्ये, मुख्यरूपस्य हि शब्दव्यापारविषयतया प्रसिद्ध्या, यत्लोपपादितस्याप्यपरस्यार्थस्य प्रसिद्ध्या तदनुमितानामनुमेयत्वमिति लिङ्गभूतादर्थान्तरस्यानुमानेनानुमेयार्थसिद्धिः । तत एव तदनुमिताद्वा लिङ्गभूताद्यदर्थान्तरमनुमीयते सोऽनुमेयः । स च त्रिविधः - वस्तुमात्रम्, अलङ्काराः, रसादयश्चेति । तत्राद्यौ वाच्यावपि सम्भवतः । अन्यस्त्वनुमेय एवेति । तत्र पदस्यार्थो वाच्य एव, नानुमेयः, तस्य निरंशत्वात्, साध्यसाधनभावाभावतः । इति ।

व्यक्तिविवेकव्याख्याने मदीये विवेकसद्दर्पणेऽप्युक्तम्[2] - 'तत्राभिधापरनामाख्यव्यापारो वाच्योऽर्थरूपः । वचेर्योगार्थे यत्प्रत्ययः। व्यक्तवचनादर्थस्य साक्षात्सङ्केतितस्याभिधेयत्वात् । अनुमेयश्चार्थोऽनुमानलभ्यः । अनुमानं नामानुमितिकरणम् । अनुमितिरनुभवविशेषः । व्याप्तिविशिष्टपक्षधर्म-

ताज्ञानजन्यज्ञानम् । यथा – धूमदर्शनाद्वह्निमान् पर्वत इत्याकारज्ञानम् । अस्या व्यापारकारणं परामर्शः । अस्याः कारणं व्याप्तिज्ञानमिति विस्तरस्तु भाषापरिच्छेदे द्रष्टव्यम् । अनुमेयरूपोऽर्थः साध्यसाधनरूपो लिङ्गलिङ्गिज्ञानरूपो महाविषयः । वाचकरूपाच्छब्दादभिधया व्यापृत्या वाच्यस्य ह्यर्थस्य बोधो जायते । मुखे तावदादौ भवो मुख्यः सोऽर्थः प्रथमः सम्भवः । व्यक्तवचनस्य श्रवणमात्रेण मुख्यार्थ-बोधः । यत्नेन तत्पश्चादर्थान्तरं यदवगम्यते तद्गौणमभिधीयते । गौणश्च सोऽर्थोऽमुख्यो यत्नेनोप-पादनीयः । अनुमेयश्चार्थश्चार्थादर्थान्तरं यत्रानुमितं तत् । तत्र वाच्योऽर्थोऽनुमेयार्थस्य लिङ्गभूतोऽ-नुमेयार्थस्यैव साध्यत्वात् । वस्त्वलङ्काररसादिभूताश्चानुमेयार्थाः सम्भवन्ति । तत्र वस्त्वलङ्कारयो-र्वाच्यरूपयोरपि सम्भवः प्रसिद्धः । रसादयस्तु – रसरसाभासभावभावाभासभावोदयभावसन्धिभाव-शान्तिभावशबलताः – न वाच्यसम्भवाः केवलमनुमानसाध्या एव । पदस्य वाच्यरूपोऽर्थः साक्षात् सङ्केतितत्वादीश्वरेच्छारूपत्वात् तत्रानुमानस्य प्रवृत्तिरेव नास्ति । अंशत्वं साध्यसाधनभावत्वं नानुमेय-त्वे प्रयोजकम् । अंशत्वं नाम विभाजनं भागः । साध्यसाधनभावेऽर्थान्तरस्य साध्यत्वात्तस्यैव प्राधान्यात् शब्दार्थयोर्वाचकवाच्ययोरेकस्य वा साधनत्वं साध्यसाधनभावत्वमेवार्थान्तरकल्पने नियामकम् ।' इति ।

एतदेव तत्त्वमवलम्ब्य श्रीमन्नारायणीये नारायणभट्टपादविरचिते वस्त्वलङ्काररसादीनामनुमानत्वं स्थापयामः ।

### नारायणीये वस्तुनोऽनुमेयत्वम्

साध्यसाधनभावेऽर्थान्तरस्य साध्यत्वात्तस्यैव प्राधान्यात् शब्दार्थयोर्वाचकवाच्ययोरेकस्य वा साधनत्वं साध्यसाधनभावत्वमेवार्थान्तरकल्पने नियामकमिति न्यायेनात्र वस्तुनः अनुमानत्वं नारायणीये चतुर्थे दशके यथा[3] –

**ध्यायतां सकलमूर्तिमीदृशीमुन्मिषन्मधुरताहृतात्मनाम् ।**
**सान्द्रमोदरसरूपमान्तरं ब्रह्मरूपमयि तेऽवभासते ॥ इति ।**

अस्मिन् पद्ये ब्रह्मस्वरूपस्य हि वस्तुनः प्रतिपादनाद्भगवतः सकललोकधृग्रूपमनुमीयते । नारायणीये एकोनचत्वारिंशत्तमे दशके यथा[4] –

**अहो खलु यशोदया नवकलायचेतोहरं**
**भवन्तमलमन्तिके प्रथममापिबन्त्या दृशा ।**
**पुनः स्तनभरं निजं सपदि पाययन्त्या मुदा**
**मनोहरतनुस्पृशा जगति पुण्यवन्तो जिताः ॥ इति।**

अत्र यशोदाभाग्यरूपं वस्तु मनोहरतनुस्पृशेत्याद्यर्थजातमनुमितमेव। नारायणीयस्याष्टमे दशके यथा[5] – **एवं तावत्प्राकृतप्रक्षयान्ते ब्राह्मे कल्पे ह्यादिमे लब्धजन्मा ।**
**ब्रह्मा भूयस्त्वत्त एवाप्य वेदान् सृष्टिं चक्रे पूर्वकल्पोपमानाम् ॥ इति ।**

सृष्टिर्वेदप्राप्त्यनन्तरजाता ब्रह्मकर्तृकेति पूर्वब्रह्मकल्पवृत्तान्तरूपं वस्त्वत्रानुमेयम् । अपि च नारायणीये द्वितीये दशके यथा[6] –

**सर्यस्पर्धिकिरीटमूर्ध्वतिलकप्रोद्भासिफालान्तरं**
**कारुण्याकलनेत्रमार्द्रहसितोल्लासं सुनासापुटम् ।**
**गण्डोद्यन्मकराभकुण्डलयुगं कण्ठोज्वलत्कौस्तुभं**
**त्वद्रूपं वनमाल्यहारपटलश्रीवत्सदीपं भजे ॥** इति ।

अत्र केशादिपादान्तक्रमेण वक्षोऽन्तभगवद्रूपवर्णनात् परब्रह्मणोऽमूर्त्तत्वेऽपि मूर्त्तत्वरूपं वस्त्वनुमेयम् अपि च नारायणीये प्रथमे दशके यथा[7] –

**सान्द्रानन्दावबोधात्मकमनुपमितं कालदेशावधिभ्यां**
**निर्मुक्तं नित्यमुक्तं निगमशतसहस्रेण निर्भास्यमानम् ।**
**अस्पष्टं दृष्टमात्रे पुनरुरुपुरुषार्थात्मकं ब्रह्मतत्त्वं**
**तत्तावद्भाति साक्षाद्गुरुपवनपुरे हन्त भाग्यं जनानाम् ॥**

इत्यत्र पद्ये ब्रह्मतत्त्वं भातोति पूर्ववन्मूर्त्तत्वरूपं वस्त्वनुमेयम् । अपि च नारायणीयस्य द्विनवतितमे दशके यथा[8] –

**भक्तास्तावत्कलौ स्युर्द्रमिलभुवि ततो भूरिशस्तत्र चोच्चैः**
**कावेरीं ताम्रपर्णीमनु किल धृतमालाञ्च पुण्यां प्रतीचीम् ।**
**हा मामप्येतदन्तर्भवमपि च विभो किञ्चिदञ्चिद्रसं त्व**
**य्याशापाशैर्निबध्य भ्रमय न भगवन् पूरय त्वन्निषेवाम् ॥** इति ।

अत्र पद्ये कलौ भक्तजनबाहल्यरूपं वस्तु तावदर्थान्तरप्रधानपूर्वमनुमेयमिति विशेषः । अपि च नारायणीयस्य दशमे दशके यथा[9] –

**वैकुण्ठ ! वर्धितबलोऽथ भवत्प्रसादा**
**दम्भोजयोनिरसृजत्किल जीवदेहान् ।**
**स्थास्नूनि भूरुहमयानि तथा तिरश्चां**
**जातिं मनुष्यनिवहानपि देवभेदान् ॥** इति च ।

अत्र पद्ये ह्यम्भोजयोनेः सृष्टौ मनुष्यत्वदेवत्वादिजात्यख्यं वस्त्वनुमेयमिति । एवं साध्यसाधनगर्भतया वस्तूनामनुमेयत्वं सिद्धमेव । इदानीं नारायणीये अलङ्काराणामनुमेयत्वमिति निरीक्ष्यते ।

### नारायणीये अलङ्काराणामनुमेयत्वम्

नारायणीयस्य तृतीये दशके यथा[10] –

**मुनिप्रौढा रूढा जगति खलु गूढात्मगतयो**
**भवत्पादाम्भोजस्मरणविरुजो नारदमुखाः।**
**चरन्तीश स्वैरं सततपरिनिर्भातपरचित्**
**सदानन्दाद्वैतप्रसरपरिमग्नाः किमपरम् ॥** इति ।

अत्र पद्ये प्रतिवस्तूपमैव प्रस्तुताश्रितां वस्तुतामनुमोयमानविषयामाश्रित्यानुमितेति स्पष्टम् । नारायणीयस्य त्रिंशत्तमे दशके यथा[11] –

**आनीतमाशु भृगुभिर्महसाभिभूतैस्**
**त्वां रम्यरूपमसुरः पुलकावृताङ्गः।**
**भक्त्या समेत्य सुकृती परिषिच्य पादौ**
**तत्तोयमन्वधृत मूर्धति तीर्थतीर्थम् ॥** इति ।

पद्येऽस्मिन् सुकृतौ हेतुरिति हेत्वलङ्कारोऽनुमितः। नारायणीयस्य प्रथमे दशके यथा[12] –

**कष्टा ते सृष्टिचेष्टा बहुतरभवखेदावहा जीवभाजा**
**मित्येवं पूर्वमालोचितमजित मया नैवमद्याभिजाने ।**
**नो चेज्जीवाः कथं वा मधुरतरमिदं त्वद्वपुश्चिद्रसार्द्र**
**नेत्रैः श्रोत्रैश्च पीत्वा परमरससुधांभोधिपूरे रमेरन् ॥** इति।

पद्येऽस्मिन् काव्यलिङ्गमलङ्कारः समर्थनीयार्थसमर्थनरूपमनुमेयम् । अपि च नारायणोये एकोनचत्वारिंशत्तमे दशके यथा[13]

**अहो खलु यशोदया नवकलायचेतोहरं**
**भवन्तमलमन्तिके प्रथममपिबन्त्या दृशा।**
**पुनः स्तनभरं निजं सपदि पाययन्त्या मुदा**
**मनोहरतनुस्पृशा जगति पुण्यवन्तो जिताः ॥** इति।

अत्रापि काव्यलिङ्गमलङ्कारः समर्थनीयार्थसमर्थनरूपमनुमेयम् । अपि च नारायणीयस्य द्वात्रिंशत्तमे दशके यथा[14] –

**क्षिप्तं जले त्वां चकितं विलोक्य**
**निन्येऽम्बुपात्रेण मुनिः स्वगेहम् ।**
**स्वल्पैरहोभिः कलशीं च कूपं**
**वापीं सरश्चानशिषे विभो त्वम् ॥** इति ।

पद्येऽस्मिन् उल्लेखो कलशकूपसरोरूपेण बहुधोल्लेखेन लिङ्गेनानुमितः । अपि च नारायणीयस्य एकादशे दशके यथा[15] –

**प्रसाद्य गीर्भिः स्तुवतो मुनीन्द्राननन्यनाथावथ पार्षदौ तौ।**
**संरम्भयोगेन भवैस्त्रिभिर्मामुपेतमित्यात्तकृपां न्यगादीः ॥** इति ।

पद्येऽस्मिन् प्रस्तुतैरेव लिङ्गैरप्रस्तुतपरिस्फूर्तौ समासोक्तिरनुमेयार्थविषया । अपि च नारायणीयस्य नवमे दशके यथा[16] –

**महार्णवविघूर्णितं कमलमेव तत्केवलं**
**विलोक्य तदुपाश्रयं तव तनुं तु नालोकयन् ।**
**क एष कमलोदरे महति निस्सहायो ह्यहं**

**कुतः स्विदिदमम्बुजं समजनीति चिन्तामगात् ॥** इति।

अत्र निगीर्याध्यवसायरूपेण लिङ्गेन साध्यातिशयोक्तिरनुमेयार्थविषया । इत्थमलङ्कारणामनुमेयार्थविषयत्वं नारायणीये लक्ष्ये निरीक्षितम् । इदानीं तत्रैव रसादीनां तद्विषयत्वं निरीक्ष्यते ।

**नारायणीये रसादीनामनुमेयत्वम्**

वस्त्वलङ्कारयोर्वाच्यरूपयोरपि सम्भवः प्रसिद्धः । रसादयस्तु - रसरसाभासभावभावाभासभावोदयभावसन्धिभावशान्तिभावशबलताः न वाच्यसम्भवाः केवलमनुमानसाध्या एवेति सिद्धान्तमाश्रित्य रसादीनामनुमानत्वं नारायणीये एकानचत्वारिंशत्तमे दशके यथा[17] -

**अहो खलु यशोदया नवकलायचेतोहरं**
**भवन्तमलमन्तिके प्रथममपिबन्त्या दृशा।**
**पुनः स्तनभरं निजं सपदि पाययन्त्या मुदा**
**मनोहरतनुस्पृशा जगति पुण्यवन्तो जिताः ॥** इति ।

यशोदागतभगवद्रूपपुत्रविषयकरतिरूपवात्सल्यमेवात्र भावरूपतयानुमीयते। नारायणीयस्य चतुस्त्रिंशत्तमे दशके यथा[18] -

**मारीचं द्रावयित्वा मखशिरसि शरैरन्यरक्षांसि निघ्नन्**
**कल्यां कुर्वन्नहल्यां पथि पदरजसा प्राप्य वैदेहगेहम् ।**
**भिन्दानश्चान्द्रचूडं धनुरवनिसुतामिन्दिरामेव लब्ध्वा**
**राज्यं प्रातिष्ठथास्त्वं त्रिभिरपि च समं भ्रातृवीरैः सदारैः ॥** इति।

अत्र पद्ये श्रीरामनिष्ठो वीरः अनुमितार्थविषयो ध्येयः। नारायणीयस्य तृतीये दशके यथा[19] -

**मरुद्गेहाधीश त्वयि खलु पराञ्चोऽपि सुखिनो**
**भवत्स्नेही सोऽहं सुबहु परितप्ये च किमिदम् ।**
**अकीर्तिस्ते मा भूद्वरद गदभारं प्रशमयन्**
**भवत्भक्तोत्तंसं झटिति कुरु मां कंसदमन ॥** इति ।

कविगता भगवद्भक्तिरेवात्रानुमीयमाना सहृदयहृदयं प्रविष्टा। नारायणीयस्य पञ्चत्रिंशत्तमे दशके यथा[20] - **सौमित्रिस्त्वत्र शक्तिप्रहृतिगलदसुर्वातजानीतशैल**
**घ्राणात्प्रणानुपेतो व्यकृणुत कुसृतिश्लाघिनं मेघनादम् ।**
**मायाक्षोभेषु वैभीषणवचनहृतस्तम्भनः कुम्भकर्णं**
**सम्प्राप्तं कम्पितोर्वीतलमखिलचमूभक्षिणं व्यक्षिणोस्त्वम् ॥** इति ।

अत्रापि पद्ये श्रीरामनिष्ठो वीरः अनुमितार्थविषयो ध्येयः। नारायणीयस्य एकत्रिंशत्तमे दशके यथा[21] - **याचत्येवं यदि स भगवान्पूर्णकामोऽस्मि सोऽहं**
**दास्याम्येव स्थिरमिति वदन् काव्यशप्तोऽपि दैत्यः।**
**विन्ध्यावल्या निजदयितया दत्तपाद्याय तुभ्यं**

**चित्रं चित्रं सकलमपि स प्रार्पयत्तोयपूर्वम् ॥** इति ।

अत्र पद्ये अद्भुतो नाम रसः अनुमितिविषयीभूतः । नारायणीयस्य सप्तमे दशके यथा[22] –

**दृष्ट्वा संभृतसंभ्रमः कमलभूस्त्वत्पादपाथोरुहे**
**हर्षावेशवशंवदो निपतितः प्रीत्या कृतार्थीभवन् ।**
**जानास्येव मनीषितं मम विभो ज्ञानं तदापादय**
**द्वैताद्वैतभवत्स्वरूपपरमित्याचष्ट तं त्वां भजे ॥** इति ।

भक्तिर्भगवद्विषयिणी पद्ये तावदस्मिन्ननुमिता स्पष्टैव । नारायणीयस्य अष्टनवतितमे दशके यथा[23] –

**नो तिर्यञ्चन्न मर्त्यं न च सुरमसुरं न स्त्रियं नो पुमांसं**
**न द्रव्यं कर्म जातिं गुणमपि सदसद्वापि ते रूपमाहुः ।**
**शिष्टं यत्स्यान्निषेधे सति निगमशतैर्लक्षणावृत्तितस्तत्**
**कृच्छ्रेणावेद्यमानं परमसुखमयं भाति तस्मै नमस्ते ॥** इति ।

निर्वेदस्थायिभूतः शान्तरसः पद्ये निष्कृष्टः काव्यानुमितिविषयीभूतः । नारायणीयस्य एकत्रिंशत्तमे दशके यथा[24] –

**निस्सन्देहं दितिकुलपतौ त्वय्यशेषार्पणं तद्**
**व्यातन्वाने मुमुचुरृषयः सामराः पुष्पवर्षम् ।**
**दिव्यं रूपं तव च तदिदं पश्यतां विश्वभाजामु-**
**च्चैरुच्चैरवृधदवधीकृत्य विश्वाण्डभाण्डम् ॥** इति।

समरविजयी भगवानिति वीरः एव रसः पद्ये तावदस्मिन्ननुमितः। नारायणीयस्य चतुस्त्रिंशत्तमे दशके यथा[25] –

**नत्वाऽगस्त्यं समस्ताशरनिकरसपत्राकृतिं तापसेभ्यः**
**प्रत्यश्रौषीः प्रियैषी तदनु च मुनिना वैष्णवे दिव्यचापे ।**
**ब्रह्मास्त्रे चापि दत्ते पथि पितृसुहृदं वीक्ष्य जटायुं**
**मोदाद्गोदातटान्ते परिरमसि पुरा पञ्चवट्यां वधूट्या ॥** इति।

देवताविषयिणी रतिर्व्यभिचारीत्यनुमेया भावरूपैवात्र पद्ये ध्येया। इत्थं च संक्षेपतया काव्येष्वनुमेयार्थविषयत्वं वस्त्वलङ्काररसादीनां श्रीमन्नारायणीये लक्ष्ये लक्षितमिति नात्र विस्तरः।

**सन्दर्भाः –**

1. नारायणीयम्, मेल्पुत्तूरनारायणभट्टपादविरचितम्, विद्वच्चतुष्टयविरचितया वनमालाव्याख्यया सहितम्, गुरुवायूरदेवस्वप्रसिद्धीकरणम्, १९७८.
2. व्यक्तिविवेकः, महिमभट्टकृतः, श्रीमन्नारायणविरचितविवेकसुदर्पणव्याख्यया समलङ्कृतः, पृ. 30
3. नारायणीयम् 4.6।
4. नारायणीयम् 39.9 ।

5. नारायणीयम् 8.1 ।
6. नारायणीयम् 2.1 ।
7. नारायणीयम् 1.1 ।
8. नारायणीयम् 92.7 ।
9. नारायणीयम् 10.1 ।
10. नारायणीयम् 3.4 ।
11. नारायणीयम् 30.9 ।
12. नारायणीयम् 1.7 ।
13. नारायणीयम् 39.9 ।
14. नारायणीयम् 32.3 ।
15. नारायणीयम् 11.6 ।
16. नारायणीयम् 9.2 ।
17. नारायणीयम् 39.9 ।
18. नारायणीयम् 34.3 ।
19. नारायणीयम् 3.9 ।
20. नारायणीयम् 35.6 ।
21. नारायणीयम् 31.5 ।
22. नारायणीयम् 7.9 ।
23. नारायणीयम् 98.3 ।
24. नारायणीयम् 31.6 ।
25. नारायणीयम् 34.7 ।

**सन्दर्भग्रन्थसूची –**

1. नारायणीयम्, मेल्पुत्तूरनारायणभट्टपादविरचितम्, विद्वच्चतुष्टयविरचितया वनमालाव्याख्यया सहितम्, गुरुवायूरदेवस्वप्रसिद्धीकरणम्, १९७८.
2. The Aesthetic Experience According to Abhinavagupta, Raniero Gnoli, Chowkhabha Sanskrit Series Office, Varanasi, 1968.
3. प्रक्रियासर्वस्वम्, मेल्पुत्तूरनारायणभट्टपादविरचितम्, सम्पादकः – प्रो. के. पी.नारायण–पिषोरोटी, एम् . एस्. मेनोन्, गुरुवायूरदेवस्वप्रसिद्धीकरणम्, १९९८.
4. नाट्यशास्त्रम्, भरतमुनिविरचितम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २००२
5. व्यक्तिविवेकः, महिमभट्टकृतः, श्रीमन्नारायणविरचितविवेकसुदर्पणव्याख्यया समलङ्कृतः, सिन्धुप्रकाशनम्, हैदराबाद, २०१२.

6. An Elucidation of Poetic Blemishes in the Vyaktiviveka, Triolkinath Jha, Mithila Institute of Post Graduate Studies and Research, Darbhanga - 1987.
7. ध्वन्यालोकः, आनन्दवर्धनविरचितः, अभिनवगुप्तविरचितलोचनेन सहितः, रामषारक-विरचितबालप्रियासहितः, काशीसंस्कृतग्रन्थमाला-१३५, चौखम्बा, वाराणसी-१९४०.
8. कुवलयानन्दः, श्रीमदप्पय्यदीक्षितविरचितः, जयदेवविरचितचन्द्रालोकसहितः, निर्णयसागर-मुद्रणालयप्रकाशितः, मुम्बयी-१९३१.
9. काव्यप्रकाशः, अलङ्कारसन्दर्भः, मम्मटभट्टविरचितः, झळकीकरोपनाम्ना रामभट्टात्मजेन भट्टवामनाचार्येण विरचितया बालबोधिन्याख्यटीकया समन्वितः, बनहट्टीत्युपाह्वयेन दशरथात्मजेन नारायणेन संशोधितः, परिमलसंस्कृतग्रन्थमाला-97, परिमल पब्लिकेशन्स, दिल्ली-110007, पुनर्मुद्रित संस्करण-2008, ISBN: 978-81-7110-322-5.
10. साहित्यदर्पणः, श्रीविश्वनाथकविराजकृतः, विद्यावाचस्पति-साहित्याचार्य-शालिग्रामशास्त्रि-विरचितया विमलाख्यया हिन्दीव्याख्यया विभूषितः, मोतीलाल बनारसीदास, दिल्ली - 110007, नवम संस्करण-1977, पुनर्मुद्रण-2000.
11. The Prakrit Gathasaptasati% Compiled by Satavahana King Hala, edited with Introduction and Translation in English by Radhagovinda Basak] Bibliotheca Indica, The Asiatic Society, Calcutta, 1971.
12. महावाक्यविचारः, कोराडसुब्रह्मण्यः, श्रीलक्ष्मणार्यभव्यस्मृतिग्रन्थमाला, द्वितीयं पुष्पम्, भाग्यनगरम् -2012.
13. The Prataprudriya of Vidyanatha with the Ratnapana of Kumarasvamin, The Samskrit Educational Society, Chennai – 1999.
14. The Rasagnagadhara of Jagannath Pandit, Motilal Banarsidass, Delhi – 7, Reprint Edition – 1988.
15. The Sarasvatikanthabharana of Bhojadeva, Nirnaya Sagar Reproduction, Chowkhambha Orientalia, Varanasi, Reprint Edition-1987.

**सहायकाचार्यः, साहित्यविभागः,**
**राष्ट्रियसंस्कृतसंस्थानम्,**
**गुरुवायूर परिसरः**
**केरलम् ।**

★★★

# व्याकरणदिशा पुरुषार्थविमर्शः

✍डॉ. दयारामदासः

**(व्याकरणविद्याया आर्षग्रन्थानालोड्य संस्कृतवाङ्मयञ्चोन्मध्य विविधप्रामाणिकसन्दर्भान् संनिवेश्य शब्दक्रीडापरकशास्त्रेऽप्यन्तर्निहितानि पुरुषार्थस्यापि सिद्धिशब्दशास्त्राद् भवेत्, तर्हि को नाम जनोऽत्र न प्रवर्त्तेत ? वस्तुतो व्याकृतिविद्येयं 'शब्दोपासनया समग्रसिद्धिः' इति सन्देशन्तनोति । विना शब्दप्रयोगं सृष्टिजाते, ततोऽपि प्राग्वा न कस्यचित् सिद्धिः । 'भूरिति व्याहरत्, भुवमसृजत्' इत्यादिश्रुतयोऽत्र प्रमाणम् ॥ - स.)**

व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेन इति व्याकरणम् । तच्च शास्त्रं मुख्यवेदांगभूतं वर्तते । श्रीपाणिनिकात्यायनपतञ्जलिप्रणीतं त्रिमुनिव्याकरणं वाङ्मलानां चिकित्सितम् । तच्च वेदवेदान्तमुपकुर्वत् शब्दसंस्कारद्वारा वाक्शुद्धया चित्तशुद्धया पुरुषार्थसाधकं वर्तते ।

पुरुषार्थ इत्युक्ते मानवानां प्रयोजनानि अभीष्टरूपाणि च । पुरुषैः अर्थ्यते इति पुरुषार्थः । पुरुषेण अभिलषितो विषयः पुरुषार्थः । कृतार्थोऽस्मि इति वृत्तिस्तत्साधनं पुरुषार्थः इति । पुरुषार्थाः चत्वारः सन्ति-धर्मः अर्थः कामः मोक्षश्च । तथाहि मार्कण्डेयपुराणे धर्मार्थकाममोक्षाख्यं पुरुषार्थचतुष्टयम् ।[१] चतुर्षु पुरुषार्थेषु धर्मः प्रथमः पुरुषार्थः । धर्मशब्दः धनपूर्वकात् ऋधातोः मक्प्रत्ययेन निष्पन्नो भवति । यस्याथः यस्मात् पार्थिवापार्थिवानां धनस्य प्रातिर्भवति ।

धृञ्धारणे (भ्वादि.उ.) धातोः ''अर्तिस्तुसुहुसृधृक्षिक्षुभायापदियक्षिनीभ्यो मन्'' इति उणादिसूत्रेण[२] मन्प्रत्यये 'धर्मः' इति सिद्धयति । सः सर्वभूतानां हितसाधनं करोति । महाभारते ''धारणाद् धर्ममित्याहुः धर्मो धारयति प्रजाः''[३] इति । धर्मः समाजस्य धारणं नाम संरक्षरणं संवर्धनं च करोति, अर्थात् समाजकल्याणकारिणों काममपि जीवनयापनपद्धतिं निर्दिशति । तथा धर्मः काममपि केवलां विशिष्टाम् उपासनापद्धतिं वा विशिष्टं कर्मकाण्डं वा न द्योतयति, तथापि उभयोः अन्तर्भावः धर्मसंकल्पनायाम् अस्त्येव । धर्मः मानवस्य ऐहिकम् आमुष्मिकं च कल्याणं विदधाति तथा व्यष्टेः विकासपुरस्सरं समष्टेः कल्याणं साधयति ।

मनुना धतिक्षमादयो दशगुणा एव धर्मशब्दवाच्यत्वेन निर्दिष्टाः-

**धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।**
**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥**[४]

वैशेषिकदर्शनकृता कणादेन प्रतिपाद्यते यत् येन लौकिकी पारलौकिकी च समुन्नतिः संजायते, स एव धर्मशब्देन वाच्यः । एवं लोकपरलोकोभयसाधकानि तत्त्वानि धर्मशब्दवाच्यानि ।

यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः ।[5]

धर्मार्थकामानां सिद्धिः अभ्युदयः, मोक्षस्य सिद्धिः निःश्रेयसम् । अभ्युदयः लौकिकोन्नतिः, निःश्रेयसञ्च पारलौकिकी सिद्धिः।

मीमांसादर्शनकृता जैमिनिमुनिना धर्मलक्षणं निर्दिश्यते यत् चोदनालक्षणोऽर्थो धर्मः ।[6]

भगवान मनुः स्पष्टम् उक्तवान् यत् परलोके जीवस्य कश्चिदपि सहायको न भवति । धर्म एव सहायको भवति । तथाहि-

**नामुत्र हि सहायार्थं पिता माता च तिष्ठतः ।**
**न पुत्रदारा न ज्ञातिर्धर्मस्तिष्ठति केवलः।।**[7]

धर्मेण परमा गतिः भवति । यः मनुष्यः धर्महीनो भवति । सः रौरवनरकं गच्छति ।

तथाहि- **तस्माद्धर्मो न संत्याज्यो धर्मो हि परमा गतिः ।**
**धर्महीना नरा यान्ति रौरवं नरकं महत् ।।**[8]

व्याकरणशास्त्रे धर्मः साधुशब्दस्य प्रयोगाद् भवति । तथाहि महाभाष्ये पतञ्जलिना उक्तम्-

**लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियम इति।**[9]

अर्थादस्येयं प्रकृतिरयं प्रत्ययः इत्यादिप्रकृतिप्रत्ययविभागविवेचनद्वारा गवादयः शब्दा एव प्रयुक्ता धर्मजनकाः, न गाव्यादय इति । शास्त्रेण धर्मनियमः क्रियते ।

अपि च शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन । शास्त्रपूर्वकं यः शब्दान् प्रयुङ्क्ते सोऽभ्युदयेन युज्यते । तत्तुल्यं वेदशब्देन । वेदशब्दा अप्येवमभिवदन्ति ''योऽग्निष्टोमेन यजते य उ चैनमेवं वेद'' ''योऽग्निं नाचिकेतं चिनुते य उ चैनमेवं वेद''।

अपर आह ''तत्तुल्यं वेदशब्देन''।[10] यथा वेदशब्दा नियमपूर्वकमधोताः फलवन्तो भवन्त्येवं यः शास्त्रपूर्वकं शब्दान्प्रयुङ्क्ते सोऽभ्युदयेन युज्यत इति । यथा वेदशब्दाः - नियमपूर्वकमधोताः एव फलवन्तो भवन्ति एवं यः प्रकृतिप्रत्ययादिविभागपूर्वकं शब्दान् प्रयुङ्क्ते स एव धर्मेण युज्यते इति श्रुतेस्तात्पर्यम् ।

अतः शास्त्रज्ञानपूर्वके शब्दप्रयोगे धर्म इति भगवत्पतञ्जलिमुनेः सिद्धान्तोऽस्ति । पाणिनि-व्याकरणशास्त्रे धर्मशब्दस्य प्रयोगः -

(1) धर्मं जिज्ञासते ।

**सूत्रम्** - ज्ञाश्रुस्मृदृशां सनः (1.3.57)

**वृत्तिः** - ज्ञाश्रुस्मृदृश् इत्येतेषां सन्नन्तानाम् आत्मनेपदं भवति ।

**उदाहरणं** - धर्मं जिज्ञासते। गुरुं शुश्रूषते। नष्टं सुस्मूर्षते। नृपं दिदृक्षते ।

(2) धार्मिकः ।

**सूत्रम्** - धर्मं चरति (4.4.41)

**वृत्तिः** - द्वितीयान्तधर्मप्रातिपदिकात् 'चरति' इत्यर्थे तद्धितसंज्ञको ठक्प्रत्ययो भवति ।

**उदाहरणं** - धर्मं चरति धार्मिकः, धर्मस्य आचरणं करोति । अत्र चरतिरासेवायां नानुष्ठानमात्र ।

आसेवा-पौनःपुन्यम्।

(3) धर्म्यम् ।

**सूत्रम्** - धर्मपथ्यर्थन्यायादनपेते (4.4.92)

**वृत्तिः** - धम पथिन् अर्थ न्याय इत्येतेभ्यः पञ्चमीसमर्थेभ्यः प्रातिपदिकेभ्योऽनपेत इत्येतस्मिन्नर्थे यत्प्रत्ययो भवति ।

**उदाहरणं** - धर्मादनपेतं धर्म्यम् आचरणम् ।

(4) धर्माथौं, अर्थधर्मौ ।

धर्मादिष्वनियमः (गणसूत्रम्) धर्मश्च अर्थश्च धर्माथौं अर्थधर्मौ । कामश्च अर्थश्च कामाथौं, अर्थकामौ । शब्दश्च अर्थश्च शब्दाथौं अर्थशब्दौ ।

**द्वितीयपुरुषार्थः अर्थः** ऋगतिप्रापणयोः (भ्वा.प.ऋच्छति) इति धातोः 'उषिकुषिगार्तिभ्यस्थन्' इति उणादिसूत्रण[११] थन्प्रत्यये कृते अर्थः सिद्ध्यति ।

ऋच्छति अर्यते वा असौ अर्थः धनं वाङ्मयप्रवृत्तिश्च । कामपूर्तेः सुखार्जनस्य साधनम् अर्थशब्देन अभिधोयते । तथाहि कामसूत्रे वात्स्ययनेन उक्तम् - ''विद्याभूमिहिरण्यपशुधान्यभाण्डोपस्करमित्रादीनाम् अर्जनम् अर्जितस्य विवर्धनमर्थः''।[१२]

प्राणिनां सुखसमृद्धेः मूलं धर्मः, धर्मस्य मूलम् अर्थः । तथाहि चाणक्यसूत्रम् - सुखस्य मूलं धर्मः । धर्मस्य मूलम् अर्थः ।[१३]

त्रिवर्गगणनायाम् अर्थः देहलीदीपकन्यायेन धर्मकामयोः मध्ये वर्तते । यतो हि अर्थं विना धर्मकामौ अपूर्णा स्तः । अर्थस्य यथार्थं फलं धर्मः, कामः तस्य गौणफलं वर्तते ।

अगर्हितेन कर्मणा धनान्यादाय गार्हस्थ्यजीवनं भवेत् । मनुना उक्तम् - 'सर्वेषामेव शौचानामर्थशौचं परं स्मृतम् ।[१४] यथा अर्जने निर्बन्धः तथा व्ययेऽपि नियन्त्रणरूपं मार्गदर्शनं कृतं वर्तते ।' उक्तं च ईशावास्योपनिषदि - ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ।[१५]

व्याकरणशास्त्रे अर्थस्य प्राप्तिविषये महाभाष्ये पतञ्जलिना उक्तम् - सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत । अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताऽधिवाचि।[१६]

अस्यार्थः - यथा तितउना सक्तोस्तुषाद्यपनीयते तथा व्याकरणेन वाचोऽपशब्दाः । धोराः ध्यानवन्तः वैयाकरणाः मनसा प्रज्ञानेन वाचमक्रतवाचम् अकृषत ।

अस्य अयं भावः - ये शास्त्रतः प्रकृतिप्रत्ययविभागेन साधून् ज्ञात्वा शास्त्रार्थध्यानवन्तो मानसज्ञानेन वाचमसाधुभ्यः पृथक् कृतवन्तस्त तज्ज्ञानपूर्वकैः साधुशब्दप्रयोगलब्धान्तःकरणशुद्धयः, अत्र

य एष दुर्गो मार्गो ब्रह्मरूपस्तत्रात्मना सह समानख्यातयः त्यक्तभेदभावनाः यतः एषां वाचि भद्रा कल्याणमयी लक्ष्मीः स्वप्रकाशब्रह्मरूपा अधि अधिकं निहिता स्थिता भवतीति ।

अपि च ऊहादिप्रयोजनेन ज्ञायते यद् वैयाकरणा एव यज्ञं कारयितुं समर्थाः सन्ति । यो हि पुरुषः यज्ञं कारयति । तेन अर्थस्य प्राप्तिर्भवति । अर्थेन च कामस्य पूर्तिर्भवति ।

व्याकरणशास्त्रे अर्थशब्दस्य प्रयोगः - अर्थी । अर्थाच्चासन्निहिते ।[१७] (वा.) अर्थः असन्निहितः अस्य अर्थी (याचकः) । असन्निहित इति किम् ? अर्थवान् ।

अर्थः अस्य अस्ति इति अर्थवान् ।

**तृतीयः पुरुषार्थः कामः** - काम्यते इति कामः । कमु कान्तौ (भ्वा.आ.कामयते) धातोः "अकर्तरि च कारके संज्ञायाम्"[१८] इति सूत्रेण घञ्प्रत्यये कृते सति कम् अ इति स्थिते "नोदात्तोपदेशस्य मान्तस्यानाचमेः"[१९] इति उपधाया वृद्धिनिषेधो "अनाचमिकमिवमीनामिति वक्तव्यम्[२०] इति वार्तिकसहयोगेन "अत उपधायाः[२१] इति सूत्रेण उपधावृद्धौ सत्यां 'कामः' इति सिद्ध्यति ।

श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानां विषयेषु तृप्तेः वासना एव कामः । तथाहि वात्स्यायनः काम - सूत्रेषु कामस्य लक्षणम् उक्तवान् - श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानामात्मसंयुक्तेन मनसाधिष्ठितानां स्वेषु स्वेषु विषयेष्वानुकूल्यतः प्रवृत्तिः कामः ।[२२]

कामः धर्मानुकूलः सेवनीयः । श्रीमद्भगवद्गीतायां भगवान्श्रीकृष्णः ब्रूते- 'धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ'[२३] इति ।

व्याकरणशास्त्रे कामविषये भगवता पतञ्जलिना महाभाष्ये उक्तम् - एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति इति ।

यद्येकः शब्दः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति, किमर्थं द्वितीयस्तृतीयश्च प्रयुज्यते?

न वै कामानां तृप्तिरस्ति ।[२४] अत्र नागेशः सम्यक्ज्ञात एकोऽप्यर्थबोधनाय सुप्रयुक्तश्चेत्का-मधुग्भवति, किं वक्तव्यं सर्वेऽपि इति तदर्थः । शास्त्रान्वितः इत्यनेन शास्त्रस्मरणपूर्वकं प्रयोगे धर्मः सूचितः । कामं दोग्धि इति कामधुग् अर्थात् इच्छायाः पूर्तिर्भवति ।

व्याकरणशास्त्र कामशब्दस्य प्रयोगः ।

1. कामुकी - कामयितुं शीलमस्या इति विग्रहे "लषपतपदस्थाभूवृषहनकमगमशृभ्य उकञ्"[२५] इति सूत्रेण उकञ्प्रत्यये कृते कामुकः" इति । कामुकशब्दात् "जानपदकुण्ड..............................."[२६] इति सूत्रेण ङीष् - कामुकी (मैथुनेच्छावती स्त्री) ।
2. कामुका - कामुकः अस्या विद्यते इति विग्रहे" अर्श आदिभ्योऽच्"[२७] इति सूत्रेण अच्प्रत्यये कृते कामुक, ततः "अजाद्यतष्टाप्"[२८] इति सूत्रेण टापि कामुका धनादीच्छावतीत्यर्थः ।

3. कामो मे भुङ्जीत भवान् । ''कामप्रवेदनेऽकच्चिति''[२९] इति सूत्रेण विधिलिङ्लकारो भवति । कामप्रवेदने इत्यत्र समास: – कामस्य इच्छाया: प्रवेदनं प्रकाशनं कामप्रवेदनम्, तस्मिन् कामप्रवेदने।

**चतुर्थ: पुरुषार्थ: मोक्ष:** पुरुषार्थचतुष्टये मोक्ष: परम: पुरुषार्थ: । धर्मार्थकामानां पुरुषार्थानाम् अनित्यत्वाद् मोक्षस्य च आत्मरूपत्वात् नित्यत्वम् । स च मोक्ष आनन्दात्मकब्रह्मावाप्ति: सर्वदु:खानाम् आत्यन्तिकनिवृत्तिश्च । तथा च श्रुति: – ब्रह्म वेद ब्रह्मैव भवति[३०] एषा ब्राह्मी स्थिति: पार्थ नैनां प्राप्य विमुह्यति । स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति[३१] इत्यादिस्मृतेश्च । मोक्ष:, मुक्ति:, निर्वाणं, कैवल्यम् इत्यादिशब्दा: पर्याया: । मोचनं मोक्ष: अपवर्ग: । मुच्लृ मोक्षणे (तुदा.उ. मुञ्चति. ते) धातो: ''वृतवदिहनिकमिकषियुमुचिभ्य: स:''[३२] इति उणादिसूत्रेण सप्रत्यये कृते सति ''मोक्ष:'' इति सिद्ध्यति ।

स च व्याकरणशास्त्रे सजातीयविजातीयस्वगतभेदशून्यसच्चिदानन्दशब्दाख्यपरब्रह्मणा सह तादात्म्य- मेकत्वमभेदो वा । स च सायुज्यरूप: । युनक्ति- सम्बध्नाति इति युक् । युजा – जीवेन सह सयुग् ब्रह्म, सयुजो भाव: सायुज्यम् – चैतन्यम्, सारूप्यम्, तादात्म्यमभेदो वा । उक्तं च भर्तृहरिणा-

**अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम् ।**
**प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते ॥**[३३]

अस्यार्थ: पयोक्तुश्शब्दोच्चारयितु: अन्तर्बुद्धिगुहायाम् अवस्थितं शब्दं महान्तं व्यापकम् ऋषभं देवं स्वप्रकाशं ब्रह्मस्वरूपं प्राहु: । येन वृषभेण महता देवेन सायुज्यं शब्दबह्माभेद इष्यते मुमुक्षुभि: ।

महाभाष्ये पतञ्जलिना उक्तम् – महता देवेन न: साम्यं यथा स्यादित्यध्येयं व्याकरणम् ।[३४] अयमर्थ: – महान् परब्रह्मस्वरूपो देव: – अन्तर्यामिरूप: शब्द:, तेन देवेन, न: – अस्माकम् साम्यम् सायुज्यम् इत्यर्थ: ।

मोक्षस्य प्राप्तिविषये वाक्यपदीये भर्तृहरिणा उक्तम्-

**तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।**
**पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते ।**[३५]

अयमर्थ: – तद् व्याकरणमपवर्गस्य द्वारम् उपाय: तद्यथा – साधुशब्दज्ञानपूर्वकात् प्रयोगाद् अभिव्यक्तधर्मराशिमहान्तं शब्दात्मानं प्राप्नोति । तथाहि – व्याकरणसंस्कृतचेता: पूर्वं वैखरीद्वारा मध्यमामधिगम्य शब्दार्थज्ञानहेतुभूतां पश्यन्तीं पश्यति, तदनु शब्दप्रयोगाभ्यासवासनावशाद् अनावृत्तां विशुद्धां पराख्यां वाचं प्राप्नोति तत्तादात्म्यमाप्नोति, इदं तादात्म्यमेवापवर्ग: ।

अपि च मुमुक्षूणां कृते निष्कपटमार्गरूपं व्याकरणम् । इदमाद्यं पदस्थानं सिद्धिसोपान- पर्वणाम् । इयं सा मोक्षमाणानामजिह्मा राजपद्धति: ।[३६]

महाभारतेऽपि व्याकरणशास्त्रस्य नि:श्रेयससाधनत्वं महर्षिव्यासेन दर्शितम् – द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् । शब्दब्रह्मणि निष्णात: परं ब्रह्माधिगच्छति ।[३७]

एवञ्चैतावता विमर्शेन निश्चितमेतत् भवति यत् व्याकरणेन शब्दानां साधुत्वज्ञानं सम्पाद्यते, शास्त्रप्रक्रियास्मरणपूर्वकसाधुशब्दप्रयोगेण च नूनं प्रयोक्तुर्वैयाकरणस्य सर्वथा अभ्युदयो भवति, ज्ञानपूर्वकसुप्रयुक्तस्य साधुशब्दस्य कामधुक्त्वेन श्रुत्या प्रतिपादनात् ।

व्याकरणशास्त्रे मोक्षशब्दस्य प्रयोगः (1) मोक्षे इच्छास्ति । अत्र ''सप्तम्यधिकरणे च''[३८] इति सूत्रेण मोक्षशब्दात् सप्तमी विभक्तिर्जाता ।

**सन्दर्भाः**


1. मार्कण्डेयपुराणम् - 41.2027.
2. उणादिसूत्रम् - 7.26
3. महाभारतम् - 8.49.50
4. मनुस्मृतिः - 6.92
5. वैशेषिकदर्शनम् - 2
6. मीमांसा - 1-1-2
7. मनुस्मृति - 4.239
8. वामनपुराणम् - 66.35
9. महाभाष्यम् - 1-1-1 पृ. 65
10. महाभाष्यम् - 1-1-1 पृ. 74
11. उणादिसत्रम्- 6.29
12. कामसूत्रम्- 1-2.9
13. चाणक्यसूत्रम्- 1.1.2
14. मनुस्मृति- 5.106
15. ईशावास्योपनिषद्- 1
16. महाभाष्यम्- 1.1.1 पृ. 45
17. अष्टाध्यायी -पुष्करादिभ्यो देशे (5.2.135)
18. अष्टाध्यायी - (3.3.19)
19. अष्टाध्यायी - (7.3.34)
20. अष्टाध्यायी - (7.3.34)
21. अष्टाध्यायी - 7.2.116
22. कामसूत्रम् - 1.2.11
23. श्रीमद्मदभगवद्गीता - 7.11
24. महाभाष्यम् - 6.1.84 पृ. 84
25. अष्टाध्यायी - 3.2.154

26. अष्टाध्यायी - 4.1.42

27. अष्टाध्यायी - 5.2.127

28. अष्टाध्यायी - 4.1.4

29. अष्टाध्यायी - 3.3.153

30. मुण्डकोपनिषद् - 3.2.9

31. श्रीमद्भगवद्गीता - 2.72

32. उणादिसूत्रम् - 9.21

33. वाक्यपदीयब्रह्मकाण्डकारिका - 130

34. महाभाष्यम् - 1.1.1 पृ. 41

35. वाक्यपदीयब्रह्मकाण्डकारिका - 14

36. वाक्यपदीयब्रह्मकाण्डकारिका - 16

37. महाभारतशान्तिपर्व - अध्यायः - 270, 12 श्लोकसं. - 1.2

38. अष्टाध्यायी - 2.3.36

**सहायकाचार्यः, व्याकरणविभागः**

**ज.रा. राजस्थानसंस्कृतविश्वविद्यालय, जयपुर**

**मोबाईल नम्बर - +९१९९२८२९५८७८**

★★★

# शब्दनित्यत्ववाद:

✍डॉ. मधुकेश्वरभट्ट:

**(संसारस्य सकलो व्यवहार: शब्दप्रयोगाधीन: । शब्दादेव वयमर्थं जानीमहे । अर्थं ज्ञात्वैव चास्माकं प्रवृत्तिर्निवृत्तिर्वा भवति । तादृशस्यार्थस्य बोधक: शब्द: क:? इति परिप्रश्ने ध्वनिव्यङ्ग्यं वणत्मकं नित्यं शब्दमाहु: मीमांसका:। ध्वनिरेव शब्द:, स च कार्य्य इति नैयायिकवैशेषिका: । श्रोत्रवृत्ति: शब्ददेशं गच्छति, तत्र च सा वृत्ति: शब्देन विक्रियते इति सांख्या: । जैनास्तु सूक्ष्मै: परमाणुभि: आरब्धशरीर: शब्द: स्वजन्मभूमे: निष्क्रम्य प्रतिपुरुषकर्णमूल-मुपसर्पतीति वदन्ति । परन्तत्र शाब्दसाधनावन्तो वैयाकरणा: पदे वर्णानामिव वाक्ये पदानां कल्पितत्वात् तेषामर्थवत्त्वमपि काल्पनिकमिति वाक्यस्यैव शब्दत्वम्, तथाहि वाक्यस्फोटं नित्यं शब्दं संगिरन्ते । प्रकृतनिबन्धे व्याकरणे-तरमतं निरस्य शब्दनित्यत्ववाद: समर्थित: । वादस्यास्यापरं नाम स्फोटवाद: । अर्थावगतिरूपात् कार्य्यात् तत्करणरूपोऽनुमानगम्य: । स च निरवयवो नित्यो निष्क्रमकश्च । अर्थप्रतिपत्तिश्च स्फोटादेव, न वर्णेभ्य इति स्फोट एव शब्द:। ध्वनय एव, वर्णा एव वा स्फोटस्य व्यञ्जका: । तत्र कौण्डभट्टानुसारं वर्णानां व्यञ्जकत्वम्, कैयटनागेशानुसारञ्च ध्वनीनां व्यञ्जकत्वं सम्मतम् । अस्तु, वादेऽस्मिन् परमार्थतो निरवयवमेव वाक्यं, निरवयवस्यैव वाक्यार्थस्य तत्र बोधकत्वमिति बोध्यम् ॥ ॥ - स.)**

(अयं लेख: महाविभूतिभ्य: प्राचीनाधुनिकाविद्यासु पारङ्गतेभ्य: करतलामलकीकृतपात-ञ्जलमहाभाष्येभ्य: आचार्यरामानुजदेवनाथवर्येभ्य: समर्प्यते)

लौकिका: बुभुत्सितं श्रोतृपुरुषानवगतमर्थं बोधयितुमिच्छन्तो वाक्यं प्रयुञ्जते । जिज्ञासितारस्तु प्रमेयं वाक्यं पृच्छन्ति । एवं रूपेण लोकयात्रा शब्दद्वारैव प्रवर्तते । अत एव शब्द: सर्वार्थप्रकाशकं ज्योति: इत्याह दण्डी- **इदमन्धतम: कृत्स्नं जायेत भुवनत्रयम् ।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ।**[१]

भर्तृहरिरप्याह - **अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम् ।**[२]

कोयं शब्द: इति संदेहे अर्थबोधजनकत्वं हि शब्दत्वमित्युत्तरम् । अवादि च भगवद्भाष्यकारै: येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्द इति:' ।[३]
अत्र शब्दनित्यत्ववादिनो मीमांसका: श्रोत्रग्रहणजन्यो वर्ण: शब्द:, स च वर्ण: नित्य इत्यामनन्ति ।

किन्तु वर्णाः आशु तिरोगच्छन्ति यथा रामशब्दे आकारोच्चारणकाले रेफवर्णस्य श्रवणाभावात् वर्णानां शब्दत्वं न । अपि चात्र वर्णाः मिलित्वा अर्थं प्रत्याययन्ति उत प्रत्येकं वर्णः इति संदेहो जागर्ति । वर्णानाम् आशुतिरोभावितत्वात् मिलित्वार्थप्रत्यायकत्वं न भवति । प्रत्येकं वर्णः अर्थमवबोधयति चेत् बहूपप्लवः । लोके न हि एकस्मात् वर्णात् अर्थप्रत्ययो भवति । यदि स्यात् तत्तच्छब्दघटकानां सर्वेषां वर्णानाम् अर्थवत्त्वात् सर्वेभ्यः वर्णेभ्यः स्वाद्युत्पत्तिः । अपि च प्रथमोच्चारणेनैव यदि अर्थप्रत्ययः द्वितीयवर्णोच्चारणं व्यर्थं स्यात् । शब्दे यावन्तो वर्णाः तावतामर्थप्रतीतिः स्यात् । अतः वर्णातिरिक्तः अर्थवाच्यः शब्दः स्वीकार्यः । स एव स्फोटः इति वैयाकरणानां समयः । अत एव शब्दानुशासनम् इति व्याख्यानावसरे भगवान् भाष्यकारः केषां शब्दानाम्[4] इति प्रश्नमुद्भाव्य लौकिकानां वैदिकानां च[5] समादधात् च । यदि श्रोत्रग्राह्यवर्णत्वं शब्दत्वमिष्येत तर्हि कोकिलतन्त्र्यादिभ्यः यो ध्वनिः श्रूयते तत्रापि श्रोत्रग्राह्यत्वात् तेषामपि अनुशासनमावश्यकं स्यात् । उक्तं च भर्तृहरिणा –

**पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च ।**
**वाक्यात्पदानामत्यन्तः प्रविवेको न कश्चन ॥**[6]

अत्र न्यायवैशेषिका इत्थमभिप्रयन्ति यत् संयोगाद्विभागाद्वा शब्दः उपजायते । उत्पन्नश्चासौ शब्दः सर्वासु दिक्षु कदम्बगोलकाकारेण सजातीयनिकटदेशानि शब्दान्तराणि आरभते, तानि च शब्दान्तराणि शब्दान्तराणि उत्पादयन्ति वीचीतरङ्गन्यायेन । इयं युक्तिः असमीचीना यतो हि शब्दाः शब्दान्तराणि कथं जनयेयुः? अपि च शब्दयोः नहि कार्यकारणभावः । किञ्च वायौ यथा वेगः क्षयश्च अनुभूयते तथा शब्देषु वेगस्य क्षयस्य अनुभवस्य कल्पना नहि भवति । शब्दान्तराणि उत्पादयतां शब्दानां विराम एव न स्यात् सर्वदा शब्दोत्पत्तिश्च स्यात् । किञ्च न्यायवैशेषिकानां मते शब्दगुणकमाकाशं विभु विद्यते । एवं च आकाशस्य सर्वगतत्वात् कड्यादीनां तन्मध्यस्थितस्य पुरुषस्य शब्दस्याश्रवणं कथङ्कारं भवेत् । कण्ठताल्वभिघातजन्यः शब्दः शब्दान्तराणि यदि जनये-त्तर्हि पञ्चमषष्ठसप्तमपरम्परा शब्दस्य कथं मन्दतां भजते? श्रूयते च शब्दोच्चारणस्थानात् समीपदेशेषु शब्दस्य तीव्रता दूरदेशेषु मन्दता च । अपि च वीचीतरङ्गन्याये वीचयः मूर्तिमन्तः अतस्त-त्क्रियायोगात् वेगादिभिः अपरवीचयो जन्यन्ते । किन्तु शब्दे मूर्तिमत्त्वक्रियावेगादिराहित्येन कथं शब्दान्तरजनकत्वं ? अतो न्यायवैशेषिकानां मतं नादर्तव्यम् ।

शब्दानित्यत्वादिनः सांख्याः श्रोत्रवृत्तिः शब्ददेशं गच्छति, तत्र च सा वृत्तिः शब्देन विक्रियते इति वदन्ति । तन्न, श्रोत्रस्य व्यामिश्रितत्वात् समीपदेशेनैव शब्दः विक्रियते न दूरदेशेन शब्देन इत्यत्र प्रमाणाभावात् । अपि च वाराणस्यामुच्चारितः शब्दः कश्मीरे अपि श्रूयेत । श्रोतृवृत्तिः अमूर्ता प्रसरन्ती मूर्तैः कुड्यादिभिः व्यवहितुं न शक्यते । अतः कुड्यादिव्यवधानेपि शब्दश्रवणापत्तिः स्यात् । जैनास्तु सूक्ष्मैः परमाणुभिः आरब्धशरीरः शब्दः स्वजन्मभूमेः निष्क्रम्य प्रतिपुरुषकर्णमूलमुपसर्पति इति वदन्ति तदपि न । यतः वर्णस्यावयवाः सूक्ष्माः परमाणवः सन्ति तैः परमाणुभिः वर्णाः जायन्ते इति न विचारपथमारोहति । परमाणूनां केन सन्निवेशेन कः शब्दः उपजायते इति नैकेषां प्रश्नानामुत्तरासंभावात् अयं पक्षोऽपि त्याज्यः ।

शब्दनित्यत्ववादिनो वैयाकरणास्तु अर्थाभिधेय: स्फोटरूपात्मक: शब्द: नित्य इति आमनन्ति। श्रूयमाणो ध्वनिरूपशब्दस्तु अनित्य: । स एव स्फोटाख्यरूप: शब्द: परब्रह्मस्वरूपोऽस्ति । सर्वेषां नामरूपात्मकानां जगदुत्पत्ति: शब्दब्रह्मणा भवति । शब्दब्रह्मैव नामरूपे व्याकरवाणि[7] इति श्रुत्या शब्दरूपेण अथरूपेण विवर्तते । तथा चोक्तम् –

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यत: ।।**[८]
**न सोऽस्ति प्रत्ययो लोके य: शब्दानुगमादृते ।**
**अनुविद्धमिदं ज्ञानं सर्वं शब्देन भासते ।।**[९]

भगवद्भाष्यकारोऽपि चत्वारि इति शब्दानुशासनप्रयोजनावसरे आह द्वौ शब्दात्मानौ नित्य: कार्यश्च[10] इति । स्फोटाख्य: शब्द: नित्य: ध्वनिरूपात्मक: शब्द: अनित्यश्चेति भाव: । भगवता पाणिनिना पृषोदरादीनि यथोपदिष्टम्[11] इति सूत्रेण यथोपदिष्टस्य पृषोदरादित्वात् साधुत्वं प्रतिपाद्य शब्दानां नित्यत्वं संसाधितम् । एवं सिद्धे शब्दार्थसंबन्धे[12] इति वार्तिकेन शब्दस्य नित्यता उदघोषि वररुचिना । अपि च कण्ठताल्वादिव्यापारै: जातै: ध्वनिभि: शब्दानाम् अभिव्यक्ति: एव भवति न तूत्पत्ति: । अत एव शब्दमुच्चारयति माणवक: इत्येव लोके व्यवहार: न तूत्पादयति । अपि च महाभाष्ये घटेन कार्यं करिष्यन् कुम्भकारकुलं गत्वाह कुरु घटम् अनेन कार्यं करिष्यामीति । न तद्वच्छब्दान् प्रयुयक्षमाणो वैयाकरणकुलं गत्वाह कुरु शब्दान् प्रयोक्ष्ये[13] इति लौकिकदृष्टान्तेन शब्दस्य नित्यता प्रत्यपादि ।

**सन्दर्भा:**


1. का. आ.1 –04 ।
2. वा.प. 1–13 ।
3. महा. पस्पश. ।
4. महा. पस्पश. ।
5. महा. पस्पश. ।
6. वा.प. 1–27 ।
7. छान्दोग्य. 3–6–322 ।
8. वा.प. 1–1 ।
9. वा.प. 1.123 ।
10. महा. पस्पश. ।
11. अष्टा. 06–03–137 ।
12. महा. पस्पश. ।
13. महा. पस्पश. ।

**सहायकाचार्य्यः, व्याकरणविभागः**
**राष्ट्रियसंस्कृतसंस्थानम्**
**नवदेहली ।**

★★★

# भासनाटकेषु स्त्रोपात्राणि समायोजनस्य उत्कृष्टोद्धरणानि

✍डॉ लीना सक्करवालः

**( भासनाटकेषु विद्यमानानां स्त्रीपात्राणां कानिचन स्त्रीपात्राणि समायोजनदृष्ट्या चित्वा लेखेऽस्मिन् तासां समायोजनगुणस्य सोद्धरणं विवरणमत्र प्रस्तुतम् । तानि च स्त्रीपात्राणि - सीता, राज्यलक्ष्मी, पद्मावती कैकेयी, गान्धारी, वासवदत्त, कौशल्या, सुमित्रारूपाणि । अत्र किं नाम समायोजनम्? पाश्चात्यचिन्तकैः प्रतिपादिताः परिभाषाः, समायोजनस्य महत्त्वपूर्णानि क्षेत्राणि कानीत्यपि प्रदर्शितम् । प्रदर्शितञ्च - 'मात्रास्पर्शास्तु...... तान्तितीक्षस्व भारत' इति गीतायाः समायोजनकृते अद्वितीयमुदाहरणम् । वस्तुतस्तु जनानां पकृतिः भिन्ना-भिन्ना । तान् जनान् भिन्नप्रकृतिकान् समूहरूपान् कर्त्तुं समायोजनशैली नितरां प्रभावकरी । परिवारः, समाजः, राष्ट्रं, विश्वं, संस्था, विद्यालयादिः तत्र तत्र सर्वत्रैव समायोजनेनैव अपेक्षानुरूपं साफल्यं वयं लभामहे । तस्माल्लेखोऽयं समायोजनपरकः समेषामेव तत्रापि विशिष्य स्त्रीणाङ्कृतेऽतीवोपकारकः ॥ - स. )**

सौहार्दपूर्णजीवनस्य आधारभूतस्तम्भत्वेन समायोजनमिति अङ्गीक्रियते । समायोजनं मनुष्यस्य व्यक्तित्वस्य तद्गुणः वर्तते यः मानवे दैहिक-मानसिकसन्तुलनं जनयति । अनेन माध्यमेन कश्चनापि मनुष्यः स्वीयं जीवनं क्लेश-चिन्ता-द्वन्द्व-कुण्ठेत्यादिं विना पूर्णेन समुल्लासेन जिवितुमवसरं प्राप्नोति । यद्यपि इदं समायोजनं शिक्षामनोविज्ञानस्य सम्प्रत्ययेषु अद्य परिगण्यते तथापि भारतीयसंस्कृतवाङ्मयस्य विभिन्नग्रन्थेषु, काव्येषु, नाटकेत्यादिषु वर्णितेषु चरित्रचित्रणेषु समायोजनस्य गुणानां विस्तृतं स्वरूपं दरीदृश्यते । प्रस्तुतशोधपत्र महाकविभासनाटकेषु वर्णितानि स्त्रीपात्राणि आधृत्य समायोजनस्य गुणानां विश्लेषणं विहितमस्ति । अपि च एतेषां स्त्रोपात्राणां गुणानां प्रास-ङ्गिकता अद्यतनयुगे कियती महत्युपकारिका वर्तते इति सर्वविदितम् ।

**मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः ।**
**आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ॥** (2.14)

श्रीमद्भगवद्गीतायाः उद्धृतमिदं पद्यं समायोजनस्याद्वितीयमुदाहरणं वर्तते । अस्मिन् पद्ये स्पष्टत्वेन पतिपादितं वर्तते यत् इन्द्रियबोधादुत्पन्नाः सुखदुःखयोः क्षणाः मानवजीवनस्य लघ्वंशत्वेन भवन्ति । अतः एतान् विचारान् विहाय मनुष्यः सर्वासु अवस्थासु अविचलभावेन कर्त्तव्यं कुर्यादिति आशयः । कालानुगुणं मनुष्यस्य कर्त्तव्यपरायणता, तस्य व्यक्तित्त्वस्य सर्वोत्कृष्टगुणेषु समायाति ।

आत्मनः दायित्वस्य निर्वहणं, कर्तव्यपरायणता, व्यवहारानुकूलता च वस्तुतः समायोजनस्य महा-वश्यकाः गुणाः वर्तन्ते, ये मनुष्येषु भवेयुः इति । एतैः गुणैः विना मनुष्यस्य सौहार्दपूर्णं जीवनं कल्पयितुं नार्हामः ।

साम्प्रतिके युगे मानसिकक्लेशः, कुण्ठा, द्वन्द्वः, चिन्ता, इत्यादिकं सर्वाधिकं मानवान् पीडयति । एतेभ्यः कारणेभ्यः विविधमानसिकरोगाः उत्पन्नाः अभवन् । व्यक्तेः जीवनप्रक्रिया सुचलिता न वर्तते, अपि च सः हीनभावनया ग्रस्तत्वम् अनुभवति । अस्य मानसिकक्लेशस्य कारणं वर्तमानसमाजे समायोजनस्य ये गुणाः श्रीमद्भगवद्गीतायाः पद्ये उल्लिखिताः वर्तन्ते, तेषामभावाद् दरीदृश्यते । इदं समायोजनं मानवजीवनस्य महत्त्वपूर्णा प्रक्रिया वर्तते । जन्मानः एव मानवः अस्याः प्रक्रियायाः महत्त्वपूर्णः अंशः भवति । आत्मानम्, जीवनं सुखदं सौहार्दपूर्णञ्च कर्तुं मानवैः समायोजनाय प्रयासाः करणीयाः इत्यस्माकं ग्रन्थाः अपि विवेचयन्ति । नूनमिदं स्पष्टं वरीवर्तते यत् समायोजनस्य सम्प्रत्ययः प्राचीनकालादारभ्य अस्माकं भारतीयसंस्कृतवाङ्मये परोक्षत्वेन विहितोऽस्ति। विशिष्टत्वेन संस्कृतसाहित्यस्य काव्येषु पात्राणां चरित्रचित्रणेषु समायोजनस्य बहूनि उदाहरणानि प्राप्यन्ते । अद्यतनयुगे पाश्चात्यविद्वद्भिरपि समायोजनस्य विभिन्नाः परिभाषाः उल्लिख्यन्ते।

**अरकौफ** ( १९६८ ) महोदयेनोक्तम् - व्यक्तेः पर्यावरणेन सह अन्तःक्रिया इति समा-योजनम् ।

**वेबस्टर** ( १९५१ ) महादयेनोक्तम् - कस्मिंश्चित् सम्बन्धो संतुष्टतायाः विकासः यः सामंजस्यम् अनुकूलनञ्च प्रतिदर्शयति इति समायोजनम् ।

**James Drever** ( १९५२ ) - Adjustment means the modification to compensate for meet special conditions.

**Carter V. Good** ( १९५९ ) - Adjustment is the process of finding and adopting modes of behavior suitable to the environment or the changes in the environment.

**Shaffer** ( १९६१ ) - Adjustment is the process by which a living organism maintain a balance between its needs and the circumstances that influence the satisfaction of these needs.

एतासामुपर्युक्तपरिभाषाणामाधारेण इदं कथयितुं शक्यते यत् समायोजनं वस्त्तः वातावरणेन सह मस्तिष्कमनुकूलयितुं प्रक्रिया वर्तते, यया मानवः वर्तमाने संभूय प्रतिकूलपरिस्थितिं प्रत्यपि सक्षमः स्यात् । पाश्चात्यमनोवैज्ञानिक अरकाफै (1968) महाभागस्य पुस्तके । djustment and Mental Health समायोजनस्य महत्त्वपूर्णानि क्षेत्राणि वर्णितानि सन्ति। एतानि क्षेत्राणि सन्ति -

1. स्वास्थ्य समायोजनम्
2. आर्थिकं समायोजनम्
3. जीवपरिस्थितयः
4. सामाजिकजीवनम्

5. सामाजिक-मनोवैज्ञानिकसम्बन्धः
6. व्यक्तिगतमनोवैज्ञानिकसम्बन्धः
7. धार्मिकनैतिकमूल्यानि
8. गृहं परिवारश्च
9. व्यावसायिकक्षमता
10. शिक्षा
11. शिक्षणं पाठ्यक्रमश्च

समायोजनस्य व्याख्या न केवलं पाश्चात्यविद्वद्भिः कृता, अपि च अस्माकं भारतीयकवीनां यथा कालिदास-भवभूति-माघ-भास-भारवीत्यादीनां कवीनां ग्रन्थेषु वर्णितेषु पात्राणां चरित्रचित्रणे समायाजनस्य विषये प्रचुरसामग्री उपलब्धा वतते, याभिः न केवलं व्यक्तेः व्यक्तिगत-शैक्षिक-सामाजिक-मानसिक-भौतिकविकासो वर्तते, अपि च उत्कृष्टतमोदाहरणत्वेन गृहं-समाजं-देशञ्च उपकरोति । एतेषु कविषु महाकविभासस्य स्त्रोपात्राणां महती प्रासङ्गिकता अद्यतनयुगे दरीदृश्यते । यद्यपि समायोजनसम्प्रत्यये स्त्रोपुरुषयोः द्वयाः महती भूमिका वर्तते तथापि सन्ध्याय भासस्य स्त्रोपात्राणां विश्लेषणमत्र समायोजनाय कृतम् ।

भासस्य नाटकेषु प्रतिमानाटकस्य सीता समायोजनस्य अनुपममुदाहरणं वर्तते । सीता जनकस्य पुत्रो, दशरथस्य पुत्रवधूः, रामस्य पत्नी, लक्ष्मणस्य भ्रातृजाया इत्येव प्रत्येकं रूपे संस्कृत- साहित्ये विलक्षणं स्थानं अलङ्करोति । सीतायाः सच्चरित्रस्य महती विशेषता वर्तते वातावरणानुसारं स्थितेः स्वीयं समायोजन सीतायाः समायोजनस्य उदाहरणं निम्नाङ्कितपंक्तौ दरीदृश्यते-

**''आर्ये! उपहारसुमनआकीर्णः सम्मार्जित आश्रमः । आश्रमपदविभवेनानुष्ठितो देव-समुदाचारः । तद्यावदार्य पुत्रे नागच्छति, तावदिमान् बालवृक्षानुदकप्रदानेनानुक्रोशयिष्यामि ।**

**( प्रतिमानाटकं पञ्चमाङ्कः )**

वस्तुतः सीता शरीरेण अतीव सुकोमला वर्तते । तया कदापि शारीरिकश्रमः न कृतः । जनकस्य पुत्रो, चक्रवर्तोपुत्रवधूः भूत्वाऽपि इयं सीता रामेण सह वने सानन्दा कर्त्तव्यपरायणा दृश्यते। सीतायाः सौकुमार्यस्य अभिव्यञ्जना रामस्य निम्नलिखितकथनेन स्पष्टो भवति -

**योऽस्याः करः श्राम्यति दर्पणेऽपि, सः नैति खेदं कलशं वहन्त्याः ।**
**कष्टं वनं स्त्रोजनसौकुमार्यः समं लताभिः कठिनीकरोतिा।।**

**( प्रतिमानाटकम्, पञ्चमाङ्कः, पद्यम् ३ )**

सीतया रामस्य हृदयं सुष्ठुतया अवगम्यते । यदा रामः पितुः दशरथस्य वार्षिकश्राद्धं स्ववैभवानुरूपं कर्तुमिच्छति तदा सीतया बोध्यते वैभवानुरूपं श्राद्धं भरतः करिष्यति । रामः वन्यजीवनस्य उपयुक्तपुष्फलैः श्राद्धं कुर्यात् । निम्नलिखितवार्तालापेन इदं स्पष्टयते -

**सीता** - शोकशून्यहृदयस्येवार्यपुत्रस्य मुखरागः किमेतत्

**कृतान्तशल्याभिहते शरीरे, तथैव तावद्धृ दयव्रणो मे ।**

**नानाफलाः शोकशराभिघाताः, तथैव तत्रैव पुनः पतन्ति ॥**

**(प्रतिमानाटकम्, पञ्चमाङ्कः, पद्यम् ४)**

**रामः -** **स्वतन्त्र भवतस्तात तस्यानुसंवत्सरश्राद्धविधिः ।**

**कल्पविशेषेण निर्वपनक्रियामिच्छति पितरः ।**

तत् कथं निर्वर्तयिष्यामीत्येतच्चिन्त्यत अथवा -

**गच्छति तुष्टिं खलु येन केन, तं एव जानन्ति हि तां दशां मे ।**

**इच्छामि पूजां च तथापि कर्तुं, तातस्य रामस्य च सानुरूपाम् ॥**

**(प्रतिमानाटकम्, पञ्चमाङ्कः - ५)**

**सीता -** आर्यपुत्र ! निर्वर्तयिष्यति श्राद्धं भरतश्रद्धया, अवस्थानरूपं फलोदकेनाप्यार्यपुत्र । एतद सातस्य बहुमततरं भविष्यकता ।

सीता यथोचितव्यवहारे निपुणा वर्तते । अनया ज्येष्ठानाम् अनुजानां समवयस्कानां समानादरं व्यवह्रियते । अयं गुणः समायोजनस्य तत्त्वेषु एको वर्तते ।

प्रतिमानाटकस्य सप्ताङ्के दृश्यते -

**सखीति सीतेति च जानकीति यथावयः स्निग्धातरं स्नुलेति ।**

**तपस्विदारैर्जनकेन्द्रपुत्रो सम्भाष्यभाणा समुपैति मन्दम् ॥**

समायोजनस्य गुणेषु एकः गुणः धैर्यम् अपि वर्तते । इयं सीता धैर्यस्य मूर्त्तिः वर्तते । ईश्वरे अतीवश्रद्धया तया सर्वाणि कष्टानि सह्यन्ते । तद्यथा -

**किन्तु खल्वार्यपुत्रस्याणमनेन प्रहलादितस्य हृदयस्याधावेग इव संवृत्तः । अतिष्टानि निमित्तानि च दृश्यन्ते एवमपीदानां हृदयस्य महानभ्युदयो वर्तते । सर्वथेश्वराः शान्तिं कुर्वन्तु ।**

**(अभिषेकनाटके पञ्चमाङ्कः पद्य-४ इत्यस्य पूर्वांशः)**

इत्थं महाकविभासस्य प्रतिमानाटकाभिषेकनाटकयोः वर्णिता चित्रिता वा सीता समायोजनस्य सर्वान् गुणान् अलङ्करोति । सीतायाः चरितेन अद्यतनसमाजः बहुमूल्यानि नैतिकतत्त्वानि नेतुं शक्नुयुः ।

समायोजनस्य दृष्टान्तस्वरूपे प्रस्तुता अस्ति भासस्य बालचरितनाटकस्य राजश्री । इयं राज्यलक्ष्मी वर्तते । सा राज्यलक्ष्मीः संभूयापि नारी अस्ति नित्यममतामयी । कंसस्य त्यागसमये इयं दुःखिता अस्ति । वस्तुतः इयमेव नारीणां समायोजनस्य क्षमता वर्तते यत् यस्मिन् गमत्वं भवति तस्य दोषा अपि गुणात्वेन दरीदृश्यन्ते । यया तया दुष्टकंसस्य विषये उक्तम् -

**न चाहं चिरसंवासात् व्यक्तं शक्नोमि पार्थिवम् ।**

**बलवान् गुणसंग्राही दृढं तपति मामयम् ॥**

**बालचरितम्, द्वितीयोऽङ्कः, ८**

भासस्य नाटकेषु नारीणां चरित्रेषु वासवदत्तायाः चरित्रं प्रमुखं वर्तते । वासवदत्तायां समायोजनस्य सर्वे गुणाः समाश्रिताः सन्ति ।

वासवदत्तायाः चरित्रं प्रतिज्ञायौगन्धरायण-स्वप्नवासवदत्तयोः सुन्दररूपेण चित्रितं वर्तते । वासवदत्ता एतादृशी सहनशीला-पतिव्रता च नारी वर्तते या पत्युः अभ्युदयाय पतिं प्रति अद्वितीयं प्रेम त्यक्त्वा यौगन्धारायणस्य निदशमनुसरन्ति । वासवदत्ता आस्तिकी अस्ति तस्याः ईश्वरं प्रति अनन्यश्रद्धा अस्ति । वासवदत्तायाः चरित्र क्वापि ईर्ष्या न दृश्यते स्वप्नवासवदत्तस्य प्रथमाङ्के पद्मावतीं दृष्ट्वा सा मुदिता भवति -

**''राजदारिकेति श्रुत्वा भगनिकास्ने होपि मेत्रऽसम्पद्यते ।''**

वासवदत्ता न केवलं प्रसन्ना अस्ति अपितु तया पद्मावत्याः रूपमपि प्रशस्यते ।

**नहि नहि! हला! अधिकमद्य शोभते! अमित इव तेऽच्चवरमुखं पश्यामि।**

**( स्वप्नवासवदत्तं, द्वितीयोऽङ्कः )**

वासवदत्ता दृढसंकल्पा नारी वर्तते । प्रियतमस्य हिताय यौगन्धरायणस्य मन्त्रणायां पद्माावत्या सह प्रियतमस्य विवाहमपि अङ्गीकरोति । वासवदत्तायाः मनसि केवलं प्रियतमस्य हितचिन्तनं यौगन्धरायणस्य प्रतिज्ञायाश्च सकुशलसमापनमेव संकल्पो वर्तते । अस्यां पंक्तौ सा अस्मिन्नेव विषये चिन्तिता अस्ति -

**हम ! आर्यपुत्रः न खलु पद्मावती ? किन्नु खलु दृष्टास्मि ? महान् खल्वार्य यौगन्धरायणस्य प्रतिज्ञामयि मम दर्शनेन निष्फलः संवृत्तः ।**

**( स्वप्नवासवदत्तम्, पञ्चमाङ्कः )**

स्वप्नवासवदत्तस्य द्वितीयं महत्त्वपूर्णं स्त्रोचरित्रं वर्तते पद्मावती । महाकविभासेन पद्मावत्यै तरुणी-दर्शनीया-अकोपना-अनहंकारा-मधुरवाक्या सादक्षिण्या इत्येतेषां विशेषाणानां प्रयोगः अतिश्यो-क्तिरूपः नास्ति ।

पद्मावती उदारहृदयस्य नारी अस्ति । उदारता वस्तुतः समायोजनस्य महत्त्वपूर्णं तत्त्वं व्यक्तित्त्वनिर्माणे च उत्तमं साधनं वर्तते। तस्याः उदारतायाः प्रमाणमत्र प्रतिपादितमस्ति -

**पद्मावती - आर्य ! किं दृष्टो मुनिजन आत्मानमनु ग्रहीतुम् ? अभिप्रेतप्रदानेन तपस्विजन उपनिमन्त्रयताम् तावत् कः किमत्रेच्छतीति ?**

**कांचुकीयः** - यदभिप्रेतं भवत्या। भोः भोः आश्रमवासिनस्तपस्विनः शृण्वन्तु शृण्वन्तु भवन्तः इहात्रभवती मगधराजपुत्रो अनेन विस्रम्भेणोत्वादितविस्रम्भा धर्मार्थमर्थेनोपनिमन्त्रयते ।

**कस्यार्थः कलशेन को मृगयते वासो यथानिश्चितम्**
**दीक्षां पारितवान् किमिच्छति पुनर्देयं गुरोर्यद् भवेत्।**
**आत्मानुग्रमिच्छतीह नृपजा धार्माभिरामप्रिया**
**यद् यस्थास्ति समीप्सितं वदतु तत् कस्याद्य किं दीयताम्।।**

**( स्वप्नवासवदत्तम् प्रथमअंकः )**

पद्मावती करुणामयी वर्तते । करुणा स्त्रोणामाभूषणं वर्तते । उदयनस्य मूर्च्छां श्रुत्वा सा व्यथिता अभवत् - यथा

**पद्मावती - दिष्टया धियते । मोहं गत् इति श्रुत्वा शून्यमिवं मे हृदयम् ।**

**( स्वप्नवासवदत्तम् प्रथमांक: )**

पद्मावती स्वभावे निश्छला, व्यवहारे प्रौढ़ा, छलविहीना, सहृदया, सुकोमला, पतिव्रता इत्येतेषां समायोजनस्य गुणानां स्रोतो वर्तते ।

भासस्य प्रतिमानाटकस्य दशरथस्य पत्नी कौशल्या अत्यन्तसौम्या शान्ता च दृश्यते । पतिपरायणा कौशल्या कदापि दु:खिनीं कर्तुं नेच्छति । यदा महाराजदशरथ: रामस्य वियोगे व्याकुल आसीत् तदा कौशल्या धैर्यपूर्वकं दशरथे आश्वस्तं करोति ।

**कौशल्या - ( सरुदितम् ) अलमिदानीं महाराजोति मात्रं सन्तप्य परवशमात्मानं कर्तुम् । ननु सा ता कुमारो महाराजस्य समयावसाने प्रेक्षितव्याभिव्यक्ति ।**

**प्रतिमानाटकं द्वितीयांक:**

प्रतिमानाटकस्य कथाविस्तारस्य केन्द्रे कैकेयी इत्यस्या: चरित्रमपि अस्ति । कैकेयी महाराजदशरथस्य द्वितीया पत्नी, रामस्य विमाता, भरतस्य माता अस्ति । प्रतिमानाटकस्य कैकेयी स्वतन्त्रव्यक्तित्त्वस्य सम्पूर्णजीवनस्य प्रतिनिधित्वं करोति । तस्या: चरित्र सजीवता, स्वाभाविकता स्वतन्त्रव्यक्तित्त्वमिति एते गुणा: सम्मिलिता: सन्ति । सा महत्त्वाकांक्षिणी नारी वर्तते, नारी सशक्तीकरणस्य अनुपमोदाहरणं वर्तते । राष्ट्रहिते इयं लाञ्छनं, अपमानं, भर्त्सनां सर्वं सहते । सम्पूर्णसमाजात् प्राप्तमपमानं वधव्यस्य भयङ्करदु:खं राष्ट्रहिताय अङ्गीकराति । पुत्रेण अपमान: कस्यैचित् मात्र दु:खस्य विषयो भवति तथापि सा दु:खमङ्गीकरोति । सा स्ववचनस्य रहस्योद्घाटनं यावत् न करोति तावत् उचितोऽअवसर: नोपलभ्यते । संक्षेपेण कैकेयी इति स्त्रोपात्रस्य चरित्रस्य गुणा: साम्प्रतिके कलियुगे नारीषु नितान्तमावश्यका: वर्तन्ते ।

प्रतिमानाटके सुमित्राया: चरितं सुमित्रताया: प्रतिमा वर्तते । मित्रता मैत्री वा समायोजनस्य कुशलगुणेषु एक: गुण: वर्तते । सुमित्राया: परिणामेन एक: पुत्र: शत्रुघ्न: भरतस्य । सुमित्राया: चरित्रं महाराजदशरथस्य पंक्तिभि: स्पष्टं वर्तते ।

**राजा - अयि सुमित्रे !**

**तत्रैव पुत्र: सत्पुत्रे नक्तन्दितं वने ।**

**रामोरघुकुलश्रेष्ठश्छायये वानुगम्येते ॥**

**प्रतिमानाटकं द्वितीयोऽङ्क: पद्य १०**

भासस्य दूतघटोत्कच - उरूभङ्गयो: गान्धारी मंचे उपस्थिता भवति । गान्धारी कुरुराज-धृतराष्ट्रस्य पत्नी, दुर्योधनस्य माता अस्ति । गान्धारी ममतामयी वीरमाता अस्ति । पतिव्रतानारीषु सा अग्रगण्या अस्ति । धृतराष्ट्रस्य परिवारस्य एकमात्रसदस्या वर्तते या समानरूपेण समादृता अस्ति ।

श्रीकृष्णाग्रजबलरामेणोक्तम्

**या पुत्र पौत्र वदनष्वकुतूहलाक्षी दुर्योधानास्तमितशोकनिपीत धैर्या ।**

**अस्तेराजस्रमधुना पति धर्म चिह्व मार्द्रीनयन बन्धामिदं दधाति ॥**

गान्धारी असीमितधैर्यस्य स्वामिनी अस्ति । सा इयं दूरदर्शिनी अपि वर्तते । अभिमन्युवधे सा दु:खिता अस्ति । दु:खं पौत्रवधस्य तु वर्तते परम् अधिकदु:खं कुलविनाशस्य वर्तते । तथोक्तम्-

हा वत्स अभिमन्यो ! ईदृशोऽपि नाम पुरुषक्षयकारके कुलविग्रहे वर्तमाने बालभावनि-मज्जनमस्माकं भाग्यक्रमेण कुर्वन् कुत्रदानीं पौत्रक ! गतोऽसि ।

निष्कर्षत्वेन इदं कथयितुमर्हाम: यत् भासस्य नाटकेषु धैर्यस्य, सहनशीलताया: प्रतिमूर्ति: सीता, बालचरितनाटकस्य नित्यममतामयी राज्यलक्ष्मी: या दुष्टकंसस्य त्यागसमयेऽपि महती दु:खिताऽऽस्ति, वासवदत्ताया: कर्त्तव्यपरायणता, आत्मानं पतिं प्रति अद्वितीयं प्रेम, ईश्वरं प्रति अनन्यश्रद्धा, अनसूया, दृढसंकल्पा, अथ च करुणामयी पद्मावती, निश्छला, छलविहीना, सहृदया, सुकोमला पतिव्रता इति एतै: गुणै: परिपूर्णा: इयं पद्मावती सर्वाधिका प्रासङ्गिको वर्तते । इत्थं च प्रतिमानाटकस्य कैकेयी स्वतन्त्रव्यक्तित्त्वस्य प्रतिनिधित्वं करोति । नारी सशक्तीकरणस्यानुपमोदाहरणं वर्तते । राष्ट्रहिताय लाञ्छनम् अपमानं, भर्त्सनां सर्वं सहत । मैत्री समायोजनस्य एक: कुशल: गुण: भवति यस्योदाहरणं प्रतिमानाटकस्य सुमित्राया: चरिते स्पष्टं विधोयते । असीमितधर्यस्य स्वामिनी गान्धारी पतिव्रता नारीषु अग्रगण्या दृश्यते । भासनाटकानाम् एतानि सर्वाणि स्त्रोपात्राणि साम्प्रतिके युगे स्त्रीभ्य: मार्गदर्शकत्वेन भवितुमर्हन्ति । समायोजनस्य विशिष्टगुणान् विकासयितुम् एतानि पात्राणि संध्याय चिन्तनमपेक्षतमिति वरम् ।

**सन्दर्भग्रन्था:**

1. पाल, डॉ हंसराज, प्रगत शिक्षा मनोविज्ञानम्, हिन्दी माधयम कार्यान्वय निदेशालय, 2005, नई-दिल्ली।
2. मिश्र, प्रो. लोकमान्य, आधुनिकं शिक्षामनोविज्ञानम्, मृगाक्षी प्रकाशनम्, प्रथमसंस्करण 2011, लखनऊ ।
3. श्रीमद् ए.सी. भक्तिवेदान्त स्वामी प्रभुपाद, श्रीमद्भगवद्गीता यथारुप, भक्तिवेदान्त बुक ट्रस्ट, 2003, मुम्बई।
4. कीथ, डॉ. ए.बी., अनुवादक मङ्गलदेव शास्त्रो, संस्कृत साहित्य का इतिहास, मोतीलाल बनारसीदास, द्वितीयसंस्करण 1967, दिल्ली ।
5. त्रिपाठी, प्रो. राधावल्लभ, संस्कृत साहित्य का समग्र इतिहास प्रथम खण्ड, न्यू भारतीय बुक कारपोरेशन, प्रथम संस्करण - 2018, नई दिल्ली ।
6. मुक्तस्वाध्यायपीठम्, स्वप्नवासवदत्तम् श्रुतबोधश्च, प्रथमखण्ड:, राष्ट्रियसंस्कृतसंस्थानम्, प्रथममुद्रणम्, 2010, नव देहली ।
7. Mangal, S.K., Advanced Educational Psychology, Prentice Hall of India, Second Edition 2005, New Delhi.
8. Arthur A.Macdonell, A History of Sanskrit Literature, Motilal Banarsidas Publication, sixth reprint 2016, New Delhi.

**सहायकाचार्या, शिक्षाविभागः**
**राष्ट्रियसंस्कृतसंस्थानम्**
**( जयपुरपरिसरः )**
**राजस्थानम्**

★★★

# शब्दार्थसम्बन्धः विमर्शः

✍डॉ. सुभाषचन्द्र मीणा

**(लोके यथा परस्परं जनानां, परस्परं वस्तूनाञ्च सम्बन्धोऽनुभवविषयः, तथैव शब्दाथयोरपि । शब्दानां त्रिविधत्वादर्थानाञ्च त्रिविधत्वात् तयोः सम्बन्धानामपि त्रिविधत्वम् - शक्तिलक्षणव्यञ्जनात्मकमिति समुद्दिश्य पतञ्जलिभर्तृहरिकैयट-दीक्षितनागेशप्रमुखाणामुद्धरणमुद्धृत्य गदाधरसम्मतं पमञ्चोल्लिख्य विशिष्य शक्तिस्वरूपं लेखकोऽत्र विविनक्ति । तन्त्रान्तरे 'अभेदोऽपि सम्बन्धः' 'एकं स्वत्वं, स्वामित्वं वा सम्बन्धः' इत्युपपाद्य शाब्दिकसिद्धान्तानुरोधेन तन्निरस्य च 'द्विष्ठ एव सम्बन्ध' ॥ - स.)**

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।**
**विवततेऽर्थभावेन प्रक्रिया जगतो यतः ।[१]**
**नित्याः शब्दार्थसम्बन्धाः समाम्नाता महर्षिभिः**
**सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः ॥[२]**

शब्दादर्थबोध इति सार्वजनीनोऽनुभवः । आचार्यपतञ्जलिर्महाभाष्ये भगवतः कात्यायनस्य 'सिद्धे शब्दार्थसम्बन्धे'[3] इति वार्तिकं व्याचक्षाणः 'सिद्धे शब्देऽर्थे सम्बन्धे चेति' इत्येवं पदविवेचनं विधाय सिद्धशब्दं नित्यपर्यायत्वेनाङ्गीकृत्य शब्दमर्थं तयोः सम्बन्धं च नित्यत्वेन स्वीचकार । सम्बन्धविषये कैयटा व्याख्याति - सम्बन्धस्यापि व्यावहारपरम्परयाऽनादित्वान्नित्यता । नागेशस्तु शब्दार्थनित्यतां स्वीकृतवान् । आचार्यभर्तृहरेः -

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥[४]**

इति वचनाज्ज्ञायते यल्लोके सर्वोऽपि व्यवहारो न शब्दप्रयोगं विना भवितुमर्हति । जगति यत् किञ्चिद् वस्तु वर्तते तत् कदाचित् स्वसम्बद्धमन्यद् वस्तु ग्राहयति । सा च सम्बद्धता न सम्बन्धं विना भवित्मर्हति । यथा उच्चरितः घटः कम्बग्रीवादिमद् वस्तु ग्राहयति । तेन ज्ञायते यद् घटशब्देन कम्बुग्रीवादिमतो वस्तुनः कश्चित् सम्बन्धो वर्तते तदैव घटः तद्वस्तु ग्राहयति नैव पटवस्तु । अतः सम्बन्धविषये भवत्येव जिज्ञासा सिद्धान्तजिज्ञासूनां मतिमताम् । तस्य सम्बन्धस्य ज्ञानं षष्ठीविभक्त्य-न्तपदेन शाब्दबोधे दृश्यते । स च सम्बन्धः कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिरूपः यथा राज्ञः पुरुषः इत्यत्र राजपुरुषयोः स्वस्वामिभावसम्बन्धः, तस्य सम्बन्धस्य प्रतियोगी राजन्शब्दः तस्मात् षष्ठी शेषे 2/3/50 इति सूत्रेण षष्ठी विभक्तिर्नियम्यते ।

उक्तं च -

**शक्तिगहं व्याकरणापमानकोशाप्तवाक्याद् व्यवहारतश्च ।**
**वाक्यस्य शेषात् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥**[५]

तत्र धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद् भवति । यथा पाचक शब्दस्य पाककर्त्ता इत्यर्थः । तत्र पच् धातोः पाकरूपोऽर्थः 'डुपचष् पाके' इति पाणिनेरनुशासनात् ।

उपमानात् शक्तिग्रहो यथा गोसदृशो गवयः इत्युक्ते गवयशब्दस्य संकेतः आरण्यकपशु-विशेषे कृत इति गवयशब्देन स एव गृह्यते । कोशादपि भवति शक्तिग्रहो यथा 'विष्णुर्नारायणः कृष्णः' इत्यादिपदानां विष्णुरूपेऽर्थे कृतः संकेतः कोशेन । आप्तवाक्यादपि शब्दस्य संकेतो गृह्यते । आप्तस्तु यथार्थविद् भवति । व्यवहारस्तु यथा - घटमानयति । वाक्यशेषात् शक्तिग्रहो यथा यवम-यश्चरुर्भवतीति उक्ते सति यवशब्देन, वाक्यशेषात् दीर्घशूक शक्तिं गृहीत्वा स एव बोध्यते । विवरणात् तत्समानार्थकपदेन यथा घटोऽस्ति इति पदस्य कलशोऽस्तीति अर्थात् घटपदस्य कलशे शक्तिग्रहः । सिद्धपदस्य प्रसिद्धपदस्य सान्निध्यादपि भवति शक्तिग्रहः । यथा 'इह सहकारतरौ मधुरं पिको रौति ।' इत्यत्र प्रसिद्धपदस्य सहकारस्य सान्निध्यात् पिकपदस्य कोकिले शक्तिरित्यवधार्यते । एवमुपर्युक्तरीत्या यत्राथ यस्य पदस्य संकेतो गृहीतो भवति, तदर्थनिरूपिता शक्तिस्तस्मिन् पदे तिष्ठतीति निश्चीयते ।

उपर्युक्तप्रकारेणेदं निश्चितं भवति यत् यस्यार्थस्य बोधिका शक्तिः बोधकः सम्बन्धो वा यस्मिन् पदेऽवतिष्ठते तेन पदेन तस्यैवार्थस्योपस्थितिः बोधश्च जायते । अत एव न येन केनापि पदेन यस्य कस्याप्यर्थस्य बोधः, वृत्त्योपस्थितस्य सम्बद्धस्य चार्थस्य बोधकः शब्द इति नात्र विसंवादः । अस्यां स्थितौ कस्तावत् शब्दार्थयोः सम्बन्ध इति जिज्ञासायामुच्यते पदपदार्थयोः वाच्यवाचकभाव एव सम्बन्धः । एतदवलम्ब्यैव शब्दो वाचकः, अर्थश्च वाच्य इत्युच्यते । तद्ग्राहकश्च इतरेतराध्यासमूलकं तादात्म्यम् । तादात्म्यमेव संकेतः । तादात्म्यञ्च भेदसहिष्णुरभेदः । तद्भिन्नत्वेऽपि तदभेदेन प्रतीयमानत्वमेव तादात्म्यम् । एतदनुसारम् अर्थः शब्दाद् भिन्नाभिन्नोः भवति। योऽर्थो येन शब्देन भिन्नाभिन्नः स एव बोध्यते तेन शब्देन । सर्वेषामर्थानां सर्वैः शब्दैः सह तादात्म्यं नास्तीति न जायते बोधः सर्वैः शब्दैः सर्वेषामर्थानाम् ।

उक्तं च- **सम्बन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः ।**
**श्रुतायामश्रुतायां वा क्रियायामभिधीयते ॥**[६]

अस्यां कारिकायां सम्बन्धः क्रियाकारकभावपूर्वकः कथितः । तत्र हेतुः क्रियाकारकसम्बन्धः शेषसम्बन्धस्तु फलितः । यथा देवदत्तस्य गृहमत्र देवदत्तगृहशब्दौ कर्त्रधिकरणरूपौ स्तः । देवदत्तः गृहे निवसति तदाधारेणोभयोः स्वस्वामिभावस्य भावात् कर्त्रादेः विशेषरूपेण ज्ञानं भवति । भर्तृहरिकारिकायां हि कारकशब्देन करणत्वादिकारकशक्तयः कथ्यन्ते । अत्र श्रवणगोचरा अधिकरणभवनादिक्रिया सम्बन्धरूपकार्यासिद्ध्या अनुमानेन ज्ञाता सती उपस्थिता भवतीति तद्द्वारैव

समन्वयो भवति । सिद्धद्रव्याणां तां विना न परस्वं सम्बन्धो भवितुमर्हति । यतो हि क्रिया नि:श्रयणेव सम्बद्ध्यते । एवं हि सम्बन्धिनौ अनुमीयमानक्रिया निमित्तरूपकारके भवत: ।

राज्ञ: पुरुष इत्यादौ स्वस्वामिभाव: षष्ठयर्थ: स्वत्वस्वामित्वसमूहरूप: अखण्डोपाधि: । ये च स्वत्वं स्वामित्वं वा अत्र षष्ठयर्थसम्बन्धत्वेनाङ्गीकुर्वन्ति, तन्न समीचीनं, स्वत्वस्वामित्वादीनामेकमात्रव्यक्तिवृत्तित्वेन सम्बन्धत्वाभावात् । यतो हि सम्बन्ध: सम्बन्धिभ्यां भिन्न: उभयाश्रितश्च भवति चेदुच्यते एकत्राश्रयतया परत्र निरूपकत्वेन विद्यमानत्वाद भवति द्विष्ठत्वं, तन्न, आधारता वृत्तिनियामकसम्बन्धेन भवति । आचार्यभर्तहरि: कथयति च

**द्विष्ठोऽप्यसौ परार्थत्वाद गुणेषु व्यतिरिच्यते ।**
**तत्राभिधीयमानश्च प्रधानेऽप्युपयुज्यते ॥**[7]

अर्थात् सम्बन्ध: प्रतियोगिनि अनुयोगिनि च यद्यपि विद्यते, तथापि गुणा: परार्था: भवन्ति । ते च विशेषणत्वेन विवक्षिता: विशेष्यं प्रति अन्वियन्ति । सम्बन्धं विना विशेषणत्वेन विवक्षा न सम्भवति । अतो विशेषणविशेष्यभावस्याकाङ्क्षितत्वादत्र सम्बन्ध उद्भूततया प्रतीयते । तदा विशेषणवाचकात् शब्दात् सर्वत्र षष्ठी नियम्यते ।

राज्ञ: इत्यत्र पदान्तरप्रयोगं विनापि विशेषणत्वप्रतीति: कर्तुं शक्यते । राज्ञ: इत्यत्र स्वामित्वं पुरुषे स्वत्वं ज्ञात्वैव भवति । अत: सम्बन्धस्य बहिरङ्गत्वात् पुरुषादन्तरङ्गा प्रथमैव न तु षष्ठी, राजनि च षष्ठ्येव एवं सर्वत्र सम्बन्धस्थले सम्बन्धिनोर्भेदे सम्बन्धिद्वयवृत्तिधर्मसमूहो भवति । ''यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी''[8] इति भाष्ये लिखितमस्ति ।

अत्र भाष्यस्थ 'अधिब्रह्मदत्ते पाञ्चाला:' इति प्रयोगे ब्रह्मदत्ते सप्तम्या पाञ्चालाद् द्वितीया प्राप्नोति । यतो हि अधेर्द्योत्यस्य पाञ्चालनिष्ठसम्बन्धस्य सप्तमीविभक्त्या अभिहितत्वेऽपि तद्द्योत्यस्य पाञ्चालवृत्तिसम्बन्धस्य तया अज्ञानात् । ''उपपदविभक्ते: कारकविभक्तिर्बलीयसी''[9] इति परिभाषया अग्रे भाष्ये समाहितं, तेन ब्रह्मदत्ते सप्तमी सिध्यति ।

इत्थं यत्र विशेष्यपदात् षष्ठी सम्भाव्यते तत्र षष्ठीवारकयुक्त्या समाधानं करणीयम् । अत एव लोकव्यवहारे शास्त्रे च स्वस्वामिभाव: अवयवावयविभाव:, आधाराधेयभाव:, प्रतियोग्यन्- योगिभाव: विशेषणविशेष्यभाव: इत्यादीनां भूयसां सम्बन्धानां व्यवहारो भवति ।

इत्थं च षष्ठ्या: सम्बन्धो, विशेषणत्वमिति चार्थद्वयम् । षष्ठी च विशेषणादेव । तत्रैका जिज्ञासोदेति यत् यथा पित्रा सह पुत्रस्य जन्यजनकभावसम्बन्धो भवति तर्हि उभयो: भ्रात्रोर्मिथ: क: सम्बन्ध: यथा देवदत्तस्य भ्राता इत्यत्र? एतस्मिन् विषये महाभाष्यकार: ''अनेकमन्यपदार्थे''[10] इति सूत्रभाष्ये ।

वस्तुतस्तु 'देवदत्तस्य भ्राता' इत्यत्र 'स्वजनकजन्यत्वभावसम्बन्धोऽत्र' समाश्रयणीय: । यतो ह्यत्र वाक्यार्थबोधानुकूल: सम्बन्ध: कल्पनीय इति भाष्यतात्पर्यम् 'अत्र चेद् युक्त: षष्ठ्यर्थो दृश्यते, इहापि युक्तो दृश्यताम्' इत्युक्त्या ज्ञायते । यतो हि कल्पनापि तादृशी एव भवति यत्र तादृशी योग्यता स्यात् स्वभ्रातरि न कदाचित् अवयवावयविभावसम्बन्धयोग्यता भवति । विकल्पात्मक- ज्ञानविषय:

सम्बन्धोऽपि कश्चित् तादृशो न स्फुटः । एवमेव 'पुरुषस्य चैतन्यम्' इत्यत्र 'आत्मात्मीयभावसम्बन्धोऽङ्गीकरणीयः ।' यतो हि तत्र तादृशी सम्बन्धयोग्यता वर्तते अतस्तत्र तादृशः सम्बन्धः कल्प्यते । अतो देवदत्तस्य भ्राता इत्यत्र पूर्वोक्तसम्बन्ध एव योग्यतां लभते । एवमेव 'अन्नस्य हेतोर्वसति' इत्यत्र हेतुहेतुमद्भावः षष्ठ्यर्थः । हेतुशब्दश्चात्र तात्पर्यग्राहको भवति । कृष्णस्य कृतिरित्यत्र कर्ता, जगतः कर्ता कृष्ण इत्यत्र च कर्म एव षष्ठ्यर्थः । कश्चिदत्र कर्तृकर्मणोः षष्ठ्याः लक्षणेति उक्तवान् । तन्नोचितम् । 'कर्तृकर्मणोः कृति'[11] इत्यादिसूत्राणां शक्तिग्राहकाणां सत्त्वात् । लक्षणायाः कल्पना तत्र नाङ्गीकरणीया भवति ।

आचार्यो गदाधरो व्युत्पत्तिवादे सम्बन्धविषये कथयति यत् 'शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते ।' स च सम्बन्धः क्वचिदभेदः क्वचिच्च तदतिरिक्त एवाधाराधेय-प्रतियोग्यनुयोगिविषयविषयिभावादिसम्बन्धः । अभेदश्च प्रातिपदिकार्थे स्वसमानविभक्तिकेन स्वाव्य-हितपूर्ववर्त्तिना च पदेनोपस्थापितस्यैव संसर्गमर्यादया (आकाङ्क्षया) भासते । यथा - नीलो घटः इति (व्यस्तस्थले), नीलघटमानय इत्यादौ (समस्तस्थले) च । अभेदपदार्थः कः? विषयेऽस्मिन् गदाधरः कथयति 'अभेदस्तादात्म्यम् । तच्च स्ववृत्त्यसाधारणो धर्मः । असाधारण्यं चैकमात्रवृत्ति-त्वम् ।' इत्येवं भेदविशिष्टमेव घटत्वादिसर्वो धर्मो भवति तदन्यत्वं तद्व्यक्तित्वे एव । एवं 'नीलो घट' इत्यादौ स्ववृत्तिनीलत्वादिसम्बन्धेन घटाद्यंशे नीलपदार्थस्यान्वयबोधो भवति । इत्येवं तत्र विषयोऽयं विचारितोऽस्ति ।

शाब्दिकास्तावदभेदस्य कथमपि सम्बन्धत्वं नाङ्गीकुर्वन्ति । कथयन्ति च ते यदि तत्र सम्बन्धत्वं स्यात् तर्हि नीलो घटः इत्यादौ नीलस्याभेदसम्बन्धेन घटेऽन्वये स्वीकारे विशेषणे नीलपदे सम्बन्धप्रतियोगिवाचकात् शब्दात् 'षष्ठी शेषे'[12] इति षष्ठी विधानात् तत्र षष्ठी स्यात् । अतो 'नीलो घट' इति प्रयोगोच्छेदापत्तिः स्यात् । किञ्चाभेदस्य सम्बन्धत्वे[13] 'कृत्तद्धितसमासेभ्यः 1/2/46 सम्बन्धाभिधानम् भावप्रत्ययेन' इति सिद्धान्ताद् 'राजपौरुष्यम् इत्यादौ भावप्रत्ययेन सम्बन्धस्येव उद्घाट्यते ।'

महाकविना कालिदासेन कृतोऽस्यां दिशि संकेतः - वागर्थाविव सम्पृक्ताविति स्वोक्त्या[14] तदुक्तं भूषणकारेण -

**इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा ।**
**अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा ॥**[15]

शब्दानामर्थैः सह वर्ततेऽनादिकालिक एव तादात्म्यमूलको वाच्यवाचकभावसम्बन्ध इति तात्पर्यम् ।

शब्दार्थयोर्मध्ये यः खलु स्वीकृतः सम्बन्धः स तु तयोः सहजः सम्बन्धः, किन्तु कदाचि-दायाति एतादृशी स्थितिर्यदा सहज-सम्बन्धेन कार्यं न चलति । यथोक्तं केनापि 'गङ्गायां घोषः' इति । गंगा तु जलप्रवाहात्मिका तत्र घोषः आभीरपल्ली कथं स्थातुं शक्नुयात्? अस्यां स्थिताविदमेव निर्णीयते यत् नात्र गङ्गाशब्दः स्वकीयं शुद्धार्थं प्रवाहात्मकं बोधयितुमुच्चारितं किन्तु तत्समीपवर्तिनं

तीरं बोधयितुमवोच्चारितम् । किन्तु शब्दस्य सहजसम्बन्धेन तीरार्थस्य बोधस्तु भवितुं नार्हतीति सहजसम्बन्धातिरिक्तो लक्षणात्मकसम्बन्धोऽपि स्वीक्रियते । तदुक्तं भाष्यकारेण तात्स्थ्यात्, तत्सामी-प्यात्, तत्साहचर्यात्, ताद्धर्म्याच्च अतस्मिन् स इत्येतद्भवति । मञ्चस्थबालकेषु मञ्चत्वारोप: तात्स्थ्यात् भवति । तीरे प्रवाहत्वारोप: तत्सामीप्यात् क्रियते । अच्छत्रिषु छत्रित्वारोप: तत् साहचयात् क्रियते । सिंहो माणबक: 'इत्यत्र माणवके सिंहत्वारोप: ताद्धर्म्यात् क्रियते ।'

एतत्सम्बन्धद्वयातिरिक्तो व्यञ्जनानामक: सम्बन्धोऽपि वाच्यलक्ष्यातिरिक्तस्य व्यङ्ग्यार्थस्य बुबोधयिषया स्वीकृतो वर्तते । सा चेयं व्यञ्जना मुख्यार्थबाधग्रहनिरपेक्षबोधजनिका मुख्यार्थसम्बद्धा-सम्बद्धसाधारणप्रसिद्धाप्रसिद्धार्थविषयिका, अत एव निपातानां द्योतकत्वं स्फोटस्य व्यङ्ग्यत्वं च सिद्धं भवतीत्यलं विस्तरेण ।

**सन्दर्भा:**


1. वाक्यपदीयम् 'ब्रह्मकाण्डम्' ।
2. वाक्यपदीयम् 'ब्रह्मकाण्डम्' ।
3. महाभाष्यम् प्रथमं पस्पशाह्निकम्, पृ. सं. 76 ।
4. वाक्यपदीयम् 'ब्रह्मकाण्डम्' ।
5. परमलघुमञ्जूषा ।
6. वाक्यपदीयम् ।
7. वाक्यपदीयम् (तृतीयकाण्डम्) ।
8. व्याकरणमहाभाष्ये पृष्ठ संख्या 106 ।
9. सिद्धान्तकौमुदी 'कारकप्रकरणम्' पृष्ठ संख्या 750 ।
10. अनेकमन्यपदार्थे 2/2/24 पृष्ठ संख्या 76 समासप्रकरणे ।
11. सिद्धान्तकौमुदी कारकप्रकरणे 2/3/65 पृष्ठ संख्या 785 ।
12. सिद्धान्तकौमुदी कारकप्रकरणे 2/2/50 ।
13. लघुसिद्धान्तकौमुदी पृष्ठ संख्या 57 ।
14. रघुवंशमहाकाव्यम्, श्लोक 1 ।
15. वाक्यपदीयम् सारसमुद्देश: (तृतीयकाण्डम्) ।


**सहायकाचार्य: ( व्याकरणविभाग: )**
**राष्ट्रियसंस्कृतसंस्थानम्**
**( मानितविश्वविद्यालय: )**
**क. जे. सोमैयासंस्कृतविद्यापीठम्**
**विद्याविहार:, मुम्बई - ४०००७७**

★★★

# अलङ्काराणामलङ्कारत्वम्

✍डा.स्वर्गकुमारमिश्रः

**( यथा प्रवृत्तिनिमित्ते घटत्वे सत्येव घटः, तथाऽलङ्कारेऽपि तदस्तित्वसिद्ध्येऽलङ्कारत्वमावश्यकम् । तच्चालङ्कारत्वं किमिति परिप्रश्ने शब्दार्थान्यतरनिष्ठविषयतासम्बन्धावच्छिन्नचमत्कृतिजनकतावच्छेदकतया काव्यजीवितभूतत्वमिति प्राञ्चोऽलङ्कारविदः । मम्मटस्तु शब्दार्थरूपाङ्गामिशयाधानपूर्वकाङ्गिरसस्योपकारकधर्मत्वं तदिति प्राह । तथाहि रसाङ्गत्वे सत्येवालङ्काराणामलङ्कारत्वं बोध्यम् । अन्यथा ते वाच्यवाचका प्रोषयन्तो वैचित्र्यमात्रमावहन्ति। क्वचिच्च अलङ्काराणामपि अङ्गित्वं सम्भवतीत्यादि निबन्धेऽत्र सोदाहरणं निरूपितम् । वस्तुतस्तु अलङ्कारो रसस्योत्तेजकः ॥ विद्यमानो हि रसः अलङ्कारसन्निधानात् काव्यज्ञचेतसि सद्य उद्भवति । तथाहि तयोरुद्भाव्योद्भावकभावसम्बन्ध इति मे प्रतिभाति । रसः साध्यः, अलङ्कारश्चतस्य साधनभूतः । यथा चोत्तमे साध्ये लोकप्रवृत्तिः, तथोत्तमसाधनेऽपि प्रवृत्तिरिति कृत्वा तयोर्माहात्म्यं वेदितव्यम् । कदाचित्साधनविरहितत्वेऽपि सति सत्वे यथा सिद्धिः तथाचापि अलङ्काररहितेत्वेऽपि रससिद्धिरिति अवगन्तव्यम् ।।-स. )**

सौन्दर्यमलङ्कारः। अलङ्क्रियतेऽनेनेति करणव्युत्पत्तिनिष्पन्नोऽयमनुप्रासोपमादिबोधकोऽलङ्कारशब्दो भूषणार्थकः काव्यशोभाधायकस्तत्त्वविशेषः "काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते" इत्यादिना प्राप्तपर्याप्तगौरवः प्राचीनैः भामहवामनोद्भट्टादिभिः बहुचर्चितो भारतीयसाहित्यशास्त्रमलङ्कारशास्त्रनाम्ना व्यपदिश्यन् वरीवर्त्ति । किञ्च "न कान्तमपि निर्भूषं विभाति वनितानन" मित्यादिना महत्त्वमस्य सुप्रतिपादितमाचार्यैः।

यथा शरीरे अवयवानाश्रित्य कटककुण्डलादयोऽलङ्काराः शोभाविशेषं जनयन्ति तथा वाच्यवाचकरचनाप्रपञ्चे काव्यशरीरे शब्दार्थावाश्रित्य विलसन्तोऽनुप्रासोपमादयोऽलङ्काराः काव्यशोभां वर्द्धयन्ति ।

केषाञ्चन पूर्वाचार्याणां मते इमे अलङ्काराः शब्दार्थान्यतरनिष्ठविषयतासम्बन्धावच्छिन्नचमत्कृतिजनकतावच्छेदकतया काव्यजीवितभूताः, अतस्तान् विना काव्यस्य काव्यत्वमपि नास्तीति परिचर्चितं परम्परायाम् ।

स्थितेऽपि एवं विचारे वाग्देवतावतारो मम्मटाचार्यः "अनलङ्कृती पुनः क्वापी"[1]ति काव्यलक्षणप्रसङ्गे निर्वक्ति ।

पुनः अलङ्कारप्रतिपादनावसरे अष्टमोल्लासे काव्यप्रकाशे कथयति–

**"उपकुर्वन्ति तं सन्तं ये ङ्गद्वारेण जातुचित् ।**
**हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ॥"**[२] इति

एतन्मते अङ्गिनो रसस्याङ्गभूतौ शब्दार्थौ तद्द्वारेण तदतिशयाधानमुखेन ये धर्मा रसमुपकुर्वन्ति तेऽलङ्काराः । सन्तमिति यत्र रससम्भवः तत्र रसं, यत्र तु तस्यासम्भवस्तत्र उक्तिवैचित्र्यमात्र पर्यवसायिनो यथा लोके शरीरस्य शोभाधायकाः इमे अलङ्काराः कण्ठाद्यङ्गोत्कर्षद्वारेण शरीरिणोऽपि सौन्दर्यं क्वचिद्वर्धयन्ति । एते अनियतलक्षणाः यथा क्वचित्किमपि कर्त्तुमक्षमाः दृश्यन्ते पुनः क्वचित् शरीरशोभां च नाशयन्ति तथा काव्ये अनुप्रासोपमादीनां स्थितिः ।

एतेन काव्ये अलङ्काराणां वैचित्र्याधायकत्वं न सार्वत्रिकमिति प्रतिष्ठते ।

एवमेवालङ्काराणां चलस्थितिकत्वं द्योतितम् । तथा चालङ्काराणां रसोपकारकत्वे सति तदवृत्तित्वं, तथात्वे सति रसव्यभिचारित्वं, अनियमेन रसोपकारकत्वं चेति लक्षणघटकत्रयं वेदितव्यं-भवति । तेनैतषामलङ्काराणामलङ्कारत्वं कुत्र प्रतिष्ठितमिति स्वतः प्रश्नः समभ्युदेति ।

परमार्थविचारे "काव्यार्थो रस उच्यते" । काव्ये अलङ्काराणां तदनुगुणा एव स्थितिः । यदि अलङ्कारकृतवैचित्र्यं काव्यार्थं न रञ्जयति तर्हि तस्य कथमलङ्कारता? रसहीने वा वाक्ये वैचित्र्यमात्राधायकेऽपि कस्यालङ्कारत्वम् ?

पुनः काव्येषूत्तमोत्तमं ध्वनिकाव्यं तत्रापि चालक्ष्यक्रमव्यङ्ग्यं रसभावादिमयम् । तेषु अलङ्काराणामलङ्कारत्वे समुचितविनियोगप्रकारः एव साधीयान् इति कृत्वा ध्वन्यालोककारेणाचार्यानन्दवर्धनेनोक्तम् –

**"रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत् ।**
**अपृथग्यत्ननिर्वर्त्यः सोऽलङ्कारः ध्वनौ मतः ॥"**[३] इति

निष्पत्तावाश्चर्यभूतोऽपि रसाक्षिप्ततया यस्यालङ्कारस्य बन्धः शक्यक्रियो भवेत्सोऽस्मिन्नलक्ष्यक्रमव्यङ्ग्ये ध्वनावलङ्कार इति । तथाहि अङ्गिनो शृङ्गारस्य स्थिता अपि अनुप्रासयमकाः अलङ्कारपदवाच्या न भवन्ति । अनुप्रासस्य एकरूपानुबन्धत्वं यमकस्य बुद्धिपूर्वनिर्वाहत्वं यत्नान्तरपरिग्रहत्वञ्च दोषाय एव भवति ।[4]

सत्यपि रसे अनुप्रासस्य शब्दालङ्कारस्य तदनुपकारकत्वं यथा–

**"चित्ते विघटते न त्रुट्यति सा गुणेषु**
**शय्यासु लुठति विसर्पति दिङ्मुखेषु ।**
**वचने वर्त्तते प्रवर्त्तते काव्यबन्धे**
**ध्यानेन त्रुट्यति चिरं तरुणीप्रगल्भा ।"**[५] इति

अत्र टवर्गानुप्रासेन शब्दालङ्कारेण शब्दमात्रमलङ्क्रियते सन्नपि न विप्रलम्भशृङ्गारः ।

अर्थालङ्कारस्यापि तथात्वं दृश्यते । तद्यथा–

**"मित्रे क्वापि गते सरोरुहवने बद्धानने ताम्यति**
**क्रन्दत्सु भ्रमरेषु वीक्ष्य दयितासन्नं पुरः सारसम् ।**

**चक्राह्वेन वियोगिना विसलता नास्वादिता नोज्झिता**
**कण्ठे केवलमर्गलेव निहिता जीवस्य निर्गच्छतः ॥"**[६] इति

अत्रार्गलेवेत्युपमालङ्कारः । स चार्थमेवोपकरोति न तु सन्तमपि रसम् । अत्र विसलता न जीवं रोद्धुं क्षमा इति प्रकृताननुगुणोपमा । जीवनिर्गमनिरोधकार्गलाया अप्रसिद्ध्या नोपमात्वम् । उत्प्रेक्षात्वेऽपि तथा ।

एवञ्च दुष्करशब्दभङ्गश्लेषचित्रादीनां क्लिष्टत्वं रसापकषणाय भवति । किन्तु अलङ्कारान्तराणि निरूप्यमाणदुर्घटनान्यपि रससमाहितचेतसः प्रतिभावतः कवेरहं पूर्विकया परापतन्ति । यतो हि रसा वाच्यविशेषैरेवाक्षेप्तव्याः । तत्प्रतिपादकैश्च शब्दैस्तत्प्रकाशिनो वाच्यविशेषा एव रूपकादयोऽलङ्काराः । तस्मान्न तेषां बहिरङ्गत्वं रसाभिव्यक्तौ । यत्तु रसवन्ति कानिचिद्यमकादीनि-दृश्यन्तेतत्ररसादीनामङ्गता यमकादीनां त्वङ्गितैव ॥ रसाङ्गत्वे एवालङ्काराणामलङ्कारत्वात् ।

तदुक्तं तेन संग्रहश्लोके – **"रसवन्ति हि वस्तूनि सालङ्काराणि कानिचित् ।**
**एकेनैव प्रयत्नेन निर्वर्त्यन्ते महाकवेः ॥**
**यमकादिनिबन्धे तु पृथग्यत्नोऽस्य जायत ।**
**शक्तस्यापि रसेऽङ्गत्वं तस्मादेषां न विद्यते ॥**
**रसाभावाङ्गभावास्तु यमकादेर्न वार्यते ।**
**ध्वन्यात्मभूते शृङ्गारे त्वङ्गता नोपपद्यते ॥"**[७] इति

एवं प्रवर्त्तिते अलङ्कारत्वविचारे रसाङ्गत्वे एवालङ्काराणामलङ्कारत्वम् । अन्यथते सर्वे वाच्यवाचकं पोषयन्तः वैचित्र्यमात्रमावहन्तीति । अत उच्यते–

**"ध्वन्यात्मभूते शृङ्गारे समीक्ष्य विनिवेशितः।**
**रूपकादिरलङ्कारवर्ग एति यथार्थताम् ॥"**[८] इति

एवमलङ्काराणां विनिवेशने समीक्षां कुर्वन् आह–

**"विवक्षातत्परत्वेन नाङ्गित्वे न कदाचन ।**
**काले च ग्रहणत्यागौ नातिनिर्वहणैषिता ॥**
**निर्व्यूढावपि चाङ्गत्वे यत्नेन प्रत्यवेक्षणम्**
**रूपकादिरलङ्कारवर्गस्याङ्गत्वसाधनम् ॥"**[९] इति

विवक्षातत्परत्वेनेति रसबन्धेष्वत्यादृतमनाकविरलङ्कारं तदङ्गतया निबध्नाति । तद्यथा–

**"चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं**
**रहस्याख्यायीव स्वनसि मृदुकर्णान्तिकचरः।**
**करौ व्याधुन्वत्या पिबसि रतिसर्वस्वमधरं**
**वयं तत्त्वान्वेषान्मधुकरहतास्त्वं खलु कृती ॥"**[१०] इति

अत्र रसानुगुणत्वेन भ्रमरस्वभावोक्तिरलङ्कारो विवक्षितः ।

कदाचिद्रसादितात्पर्येण विवक्षितोऽपि अङ्गित्वेन प्रतिपद्यते । अतः नाङ्गित्वेन कदाचन ।

अङ्गीत्वप्राप्तोऽलङ्कारो यथा–

**"चक्राभिघातप्रसभाज्ञयैव चकार यो राहुबधूजनस्य ।**
**आलिङ्गनोद्दामविलासवन्ध्यं रतोत्सवं चुम्बनमात्रशेषम्"**[११] इति

अत्र रसादितात्पर्ये सत्यपि पर्यायोक्तस्य अङ्गित्वविवक्षा । तथा न कर्त्तव्यमिति शेषः ।

अङ्गत्वेन विवक्षितमपि यमवसरे गृहणाति नानवसरे । अवसरे गृहीतिर्यथा–

**"उद्दामोत्कलिकां विपाण्डुररुचं प्रारब्धजृम्भां क्षणा–**
**दायासं श्वसनोद्गमैरविरलैरातन्वतीमात्मनः।**
**अद्याद्यानलतामिमां समदनां नारीमिवान्यां ध्रुवं**
**पश्यन् कोप विपाटलद्युतिमुखं देव्याः करिष्याम्यहम्"**[१२] इति ।

अत्र अवसरे एवोपमाश्लेषस्य ग्रहणम्।

पुनः गृहीतमपि अवसरे त्यागो वरं यथा–

**"रक्तस्त्वं नवपल्लवैरहमपि श्लाघ्यैः प्रियायाः गुणै–**
**स्त्वामायान्ति शिलीमुखाः स्मरधनुर्मुक्ताः सख मामपि ।**
**कान्तापादतलाहतिस्तवमुदे तद्वन्ममाप्यावयोः**
**सर्वं तुल्यमशोककेवलमहं धात्रा सशोकः कृतः ॥"**[१३] इति

अत्र प्रवृत्तोऽपि श्लेषः व्यतिरेकविवक्षया त्यक्तः रसविशेषं पुष्णाति ।

तथाचालङ्काराणां नातिनिर्वहणं यथा–

**"कोपात्कोमललोलबाहुलतिकापाशेन बद्ध्वा दृढं**
**नीत्वा वासनिकेतनं दयितया सायं सखीनां पुरः।**
**भूयो नैवमितिस्खलत्कलगिरा संसूच्य दुश्चेष्टितं**
**धन्यो हन्यत एव निह्नुतिपरः प्रेयान् रुदत्याहसन् ॥"**[१४] इति

अत्र अनिर्व्यूढो रूपकालङ्कारः ।

एवञ्च निर्वोढुमिष्टमपि यत्नात् अङ्गत्वेन प्रत्यवेक्षितो रसपुष्टये भवति । तद्यथा–

**"श्यामास्वङ्गं चकितहरिणीप्रेक्षणे दष्टिपातं**
**गण्डच्छायां शशिनि शिखिनां बर्हभारेषु केशान् ।**
**उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्**
**हन्तैकस्थं क्वचिदपि न ते भीरु सादृश्यमस्ति ॥"**[१५] इति

अत्र ह्युत्प्रेक्षायास्तद् भावाध्यारोपरूपाया अनुप्राणकं सादृश्यं यथोपक्रान्तं तथा निर्वाहितमपि विप्रलम्भरसपोषकमेव जातम् ॥

एवमेव रसाक्षिप्तः अलङ्कारः अलङ्कारत्वं भजते । अन्यथा तु वैचित्र्यमात्रमिति दिक् ॥

**सन्दर्भाः -**


1. काव्यप्रकाशे प्रथमोल्लासः ।
2. काव्यप्रकाशे/२/अष्टमोल्लासः ।
3. ध्वन्यालोके/१७/द्वितीय उद्योतः ।
4. शृङ्गारस्याङ्गिनो यत्नादेकरूपानुबन्धवान् ।
सर्वेष्वेव प्रभेदेषु नानुप्रासः प्रकाशकः ॥
ध्वन्यात्मभूते शृङ्गारे यमकादिनिबन्धनम् ।
शक्तावपि प्रमादित्वं विप्रलम्भे विशेषतः ॥ ध्वन्यालोके/१५,१६/द्वितीय उद्योतः
5. काव्यप्रकाशे अष्टमोल्लासः ।
6. तत्रैव ।
7. ध्वन्यालोके/१७/द्वितीय उद्योतः ।
8. ध्वन्यालोके/द्वितीय उद्योतः ।
9. तत्रैव ।
10. तत्रैव ।
11. तत्रैव ।
12. तत्रैव ।
13. तत्रैव ।
14. तत्रैव ।
15. तत्रैव ।


**संविदाध्यापकः ( साहित्यविभागः )**
**राष्ट्रियसंस्कृतसंस्थानम्,**
**क.जे.सोमैया संस्कृतविद्यापीठम्,**
**विद्याविहारः, मुम्बई-७७**

★★★

# संयुक्त राष्ट्रसंघ में हिन्दी की स्थिति का मूल्यांकन

✍डॉ. गीता दुबे

**( हिन्दी शब्द का सम्बन्ध संस्कृत शब्द सिन्धु से माना जाता है । यह सिन्धु शब्द ईरानी में हिन्दू और हिन्द से हुआ है जिसका अर्थ हुआ सिन्ध प्रदेश । हिन्द में ईरानी का ईक् प्रत्यय लगने से हिन्दीम शब्द बना है । हिन्दी हिन्दीम का परिवर्तित रूप है । ४ सितम्बर १९४९ को भारत के संविधान में हिन्दी को राजभाषा का दर्जा दिया गया है । डॉ. गीता दूबे ने हिन्दी भाषा के विस्तार पर विचार किया है और आशा व्यक्त की है कि एक दिन हिन्दी संयुक्त राष्ट्रसंघ की अधिकृत भाषा बनेगी ॥ - स. )**

संयुक्त राष्ट्रसंघ एक अन्तर्राष्ट्रीय संगठन है यह विश्व की सर्वोच्च संस्था है । संयुक्त राष्ट्र की स्थापना 24 अक्टूबर 1945 को संयुक्त राष्ट्र अधिकार पत्र पर 50 देशों के हस्ताक्षर होने के साथ हुई । इसके उद्देश्य में उल्लेख है कि यह अन्तर्राष्ट्रीय कानून को सुविधाजनक बनाने के सहयोग, सुरक्षा, आर्थिक विकास, सामाजिक प्रगति, मानव अधिकार और विश्व की शांति के लिए कार्यरत है । द्वितीय विश्वयुद्ध के विजेता देशां ने मिलकर संयुक्त राष्ट्र को अन्तर्राष्ट्रीय संघर्ष में हस्तक्षेप करने के उद्देश्य से स्थापित किया था । वर्तमान में संयुक्त राष्ट्र ने छह भाषाओं (अरबी, चीनी, अंग्रेजी, फ्रासीसी, रूसी और स्पेनी) को राजभाषा स्वीकृत किया है । किन्तु इनमें से केवल दो भाषाओं (अंग्रेजी और फ्रांसीसी) को संचालन भाषा माना जाता है । स्थापना के समय केवल चार राजभाषाएँ स्वीकृत की गयी थी और सन् 1973 ई. में अरबी और स्पेनी को भी सम्मिलित किया गया ।

कुछ विद्वान् मानते हैं संयुक्त राष्ट्र में राजभाषाओं की संख्या बढ़ाना चाहिए, जिसमें कई लोगों की मान्यता है कि हिन्दी को भी संयुक्त राष्ट्र संघ की अधिकारिक भाषा बनाया जाना चाहिए । संयुक्त राष्ट्र संघ में हिन्दी विमर्श का माध्यम बने, उसकी उपयोगिता इसी दृष्टि से है । ऐसा होने पर हिन्दी स्वत: ही वैश्विक भाषा बन जाएगी । संयुक्त राष्ट्र में किसी भाषा को आधिकारिक भाषा के रूप में मान्यता देने के लिए कोई विशेष मानदंड नहीं है । किसी भाषा को सम्मिलित किए जाने की प्रक्रिया में संयुक्त राष्ट्र महासभा में साधारण बहुमत द्वारा एक संकल्प को स्वीकार करना और संयुक्त राष्ट्र की कुल सदस्यता के दो तिहाई बहुमत द्वारा उसे अंतिम रूप से परित करना होता है ।

हिन्दी संयुक्त राष्ट्रसंघ की आधिकारिक भाषाओं में शामिल हो, भारत लम्बे समय (40 वर्ष) से प्रयासरत रहा है । भारत का यह दावा इस आधार पर है कि हिन्दी विश्व में बोली जानेवाली दूसरी सबसे बडी भाषा है और विश्व भाषा के रूप में स्थापित हो चुकी है । भारत का यह दावा इस अर्थ में मजबूत है कि आज का भारत विश्व का सबसे बडा लोकतंत्र होने के साथ साथ चुनी हुई आर्थिक शक्तियों में भी सम्मिलित हो चुका है । सूचना प्राद्योगिकी और तकनीकी क्रान्ति ने विश्व ग्राम (ग्लोबल विलेज) के स्वप्न को यथार्थ बना दिया है ।

हम जानते हैं कि 10 जनवरी 1975 ई. को नागपुर में आयोजित प्रथम विश्व हिन्दी सम्मेलन के अध्यक्ष पद से मॉरिशस के तत्कालीन प्रधान मंत्री सर शिवसागर रामगुलाम ने हिन्दी के अन्तर्राष्ट्रीय महत्व को प्रतिपादित किया था और यह सुझाव दिया था कि हिन्दी को संयुक्त राष्ट्रसंघ की आधिकारिक भाषा बनाया जाए ।

उस समारोह में वर्धा में विश्व हिन्दी विद्यापीठ की स्थापना का निर्णय लिया गया । फलस्वरूप वर्धा में महात्मा गांधी अन्तर्राष्ट्रीय विश्वविद्यालय प्रगति पर है ।

संयुक्त राष्ट्र की आधिकारिक भाषाओं की जब आज की स्थिति पर विचार करते हैं तो निकर्ष पाते हैं कि अंग्रेजी संयुक्त संघ के दो स्थायी सदस्यों (इंग्लैण्ड, संयुक्त राज्य अमेरिका) की शासकीय भाषा है । साथ ही कनाडा एवं अफ्रीका की भी राजभाषा है । फ्रेंच भाषा फ्रांस के साथ ही अन्य कई देशों में प्रयुक्त होती ह । अरबी भाषा भी पश्चिमी एशिया एवं उत्तरी अफ्रीका के लगभग दो दर्जन देशों की भाषा है । इसी प्रकार स्पैनिश स्पेन के अतिरिक्त एक्कीस देशों की आधिकारिक भाषा है । इसी क्रम में मंदारिन (चीनी) चीन, ताइवान और सिंगापुर की प्रमुख भाषा है । इसी क्रम में अन्तिम भाषा रूसी रूस एवं सोवियत संघ के 15 देशों की भाषा है । जब हम इन भाषाओं की कसौटी पर हिन्दी को कसते है तो यह पाते हैं कि हिन्दी आज न केवल विश्व की सर्वाधिक बोली जाने वाली भाषा है बल्कि वह भारत, नेपाल, पाकिस्तान, बांग्लादेश, भूटान फिजी, मॉरिशस, सूरीनाम, ट्रिनिडाड, टोबैको, मालदीव, श्रीलंका, जापान, चीन, कनाडा, खाड़ी के देशों, यूरोपीय देशों, दक्षिण अफ्रीका एवं संयुक्त राज्य अमेरिका आदि देशों में अच्छे से प्रयुक्त हो रही है । हिन्दी का संयुक्त राष्ट्र की अधिकारिक भाषा न होना विश्व के लिए सोचने को बात है । समय की मांग है कि हिन्दी को संयुक्त राष्ट्र की आधिकारिक भाषा बनाया जाए । हमारी वर्तमान सरकार इस लक्ष्य को पूरा करने में समर्थ है । विश्व के जिन राष्ट्रों ने विकास किया है भाषा के बल पर ही किया है ।

सन् 1975 ई. में आयोजित प्रथम विश्व हिन्दी सम्मेलन में प्रख्यात साहित्यकार काका कालेकर ने पूरे विश्वास के साथ प्रस्तावित किया कि – 'संयुक्त राष्ट्र संघ में हिन्दी को मान्यता मिलने से विश्व शोषण रहित, शांतिपूर्ण और संघर्ष रहित समाज रचना के अधिक समीप पहुँच सकेगा । हिन्दी के मूल प्रेरणा, त्याग और सेवा है । इसलिए यह कोई आश्चर्य की बात नहीं कि हिन्दी विश्व सेवा के लिए उपस्थित है ।' उस समय पर वहाँ उपस्थित सभी प्रतिभागी प्रतिनिधयों

ने उनके कथन का समर्थन किया था । दूसरा विश्व हिन्दी सम्मेलन अगस्त सन् 1976 मॉरिशस में हुआ । इस सम्मेलन में भी हिन्दी को संयुक्त राष्ट्रसंघ में अधिकारिक भाषा के रूप में स्थान देने की चर्चा हुई । तोसरा विश्व हिन्दी सम्मेलन 28-30 अक्तूबर, 1983 नई दिल्ली भारत में हुआ । चौथा सम्मेलन 2-4 दिसम्बर, 1993 को मॉरिशस में हुआ । पाँचवा सम्मेलन 4-8 अप्रैल, 1996 को पोर्ट ऑफ स्पेन, ट्रिनिडांड और टोवैगों में हुआ । छठा सम्मेलन 14-18 दिसम्बर, 1999 लंदन में डुआ । सातवाँ सम्मेलन 6-9 जून, 2003 पारामारिवों, सूरीनाम में हुआ । आंठवा सम्मेलन 13-16 जुलाई, 2007 न्यूयार्क, यू. एस्. ए. में हुआ । नवां सम्मेलन 22-24 दिसम्बर, 2012 ई. जोहानसबर्ग दक्षिण अफ्रीका में एवं दसवां सम्मेलन 10-12 दिसम्बर, 2015 भोपाल भारत में आयोजित हुआ । भोपाल में हुए विश्व हिन्दी सम्मेलन के एक सत्र का शीर्षक विदेशी नीतियां में हिन्दी पर समर्पित था जिसमें हिन्दी कों संयुक्त राष्ट्र की आधिकारिक भाषा में से एक भाषा के रूप में पहचान दिलाने की सिफारिश की गई थी । 11 वाँ विश्व हिन्दी सम्मेलन 18-20 अगस्त, 2018 को मॉरिशस में आयोजित किया गया । इस सम्मेलन में पूर्व प्रधानमंत्री अटल बिहारी वाजपेयी को श्रद्धांजलि दी गई । 12 वाँ विश्व हिन्दी सम्मेलन न्यूयार्क में 2021 में होगा । ग्यारहवे हिन्दी सम्मेलन की थीम थी - विश्वहिन्दी और भारतीय संस्कृति । हिन्दी को वैश्विक भाषा का दर्जा देने की मांग की गई । 2008 में मॉरिशस में भो विश्व हिन्दी सचिवालय खोला गया था । प्राय: सभी सम्मलेनों में हिन्दी को संयुक्त राष्ट्र संघ में एक आधिकारिक भाषा के रूप में सम्मिलित करने की बात कही गई ।

संयुक्त राष्ट्र अपने कार्यक्रमों का संयुक्त राष्ट्र रेडियो वेबसाईट पर हिन्दी भाषा में भी प्रसारण करता है । समय समय पर भारतीय नेताओं ने यू. एन्. में हिन्दी में वक्तव्य दिए है । जिनमें 1977 ई. में अटल बिहारी वाजपेयी का हिन्दी में भाषण चर्चित है । प्रधानमंत्री पी. वी. नरसिंह राव. ने भी संयुक्त राष्ट्र संघ में हिन्दी में वक्तव्य दिया था । सितम्बर 2014 में 69 वीं संयुक्त राष्ट्र महासभा में प्रधानमंत्री नरेन्द्र मोदी ने भी हिन्दी में सम्बोधित किया । इसके साथ ही वे देश-विदेश में सर्वत्र ही हिन्दी का प्रयोग कर एक उदाहरण प्रस्तुत किया है । अक्तूबर 2015 में विदेश मंत्री सुषमा स्वराज द्वारा 70 वीं संयुक्त राष्ट्र महासभा को हिन्दी में सम्बोधन एवं सितम्बर 2016 में 71 वीं संयुक्त राष्ट्र महासभा को विदेश मंत्री द्वारा हिन्दी सम्बोधन शामिल है । 2018 में 73 वीं संयुक्त राष्ट्र महासभा में विदेश मंत्री ने हिन्दी में भाषण प्रस्तुत किया और उसमें सुधार करने की बात कहीं ।

यह तथ्य विचारणीय है कि, विगत तीन दशकों में हिन्दी की बहुविध उन्नति हुई है । वह ज्ञान विज्ञान का माध्यम बनने के लिए अग्रसर है उसके बोलनेवालों प्रयोक्ताओं की संख्या में वृद्धि हुई है । सन् 1991 ई. के बाद जन्म लेने वाले बच्चे किसी न किसी रूप में हिन्दी बाल सकते हैं भले ही हिन्दी उनकी पहली, दूसरी, तोसरी, चौथी आदि भाषा क्यों न हो । यही कारण है कि सन् 1975 ई. में जो हिन्दी बोलने वालों की दृष्टि से विश्व में तीसरे स्थान पर थो वहीं

सन् 2001 में दूसरे स्थान पर आ गयी । डॉ. जयन्ती प्रसाद नौटियाल ने 'भाषा शोध अध्ययन' 2012 के हवाले से यह सिद्ध कर दिया है कि हिन्दी बोलने वालों की संख्या के आधार पर प्रथम स्थान पर आ गयी है एवं मन्दारिन् (चीनी) दूसरे स्थान पर है । भारत के बाहर लगभग 150 विश्वविद्यालयों में हिन्दी का अध्ययन अध्यापन हो रहा है । विदेशों में 25 से अधिक पत्र-पत्रिकाएँ हिन्दी में निकल रही है । आज हिन्दी का प्रयोग हर क्षेत्र में हो रहा है । हिन्दी चैनलां की संख्या बढ रही है । व्यापार स्पर्धा के कारण अंग्रेजी चैनलों का हिन्दी मं रूपान्तरण हो रहा है । दिसम्बर, 2016 में 'विश्व आर्थिक मंच' ने सर्वाधिक शक्तिशाली भाषाओं की जो सूची जारी की है उसमें हिन्दी भी एक है । वर्ष 2017 को सीखने योग्य सर्वाधिक 9 भाषाओं में हिन्दी को स्थान दिया है । वेब, विज्ञापन, संगीत, सिनेमा एवं बाजार आदि क्षेत्रों में हिन्दी की मांग तेजी से बढ रही है । यू. ए. ई. के 'हम एफ.-एम.' सहित अनेक देश हिन्दी कार्यक्रम प्रसारित कर रहे हैं, जिनमं बी. बी. सी., जमंनी के डॉयचे वेले, जापान के एन. एच. वे वर्ल्ड और चीन के चाइना रेडियों इन्टरनैशनल की हिन्दी सेवा उल्लेखनीय है । संयुक्त राष्टरेडियों ने अपना प्रसारण हिन्दी में करना आरम्भ किया है । हिन्दी को संयुक्त राष्ट्र संघ की भाषा बनायें जाने के लिए भारत सरकार प्रयत्नशील है । अत: कहा जा सकता है कि वर्तमान वैश्विक परिवेश में हिन्दी को संयुक्त राष्ट्रसंघ की आधिकारिक भाषा बनाए जाने के सर्वथा अनुकूल है । आठवें विश्व हिन्दी सम्मेलन के प्रथम सत्र में डॉ. रत्नाकर पाण्डेय ने एक महत्त्वपूणं बात कही थी कि अब जबकि हम लोग संयुक्त राष्ट्र के सभाभवन में आज हिन्दी बोल रहे हैं, हिन्दी संयुक्त राष्ट्र की भाषा तो बन ही गयी । संयुक्त राष्ट्र संघ ने 22 जुलाई, 2018 से साप्ताहिक आधार पर हिन्दी समाचार बुलेटिन का प्रसारण शुरू किया है । समाचार एजेन्सी पी.टी. आई के मुताबिक विदेशमंत्री श्रीमती सुषमा स्वराज ने स्वयं यह जानकारी दी है । यह भी बताया गया कि हिन्दी को संयुक्त राष्ट्रकी अधिकृत भाषा का दर्जा दिलाने की कोशिशें लगातार की जा रही है । संयुक्त राष्ट्र संघ द्वारा प्रसारित हिन्दी बुलेटिन 10 मिनट का है इसकी जिम्मेदारी एवं खर्च भारत सरकार उठा रही है । उन्होंने यह भी बताया है कि फिलहाल विश्व के 191 राष्ट्र संयुक्त राष्ट्र महासत्ता के सदस्य है और भारत सरकार को पूर्ण बहुमत प्राप्त करने के लिए 128 राष्ट्रों का समर्थन प्राप्त करना जरूरी है । आशा है हिन्दी शीघ्र ही संयुक्त राष्ट्र संघ अधिकाधिक भाषा बनेगी ।

।। इति ।।

**सन्दर्भग्रन्थ**


1. हिन्दी का प्रवासी साहित्य - डॉ. कमल किशोर गोयनका ।
2. हिन्दी का विश्व सन्दर्भ - डॉ. करूणा शंकर उपाध्याय ।
3. राजभाषा भारती में प्रकाशित शोधपत्र - डॉ. जयन्ती प्रसाद नौटियाल ।
4. मनोरमा इयर बुक - 2000 ।

5. मधुमती - 2003 ।
6. अन्तर्जाल ।
7. हिन्दी साहित्य का इतिहास - डॉ. नगेन्द्र ।

**संविदाध्यापिका (हिन्दी विभाग)**
**राष्ट्रिय संस्कृत संस्थान,**
**क. जे. सोमैया संस्कृत विद्यापीठ,**
**विद्याविहार, मुम्बई-७७**

★★★

# Colonial Alienation in NgugiwaThiong'o's Decolonising the Mind

✍Dr.Shweta Sood

**( 'Decolonising the Mind' is an African novel by Kenyan novelist and the post colonial theorist Ngugiwa Thiong. The book stands for the Ngugi theory of language in which language exists as culture and cultural is means of communication. Thiong, in this book of four essays on language debate and post colonial studies, has narrated how British colonial rule In Africa alienated people from their own language and culture. The author of this paper, Dr. Sood has made a brief study of the biographical volume of the Kenyan author. - Ed. )**

**ABSTRACT**

Colonialism, according to Ngugi, has distorted African realties by projecting the peoples of this continent as primitive and backward whereas Africa has largely contributed in terms of natural and human resources to the enrichment and development of Europe and America.The colonial system had its own pyramid of racial discrimination with a broad primary base, a narrowing secondary middle and an even narrower university apex.Colonial rule in Kenya, according to Ngugi, alienated people from their own culture and environment. And he blames the imposition of English for this. After a state of emergency was imposed in 1952 English became the medium of education in all Kenyan schools and proficiency in the language preceded the study of local languages, nature and environment. This pushed the Kenyan languages and culture into the background and led to alienation of the people from their roots. This is what Ngugi means by "colonial alienation."

**Colonial Alienation in NgugiwaThiong'o's *Decolonising the Mind***

A novelist, dramatist, short story writer, essayist and critic, NgugiwaThiong'o was born on January 5, 1938 at Limuru in Kiambu District, Kenya to a family of small peasants. At the local Gikuyu school where he studied, Ngugi became an avid reader of English literature, Shakespeare and Dickens being his favourites. He experienced the effects of colonialism as Kenya was under British rule (1895-1963) at that time. His first novel, *Weep Not, Child* (1964) was about the Mau Mau War and East African culture. Subsequently he wrote his works in his mother tongue Gikuyu and translated

them into English. He has been described as the most significant exponent of East African culture and "a novelist of the people." He left Kenya in 1992 and has been living in the United States since then.

The book offers a distinctive study of anti-imperialist perspective on the "continuing debate...about the destiny of Africa" and language's role in both combatting and perpetrating imperialism and the conditions of neocolonialism in Africa. *Decolonising the Mind* is a blend of autobiography, post-colonial theory, pedagogy, African history, and literary criticism. Ngugi dedicated *Decolonising the Mind* "to all those who write in African languages, and to all those who over the years have maintained the dignity of the literature, culture, philosophy, and other treasures carried by African languages."

In *Decolonising the Mind*, Ngugi talks of his upbringing, schooling and the emphasis that was placed on the teaching of English in preference to his native language Gikuyu. In the evenings the children would gather round the fireside and grown-ups would tell them stories, which they would share the next day with their co-workers in the fields owned by the European and African landlords. The stories were fables in Gikuyu about the birds and animals they could easily identify with; they were about struggles against the forces of nature and taught the children lessons in cooperation and fellow-feeling in a hostile world. Stories about human beings taught them such qualities as courage, kindness, mercy, hatred of evil and concern for others as opposed to such negative traits as greed, selfishness, duplicity and working against the interests of the community.

The British colonised Kenya in 1895 but they did not interfere with the system of education till 1952 when a state of emergency was declared in the country. All the local schools were taken over by District Education Boards run by Englishmen. From then onwards, English became the language of formal education. It became the only medium of instruction in Kenyan schools and all the other languages were relegated to a second place. Proficiency in reading, writing and speaking in English became the touchstone of a student's intelligence even though he was not familiar with his own language and culture. This presented a distorted view of the African reality to the outside world. The status accorded to the English language and literature led to the neglect of the African languages and cultures. Students who were caught speaking in Gikuyu in the vicinity of school were punished with three to five strokes of cane on their bare buttocks or were made to carry a metal plate around their necks with inscriptions such as I AM STUPID OR I AM A DONKEY. The teachers caught the culprits through their informers from among the students themselves. These informers were given special benefits to identify the culprits and spy against the fellow students during, before and after school. As against this the ability to communicate in English was highly

rewarded. It was a measure of a student's intelligence and proficiency in the disciplines of learning. English became the main determinant of a child's progress up the ladder of formal education.

The colonial system had its own pyramid of racial discrimination with a broad primary base, a narrowing secondary middle and an even narrower university apex. A student could cover these stages only if he knew English and could write and speak it fluently. No student could pass the Kenya African primary examination unless he had passed in English, no matter how good or competent he was in other subjects. Ngugi remembers a boy in his class who had distinctions in all subjects but failed in English. He ended up as a bus conductor whereas the author, who had only pass marks in other subjects but a credit in English, was sent to Alliance High School, one of the most elitist institutions for Africans in colonial Kenya. Thus English was the magical password to colonial elitedom.

As a result, oral literature in Kenyan languages was discontinued and authors in English became Ngugi's daily companions in the world of his imagination. Instead of fables about birds and animals, he now read Shaw, Rider Haggard, John Buchan, Alan Paton, Chaucer, T.S. Eliot and Graham Greene and many others. Literature took him farther from his roots – from his own world to other worlds.

Brought up on the stories of fables in Gikuyu languages in his early years, Ngugi felt in harmony with his culture and environment. But the imposition of English as the medium of instruction and the emphasis placed on the language to the exclusion of native languages destroyed the African students' harmony with their culture and environment. It also presented a distorted view of African reality to the outside world. When Ngugi started writing in his native language Gikuyu in 1977, he saw the shift as part of the anti-imperialist struggle as he wanted to present the real picture of his culture and environment. He firmly believes that Africa has contributed greatly in terms of natural and human resources to the development and enrichment of Europe and America, yet it is looked down upon by the so called civilised world. The continued use of English as a medium of communication has turned the African reality upside down. So if Africans write and communicate in their own languages and project their cultures in the proper perspective to the outside world it would go a long way in correcting the distorted view that is projected about their cultures and environment. Thus the adoption of his native tongue for creative writing is "part and parcel of the anti-imperialist struggles of Kenyan and African peoples" (Boehmer 12).

He advocates for African writers to reconnect with their "revolutionary traditions" of anti-imperialism in Africa.

I believe that my writing in Gikuyu language, a Kenyan language, an African language, is part and parcel of the anti-imperialist struggles of Kenyan and

African peoples... I want (Kenyans) to transcend colonial alienation... We African writers are bound by our calling to do for our languages what Spencer, Milton and Shakespeare did for English; what Pushkin and Tolstoy did for Russian; indeed what all writers in world history have done for their languages by meeting the challenge of creating a literature in them, which process later opens the languages for philosophy, science, technology and all other areas of human creative endeavors.

— *Decolonising the Mind (28)*

Ngugi started writing in his own language Gikuyu in 1977 after seventeen years of involvement in Afro-European literature because he wanted to go back to his roots, and he wrote his best works after that. These included a play *I Will Marry When I Want,* a musical drama, and three books for children and his acclaimed novels. He has been often asked why he has started writing in Gikuyu in preference to English. He has been accused of abandoning a world language like English as if he has done something abnormal in switching over to his own language. Ngugi is of the view that writing in Gikuyu, a Kenyan language and African language, is part and parcel of the anti-imperialist struggles of the Kenyan and African peoples. Why should their own native languages and cultures be always associated with something negative and backward? Why should they be symbols of underdevelopment and punishment? Why should the Africans be humiliated and looked down upon for writing in their own languages and projecting their own cultures? Ngugi does not want to see the Kenyan children growing up in the imperialistic imposed tradition of contempt for their own language and cultures. They must transcend this colonial alienation, learn and communicate in their native tongues. This will bring them closer to reality.

Central to *Decolonising the Mind* is Ngugi's "theory of language", in which "language exists as culture" and "language exists as communication":

Language as communication and as culture are then products of each other. Communication creates culture: culture is a means of communication. Language carries culture, and culture carries, particularly through orature and literature, the entire body of values by which we come to perceive ourselves and our place in the world. How people perceive themselves and affects how they look at their culture, at their places politics and at the social production of wealth, at their entire relationship to nature and to other beings. Language is thus inseparable from ourselves as a community of human beings with a specific form and character, a specific history, a specific relationship to the world

— *Decolonising the Mind (16)*

Ngugi's objective is to contribute towards the restoration of harmony in all the aspects and divisions of language so as to restore the Kenyan child to his environment. This will enable the child to understand it fully so that he is

able to change it for his collective good. He would like to see all the native language of Kenya produce a literature that would carry not only the rhythms of a child's expression but also his struggle with society and nature. This will bring him in harmony with himself and his environment, as also enable him to understand and appreciate other people's literatures and cultures better. Once a child is familiar with the all-Kenya national language (Kiswahili) and the languages of other nationalities, he will be able to understand the nuances of such languages as English, French, German, Chinese, Japanese, Portuguese and Spanish. For developing a proper perspective, it is essential that a child must first be conversant with his own language and culture. This is the rationale behind Ngugi writing in Gikuyu.

Colonial rule in Kenya, according to Ngugi, alienated people from their own culture and environment. And he blames the imposition of English for this. After a state of emergency was imposed in 1952 English became the medium of education in all Kenyan schools and proficiency in the language preceded the study of local languages, nature and environment. This pushed the Kenyan languages and culture into the background and led to alienation of the people from their roots. This is what Ngugi means by "colonial alienation."

To sum up, colonialism, according to Ngugi, has distorted African realties by projecting the peoples of this continent as primitive and backward whereas Africa has largely contributed in terms of natural and human resources to the enrichment and development of Europe and America. Yet Africa is made to feel grateful for the scanty aid it receives from the developed world. One way to correct the distorted view of Africa is to project the realities in African languages and portray their rich culture to the outside world by men of letters belonging to the continent. This explains why from 1977 onwards, Ngugi has started writing in his native tongue Gikuyu. This is part and parcel of the anti-imperialist struggle of his people to rationalise the upside down way of looking at Africa.

**Works Cited**

1. Abrams, M.H. A Glossary of Literary Terms. Australia: Thomson, 2005. Print.
2. Boehmer, Elleke. Colonial and Post-colonial Literature. London: OUP, 1995. Print.
3. Brown, D. A. Maughn. "Decolonising the Mind by Ngugiwa Thiong'o". The International Journal of African Historical Studies. **20** (4): 726–8. 1987. Print.
4. Cook, David. NgugiwaThiong'o: An Exploration of His Writings. Oxford: James Currey Ltd., 1997. Print.
5. Frye, Northrop. Anatomy of Criticism: Four Essays. New Jersey: Princeton University Press, 1957. Print.

6. GayatriSpivak. "NgugiwaThiong'o: In Praise of a Friend". In Oliver Lovesey. Approaches to Teaching the Works of NgugiwaThiong'o. New York: The Modern Language Association of America, 2012. Print.
7. Gikandi, Simon. NgugiwaThiong'o. Cambridge: Cambridge University Press, 2000. Print.
8. Guerin,Wilfred L., et al. A Handbook of Critical Approaches to Literature. New York: Oxford University Press, 2005. Print.
9. Lovesey, Oliver. Approaches to Teaching the Works of NgugiwaThiong'o. New York: The Modern Language Association of America,2012. Print.
10. Sicherman, Carol. NgugiwaThiong'o: The Making a Rebel. London: Hans Zell Publishers, 1990. Print.
11. Thiong'oNgugiWa. Decolonising the Mind: The Politics of Language in African Literature. Nairobi: Heinemann, 1986. Print.

**Contract Teacher**
**Department of English**
**K.J.Somaiya Sanskrit Vidyapeetham**
**Vidyavihar, Mumbai-77**
**Phone:9967786364/8356906245**
**Email: shwetasood1937@gmail.com**

★★★

# वर्तमान परिदृश्य में भारत-नेपाल सम्बन्ध

**✍डॉ. रंजय कुमार सिंह**

**(लेखक राजनीतिविज्ञान का शिक्षक है । लेखक ने भारत-नेपाल के बीच विदेशनीति के वर्तमान पहलुओं पर चिन्तन करते हुए अपने शोधपत्र के माध्यम से वर्तमान समय में भारत-नेपाल तनाव और समस्या का समाधान पर विचार को प्रकट करने की कोशिश की है ॥ - स.)**

भारत-नेपाल सम्बन्ध प्राचीन काल से ही सांस्कृतिक, धार्मिक, भौगोलिक आर्थिक क्षेत्रों में अत्यन्त प्रगाढ़ रहे हैं । अत: स्वतन्त्र भारत और नेपाल के मध्य सम्बन्धों की घनिष्ठता अपरिहार्य है । विश्व राजनीतिक घटनाक्रम को प्रभावित करनेवाले निर्णायक तत्त्वों के आधार पर हम भारत-नेपाल सम्बन्धों को प्रभावित करनेवाले भौगोलिक, ऐतिहासिक, सांस्कृतिक, आर्थिक एवं राजनीतिक तत्त्वों की संक्षिप्त प्रारम्भिक विवेचना कर सकते है ।

ब्रिटीश काल में नेपाल आंतरिक मामलों में पूरी तरह स्वतंत्र था । लेकिन उसकी विदेशनीति में ब्रिटीश सरकार का प्रभाव था । जब भारत स्वतन्त्र हुआ तो दोनों देशों ने अपने विशेष सम्बन्धों को रेखांकित करने के लिए दोनो देशों ने 1950 में भारत-नेपाल शांति और मित्रता संधि पर हस्ताक्षर किए थे । भारत और नेपाल के बीच इस संधि द्वारा ही 'विशेष सम्बन्धों' की स्थापना की गई है । भारत तथा नेपाल एकमात्र ऐसे देश है, जिनके बीच उक्त संधी द्वारा खुली सीमा का सिद्धान्त लागू किया गया है । खुली सीमा से तात्पर्य दोनों देशों के नागरिकों के आवागमन में कोई रोक-टोक नहीं होगो । भारत-नेपाल के बीच खुली सीमा 1850 किलोमीटर लम्बी है तथा यह भारत के पाँच राज्यों सिक्किम, पश्चिम बंगाल, बिहार, उत्तरप्रदेश तथा उत्तराखण्ड को छूती है । खुली सीमा का तश्करों, उग्रवादियों, आतंकवादियों तथा अन्य असामाजिक तत्त्वों द्वारा दुरूपयोग भी किया जा रहा है । फिर भी खुली सीमा भारत-नेपाल के विशेष सम्बन्धों को रेखांकित करती है । इस सन्धि के द्वारा ही नेपाल के नागरिकों को भारत में भारतीय नागरिकों के समान कई सुविधाएँ व अधिकार प्राप्त है ।

वर्तमान समय में नेपाल के कतिपय राजनीतिक दलों द्वारा इस आधार पर इस संधि का विरोध किया जा रहा है कि यह व्यवस्था नेपाल की स्वतन्त्र विदेश नीति व संप्रभुता के विरुद्ध है । भारत इस संधि में संशोधन हेतु तैयार है । लेकिन नेपाल को इस सन्धि के समाप्त होते ही उसे भारत द्वारा प्राप्त प्रदत्त विशेष सुविधाएँ भी समाप्त हो जाएगी ।

विगत 2015 में नेपाल में नया संविधान लागू होने के बाद से भारत तथा नेपाल के बीच तनाव पैदा हो गया । सीमा पर चीन का नेपाल में बढता प्रभाव भी भारत के लिए चिन्ता का विषय है । नेपाल का नया संविधान 20 सितम्बर, 1915 को लागू हुआ, किन्तु नए संविधान में नेपाल के तराई क्षेत्र में रहने वाले मधेशी समुदाय के लोगों को अलग प्रान्त का दर्जा नहीं दिया गया था तथा नागरिकता के मामले में भेदभाव किया गया था । परिमाणस्वरूप तराई क्षेत्र में सितम्बर–अक्तूबर 2015 में व्यापक हिंसक आन्दोलन तथा तराई क्षेत्र में नाकेबन्दी कर दी गई । नेपाल के नेताओं ने भारत सरकार से विचार विमर्श किए विना नया संविधान लागू कर दिया । नए संविधान में मधेशियों की न्याय संगत मांगो को स्थान नहीं दिया गया । मधेश यानी नेपाल की पहाडियों और बिहार–उत्तरप्रदेश के मैदान के बीच पडनेवाला तराई का क्षेत्र या मध्य देश है। सिर्फ 50 किमी. चौडी इस पट्टी में नेपाल की आधी आबादी बसती है । नेपाल का सबसे पिछडा, गरीब और उपेक्षित क्षेत्र है मधेश । नेपाल की सत्ता पहाडी, ब्राह्मण, क्षत्रिय और नेवाडी लोगों के हाथ रही है । जबकि मधेश में भारतीय मूल के मैथिल, भोजपुरी और अवधि बोलनेवाले पिछडे और दलित समाज का प्रभुत्व है । नेपाल के सत्ता पर बैठे नेताओं ने मधेशियों के साथ भेदभाव किया । नए संविधान में पहाडी नेताओं ने जनसंख्या के तर्क की उपेक्षा करते हुए संसद में अपने बहुमत को सुनिश्चित कर लिया । फलत, मधेशी नेताओं ने आर–पार की लडाई छेड दी । नेपाल सरकार ने मधेशी आन्दोलन का दमन किया और मानवाधिकारों का खुले तौर से उल्लंघन किया । इस पर मधेशियों ने ब्रह्मास्त्र का प्रयोग करते हुए भारत–नेपाल सीमा बन्द कर दिया । इस तनाव पूर्ण वातावरण को देखते हुए भारत सरकार को मधेशियों के साथ खडा होना पडा । पुरे नेपाल में पेट्रोल, गैस और दवाइयों का संकट हो गया । सदियों पुराने सम्बन्धों पर विपरीत प्रभाव पडता दिखाई देने लगा ।

इस तनाव पूर्ण वातावरण का लाभ उठाकर चीन ने नेपाल के साथ सामान की आपूर्ति तथा यातायात का समझौता किया तथा दोनों देशों (नेपाल–चीन) के बीच घनिष्ठता बढने लगी । यह बात भारत के लिए चिन्ताजनक हो गई । भारत ने अन्तराष्ट्रिय पटल पर प्रथम वार संयुक्त राष्ट्र मानवाधिकार में 5 नवम्बर, 2015 को भारत–नेपाल में बढती हिंसा राजनीतिक अस्थिरता और बढते भेदभाव की शिकायत की । भारत ने नेपाल सरकार से आग्रह और दबाव बनाया कि वह हिंसा के मामलों की जांच करे और दुबारा ऐसी घटनाएँ न हों ये सुनिश्चित करें ।

नेपाल के नए प्रधानमंत्री के. पी. शर्मा ओली 6–8 अप्रैल, 2018 को भारत की राजकीय यात्रा पर आए । ओली अघोषित परम्परा का निर्वहन किया कि नेपाल के नए प्रधानमंत्री अपनी पहली विदेश यात्रा भारत की ही करते है । किन्तु परम्परा का एक बार निर्वहन नहीं हुआ था, जब 2008 में तत्कालीन माओवादी पार्टी के प्रधानमंत्री पुष्पकमल दहल 'प्रचण्ड' ने भारत आने से पहले पहली विदेश यात्रा चीन की थी । किन्तु ओली की यात्रा वर्ष 2015 से चल रहें तनावों के प्रबन्धन की दृष्टि से महत्वपूर्ण है, निम्न रूप से –

1. नेपाल के प्रधानमंत्री के. पी. शर्मा ओली तथा भारत के प्रधानमन्त्री नरेन्द्र मोदी ने दोनों देशों के बहुमुखी सम्बन्धों की समीक्षा की । दोनों देशों ने समानता, आपसी विश्वास, सम्मान और लाभ के आधार पर द्विपक्षीय सम्बन्धों को नई ऊंचाईयों तक पहुँचाने के लिए मिलकर काम करने का निश्चय किया ।
2. दोनों प्रधानमन्त्रियों ने साझा ऐतिहासिक और सांस्कृतिक सम्पर्को और लोगों के आपसी सम्बन्धों के मजबूत आधार पर निर्मित भारत और नेपाल के द्विपक्षीय सम्बन्धों को मजबूत करने में नियमित उच्च स्तरीय राजनीतिक आदान-प्रदान के मार्गों को महत्त्व दिया ।
3. ओली ने कहा कि उनकी सरकार भारत के साथ मैत्रीपूर्ण सम्बन्धों को उच्च पाथमिकता देती है । मोदी ने कहा कि 'सबका साथ सबका विकास' का भारतीय दृष्टिकोण, समावेशी विकास और समृद्धि के साझा लक्ष्य के लिए अपने पडोसियों के साथ भारत की सम्बद्धता का एक मार्गदर्शक ढांचा प्रस्तुत करता है ।
4. दोनों प्रधानमंत्रियों ने नेपाल में बीरगंज में एकीकृत चेकपोस्ट तथा मोतीहारी में मोतीहारीअमलेखगंज पेट्रोलियम उत्पादों की सीमा पार पाइपलाइन का शिलान्यास किया ।
5. दोनो देशों ने नेपाल में द्विपक्षीय परियोजनाओं के शीघ्र कार्यान्वयन हेतु मौजूदा द्विपक्षीय तंत्र को पुनर्जीवित करने पर बल दिया ।
6. पारस्परिक हित के प्रमुख क्षेत्रों मे सहयोग हेतु निम्नलिखित तीन संकल्प जारी किए गए-

अ) दोनों देशों ने भारत के सीतावर्ती शहर रक्सौल को नेपाल में काठमाण्डू से जोडने के लिए भारत को वित्तीय सहायता के साथ एक नई विद्युतीकृत रेल लाईन बनाने के लिए सहमति व्यक्त की । यह भी तय हुआ कि जयनगर से जनकपुर, कुर्था और जोगबनी से विराटनगर कस्टम यार्ड तक रेल्वे लाईनों का विस्तार 2018 में पूरा हो जाएगा । प्रथम चरण के अन्तर्गत चल रही रेल सम्पर्क परियोजनाओं के बाकी हिस्सों जयनगर-बिजलपुरा-बदरीबास और जोगबनी विराटनगर में इस काम को प्राथमिकता के आधार पर पूरा किया जाएगा । रेल सम्पर्क परियोजनाओं के द्वितीय चरण के अन्तर्गत शेष तीन सम्पर्को न्यूजलपाईगुडी-काकरभीटा, नौतनवाभैरहवा और नेपालगंज रोड-नेपालगंज को कार्यान्वित करने के महत्त्व पर बल दिया गया ।

ब) अन्तर्देशीय जलमार्ग के माध्यम से भारत और नेपाल के बीच नया सम्पर्क - ओली और मोदी ने नेपाल को समुद्र तक एक अतिरिक्त पहुँच प्रदान करने के लिए अन्तर्देशीय जलमार्गों का विकास करने का ऐतिहासिक निर्णय लिया । यह नई पहल कार्गो की लागत प्रभावी और कुशल आवाजाही को सक्षम करेगी । नेपाल के प्रधानमन्त्री ने कहा कि इस अतिरिक्त सम्पर्क मार्ग से नेपाल के व्यापार और अर्थव्यवस्था के विकास पर अच्छा प्रभाव पडेगा । इसके लिए पारगमन संधि में शीर्घ बदलाव लिया जाएगा ।

स) कृषी में भारत नेपाल के बीच नई भागीदारी – कृषी और सम्बद्ध क्षेत्रों के महत्व को ध्यान में रखते हुए दोनों देशों ने किसानों, उपभोक्ताओं, वैज्ञानिक समुदाय और निजी क्षेत्र के पारस्परिक लाभ के लिए कृषिविज्ञान और प्रोद्योगिकी, कृषि उत्पादन और कृषि प्रसंस्करण के क्षेत्र में सहयोग को बढावा देने पर बल दिया । दोनो देशों ने कृषि में एक नई भागीदारी में कृषि अनुसन्धान एवं विकास करने जलवायु लचीनापन, बीज प्रौद्योगिकी में शोध, ज्ञान व अनुभव का आदान-प्रदान किया जाएगा । भारत ने नेपाल में जैविक खेती और मृदा स्वास्थ्य निगरानी पर एक प्रायोगिक परियोजना के कार्यान्वयन की घोषणा की ।

**प्रधानमंत्री नरेन्द्र मोदी भारत-नेपाल –**

प्रधानमंत्री नरेन्द्र मोदी सन् 2014 से लेकर वर्तमान समय तक तीन बार नेपाल की यात्रा कर चुके है । मई 2014 में भारत ने अपनी 'पडोस पहले' की नीति का आगाज किया तथा अगस्त 2014 में ही मोदी ने नेपाल की सरकारी यात्रा की । इसके बाद नवम्बर, 2014 में ही दक्षेस शिखर सम्मेलन में भाग लेने के लिए प्रधानमंत्री मोदी ने काठमाण्डू की यात्रा सम्पन्न की । तीसरी बार मोदी ने 11-12 मई, 2018 को फिर नेपाल की यात्रा की । इस तीसरी यात्रा को महत्त्वपूर्ण माना गया क्योंकि अप्रैल, 2018 में ही नेपाल के प्रधानमन्त्री ओली भारत यात्रा पर प्रधानमन्त्री नरेन्द्र मोदी के साथ कई महत्वपूर्ण विकास के मुद्दों पर संकल्प पत्र जारी किया था। मई 2018 के यात्रा के दौरान् मोदी ने अपनी यात्रा की शुरूआत नेपाल के जनकपुर से की जहाँ 11 मई को नेपाल के प्रधानमंत्री ओली ने उनकी अगुवानो की । दोनो नेताओं ने उसी दिन जनकपुर से अयोध्या बस सेवा का उद्घाटन किया । इस घटना का ऐतिहासिक महत्व है । अयोध्या निवासी भगवान राम की पत्नी नेपाल के जनकपुर की निवासी थी । यह भारत व नेपाल के पुराने व घनिष्ठ सम्बन्धों का प्रतीक है । इस अवसर पर मोदी ने कहा कि नेपाल के बिना राम व भारत दोनों अधूरे है । यह घटना दोनों देशों क बीच सकारात्मक सद्भावना की दृष्टि से अत्यन्त महत्त्वपूर्ण है । प्रधानमंत्री मोदी ने काठमाण्डू के पास मुक्तिनाथ मन्दिर जाकर हिन्दुओं तथा बौद्धों के बीच संगम का कार्य किया क्योंकि दोनों धर्मों (हिन्दू-बौद्ध) के लिए पवित्र धार्मिक स्थल है । दोनों प्रधानमंत्रियों ने संयुक्त रूप से वक्तव्य जारी किया जो दोनों के सहयोग के भविष्य को दिग्दर्शित करता है । जो निम्न है –

1. दोनो नेताओं ने कहा कि नेपाल के प्रधानमंत्री ओली की अप्रैल, 2018 में भारत यात्रा के दौरान सम्बन्ध में जो गति आई है उसे बनाए रखा जाएगा ।
2. दोनो देश इस बात पर सहमत हुए कि सम्बन्धों की निरन्तर समीक्षा तथा विसा कार्यक्रमों के शीघ्र क्रियान्वयन के लिए विचार-विमर्श मंचों को और गति प्रदान करेंगे ।

3. दोनो प्रधानमंत्रियों ने सहयोगात्मक कार्यक्रमों को मजबूत बनाकर तथा सामाजिक-आर्थिक विकास के लिए साझीदारी का विस्तार कर अपने बहुआयामी द्विपक्षीय सम्बन्धों को नई ऊंचाई तक ले जाएंगे । यह साझेदार समानता आपसी विश्वास सम्मान तथा आपसी लाभ के सिद्धान्तों पर आधारित होगी ।
4. दोनो प्रधानमंत्रियों ने द्विपक्षीय व्यापार तथा आर्थिक सम्बन्धों के महत्व को रेखांकित किया । भारत के साथ नेपाल के व्यापार घाटे के समाधान के लिए भारतीय प्रधानमंत्री ने भारतीय बाजार में नेपाली वस्तुओं की पहुँच को सुविधाजनक बनाने पर बल दिया ।
5. आर्थिक विकास में सम्पर्कता के महत्व को रेखांकित करते हुए दोनों नेताओं ने भारत-नेपाल के बीच जल, वायू तथा थल मार्ग से भौतिक संसाधन को और मजबूत करने पर बल दिया ।
6. दोनो प्रधानमंत्रियों ने जल संसाधनों के क्षेत्र में सहयोग को और अधिक बढानें पर बल दिया । दोनों ने 100 मेगावॅट की अरुण-111 जलविद्युत परियोजना की आधारशिला रखी । यह परियोजना पूर्वी नेपाल में स्थित है तथा भारत के सहयोग से संचालित होगी ।
7. दोनों नेताओं ने अपने-अपने सम्बन्धित अधिकारिओं को निर्देशित किया कि वे सितम्बर, 2018 तक सहयोग के लिए चिह्नित सभी कार्यक्रमों की गतिविधियों को तेज करें ।
8. दोनों नेताओं ने चिह्नित क्षेत्रों में सारभूत सहयोग क लिए क्षेत्रीय तथा उपक्षेत्रीय सहयोग के विभिन्न मंचों जैसे विम्सटेक, दक्षेस, भूटान-बांग्लादेश-भारत-नेपाल सहयोग के मुद्दों पर विचार-विमर्श करने पर बल दिया गया ।

**निष्कर्ष** -

भारत-नेपाल के बीच ऐतिहासिक, सामाजिक, सांस्कृतिक तथा धार्मिक रिश्ते है । दोनों के बोच 1950 की मित्रता व सहयोग सन्धि द्वारा खुली सीमा को लागू किया गया है तथा एक दूसरे के नागरिकों को दोनो देशों में आने-जाने की विशेष सुविधा प्रदान की गई है । सन् 200 तक नेपाल विश्व का एकमात्र देश था जिसका राज्यधर्म हिन्दू धर्म था नेपाल के नए संविधान में पंथनिरपेक्ष गणतन्त्र की अवधारणा को अपनाया गया है । वर्तमान में भारत-नेपाल का सबसे बडा निवेशक तथा व्यापारिक साझीदार देश है । नेपाल के कुल व्यापार में भारत की 64 प्रतिशत है । इतना ही नहीं, नेपाल एक भू-आवेशित देश है तथा उसका सारा अन्तर्राष्ट्रीय व्यापार भारत से होकर गुजरता है । इसके लिए भारत ने नेपाल में भारत द्वारा 425 छोटे-छोटे कार्यक्रम संचालित है । हाल के वर्षों में नेपाल की राजनीतिक अस्थिरता तथा नेपाली राजनीति में माओवादिओं का उदय मधेशी समस्या, नेपाल में बढती भारत विरोधी भावनाएँ तथा चीन के बढते घनिष्ठ सम्बन्धों के बीच तनाव उभरता रहा है । भारत नेपाल में चीन के बढते प्रभाव के कारण सदैव अपनी सुरक्षा को लेकर चिन्तित रहा है । वास्तविकता यह है कि नेपाल में चीन का बढता प्रभाव भारत व नेपाल के बीच तनाव का कारण व परिणाम दोनो है । नेपाल के शासक भी समय-समय पर

भारत के विरूद्ध चाइना कार्ड का प्रयोग करते रहे है । सन् 2015 में मधेशी आन्दोलन के बाद नेपाल चीन एक पारगमन सन्धि पर हस्ताक्षर किए है । वर्तमान में चीन नेपाल में कई विकास व यातायात विकसित करने की योजनाएँ संचालित कर रहा है जो भारत के लिए चिन्ता का विषय है । अप्रैल 2018 में नेपाल के प्रधानमंत्री ओली की भारतयात्रा के द्वारा दोनों देशों भारत-नेपाल यात्रा के द्वारा उक्त तनावों को दूर कर तथा उनका प्रभावी प्रबन्धन कर दोनों देशों के बीच ऐतिहासिक घनिष्ठ तथा बहुआयामी सम्बन्धों को पुन: नई दिशा तथा ऊर्जा देने का प्रयास किया गया है । इन दोनों यात्राओं से इस दिशा में सफलता भी मिली है । भारत ने अब द्विपक्षीय विकास कार्यक्रमों को लागू करने में अपने सकारात्मक भूमिका परिचय दिया है । जो भारत-नेपाल के लिए मील का पत्थर साबित होगा ।

**सन्दर्भग्रन्थसूची**


1. राम राहुल, मार्डन नेपाल, 1985, पृष्ठ - 1 ।
2. श्रीकृष्ण, अन् इजी पासर्स, 1975, पृष्ठ - 1 ।
3. द पालिटिक्स ऑफ नेपाल - 1970, पृष्ठ - 4 ।
4. Kee Sings Comtemporary Archive, 16&23] August 1974.
5. The Hindu (Madrs), 1950 .
6. R. K. Sinha "Nepal and India - Friends and Strangers" The Nepali Council of World affairs, (Kathmandu), 12th June, 1968, P. 3.
7. पी. डी. कौशिक, भारत की विदेश नीति (वाराणसी), पृष्ठ - 150-151 ।
8. यू. आर्. घई 'भारतीय विदेश नीति', जालन्धर, 2002, पृष्ठ - 421 ।
9. डॉ. पुष्पेशपंत एवं श्रीपल जैन 'अन्तर्राष्ट्रीय सम्बन्ध' मेरठ - 2000, पृष्ठ - 483 ।
10. प्र. दर्पण, जुलाई - 2018, पृष्ठ - 70 ।
11. प्रो. नवीन मिश्र - भारत नेपाल सम्बन्ध, पृष्ठ - 1-5 ।



**संविदाध्यापक ( राजनीतिक विज्ञान )**

**राष्ट्रिय संस्कृत संस्थान,**

**क.जे.सोमैया संस्कृत विद्यापीठ,**

**विद्याविहार, मुम्बई-७७**


★★★

# प्रातिपदिकार्थविचारः

डॉ. नवीनकुमारमिश्रः

**( निबन्धेऽत्र ससूत्रपदत्वप्रतिपादनम्, प्रातिपदिकत्वनिरूपणम्, प्रातिपदिकार्थलि-ङ्गसूत्रविवचेनम्, ततश्चशब्दसहितषट्प्रातिपदिकार्थनिदर्शनं कृतमस्ति । पद-म्पदम्प्रति इति विग्रहे प्रतिपदम्, तदर्हतीति प्रातिपदिकम्, तस्यार्थः प्रातिपदिका-र्थः इति विवरणानुसारं लेखकेन पदस्य, प्रातिपदिकस्य, तदर्थस्य च निरूपणं व्यधायि । वस्तुतस्तु पञ्चदशनामार्थाः । तथा च 'जात्याकृतिव्यक्तयः पदार्थः' इति सिद्धान्तानुसारं जातिः व्यक्तिः, तयोः सम्बन्धः समवायः, लिङ्गं पुंस्त्वादि तद्वृत्तिधर्मः पुंस्त्वत्वादिः, तत्सम्बन्धः स्वरूपाख्यः, संख्या एकत्वादिः, तदधर्मः एकत्वत्वादिः, तत्सम्बन्धः तादात्म्यं समवायो वा, कारकं कर्मादि, तद्धर्मः कर्मत्वादिः तत्सम्बन्धः स्वरूपम् शब्दो घटादिः तद्धर्मः घटशब्दत्वादिः तत्स-म्बन्धस्तादात्म्यम् इति । तथापि प्रधानप्रातिपदिकार्थनिरूपणमेवात्र लेखकस्या-भीष्टं बोध्यम् ॥ - स. )**

**पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम् ।**
**सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन ॥**

पाणिनीयव्याकरणं लौकिकवैदिकोभयविधशब्दसाधुत्वबोधकं भवति । तत्र केषां शब्दानां, लौकिकानां वैदिकानाञ्च उभयविधत्वं स्वीकृतवान् शंकासमाधानोत्तरम् । तेन सह तयोः उभयोः उदाहरणानि प्रादर्शयत् । अश्वः, हस्ती, पुरुषो, मृगः, वृद्धः, नदी इत्यादयः लोकप्रसिद्धाः अद्रुहत, देवासः, जयते, वय ँ इत्यादयः वेदप्रसिद्धाः केचन तूभयत्र सिद्धाः । सर्वेषां साधुशब्दानामन्वा-ख्यानम् उपदेशनम् आचार्येण व्याकरणेऽस्मिन् कृतम् । शब्दानां साधुत्वं पदे भवति । अतः 'अपदं न प्रयुञ्जीत' अर्थात् पदमेव प्रयोक्तव्यम् इत्यर्थलाभः । तत्र किन्नाम पदमिति शङ्कायां कथ्यते आचार्यपाणिनिना 'सुप्तिङन्तं पदम्' नः क्ये, सिति च, स्वादिष्वसर्वनामस्थाने इत्यादीनि चत्वारि सूत्राणि पदसंज्ञाविधायकानि सन्ति । पदलक्षणे दर्पणकाराः वाक्यैकदेशे वर्णाः पदं प्रयोगार्हान-' न्वितैकार्थबोधकाः । लोके पदं नाम श्लोकांशः चरणम् पादुका वेति ।

सुप्तिङिति प्रत्याहारगहणम् । सुबन्तं तिङन्तं च शब्दस्वरूपं पदसंज्ञं भवति । प्रत्ययग्रहणे तदन्तग्रहणमिति न्यायबलात् तदन्तलाभः । ब्राह्मणाः, बालिका, देवाः हसन्ति, पाचकाः पचन्ति । पदसंज्ञायामन्तग्रहणमन्यत्र तु संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधेः प्रतिषेधो विद्यते । यथा गौरी ब्राह्मणितरा । पदाधिकारः 'पदस्य' इति सूत्रानुसारम् ।

नः क्ये इति क्यच्क्यङ्क्यषां त्रयाणां सामान्यग्रहणं वर्तते । नान्तं शब्दरूपं क्ये परतः पदसंज्ञं भवति । क्यच् - राजीयति । क्यङ् - राजायते । क्यष् वर्मायति वर्मायते । सिद्धे सत्यारभ्यमाणो

नियमार्थः । नकारान्तमेव क्ये प्रत्यये परे पदसंज्ञं भवति नान्यत् । वाच्यति । स्रुच्यति इत्यादौ तु नानेन सूत्रेण पदसंज्ञालाभः ।

सिति प्रत्यये परतः पूर्वं पदसंज्ञं भवति । 'भवतष्ठक्छसौ –' भवदीयः । ऊर्णाया युस् – ऊर्णायुः । छन्दसि घस् – ऋत्वियः ।

स्वादिष्विति सुशब्दादेकवचनात् पारभ्य उरः प्रभृतिभ्यः कबिति सूत्रं यावत् प्रत्यया गृह्यन्ते । स्वादिषु प्रत्ययेषु परतः सर्वनामस्थानवर्जितेषु पूर्वं पदसंज्ञं भवति । राजभ्याम् राजभिः, राजत्वम्, राजतरः राजतमः । आदिपदेन कप्प्रत्ययपर्यन्ताः प्रत्ययाः लभन्ते ।

कोषानुसारन्तु – अचन्तः पदशब्दः व्यवसाये, त्राणे, स्थाने, श्लोकांशे, चिह्ने, वस्तुनि च

न्यायमते – अर्थबोधशक्तिविशिष्टे वृतिमत्त्वं पदत्वम् । तत्र ममाभिप्रायः पदं नाम नित्यशब्दसम्बन्धेन सम्मिलितार्थः शब्दः । पुण्यजनकत्वं पदत्वम् । तत्र हि –

**धात्वादीनां विशुद्धानां लौकिकाऽर्थो न विद्यते ।**
**कृत्तद्धितानामर्थश्च केवलानामलौकिकः ॥**

प्रातिपदिकसंज्ञासन्दर्भे आचार्यपाणिनिः वदति – 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति प्रातिपदिकसंज्ञाविधायकसूत्रम् । अर्थोऽस्यास्तीत्यर्थवत् । अर्थशब्दो हि प्रयोजनवचनोऽप्यस्ति । अनेन प्रयोजनेन अर्थेन गम्यते । निवृत्तिविषये मशकार्थो धूम इति, मशकनिवृत्यर्थः गम्यते । धनवचने अर्थवान् यज्ञदत्तः धनवानिति । अभिधेये तात्पर्येऽपि गम्यते । धनवचने अर्थवान् यज्ञदत्तः धनवानि-ति । अभिधेये तात्पर्येऽपि गम्यते अर्थशब्दः । अभिधेयं हि जातिगुणक्रियाद्रव्यभेदेन चतुर्विधम् । तत्र चतुष्टयी शब्दानां प्रवृत्तिर्भवति । जातिशब्दाना जातिरभिधेया – गौरिति अर्थवतः प्रातिपदिकसंज्ञा वि-धीयते । गुणशब्देन – शुक्लः, नीलो पीता वाऽभिधेयः । क्रियया – अस्ति भवति हसति पचतीत्या-दीनां ग्रहणम् । द्रव्यशब्दाः – घटः पटः ग्रन्थः क्षीरमित्यादीनां ग्रहणम् । अधातुनिषेधपदेनअध्यारोपि-तार्थयोरपि तयोर्गणपाठसामर्थ्यात् धातुसंज्ञकाः भवन्ति । तस्मात् धातुवाचकानां प्रातिपदिकं न ।

अर्थवदिति वचनेन धनं वनमित्यादौ पतिवर्णं न प्रातिपदिकसंज्ञा सोर्दुर्वारित्वात् अहन्नित्यादौ हन् धातोः प्रातिपदिकसंज्ञायाः सुबपवादे तिङि उत्पन्ने लुप्ते तस्मिन् प्रातिपदिकसंज्ञायाः प्रागुत्पन्नाया अनपगमात् नलोपः स्यादिति आपत्तिः । रामेषु इत्यत्र सुबित्यस्य प्रातिपदिकत्वाभावात् उत्सर्गेण सु इत्यस्य सात्पदाद्योः अनेन शास्त्रेण निषेधः मा भूत् अप्रत्यय इत्यत्र प्रत्ययपर्युदासबलात् । अत्र हि वृत्त्या अर्थविषयकबोधजनकत्वरूपमर्थवत्वम् । हरिषु इत्यादौ तु सुबित्यस्य प्रातिपदिकसंज्ञावारणाय अर्थवत्सूत्रे अप्रत्ययपदप्रयोगः । कृत्तद्धितसूत्रे एकार्थीभावश्च कृतद्धितसमासैकशेषधातुरिति पञ्च-वृत्तिषु शक्तिविशेषः । वृत्या विभिन्नयोग्यतादिरूपकारणाधिक्यञ्च अतिगौरवम् । अत एवोच्यते – एतत्संज्ञाफलभूतविभक्तोतरसमभिव्याहारानपेक्षया लोकेऽर्थविषयकबोधजनकत्वमर्थवत्वम् । यथा राम-शब्दादेः संज्ञा प्रातिपदिकसंज्ञा, तत्फलभूतविभक्तिः उत्पत्स्यमाना स्वादिविभक्तिः तदितरो घटपटादेः तत्समभिव्याहारानपेक्षैव लोके रामेत्यादितो दशरथापत्याद्यर्थविषयको बोधस्तस्य जननात् अर्थवत्त्वं रामादेः फलितम् । लोकेऽपि अर्थविषयकबोधजनकत्वात् अर्थवत्त्वात् रामेषु इत्यादौ अर्थलाभः ।

प्रातिपदिकसंज्ञाविधायकसूत्रद्वयमस्ति । प्रथमन्तु अर्थवत्सूत्रम् द्वितीयं कृतद्धितसमासाश्च । प्राति-पदिकस्यार्थ: प्रातिपदिकार्थ: तस्मिन् अर्थे कथं प्रथमेति संदेह:? तत्र च प्रातिपदिकार्थलिङ्ग-परिमाणवचनमात्रे प्रथमेति सूत्रेण प्रातिपदिकार्थ: सत्ता । लिङ्गं स्त्रीपुनपुंसकानि । परिमाणं द्रोण:, खारी, आढकम् । वचनम् एकत्वद्वित्वबहुत्वानि । मात्रशब्दस्य तु प्रत्यकस्मिन् अन्वय: । प्राति-पदिकार्थमात्र, लिङ्गमात्र, परिमाणमात्रे, वचनमात्रे प्रथमाविभक्ते: विधानं भवति । प्रातिपदिकार्थ-मात्रेउच्चै: नीचै:, लिङ्गमात्रे कृष्ण: ज्ञानम् श्री:, परिमाणमात्रे द्रोणो व्रीहि: । वचनमात्रे - एक: द्वौ बहव: । आचार्यदीक्षित: प्रातिपदिकार्थविषये वदति - 'नियतोपस्थितिक: प्रातिपदिकार्थ:' यस्मिन् प्रातिपदिके उच्चारिते यस्यार्थस्य नियमेनोपस्थिति: स: प्रातिपदिकार्थ: । यथा - राम: कृष्ण: श्री: ज्ञानम्, मुकुन्दादय: । तत्र संदेह: गौर्वाहीक इत्यादौ लाक्षणिकस्थले लक्ष्याथस्य वाहीकादे: नियतो-पस्थितिकत्वाभावेन प्रातिपदिकार्थत्वाभावात् प्रथमाया: विभक्ते: साधुत्वं कथमिति चेन्न । अन्वयानुपपत्तिपूर्विका लक्षणा पदे एव । सुबादिप्रत्ययोत्पत्ति: सर्वत्र शक्यार्थे एव । पदान्तर-सम्बन्धकाले लक्षणया तदर्थोपस्थिति: । अत एव गङ्गायां घोष: इति प्रयोग: सङ्गच्छत, नो चेत् सुबुत्पत्ते: प्राक् प्रातिपदिकस्यैव लक्षणायां 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति सूत्रेण नपुंसक ह्रस्वत्वापत्या तत्प्रयोगासिद्धि: । लिङ्गादोनां केवलानां प्रातिपदिकार्थं विना कुत्रापि उपस्थितिर्न । तट:, तटी, तटम् इति तटादीनां तत्तत्प्रत्ययसमभिव्याहारे सकललिङ्गबोधकतया न किमपि लिङ्गं ततो नियतोपस्थितिकं नैव तद्बोध्य लिङ्गस्यात्र प्रातिपदिकशब्देन ग्रहणमिति सूत्रे लिङ्गग्रहणम् । लिङ्गाधिक्ये लिङ्गपदेन प्रथमासिद्धि: । घट: घटी, तट: तटी, तटम्, पुस्तक:, पुस्तिका, पुस्तकम्। परिणाममात्रे - द्रोणे व्रीहि, खारी लवणम्, पायलं गोधूमं, चष्क: चषकम् । द्रोणरूपं यत्परिमाणं तत्परिच्छिन्नो व्रीहिरित्यर्थ: । लोके कृष्ण: सर्प:, नीलम् उत्पलम् इत्यादिषु नामार्थयो: अभेदेन अन्वयस्य स्वीकारात् प्रकृतेऽपि द्रोणव्रीह्योस्तथाङ्गीकारे अर्थस्य बाधात् प्रथमाया: परिमाणार्थ: अङ्गीक्रियते । तथा च द्रोणस्य प्रथमार्थे परिमाणे सामान्यविशेषयोरभेदेनान्वय: इति सिद्धान्तात् अभेदेन अन्वय: । तस्य परिच्छेद्यपरिछेदकभावेन व्रीहौ अन्वय: । तत्र शाब्दबोध इत्थम् - द्रोणरूपं यत्परिमाणं विशेषाभिन्नं यत्सामान्यं परिमाणं तत्परिच्छिन्नो व्रीहिरिति बोध: । अन्यथा परिमाण-विशेषरूपद्रोणस्य व्रीहौ अभेदान्वयबाधात् परिच्छेद्यपरिछेदकभावेन चान्वयस्य 'नामर्थयोरभेदान्वय:' इति व्युत्पत्तिविरोधेन शाब्दधबोधानुपपत्ति: । सूत्रे वचनशब्दस्य संख्यार्थो लभ्यते । एकशब्देन एकत्वस्य द्वि इत्यनेन द्वित्वस्य उक्तत्वात् 'उक्तार्थानामप्रयोग:' इति न्यायेन विभक्तेरप्राप्तौ सुबादिविधानार्थं वचनग्रहणमावश्यकम् ।

पञ्चकं प्रातिपदिकार्थ: इति प्रसङ्गे लिख्यते - पदं पदं प्रतिपदम् प्रतिपदम् उद्देश्यतया लब्धम् अर्हति 'तदर्हति' इत्यनेन ठक्प्रत्यय: इगादेशे स्वादिकार्यसम्पन्ने प्रातिपदिकम् । अस्यार्थ: प्रातिपदिकार्थ: । अर्थ्यते अवबुध्यते वा अर्थ: कर्मणि घञ्प्रत्ययविधानम् । तत्र हि -

**एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा ।**
**नामार्थ इति सर्वेऽमी पक्षा: शास्त्रे निरूपिता: ॥**

एकं नाम जाति: । तत्र मीमांसकानां मते जातावेव शक्ति: व्यक्तौ लक्षणा क्रियते । अत: जाति: प्रथम: प्रातिपदिकार्थ: । नयायिकानां मते व्यक्तौ शक्ति:, जातौ तु उपलक्षणत्वं व्यक्त्यन्तरे लक्षणां स्वीकुर्वन्ति । अत: व्यक्ति: प्रातिपदिकार्थ: । विशेषणोपलक्षणयो: साम्यं किंतु विशेषणेऽर्थ: विद्यते नोपलक्षणस्य । वैयाकरणस्तु एवं नाम विशिष्ट: नामार्थ: प्रातिपदिकार्थो वा अत्र हि 'सामान्य नपुंसकमित्यनेन क्लीबत्वं जातौ व्यक्तौ तयो: समवाये च शक्ति: । अत: जातिविशिष्टव्यक्तौ शक्ति: उत व्यक्तिविशिष्टजातौ शक्ति: । गौतमसूत्रेऽपि - जात्याकृतिव्यक्तय: पदार्था: । इत्यत्र आकृतिर्नाम सम्बन्ध: ।

न च व्यक्तेरेवैकस्या वाच्यत्वमस्तु व्यक्त्यन्तरबोधस्तु लक्षणयेति न गौरवं वाच्यम् । अर्थात् व्यक्त्यन्तरे बोधे लक्षणा तु गौरवमिति ।

न च व्यक्तीनामपि प्रत्येकमेकत्वात् विनिगमनाविरह: । एवमि एकस्यामेव व्यक्तौ शक्त्य-भ्युपगमे व्यक्त्यन्तरे लक्षणायां स्वसमवेताश्रयत्वं संसर्ग इति गौरवम् । जात्या तु सहाश्रयत्वमेव संसर्गस्तु लाघवम् । तथाहि -

**नागृहीतविशेषणा बुद्‍धि: विशेष्ये चोपजायते ।**
**विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे ॥**

यावत् विशेषणविषयकं ज्ञानं न जायते, तावत् विशिष्टबुद्‍धिरपि न भवति । अत: विशिष्टज्ञानं प्रति विशेषणज्ञानं कारणम् । एवञ्च अभिधया शक्त्या पर्व विशेषणस्य ज्ञानं समुत्पद्यते। तदनन्तरं विशेषणविषयकज्ञानस्य उत्पादने अभिधाशक्ते: सामर्थ्यं क्षीणं भवति । अत: अभिधाशक्त्या विशेष्यस्य ज्ञानं जनयितुं न शक्यते । अनेन जातिविशिष्टव्यक्तौ शक्तिस्वीकारे अभिधाशक्त्या जातेरे-वोपस्थिति: भविष्यति, न तु व्यक्तेरपि । अत: जातिरेव प्रातिपदिकस्य वाच्या । अर्थात् जातिरेव एकं पातिपदिकार्थ: इति सुवचम् यद्‍वा केवलव्यतिरेक एव शब्दार्थ: । केवलव्यक्तिपक्षे एवाण्ग्रहण-स्यैकशेषस्य चारम्भेण तस्यापि शास्त्रसिद्‍धत्वात् । युक्तञ्चैतत् । गवानयनादिव्यवहारेण व्यक्तावेव शक्तिसम्बन्धग्रहणात् । सम्बन्धितावच्छेदिकाया जातेरैक्याच्छक्ति: अपि एक एव इति न गौरवम् । न चैवं घटत्वं वाच्यं शक्यतावच्छेकत्वात् । तथा च नागृहीतविशेषणन्यायात् तदेव वाच्यमस्ति इति शङ्क्यम् । अकारणत्वेऽपि कारणतावच्छेदकत्ववत् अलक्ष्येऽपि लक्ष्यतावच्छेदकत्ववत् घटत्वादे: अशक्त्वेऽपि शक्यतावच्छेदकत्वस्य सम्भवात् । तथाहि -

**आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम् ।**
**शब्द: सुकरसम्बन्धो न च व्यभिचरिष्यति ॥** इति ॥

भावानाम् व्यक्तीनामानन्त्येऽपि एकम् - जातिरूपं धर्ममुपलक्षणं कृत्वा सुकरसम्बन्ध: सक-रशक्तिग्रह: शब्द: । न च व्यभिचरिष्यति न असम्बद्‍धां व्यक्तिं बोधयिष्यतीत्यर्थ: ।

वस्तुतस्तु 'न ह्याकृतिपदार्थकस्य द्रव्यं न पदार्थ:' इति भाष्याद् विशिष्टं वाच्यम् । ननु विशिष्टस्य पदार्थत्वपक्षे एकमिति विरुद्‍धमिति तु न । एकमित्यस्य चायमभिप्राय: शक्तिज्ञाने च विषयतावच्छेदिका जातिरेकैव तथा च घटत्वविशिष्टबोधे घटत्वांशेऽन्यप्रकारकघटत्वशक्तिज्ञानत्वेन

हेतुतेति कार्यकारणभावः । तद्विषयकशाब्दबोधे तद्विषयकशक्तिग्रहः कारणम् । यथा घटविषयक-शाब्दबोधः घटविषयकशक्तिग्रहे सति जायते इत्यनुभवः । अत्र शक्तिज्ञानं कारणं, व्यक्तिबोधश्च कार्यम् । तद्र्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्ट ज्ञानं हेतुः । वैशिष्ट्यञ्च स्वविषयकोद्बुद्धसंस्कारसमानाधिकरण्यस्वाश्रयपदविषयकत्वोभयसम्बन्धेन ।

'समन्वयस्तु स चासौ धर्मश्च इति तद्धर्मः यथा घटे घटत्वधर्मः । तेन धर्मेण अवच्छिन्नः तद्धर्मावच्छिन्नः, यथा घटत्वधर्मेण अविच्छन्नः घटः । तद्धर्मावच्छिन्नो घटो विषयो यस्य सः घट-त्वधर्मावच्छिन्नघटविषयकः । तद्धर्मावच्छिन्नविषयिका चासौ शाब्दबुद्धिः, तद्धर्मावच्छिन्नविषयक-शाब्दबुद्धिः, तस्या भावः शाब्दबुद्धित्वम् । तेन धर्मेण अवच्छिन्ना शाब्दबुद्धिः शाब्दबोधः । तद्धर्मावच्छिन्ननिरूपित वृत्तिविशिष्टज्ञानम् तद्धर्मावच्छिन्नः घटः । तद्धर्मावच्छिन्नेन धर्मेण निरू-पिता घटत्वधर्मावच्छिन्नेन घटेन निरूपिता घटनिरूपिता । तद्धर्मावच्छिन्ननिरूपिता चासौ वृत्तिः तद्-धर्मावच्छिन्ननिरूपितवृत्तिः घटत्वधर्मावच्छिन्नघटनिरूपितवृत्तिः । तया वृत्या विशिष्टं ज्ञानम् तद्धर्मा-वच्छिन्ननिरूपितवत्तिविशिष्टज्ञानम् । तथा च घटत्वधर्मावच्छिन्नघटविषयकशाब्दबुद्त्वावच्छिन्नं प्रति घटत्वधर्मावच्छिन्नघटनिरूपितवृत्तिविशिष्टज्ञानहेतुः ।

जातिविशिष्टव्यक्तिविषयकशक्तिज्ञानत्वेन गौरवम् । तदेवं विशिष्टस्य वाच्यत्वमादाय द्विक-मिति जातिव्यक्तिश्च अत्र सरूपं मानम् । तत्र च एकस्यां विभक्तौ परतः सरूपाणामेव दृष्टानां मध्ये एकः शिष्यते । क्वचित्सारूप्ये सत्यपि, औजसादिषु मातरौ मातराविति वैरूप्यदर्शनान्नैकशषः । यद्यपि कतिपयविभक्तौ उक्तयोर्मातृशब्दयोः सारूप्येणैव दर्शनमस्ति । तथापि एकस्यामपि विभक्तौ परतो विरूपाणि न दृष्टानि । सारूप्यमस्ति तद्योतनाय एकविभक्तावित्यत्र एकग्रहणम् । द्विबहूनां व्यावृत्तये एकग्रहणम् ।

जातिलक्षणं तु वैयाकरणसिद्धान्तकौमुद्यां दीक्षिताचार्यैः प्रपञ्चितमेव । तच्च -

**आकृतिग्रहणाजातिः लिङ्गानां च न सर्वभाक् ।**
**सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह ॥**

भावः आकृतिः अवयसन्निवेशविशेषः । गृह्यते अनेनेति ग्रहणम् व्यञ्जकम्, ल्युटि क्लीब-त्वं सामान्ये, आकृतिर्ग्रहणं यस्येति । सर्वासु घटादितद्व्यक्तिषु एकरूपतदाकारव्यङ्ग्येति यावत् । तटं त्रिषु लिङ्गेषु वर्त्तते । तटं नाम जलसमीपप्रदेश आकृतिविशेषविशिष्टस्तटः अतस्तटत्वस्या-कृतिव्यङ्गत्वाज्जातिः, अतस्तटशब्दस्य जातिवाचित्वादनियतस्त्रीलिङ्गत्वादयोपधत्वाच्च ङीषिति । युवत्वादिकमप्याकृतिव्यङ्ग्यत्वात् जातिरेव । अनेन अनुगताकारप्रत्ययसिद्धा तटत्वादिजातिरुक्ता । एवम् सति वृषलत्वादीनां जातिविषये अनभिधानं स्यात् इति चेदुच्यते । लिङ्गानां न च सर्वभाक् । सकृदाख्यातनिर्ग्राह्येति । अन्या जातिरिति सर्वाणि लिङ्गानि जातिलक्षणे न भजन्ते । सकृदित्यतः प्रथमतया एकस्यां व्यक्ताविति आख्याता तत्र हि व्यक्त्यन्तरेऽपि तदनुवर्तताम् पुनः पुनः उपदेशं विनापि ग्रहणे दोषाभावः आकृतिः गृह्यते तटत्वादीनामेव । वृषलत्वे सकृदाख्यातेन सुग्राह्या इत्यर्थः। ब्राह्मणादिविशेषदशायां गोत्रं च चरणैः सह जात्यन्तरे विवाहे अपत्यजनने वा । यथा औपगवः,

उपगोः गोत्रापत्यं पुमानिति, कठी कठशाखाध्येतृणां कृते कठी इति व्यवहारः । स्त्रियाम् औपगवी ङीषविधानसामर्थ्यात् । ब्राह्मणादीनां गोत्रम् एवं चरणं शाखापर्यायः जाति व्यवस्थाविषये त्रीणि लक्षणानि उक्तानि । प्रातिपदिकार्थसूत्रे लिङ्गादिग्रहणसामर्थ्यात् अपूर्वस्य नियतोपस्थितिक-रूपप्रातिपदिकार्थस्य कल्पनापेक्षया द्विकं पातिपदिकार्थपक्षे लिङ्गादिग्रहणमस्य चारितार्थ्यात् सरूपसूत्रे 'न ह्याकृतिपदार्थस्य द्रव्यं न पदार्थः द्रव्यपदार्थस्याकृतिः न पदार्थः' इति कस्यचित् किञ्चित् गुणीभूतं किञ्चिद् प्रधानम् इत्युत्तरभाष्याच्च विशिष्टे शक्त्यवधारणात् विशिष्टं नामार्थः इत्यभिपति तस्मात् जात्याश्रिता व्यक्तिः प्रातिपदिकार्थः । इह जातिशब्दः प्रवृत्तिनिमित्तस्योपलक्षणम् । यस्य शब्दस्य शक्यार्थे योऽर्थः प्रकारतया भासते स एवार्थः प्रवृत्तिनिमित्तमुच्यते । तथा च प्रवृत्ति-निमित्तप्रकारकारोपविशेष्योऽपि गृह्यते । अत एव गोपी इत्यादौ स्वादिप्रकृतेः लाक्षणिकत्वेऽपि प्रथ-मासिद्धिः । प्रातिपदिकार्थपदेन प्रवृत्तिनिमित्तस्य तदाश्रययोः ग्रहणादेव सूत्रे लिङ्गग्रहणं चारितार्थम्। अन्यथा स्वामोर्नपुंसकात् इति शास्त्रेण लिङ्गस्य प्रातिपदिकार्थत्वं व्यर्थमिति । लिङ्गमपि प्रातिपदिकार्थो भवति । प्रत्ययार्थत्वे हि स्त्रीत्वस्य, स्त्रिया वा प्राधान्यापत्तिः व्यक्तिशक्तावपि स्त्रीतादात्म्यापन्नाऽजाबोध एवानुभवसिद्धः, न त्वजातादात्म्यापन्नस्त्रीबोधः । वागादिशब्दे विनाऽपि प्रत्ययं स्त्रीत्वस्य बोधात् प्रातिपदिकस्य शक्तत्वे टाप्प्रत्ययस्यापि शक्त्यन्तरकल्पने गौरवमिति । तत्र च लौकिकलिङ्गे मानम् – **स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः ।**

**उभयोरन्तरं यत्र सामान्ये तद् नपुंसकम् ॥**

लौकिकलिङ्गलक्षणस्वीकारे लक्षणलक्षितावययवसंस्थानविशेषरूपलिङ्गस्याचेतने खट्वादौ बाधात् तत्र न लिङ्गनिर्धारणं भवति । तेन दारान् इत्यत्र नत्वं न, तदर्थस्य पुंस्त्वाभावादिति चेन्न । आरोपेण लिङ्गानुशासने मानम् इति केचित् । भाष्यकारस्तु – सतरजस्तमसां प्राकृतगुणानां वृद्धिः पुंस्त्वम्, अपचये स्त्रीत्वम् सामान्ये गुणानां स्थितिमात्रं नपुंसकत्वम् । किन्तु द्रव्ये तु न सन्ति गुणाः नैव गुणानां त्वपचयोपचयस्थितिमात्रकल्पनम् इयं व्यक्तिः, इदं वस्तु, अयं पदार्थः इति व्यवहाराणां सर्वत्राप्रतिबद्धप्रसरत्वादर्थनिष्ठञ्च । एकस्मिन्नेवार्थे पुष्यः, तारकाः, नक्षत्रमिति शब्दनानात्वदर्शनात् स्तनकेशाद्यविखितमेव लिङ्गम् कुटी, कुटीरः इत्यादौ एकस्यावयवस्योपजने लिङ्गभेददर्शनाच्च ।

एवञ्च स्त्रियां पशुनैतयादिप्रयुक्ते शास्त्रीयलिङ्ग एव, नाभावादिकम् । आदौ नाऽस्त्रियाम् इत्यनेन टा इत्यस्य स्थाने नाभावः पुंपशौ प्रयुक्ते तु शास्त्रीयविशिष्टे लौकिके । अत एव 'पशुना यजेत' इत्यादौ पुस्त्वस्य विवक्षितत्वान्न स्त्रिया याग इति ।

शास्त्रीयमपि लिङ्गं लौकिकलिङ्गमिव शाब्दबोधे भासते, लिङ्गनिर्णयस्तु कोशादिप्र-माणेनापि सम्भवति निर्णयः । तत्र हरिः –

**तिस्रो जातय एवैताः केषाञ्चित् समवस्थिताः ।**

**अविरुद्धा विरुद्धाभिर्गोमनुष्यादिजातिभिः ॥**

इहापि जातित्रयमुक्तम् प्रसङ्गानुसरं शास्त्रीयं लौकिकं लिङ्गं संगच्छते इति । शास्त्रीय-लिङ्गविधाने खट्वादावापत्तिः लौकिकलिङ्गविधानेऽपि खट्वादीनां लिङ्गनिर्णयो न । अतः

खट्वादिषु कोशानुसारमव । पशुना दारानित्यत्र शास्त्रीयलिङ्गम् । क्वचित् शब्दनिष्ठं लिङ्गम् । क्वचिदर्थनि लिङ्गनिर्णयः भवेत् । एवञ्च त्रिकं प्रातिपदिकार्थः, संख्याकारके तु प्रत्ययार्थ एवं नानाप्रकृतीनां संख्याकारकयोः शक्तिकल्पनामपेक्ष्य प्रत्ययानामेन तत्र शक्तिकल्पनाया औचित्यम् । पश्वादिशब्दोक्त लिङ्गं हि अर्थपरिच्छेदकत्वेनान्वयः । एवञ्च पुंसः पशुशब्दस्य पुंव्यक्तिवाचकत्वेन पुंस्त्वविशिष्टयोरेव विधानात् 'पशुना यजेत' इत्यादिविधिर्न छागादीनङ्गत्वेन प्रयोजयति । यथा स्वमोर्नपुंसकात् इति । चतुष्कं प्रातिपदिकार्थ इति पक्षं प्रतिपादयति कौण्डभट्टः संख्याऽपि प्रातिपदिकार्थः । संख्याप्रवृत्तिनिमित्तं तस्य आश्रयः । दधि पश्येत्यादौ हि प्रत्ययं विनापि संख्यायाः बोधो भवति । यथा द्वयेकयोर्द्विवचनैकवचने, बहुषु वचनम् संख्यासंज्ञाबोधः 'बहुगणवतुडति संख्या' इति सूत्रेण शास्त्रीयसंख्यायाः ग्रहणं भवति । दधि, मधु इत्यादौ अनन्तशक्ततावच्छेदककल्पनागौरवं तु फलमुख्यत्वात् दोषः तथा गृहीतबोधकत्वस्य प्रकृतिमात्रादपि तज्ज्ञाने तेषामपि तद्बोधकारणत्वावश्यकत्वेन कल्प्यस्याभावात् । संख्याबोधे दधि इत्यादीनां विभक्तिसमभिव्याहारकारणतया परिहर्तव्यः।

पञ्चकं कारकमपि नामार्थः । तत्र षट्कारकाणि भवन्ति कर्ता-कर्म-करणं-सम्प्रदानम् अपादानमधिकरणञ्चेति षट् । कारकसहितं चतुष्कमित्यर्थः । कारकाणां प्रातिपदिकार्थाभावे गामानयेत्यादौ द्वितीयादीनामनापत्तिः । केचित् - दधि आनय इत्यादौ व्यवहारादेव प्रत्ययं विनाऽपि शाब्दबोधो जायते । तत्र कारकविधानमेव मानम् ।

वस्तुतस्तु षटकं प्रातिपदिकार्थः । शब्दः शाब्दबोधं प्रति कारणं भवति । अतः शब्दः प्रातिपदिकार्थः । जातिः, व्यक्तिः, लिङ्गम्, संख्या, कारकम्, शब्दश्चेति । उच्यते हि -

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥** वा. प. ।

यथा गामुच्चारय, विष्णुमुच्चारय जबगडदशमुच्चारयेति शाब्दिकानां मते तु शब्दोऽपि शाब्दबोधे भासते ।

**स्वार्थो द्रव्यञ्च लिङ्गञ्च संख्या कर्मादिरेव च ।**
**अमी पञ्चैव नामार्थास्त्रयः कषाञ्चिदग्रिमाः ॥** इति ।

॥ शम् ॥

**सन्दर्भग्रन्थाः**

1. वैयाकरणभूषणसारः नामार्थनिरूपणम् ।
2. परमलघुमञ्जूषा नामार्थनिरूपणम् ।
3. वैयाकरणसिद्धान्तकौमुदी ।
4. व्याकरणमहाभाष्यम् ।
5. तर्कसंग्रहः - श्रीमदन्नम्भट्टः ।
6. अष्टाध्यायी - पं. ईश्वरचन्द्रः ।
7. अष्टाध्यायी प्रथमावृत्ति - पं. ब्रह्मदत्तजिज्ञासु ।
8. काशिका ।

9. लघुशब्देन्दुशेखरः स्त्रीप्रत्ययप्रकरणम् ।
10. वैयाकरणसिद्धान्तकौमुदी - श्रीधरमुखेल्लासिनी टीका ।
11. वैयाकरणसिद्धान्तदिग्दर्शनम् ।
12. परमलघुमञ्जूषा - प. बोधकुमारझा - शाब्दबोधकार्यकारणस्वरूपम्
13. वैयाकरणसिद्धान्तलघूमञ्जूषा - नामार्थविचारः ।
14. शब्दशक्तिप्रकाशिका
15. प्रौढमनोरमा - शब्दरत्नटीकासहिता ।
16. वाक्यपदीयम् ।
17. विद्यारश्मिः पत्रिका ।
18. शब्दकोशः - वामनशिवरामआपटे ।
19. प्रो. मदनमोहनझा वर्याणां चलदूरवाणी अनुप्रयोगः अष्टाध्यायी ।

**संविदाध्यापकः**
**व्याकरणविभागः,**
**राष्ट्रियसंस्कृतसंस्थानम्,**
**क.जे.सोमैयासंस्कृतविद्यापीठम्,**
**विद्याविहारः, मुम्बई-७७**

★★★

# अनुसन्धानस्यार्थविमर्शः

✍डॉ. विनोदकुमारशर्मा

**( प्रयत्नकृता नूतनोपलब्धिः अनुसन्धानम् । नूतनत्वं च नाम किमित्यत्र भारतीयमनीषायां बहवो वादाः । तथा च असतः सदुत्पद्यते इति बौद्धाः । असत्कारणव्यापारदुत्पद्यते इति नैयायिकादयः । सत्कारणव्यापयारात् सतः अभिव्यक्तिः, नोत्पत्तिः इति सांख्या वेदान्तिनश्च । तत्रापि सतो विवर्त्तः इति वेदान्तिनः, सतः परिणामः इति च सांख्याः । तथाहि अनुपलब्धस्य कारणस्य कार्य्यस्य वा प्रत्यक्षादिप्रमाणैः सिद्धीकरणं नाम अनुसन्धानम् । तत्सिद्धीकरणं च कस्यादपि ज्ञानस्य वा ज्ञेयस्य वा भवितुमर्हति । अनेनैवाशयेन प्रवृत्तोऽयं लेखो विद्याया अवस्थाचतुष्टयम्, अनुसन्धाना-न्वेषण-गवेषणानु-शीलना-लोचन-डिस्कवरी-एकस्प्लोरेसनशब्दाना् विविनक्ति । अद्यत्वे, विशेषतश्च भारते तथ्यमिदमत्यन्तं सान्दर्भिकं विद्यते ॥ - स. )**

बुद्धियुक्तमानवः सर्वदा बुद्ध्या अनुसन्दधानो भवति । स पूर्वतनं पश्यति, वर्तमानं निर्णयति, भविष्यञ्च अनुमिनोति । अस्माकं प्राचीनाचार्याः ज्ञानस्य सम्पूर्णप्रक्रियां त्रिषु स्तरेषु व्यवस्थितां कृतवन्तः ।

'आदौ शोधस्ततो बोधः प्रबोधश्चाप्यनन्तरम्' अर्थात् सर्वप्रथमं ज्ञानस्य ततस्ततः शोधः तदनन्तरं श्रेष्ठगुरूणां प्रवचनेन बोधः, अन्ते च अनुभूतिः भवति । इत्थं शोधस्य अनुसन्धानस्य वा 'ज्ञानस्य पिपासा' मूलमिति वक्तुं शक्नुमः । ज्ञानपिपासां विना कथं कश्चित् पठिष्यति लेखिष्यति ?

द्वादश्या शताब्द्यां लब्धजन्मा कान्यकुब्जेश्वरस्य जयचन्द्रस्य राजकविः नैषधीयचरित-महाकाव्यस्य प्रणेता महापण्डितः श्रीहर्षः विद्यायाः (ज्ञानस्य) चतस्रः अवस्थाः सन्तीति ब्रवीति -

**अधीतिबोधाचरणप्रचारणैर्दशाश्चतस्रः प्रणयन्नुपाधिभिः ।**
**चतुर्दशत्वं कृतवान् कुतः स्वयं न वेद्मि विद्यासु चतुर्दश स्वयम् ॥**

श्लोकेऽस्मिन् राज्ञः नलस्य चतुर्दशविद्याः वर्णयन् तस्य श्रीहर्षः क्रमिकस्थितोनां प्रसङ्गे वर्णयति - अधीतिः (Perusal or Study), बोधः (Digestion or Experience), आचरणम् (Application) तथा प्रचारणम् (Teaching or deliverance) । भारतीयभाषासु पयुक्तोऽयम् अनुसन्धानशब्दः आंग्लभाषाया Research 'रिसर्च' शब्दस्य स्थाने तदर्थबोधाय अनुसन्धानम्, गवेषणा, शोधः, संशोधनम् इत्यादयो विविधाः शब्दाः प्राप्यन्ते । एतेषु व्युत्पत्त्यर्थदृष्ट्या अनुसन्धान-शब्दो मूलशब्दार्थं सर्वाधिकं निर्वहति । अतः मूलशब्दस्य सर्वाधिकनिकटः अयं शब्दः । अत्र हि Re 'रि' अनुपर्यायः Search 'सर्च' संधानार्थकश्चेति ।

यद्यपि प्रतिपदमात्मनः विशेषमन्तर्भूतं रहस्यं तात्पर्यञ्चावधारयति, तथापि मुख्यशब्दस्य पर्यायवाचिनः शब्दाः यद्यपि स्वस्वरूपं धारयन्ति, पदार्थञ्चापि प्रकटयन्ति तदनुसारम् । तथापि कस्मिंश्चिदर्थे मुख्यशब्देन सह तात्पर्यसंवादं प्रकटयन्त्येव । अतोऽत्र 'शोधः' इति पदस्य पर्यायवाचिनः अन्ये शब्दाः प्रस्तूयन्ते -

1. **अनुसन्धानम्** -

सन्धानं[1] भवति द्वयोः वस्तुनोः बहूनां वा पदार्थानाम व्यवस्थितानां व्यवस्थितीकरणम् । तद् व्यवस्थायां या काचित् प्रक्रिया स्वीक्रियते, प्रयासो वा विधीयते तद्भवत्यनुसन्धानम् ।[2] अन्यत्र भवत्यर्थो लक्ष्यसाधनम् । यथाऽभिज्ञानशाकुन्तले कविकुलगुरुः कालिदासो निरूपयति वस्तु दुष्यन्तद्वारा इति शरसन्धानं नाटयति - इति । तथैव निम्नोन्तभावस्य पृथिव्याः वा निम्नोन्नतायाः समताविधानेऽप्येष शब्दः सन्धानमित्युच्यते - यथा तत्रैवाभिज्ञानशाकुन्तले - 'यदर्धे विच्छिन्नं भवति कृतसन्धानमिव तत्' - 1/9

2. **अन्वेषणम्** -

अन्वेषणशब्दोऽपि शोध-शब्दस्य पर्यायेऽर्थे गण्यते । यद्यपि शब्दोऽयं भौगोलिकानुसन्धानार्थं, कदाचिद्वैज्ञनिकानुसन्धानार्थं, विशेषरूपेण प्रतिपादयति, तथापि गौणरूपेण साहित्यक्षेत्रीयसमाजशास्त्रीयादिविषयकशोधकर्मणेऽपि शब्दोऽयं प्रयुज्यते । केषाञ्चिन्मतमस्ति यत् अस्य अंग्रेजी-शब्दोऽस्ति डिस्कवरी (Discovery) इति उदाहरणानि खलु अन्वेषणस्य मन्यन्ते तैः कोलम्बसेनान्विष्टो देशः अमेरिका, जेम्सवाटस्य रेलयान-इञ्जनम्-इत्यादि । एकेषां मतमिदमस्ति यदन्वेषणशब्दः साहित्यिकसम्पदः संशोधनविषये न प्रवर्तते । परन्त्वेषा धारणा न समीचीना प्रतिभाति - यतो हि साहित्यिकक्षेत्रेऽपि सूक्ष्मनिरीक्षणपरिशीलनादिव्यापारेण कस्यचिन्नूतनस्य पदार्थस्यप्रस्तुतिर्भवत्येव । कश्चिदपि शब्दः पारिभाषिकशब्दो वा प्रतीको भवति विशेषपदार्थावगमनस्य । अत एव काव्यशास्त्रे साक्षात्संकेतितशब्दस्य व्यवहारोऽभिधासूचनाय प्रयुक्तः ।[3] अस्य तात्पर्यमिदमस्ति यत् विशेषो हि शब्दः विशिष्टपदार्थस्याकारात्मकं स्वरूपं संकेतयति यथा अस्मात् पदादयमर्थो बोद्धव्य इति ईश्वरसंकेतः शक्तिः ।[4] तस्मात् तच्छब्दशक्त्यनुसारमेव मनासि पदार्थाकारो हि प्रादुर्भवति इति । तस्मात् अन्वेषणशब्दोऽपि विद्यतेऽनुसन्धानशब्दस्य पर्याय इति कथने न संकोचः ।

3. **गवेषणा** -

प्राक्तनकाले शब्दोऽयं गवामन्वेषणे प्रयुज्यते स्म इति एकेषां विदुषां मतम् । व्युत्पत्तिदृशा समालोचनेनास्य शब्दस्य तदेवार्थं साधयितुं शक्यते तथा चात्र भावोऽस्तिविलुप्त-वस्तुनः सूक्ष्मतयाऽवलोकनम् - यथा गोपालकः गामन्वेष्टि वने । एतस्य शब्दस्यापि शोधार्थः भवितुमर्हति यतो हि आधुनिक-शोध-प्रविधौ बहुविधाः शोधप्रकाराः मन्यन्ते । तत्र इतिहासपुराणादिगतानां शब्दसंकेतमाध्यमेन भौगोलिकतथ्यान्वेषणमस्मिन् क्षेत्रे खल्वागच्छति तत्र मन्ये, ऐतिहासिक-भौगोलिक-परिवर्तनेन शब्दसंकेतितस्थलानामन्येषाञ्च

पदार्थानां सम्यक्तया अन्वेषणं, संशोधन वा उदाहरणं भवति । यथा, रामसेतुस्थलस्यान्वेषण-प्रसङ्ग: । साहित्य-भाषा-संशोधनविषयेष्वप्ययं शब्द: स्वकीयां प्रवृत्तिं द्योतयति तथापि सम्प्रतिशोधपर्यायरूपेणास्य पयोगो न दृश्यते शोधसंस्थानेषु । अत एष: शब्द: स्वकीयं शोधस्वरूपं इदानीं त्यक्तवान् अस्तीति दृश्यते । क्वचिदेवास्य शोधपत्रिकानामकरणे प्रयोगो दृश्यते न सर्वसामान्यरूपेण ।

उपर्युक्ता: शब्दा: संशोधनस्य पर्यायत्वेन ये प्रोक्ता: तेषां तात्पर्यमस्ति केनचिदपि माध्यमेन नूतनवस्तुन: संशोधनमाध्यमेनावाप्तिरेव । गवेषणसन्दर्भेऽपि तथैवास्ति । अर्थात् गोपालकेन क्वचिद् विलुप्तगोरन्वेषणप्रसंगेऽपि अटता तेन मार्गे कस्यचिन्नूतनस्य वस्तुन: प्राप्तिर्यदा जायते तदाऽस्य शब्दस्य शोधपर्यायत्वेन ग्रहणं शक्यमस्ति ।

तत्र चोपलब्धसाहित्यस्य परिशीलनेन, विस्तृतविवचनेन गभीरालोचनपद्धत्या वा तात्पर्यावगमनं मुख्यसन्देशस्य च या प्राप्तिर्भवति साप्येकधाराऽनुसन्धानक्षेत्रस्याद्य प्रवहन्ती दृश्यते।

4. **अनुशीलनम्** -

एष शब्द: प्रवर्तते अन्वेषणीये संशोधनीये वा साहित्यिक विषये । विशेषोद्दिष्ट-पदार्थप्रकृतिज्ञानस्य आधारेण नैकविषयदृष्ट्या, साहित्यशास्त्रे कविहृदय-प्रकृतिज्ञानाय शब्द-गत-शक्ति-सामर्थ्य-बलाद् यत्किञ्चिदपि चिन्तनं सप्रमाणं तार्किकरूपेण विधीयते, तदनु-शीलनं समीक्षाया एक: प्रकार:, अनुसन्धानशब्दपर्याय-रूपेणावगन्तुं शक्यते । 'विज्ञातसारा-न्यतानुशीलनेन' इति भारवे: वचनेनापि तदेव-भावोऽवगम्यते । कस्मिंश्चिदर्थे परामर्श: विमर्श: परिशीलनादिशब्दा अपि कला विषयकानुसन्धानक्षेत्रमेव सूचयन्ति, तस्मादेतेऽपि शब्दा अनुसन्धानशब्दपर्याया:, शोध-पर्याया वा स्वीकर्तुं शक्यन्तेऽवस्थाविशेषस्य विशेष-चिन्तनमननाध्ययनसन्दर्भे, काव्यसौष्ठवस्य, ध्वनिविशेषस्य, भावनाविशेषस्य, तात्पर्यविशेषस्य च अवकलनाय साहित्यक्षेत्रेऽनुसन्धानसन्दर्भे च ।

5. **समीक्षा** - शब्दे किञ्चिद्विशेषोऽस्ति । अत्र समीक्षासन्दर्भे सर्वतोभावनानुसन्धेयविषयस्य प्रतीकशब्दानां चिन्तनं विधीयते, विशेषसन्देशावगमनाय च ताटस्थ्यभावेन अनुसन्धेय-विषयस्याध्ययनं, मननं, चिन्तनं च विधीयते ।

6. **आलोचनाऽपि** शोधविषस्य शीर्षकस्थानीय: शब्दो विद्यते । आलोचनाया: प्राय: व्यावहारिकक्षेत्रे नकारात्मकं रूपं मन्यते परन्तु तस्य शब्दस्य व्युत्पत्त्यनुशीलनेन न तथाऽर्थमनुसन्धानकर्मणि कर्तुं शक्यते । अनुशीलने, परिशीलने, समीक्षायामालोचने च सर्व-त्रैव ताटस्थ्यभावेन, तार्किकरूपेण, वैज्ञानिक-प्रकारेण चिन्तनं क्रियते विषयस्य । यद्यपि साक्षाद्रूपेणात्र वैज्ञानिकदृष्टे: प्रतीति: न भवति, परन्तु यदा वैज्ञानिकसंसाधनानामुपयोगेन साहित्यसम्पद: परिशीलनं विधीयते तदास्या: प्रतीतिर्भवति । आधुनिकानुसन्धानसंस्कृतौ सर्वत्रैवानुसन्धानपद्धते: उपयोगात्, संसाधनानाञ्च प्रयोगात् समीक्षादिप्रकारा अपि खल्वनु-

सन्धानस्य वैज्ञानिका एव मन्यन्ते । उदाहरणार्थं यदि कविकुलगुरुकालिदासविरचितस्य मेघदूतस्य समालोचनात्मकमध्ययनमनुसन्धानदृष्ट्या विधीयेत तदा मानवमनोविज्ञानपरीक्षण-साधनानामन्येषाञ्च वैज्ञानिकसंसाधनानामुपयोगः भविष्यत्येव । तस्मात्-समीक्षात्मकाध्ययने शास्त्रान्तरपदार्थसिद्धये वैज्ञानिकी दृष्टिस्तु भवत्येव ।

**अन्ये चानुसन्धानार्थज्ञापकान् पर्यायान्** वयं यथा जानीमो यदस्माकं प्राचीन-संस्कृतभाषासाहित्ये सर्वाः विद्याशाखाः वैश्विक-शिक्षण-परिभाषिकाश्च शब्दाः विराजमानाः सन्ति, परन्तु तिलेषु तैलं यथा व्याप्तं दृश्यते, तत्कुट्टन-निश्च्योतन-माध्यमेन च प्रत्यक्ष-मुपस्थितं भवति, तद्वदेवास्माकं शास्त्राणि तिलस्थानीयानि सन्ति, येषां विशेषशास्त्रम-न्थनधिया, परीक्षणं क्रियते तदाऽभीष्टमुपलभ्यते । अतः आधुनिक-संशोधनसूचना-संवाहक-शब्देषु, डिस्कवरी इनवेन्सन, रिसर्चादयोऽपि शब्दाः यान् यान् अथान् नीत्वा प्रवर्तिताः प्रतिभान्ति ते ते अर्था खलूपर्युल्लिखितेषु शोधपर्यायेषूपलभ्यन्ते तथापि आङ्गलभाषीया अपि शोध-पर्यायवाचिनो हि शब्दा अत्र पाठकानां समक्षं सपरिशीलनं प्रस्तूयन्ते-

7. **डिस्कवरी** (Discovery) -

डिस्कवरीति शब्दः ददाति सन्देशं तद्वस्त्वन्वेषणस्य, यस्योपरि विद्यते ह्यावरणम्। अस्य सूत्रं वेदान्तशास्त्रस्यावरणशक्तिविचारे प्राप्तुं शक्यते । '**भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः**' इति वाक्यं स्पष्टं तदेवाङ्लभाषीयं डिस्कवरीति शब्दार्थं सूचयति । तत्र वेदान्तशास्त्रेऽपि मायाया आवरणशक्त्या वस्तुनः जीवात्मनः प्रकाशः तिरोहितो जायते । यदा ज्ञानेन तत्त्वमसीति महावाक्यस्य तात्पर्यज्ञानेन, तथा च 'अहं ब्रह्मास्मि' - इति खल्वनुभववाक्येन साधकः स्वं-स्वं रूपमवधारयति तदा सर्वमावरणं निरस्तं भवति । डिस्कवरीतिनाम्नाख्यातेऽनुसन्धानेऽपि कस्यचिदपि दूरस्थस्य वस्तुनः भौगोलिकप्राकृतिक-वातावरणेन अन्येन केनचित् कारणनावृतं स्वरूपमुद्घाट्यते । आध्यात्मिक-क्षेत्र-सम्बद्धमिव प्रतिभाति Discovery (डिस्कवरीति) पदम्, यस्य तात्पर्यमिदं भवति यत् केनचित् कारणेन स्थितमपि वस्तु सरलतया नावलोक्यते, परन्तु कञ्चित्संकेतं लक्षणं वा मनसि धृत्वा समुचित-साधनेन यदा तस्योद्घाटनं भवति तदस्ति डिस्कवरी-पदार्थ-फलम् ।

आइनस्टीन-महोदयोऽपि तदेव संकेतयति, परन्तु तस्य सिद्धान्ते विशेषोऽस्ति यत् उपनिषदां भावानुसारं कस्यचिदपि पदार्थानुसन्धानेऽन्तःप्रज्ञैव कारणमस्ति-यथा 'Einstein very emphatic-cally pointed out that scientific laws may be discovered only through intuition'[5].अतः इन्वेन्सनशब्दोऽपि तथैवानुसन्धानस्य तात्पर्यं धत्ते यथा डिस्कवरीति पदं धारयति। किञ्चिद्विशेषोऽस्ति (Invention) इन्वेनसनपदे यदयं शब्दः साहित्यकलाक्षेत्रे कल्पना-प्रकारमपि खल्वनुसन्धानस्य परामृशति । अनेन प्रकारेणानुसन्धानतत्त्वार्थप्रतिनिधिशब्दा अन्येऽपि 'एक्सप्लोरेसन' (Exploration) इत्यादयः सन्ति, येषां विश्लेषणेनानुसन्धानमेवार्थोऽवगम्यते । अतोऽवगम्यते यत् प्रत्येकं पर्यायपदमनुसन्धानस्य, शोधस्य वा शाखाविशेषं, प्रकारविशेषं चोपगृह्य प्रवर्तितं प्रतिभाति ।

विशेषरूपेणाङ्ग्ल-शब्दा: शोधस्य पर्यायरूपा: डिस्कवरीत्यादय: आधुनिकभौतिक-रसायनादि-विज्ञान-विभागस्यानुसन्धानाय प्रयुज्यन्ते, परन्तु शोध: अनुसन्धानं च भाषा-साहित्य-समाजशास्त्रादिविषयक-अनुसन्धानप्रसङ्गे प्रयुज्यते ।

परन्तु तटस्थपरिशीलनेन, स्वतन्त्र-चिन्तनेन च ज्ञायते यत् शोधस्यानुसन्धानस्य वा डिस्क-वरीत्यादिशब्दानां वा लक्ष्यप्राप्ति-प्रक्रिया समाना एव, यतो हि विश्वस्मिन् प्रकृतिरेका एवास्ति तस्यैव व्यापकस्वरूपानुसन्धाने ज्ञान-विज्ञान-भाषा-साहित्यमनोविज्ञानादिविभागेषु प्रवर्तिता: नानाविधशोधा: नानाभिधानै: संबोध्यन्ते । वस्तुत: तत्र सर्वत्रैव पारस्परिको हि सम्बन्ध: प्रतिभाति । अस्य स्पष्टी-करणं फ्रिट्जोफ कापरा (Fritzof Capra) इति महतो वैज्ञानिकस्य पुस्तकानामध्ययनेन भवति – यथा – 'Problems must be seen as just different facets of one single crisis, which is largely a crisisi of perception. It derivers from the fact that most of us and specially our large social institutions subscribe to the concepts of an outdated worldview] a perception of reality inadequate for dealing with our overpopulated, globally interconnected world'. The web of life P.4

अत: पारमार्थिक-रूपेणाथर्ववेदस्य पृथिवीसूक्तं यथा केवलं देशविशेषस्य भूम्या: वर्णनं न करोति प्रत्युत् पृथिवी-सामान्य-तत्त्वस्यैव वर्णनं करोति – तथैव शोधादिपर्याया अपि सर्वे सर्वार्थवाचका: वर्तन्ते, तथापि वैशिष्ट्यात्तद्वादस्तद्वाद इति सिद्धान्तेन प्रवृत्तिर्भिद्यतेऽनुसन्धान-पर्यायवाचिनां पदानाम्' – इति ।

**सन्दर्भा: –**


1. अभिज्ञानशाकुन्तलम् – प्रथमाङ्क:
2. तेजोबिन्दूपनि तथा च अनुसन्धानपद्धति: – डॉ. वागीश शास्त्री (सरस्वती सुषमा)
3. काव्यप्रकाश: 2/7 साक्षात् संकेतितं योऽर्थमभिधते स वाचक: ।
4. तर्कभाषा – शब्द-प्र. ।
5. Vedanta and modern Science, by Ajit Kumar Sinha Pp. 104-105.


**सन्दर्भग्रन्थसूची**


1. शोधप्रविधि एवं पाण्डुलिपिविज्ञान – प्रो. अभिराजराजेन्द्र मिश्र
2. द्र. अभिज्ञानशाकुन्तलम् – प्रथमाङ्क:
3. Vedanta and modern science, by Ajit Kumar Sinha.



**संविदाध्यापक: ( शिक्षाशास्त्रविभाग: ),**
**राष्ट्रियसंस्कृतसंस्थानम्,**
**क.जे.सोमैयासंस्कृतविद्यापीठम्,**

**विद्याविहारः, मुम्बई-७७**

★★★

# शिक्षासामाजिकपरिवर्त्तनञ्च

✍डॉ. मनीषकुमारचाँडक

**( पूर्वं जानाति, ततः इच्छति, ततो यतते, ततश्च प्रवर्त्तते इति कश्चन सर्वसम्मतः क्रमः । अत्र प्रथमतः ज्ञानस्थानम् । ज्ञानञ्च पूर्वजन्मोपार्जितम्, एतज्जन्तोपार्जितञ्च । तत्र द्वितीयं यज्ज्ञानम्, तच्छिक्षाप्रयुक्तम् । अनयैव शिक्षाया अधिकांशतो जनेषु यतितुमिच्छा जाग्रति । इच्छानुरूप एव यत्नो भवति, यः खलु आत्मनिष्ठो भवति । तदनु च शारीरिकी चेष्टात्मिका प्रवृत्तिर्जायते । 'प्रवृत्तिर्यया, परिवृत्तिरपि ( परिवर्त्तनमपि ) तथा' इति सिद्-धान्तमनुसृत्य शोधपत्रप्रस्तोताऽत्र शिक्षाया अर्थम् । प्राच्यपाश्चात्यपद्धत्या तत्परिभाषाम्, सामाजिकपरिवर्त्तनसिद्धान्तम्, तस्य च कारणम्, विज्ञानशिक्षा - संस्कृतिस्वीकृति - सामाजिकशासनशक्तिद्वारा च सामाजिकं परिवर्त्तनं प्रतिपादयति । अत्र निबन्धे परिवर्त्तनपदेन गुणात्मकं परिवर्त्तनमिष्टम् । तच्च स्वाभाविकं न भवितुमर्हति । शिक्षयैव तत्कर्त्तुं सम्भवमिति सारः ॥ - स. )**

**विद्या विवादाय धनं मदाय शक्तिः परेषां परिपीडनाय ।**
**खलस्य साधोर्विपरीतमेतज्ज्ञानाय दानाय च रक्षणाय ॥**

नीतिशास्त्रस्य एका उक्तिः अस्ति – 'ज्ञानेन हीनाः पशुभिः समानाः' । अर्थात् ज्ञानरहिताः जनाः पशुतुल्याः भवन्ति । ज्ञानस्य प्राप्तिः जनाः शिक्षया एव कुर्वन्ति । शिक्षा एव मनुष्यस्य पथप्रदर्शिका भवति । वर्तमाने लोकेतान्त्रिकशासनप्रणाल्यां शिक्षया विना जनः जीवितुं न शक्नोति । लोकतन्त्रे शिक्षा एव सर्वोपरि भवति अपि च – 'लोकतन्त्रम्' नाम केवलम् एका शासनव्यवस्था इति नास्ति, परञ्च वास्तविकरूपेण इदमेकं सर्वाङ्गीणजीवनदर्शनमस्ति । अस्य जीवनदर्शनस्य सर्वोपरि सत्यं 'जनः' वर्तते । अतः जनतन्त्रात्मकव्यवस्थायां शिक्षायाः प्रप्रमुखं दायित्वं भवति यत् – सा समाजे वैचारिकचेतनायाः विकासं कुर्यात्, यन 'जनः' इत्यस्य सत्ता धनवत्ता, निर्धनता, विद्वत्ता, क्षेत्रीयतादिभेदभावैः सदा सर्वदा उपरि स्यात् । अतः जनतन्त्रप्रधानसमाजस्य संरचनायां केन्द्रबिन्दुः 'जनः' एव भवति। जनतन्त्रप्रधाने समाजे विशिष्टरूपेण शिक्षितसमाजे सामाजिकपरिवर्तनाय शिक्षायाः भूमिका स्यात् । यतो हि – छात्रेषु परिमितविमर्शात्मकदृष्टिं प्रसारयन्ती शिक्षा छात्रान् सामाजिक-परिवर्तनाय सज्जीकरोति । परञ्च तादृशं सामाजिकपरिवर्तनं समाजे अङ्गीकृत – जीवनमूल्यरूपेण पूर्वमेव उपस्थितं भवेत् । डॉ. राधाकृष्णमहोदयस्य कथनानुसारं – शिक्षा परिवर्तनस्य साधनम् । पूर्वं यत्कार्यं समाजेषु परिवार-धर्म-सामाजिक-राजनैतिक-संस्थाद्वारा कार्यते स्म, तत्कार्यमद्य शिक्षा-संस्थाभिः कार्यते ।

प्रसङ्गऽस्मिन् पूर्वं शिक्षायाः अर्थः, परिभाषायाः विवरणं उच्यते –

**शिक्षायाः अर्थः –**

'शिक्षा' इति संस्कृतभाषायाः शब्दः वर्तते । यस्य व्याकरणानुसारम् अर्थः भवति – 'विद्यायाः ग्रहणम्' । ('शिक्ष् – विद्योपादाने' भ्वादिः आत्मनेपदी, सि. कौ.) । विद्यायाः प्रत्नतमानि स्रोतांसि वेदाः सन्ति । अत्र शिक्षकः नाम गुरुः, यः विद्यां ददाति । शिक्ष्यः नाम शिष्यः यः विद्यां गृह्णाति । अस्याः प्रक्रियायाः लाभद्वयमस्ति । 1. सांसारिकाभ्युदयः, 2. निःश्रेयसप्राप्तिः च ।

**शिक्षायाः परिभाषाः – (प्राच्यदृष्ट्या)**

1. न हि ज्ञानेन सदृशं पवित्रमिह विद्यते । (गीता 4/38)
2. अथाधिविद्यम् । आचार्यः पूर्वरूपम् । अन्तेवास्युत्तररूपम् । विद्यासन्धिः । प्रवचनं सन्धानम् । इत्यधिविद्यम् । गुरुशिष्ययोः मध्ये विद्यार्जनाय प्रवचनद्वारा या प्रक्रिया संगच्छते सा शिक्षा (विद्या) । (तैत्तिरीयोपनिषद्)
3. मानवान्तर्निहितदैवात्मस्वरूपाभिव्यञ्जनमेव शिक्षा – स्वामिविवेकानन्दः ।
4. बालक मनुष्ये च शारीरिक-मानसिकाध्यात्मिकशक्तीनाम् उत्तमोत्तमसर्वाङ्गीणविकास एव शिक्षा – महात्मा गान्धी ।

**शिक्षायाः परिभाषाः – (पाश्चात्यदृष्ट्या)**

1. स्वस्थे शरीरे स्वस्थं मनः । – अरस्तु
2. उत्तमनैतिकचरित्रस्य विकासः एव शिक्षा । – जॉन फ्रोड्रिक हेर्बट्
3. शिक्षा मानवशक्तीनां निहितयोग्यतानां वा विकासोऽस्ति । – कॉलसनिक्
4. शरीरात्मनोः पूर्णत्वप्रदानमेव शिक्षायाः कार्यम् । यत्र श्रेष्ठगुणानां समन्वयं करोति । – प्लेटो

**किं नाम सामाजिकपरिवर्तनम्**

मनुष्यः सामाजिकः । समाजस्य संरचना मनुष्याधीना । समाजस्य मूलाधारः मानवानाम् अन्तःक्रियाः एव । ताश्च अन्तःक्रियाः निरन्तरतया परिवर्तनशीलाः, तस्मात् कारणात् समाजोऽपि परिवर्तनशीलः । एतद् परिवर्तनं वयं प्रतिक्षणं साक्षात्कुर्मः अनुभवामः च । केचन समाजाः शीघ्रं, अन्ये च मन्दं परिवर्तन्ते । एतत् परिवर्तनं देश-कालावच्छेदेन सर्वेषु समाजेषु द्रष्टुं शक्नुमः । तत् परिवर्तनं नास्तीति न, परञ्च परिवर्तनस्य गतिः मन्दा भवति इति । अधुना एवं पश्यामः यत् 'शिक्षा' अस्मिन् सामाजिकपरिवर्तने कथं साहाय्यमाचरति इति । सामाजिकपरिवर्तने बहूनि परिवर्तनानि आयान्ति तेषु मुख्यानि पञ्चप्रकारकाणि परिवर्तनानि सन्ति । तद्यथा –

1. सामाजिक-सांस्कृतिक-बौद्धिकमूल्येषु परिवर्तनम् ।
2. संस्थागतं परिवर्तनम् ।
3. सम्पदः सामाजिकपुरस्काराणां वितरणप्रणालीगतं परिवर्तनम् ।
4. सामाजिककार्यकर्तृषु परिवर्तनम् ।
5. कार्यकर्तृणाम् अभिवृत्त्यभिरुच्यादिषु च परिवर्तनम् ।

**सामाजिक-परिवर्तन-सिद्धान्तः**

1. **पारम्परिकः, दार्शनिकः, धार्मिकः च सिद्धान्तः** -

विश्वस्य अस्तित्वं प्रयोजनपरकमिति सर्वे दार्शनिका: आमनन्ति, तथा च प्रत्येकमपि वस्तु पूर्वनिश्चित रूपेण रूपमाधते, तया शक्त्या एव मानवसहितं समग्रोऽपि संसार: गतिशीलं तया विना तृणमपि न चलति ।

2. **परिवर्तनं विश्वस्य सहजस्वभावः** -

सम्पूर्णजगति सदा-सर्वदा परिवर्तनं जायते । क्षणमेकमपि विना परिवर्तनेन न गच्छति । यथा - निमेषपरिवर्तनं, होरापरिवतनं, दिनपरिवर्तनं, मास-वर्ष-शताब्दी-युगादिप-रिवर्तनम् । तेनैव सिद्धान्तेन सामाजिकपरिवर्तनमपि तार्किकरूपेण चक्रवत् जायते ।

3. **राजनैतिक-आर्थिककारकसिद्धान्तः** -

विभिन्नदेशेषु समये-समये राजनैतिकपरिदृश्ये परिवर्तने सत्यपि समाज परिवर्तन-मायाति । तथैव आर्थिकघटकानि अत्र कारकाणि इति एक: पक्ष: ।

**सामाजिकपरिवर्तनस्य कारणभूततत्त्वानि** -

सामाजिकपरिवर्तनस्य कारणं जनसमुदायस्य संस्कृतिः । विभिन्नदेशानां, धर्माणां, आर्थिक-व्यवस्थानां तुलनात्मकाध्ययनेन एतद् ज्ञायते यत् संस्कृतौ परिवर्तनं सामाजिकपरिवर्तनकारणमिति । संस्कृत्या सह भौतिक-वैज्ञानिक-राजनैतिककारणानि अपि महत्त्वपूणानि सन्ति । कानिचन परिवर्तन-कारकाणि अत्र प्रस्तूयन्ते -

1. **प्राकृतिककारकम्** -

विज्ञानेन सर्वं साधितमिति मन्यमानो मानवः अद्यापि प्रकृतेरुपरि प्रभुत्वं स्थापयितुं न क्षम: । अत्र प्रकृति: स्वतन्त्रा सती सामाजिकपरिवर्तनस्य कारकत्वं वहति । विशेषरूपेण इयं प्रकृतिः यदा स्वीयं रौद्ररूपं धरति । यथा - भूकम्पः, जलप्रलयः, भीकररोगाणां व्याप्तिप्रभृतयः ।

2. **वैज्ञानिककारणानि** -

विज्ञानस्य प्रबलतमप्रभाव: अद्यत्वे सर्वत्र दरीदृश्यते । विज्ञानेन जीवनस्य धारा, रीतिः, कार्यं च परिवर्तितम् । यथा - संगणकयन्त्रं, कारयानं, जंगमदूरवाणीयन्त्रं, दूरदर्शनं, गृहोपयोगीनि यन्त्राणि । अस्य प्रभावकारणात् समाजे क्षिप्रपरिवर्तनं गुणपक्षेदोषपक्षेऽपि दृश्यते। यथा -

अ. सामुदायिकजीवनक्रमस्य ह्रासः ।

आ. स्त्रीपुरुषानुपाते असन्तुलनकारणात् परिवारे समस्याः ।

इ. मानसिकसंघर्षः अपरिमितस्पर्धा ।

ई. मनोरञ्जनस्य व्यापारीकरणम् ।

उ. संयुक्तकुटुम्बव्यवस्थायाः विघटनम् ।

ऊ. राजनैतिक–महायुद्धं, भारतपाकिस्तानविभजनम् ।

ए. आर्थिकशोषणं, विषमतादिकम् ।

ऐ. नगरीकरणम्, औद्योगिकीकरणम्, संघवाद: आदिकम् ।

एतान् अतिरिच्य अन्यानि कारणानि कारकाणि च सामाजिकपरिवर्तनम् आनयन्ति ।

**शिक्षाद्वारा सामाजिकपरिवर्तनम् –**

1. **विज्ञान–शिक्षाद्वारा –**

आध्यात्मिकमूल्यानां ह्रास:, परम्परागतसांस्कृतिकभावनासु भीषणकुठाराघात: सञ्जात: । वैज्ञानिकदृष्टे: कारणात् गुण–दोष–दृष्ट्या समाजे परिवर्तनमागतम् । अद्यत्वे आधुनिकवैज्ञानिकविषयेषु एव न समाजशास्त्र, शिक्षाशास्त्र, दर्शनशास्त्र, मनोविज्ञानादिष्वपि मार्क्स, हॉब्स, स्किनर, पॉवलव, अरस्तु, एडम्स, पेस्तालॉजी, मारिया मॉन्टेसरी, नन, रॉस, प्रभृतय: विदुषां विचारै: सह वयं किमर्थं मनु–वसिष्ठ–कौटिल्य–व्यास–कपिल–कणाद–पाणिनि–चरक–शंकर–वल्लभादोनां विचारान् ज्ञातुमेव न इच्छाम: । सामाजिकपरिवर्तन विघटने च सर्वोपरि स्थितं बलवत् कारणं विज्ञानस्य वैज्ञानिकदृष्टिकोणस्य च विकास: विद्यते । शिक्षया सामाजिकपरिवर्तनस्य अनुगमनम् आधुनिकभारतस्य सामाजिकावश्यकतानां कारणत: शैक्षिकं परिवर्तनमस्ति । वर्तमानभारते धर्म–निरपेक्षराज्यं समाजवादिसमाजस्था–पनम्, औद्यागिकीकरणमं, संगणकीकरणम् इत्यादिकं पुरस्कृत्य शिक्षास्वरूपं परिवर्त्यमानं दृश्यते ।

2. **संस्कृतेरात्मीकरणद्वारा –**

प्रमुखतया संस्कृतेरङ्गद्वयम् अस्ति – अ. भौतिकसंस्कृति:, आ.अभौतिकसंस्कृति:।

अ. भौतिकसंस्कृति: नाम – गृहं – यन्त्राणि – भोगसाधनानि (मूर्तवस्तूनि) ।

आ. अभौतिकसंस्कृति: नाम – धर्म:, परम्परा, संस्कृति:, भाषा, लोकव्यवहार: विविधकला:, आचारविशेषा: इत्यादय: ।

केचन सांस्कृतिकपरिवर्तनमेव सामाजिकपरिवर्तनं मन्वते । अत: कथ्यते यत् संस्कृत: तादा–त्म्यकरणेन शैक्षिक–परिवर्तनमानयति इति । यथा– दूरदर्शनरूपसंस्कृते: आत्मीकरणेन कृषि:, स्वास्थ्यं, शिक्षा, मनोरंजनं, वार्ता:, यात्रा:, अध्यात्म–राजनीति: इत्यादिविषयेषु नूतनं ज्ञानं समधिगम्यत । तथैव विद्यालयेष्वपि दूरदर्शनाकाशवाणी–संगणकमाध्यमेन नूतनज्ञानप्राप्ति: तद् विकास: च जायते एव । तेनैव कारणेन सिद्धं यत् संस्कृते: आत्मीकरणहेतो: शिक्षायामपि परिवर्तनमनिवार्यम् आगच्छति ।

3. **सामाजिकशासनशक्तिद्वारा –**

यथा – कोठारीशिक्षाआयोग: – 1964, राष्ट्रियशिक्षानीति: – 1968, नूतनशिक्षा–नीति – 1986, राष्ट्रियज्ञानआयोग: 2005, राष्ट्रियपाठ्यचर्यारूपरेखा 2005, प्रभृतिभि:

भारतीयसमाजस्य आवश्यकताः, आकांक्षाः च मनसि निधाय काले-काले शिक्षानीतौ, प्रक्रियासु च परिवर्तनम् आनीतं दृश्यते ।

**उपसंहारः -**

अनया रीत्या समाजद्वारा शिक्षायां शिक्षाद्वारा च समाजे परिवर्तनं जायते इति प्रतिपादितम् । अतः सामाजिकपरिवर्तने शिक्षायाः भूमिका किञ्चिद् विशदीक्रियते । वस्तुतः शिक्षा साक्षात् सामाजिकपरिवर्तनकारणं नैव भवति, परन्तु शिक्षायाः प्रभावः गणनीयो भवति । समाजेऽपि प्रति-ष्ठितव्यक्तिभिः शिक्षायाः प्रयोगः निश्चितोद्देश्येन क्रियते । सति च उद्देश्यपरिवर्तने शिक्षास्वरूपे अपि परिवर्तनं जायत एव । अतः विद्वद्भिः चिन्तकैः इदं प्रतिपाद्यते यत् - शिक्षास्वरूपपरिवर्तनेन भाविसमाजस्य दिशा-दशा च परिवर्तयितुं शक्यते। किन्तु शिक्षायाः परिमितिः वर्तते इति न विस्मरेत्। उदाहरणार्थम् - स्वतन्त्रतायाः प्राप्तेः अनन्तरं धर्मनिरपेक्षराज्यस्थापनार्थं भारते शिक्षास्वरूपस्य परिवर्तनं कृतं, किन्तु अद्यापि सम्पूर्णदेशे धर्मसापेक्षं द्वेष-वैषम्य-वैमनस्यादिकं तथैव दृश्यते, तस्यामेव अवस्थायां जीवाम इति विरोधाभास एव । शिक्षायाः वास्तविकविकासः तदा भविष्यति यदा मनुष्यस्य आत्मविकासः प्रथम स्थाने लक्ष्यरूपेण भविष्यति । तदैव 'विद्ययामृतमश्नुते' इति सर्वोच्चादर्शस्य स्थापना अचिरादेव भविष्यति । इति शम् ।

**सन्दर्भग्रन्थसूची**


1. ओड, एल्. के. (2009) शिक्षा के समाजशास्त्रीय और दार्शनिक आधार, राजस्थान हिन्दीग्रन्थअकादमी, जयपुर ।
2. गौतम, सत्यपाल, (2014) समाजदर्शन, हरियाणा साहित्य अकादमी, पंचकूला ।
3. जायसवाल, सीताराम, (2010) शैक्षिकसमाजशास्त्र, विनोदपुस्तकमंदिर, आगरा ।
4. द्विवेदी, देवीप्रसादः, (2016) प्राच्यशिक्षादर्शनम्, वीरबहादुर प्रकाशन, बनारस ।
5. सच्चिदानन्द, ए. पी., (2015) शिक्षायाः सामाजिकाधाराः, गौरीशप्रकाशन, शृङ्गेरी ।
6. साहु, सोमनाथ, (2014) शिक्षायाः दार्शनिकाधाराः, जगदीशसंस्कृतपुस्तकालय, जयपुर ।
7. पाण्डेय, के. पी. (2012) शिक्षा के दार्शनिक एवं सामाजिक आधार, विश्वविद्यालय प्रकाशन, वाराणसी ।
8. रूहला, सत्यपाल, (2012) भारतीय शक्षा का समाजशास्त्र, राजस्थान हिन्दीग्रन्थअकादमी, जयपुर ।
9. कल्याण, शिक्षाङ्क वर्ष - 62, (1988) संख्या - 1, गीताप्रेस, गोरखपुर ।



**संविदाध्यापकः ( शिक्षाशास्त्रविभागः ),**
**राष्ट्रियसंस्कृतसंस्थानम्,**

क.जे.सोमैयासंस्कृतविद्यापीठम्,
विद्याविहारः, मुम्बई-७७

★★★

# समावेशिशिक्षायाः समस्याः सम्भावनाश्च

✍ डा. सचिनकुमारः

**(अद्य विश्वस्मिन् विािसिनि विकसिते च विश्वे सवाधिको गभीरः प्रयासः शिक्षाक्षेत्रे क्रियमानोऽस्ति । यतः समस्तानां समस्यानां समाधानं शिक्षा-माध्यमेनैव शक्यम् । प्रकृतिः सर्वेभ्यो हस्तद्वयेन स्वोपहारं प्रदातुं प्रतिबद्धा । विज्ञानमपि देयस्य कृते ग्रहीतृषु भेदं न करोति तर्हि कोऽपिज नः कथं वा तस्माद् वञ्चिताः स्युः । अतो युनेस्कोप्रभृतिसंस्थया प्रकृतिविज्ञानोपहारः सर्वेभ्योऽपि स्यादिति धिया बहूनि यतनानि कुर्वन्ति । भारतसर्वकारेणापि बहु किमपि तत्रानुष्ठितानि अनुष्ठीयमानानि च सन्ति । संवेदनशीलाः शिक्षाविदोऽपि तत्र स्वीयं हविर्यच्छन्ति । तादृश एव कश्चनासौ पत्त्रप्रस्तोता समावेशिशिक्षासमस्यासम्भावने अधिकृत्य प्रामाणिकं विवरणमत्र प्रस्तौति । तथाहि समाावेशिशिक्षा नाम का? समये-समये सर्वकारीय जनगणनाधारेण विविधविधदिव्याङ्गानां संख्यास्थितिः, समावेशिशिक्षायै सामाजिकशैक्षिकार्थिकसमस्या का ? समावेशनस्य प्रत्यह्वानस्य सप्तनिवारणोपायाः, युनस्कोद्वारा प्रबन्धकेभ्यः प्रदर्शितनिर्देशाः, सर्वकारीयप्रयासाः निःशक्तजनेभ्यः राष्ट्रियसंस्थानानि कानि ? इत्यादिविषयं परामृश्य 'सवेभ्यः शिक्षा भूयादि'ति कञ्चन मनोभावं प्रकटयति ॥ - स.)**

समावेशिशिक्षा समावेशनं (lnclusion) वा 'अपवर्जनम्' (Exclusion) इत्यस्य विपरीतार्थकशब्दोऽस्ति । यस्यार्थः पृथक्करणं निषेधीकरणं वा भवति । अपवर्जनं हि प्रकृतितः नकारात्मकम् अनुपयुक्तञ्च भवति, अत एव अशक्तच्छात्रेभ्यः कृतानां विशिष्टानां प्रावधानानां विद्यालयानां स्थापनेन अपेक्षितलाभो नाभवत्, यतः संवेगात्मक-सर्जनात्मक-सामाजिकविकासस्य स्वीकृतेश्च दृष्ट्या एते छात्राः वंचिताः एव सन्ति । विद्यालयेषु अध्ययनरताः सर्वेऽपि छात्राः काञ्चिद् विभिन्नतां विशेषयोग्यतां वा धारयन्ति । विभिन्नतेयं विविधा भवति । तद्यथा सामाजिक-आर्थिक-बौद्धिक-संवेगात्मक-शारीरिक-मानसिक-पारिवारिकपृष्ठभूमि-भाषा-धर्म-संस्कृत्यादीनां विभिन्नता । एताः विभिन्नताः स्वीकृत्य संकलय्य संयोज्य प्रत्येकमपि बालकं (सर्वेषां इतरच्छात्रैस्सह) स्वीयावश्यकतानुगुणम् अधिगमस्य अभिवृद्धेः विकासस्य च उपयुक्तावसरप्रदानं समावेशिशिक्षायाः प्रमुखम् उद्देश्यं भवति । यथोक्तमपि – "Inclusive education while recognizing student's vast

diversity, accepting them, gives every child the equal chance of cognitive, emotinal and creative development to the utmost".[1]

समावेशिनी शिक्षा न केवलम् अशक्तेभ्य: बालेभ्य: एव; प्रत्युत उपर्युक्तवैभिन्नययुक्तेभ्य: समेभ्योऽपि बालेभ्य: सम्भूय शिक्षाप्रदानमेव भवति । संयुक्तराष्ट्रशैक्षिकवैज्ञानिक-सांस्कृतिक-संघटनस्य (UNESCO Report-2008) प्रतिवेदने स्पष्टतया उल्लिखितं यत् अपवर्जनेन ग्रसितेषु छात्रेषु ३७% छात्रा: आर्थिकदृष्ट्या हीना: भवन्ति । सत्यमिदं यत् अशक्तच्छात्रा: अपवर्जनेन सर्वाधिकं प्रभाविता: भवन्ति । एतेषु शैक्षिकापवर्जनं स्पष्टरूपेण द्रष्टुं शक्यते । अत: समावेशिशिक्षा समावेशनं वा 'सर्वेभ्य: सामान्यविद्यालयेषु शिक्षा' उक्तेरस्या: प्रत्ययं स्पष्टयति ।

समावेशिशिक्षाया: अर्थ:, तदन्तर्गतकाठिन्यानि तेषां निराकरणोपायाश्च सामान्यच्छात्रै: इतर-च्छात्राणाम् आवश्यकतामवधार्य सरलतया अवगन्तुं शक्यन्ते । शारीरिक-मानसिकादिन्यूनतानां कारणेन अशक्तबालकानाम् अध्ययनसम्बद्धिसु आवश्यकतासु विभिन्नता भवति । यथा दृष्टिबाधित: कश्चन छात्र: सामान्यबालकानामिव दृष्ट्वा पठितुं नार्हति, किन्तु श्रुत्वा स्पृष्ट्वा च स: बहु किमपि अधिगच्छेत् । इत्थं तस्य छात्रस्य आवश्यकता: अपरेभ्य: भिन्ना: भवन्ति । अत: एतादृशच्छात्र: 'विशेषावश्यकतायुक्त: छात्र:' कथ्यते । एवमेव कश्चित् छात्र: श्रवणबाधित:, विकलाङ्ग: विकास-रहितश्च भवति, केचन अधिगमे किमपि काठिन्यमनुभवन्ति । एतेषां काठिन्यानामाधारण तादृशच्छात्राणाम् अधिगमरीतिष्वपि वैभिन्न्यमेव भवति । प्रत्येकस्य विशिष्टावश्यकतायुतस्य छात्रस्य अधिगमस्य रीति: समस्याश्च भिन्ना: भवन्ति । एतादृग्भि: विभिन्नताभिस्सह तेभ्य: सामान्यवातावरणे शिक्षाप्रदानमेव वास्तविकरूपेण समावेशिशिक्षा भवति । अत्रोल्लेखनीयं यत् विशिष्टावश्यकतायुक्त-च्छात्रेभ्य: अशक्त-नि:शक्त-विकलाङ्गदिव्याङ्ग-सदृशशब्दा: प्रचलिता: । येषु 'दिव्याङ्ग:' सर्वा-धिकनूतनशब्दोऽस्ति, यस्य प्रचलनं एतादृशेभ्य: छात्रेभ्य: प्रारब्धम् ।

सत्यमिदं यत् विशेषयोग्यतावद्भ्य: बालेभ्य: पृथक्तया केचन विशेषविद्यालया: भवन्ति । परमिदमपि सत्यमेव यत् विशेषयोग्यतावतां बालानां संख्याया: समनुपाते विशेषविद्यालया: नैव वर्तन्ते। भारतसर्वकारस्य जनगणनाया: तथ्यानामवलोकनेन ज्ञायते यत् भारतवर्षे २००१ तमे वर्षे नि:शक्त-जनानां संख्या जनसंख्याया: २.१३ प्रतिशतम् आसीत्, यच्च २०११ तमे वर्षे २.२१ प्रतिशतमभवत् । २०११ तमाब्दस्य नूतनसूचनानाम् अनुसारं नि:शक्तजनानां संख्याया: (२.६८ कोटि:) ६९.५ प्रतिशतभाग: ग्रामीणक्षेत्रेषु निवसति । २०११ तमाब्दस्य जनगणनानुसारं नि:शक्तजनेषु स्त्रीणां संख्या ४४.१ प्रतिशतमासीत् । २००१ वर्षात् २०११ वर्षाणां मध्ये नि:शक्तजनेषु स्त्रीणां संख्यायां २७.१ प्रतिशतस्य वृद्धिरभवत्, पुरुषाणां प्रतिशते १८.९ वृद्धिर्जाता । एकमपरमपि सत्यमस्ति यत् विशेष-विद्यालयेषु छात्रा: समानकाठिन्यवतां छात्रैस्सह निवसन्ति । तत्रैव विविधैरनुसन्धानै: इदं सिद्धं जातं यत् सामान्यच्छात्रैस्सह अध्ययनेन विशेषच्छात्राणां विकासस्याधिका: सम्भावना: उत्पद्यन्ते । अत एव समावेशिशिक्षायां विशेषावश्यकतान्तश्छात्रा: सामान्यच्छात्रैस्सह उपाविश्य सामान्यरूपेण अध्याप्यन्त । येन सामान्य-विशेषच्छात्रेषु कश्चिदपि भेदभाव: न स्यात्, अपि च ते पारस्परिकसहयोगेन सुष्ठु

अध्ययनं कुर्यु: । समावेशिशिक्षाया: इदमपि व्यापकलक्ष्यं प्रतीयते यत् सम्भूय अध्ययनेन भविष्ये समाजे सामान्यजना: विशेषावश्यकतावतां जनानां प्रयोजनानि उत्तमतया अवगत्य अपेक्षितसंवेदन-शीलतां प्रदर्शयेयु: । भारतीयसंविधानमपि जाति-वर्ग-लिङ्ग-धर्म-स्तराधारै: सर्वविधभेदभावं निषिध्य समावेशिसमाजस्यैकाम् आदर्शस्थितिं प्रस्तौति । अस्मिन् परिप्रेक्ष्ये बालकं जातीय-वर्गीय-लैंगिक-शारीरिक-मानसिक-सामाजिक-आर्थिकदृष्टिभि: भिन्नं न दृष्ट्वा, स्वतन्त्राधिगन्तु: रूपेण द्रष्टव्य: । येन विद्यालये बालकस्य समुचितसमावेशनाय समावेशिशिक्षाया: वातावरणस्य निर्माणं सम्भवेत् । भारतसर्वकारेण निर्मित: 'नि:शल्कानिवार्य-शिक्षाधिकाराधिनियम: (२००९)'[2] अपि ६ त: १४ वर्षी-यविशेषावश्यकताया: छात्रैस्सह सर्वेभ्योऽपि बालेभ्य: प्रतिवेशे निकटतमे विद्यालये नि:शुल्कानिवार्य-शिक्षाया: व्यवस्थां करोति ।

समावेशिशिक्षा विशेषबालेभ्य: सामान्यजीवनयापनार्थं दैनन्दिनजीवनस्य गतिविधिषु प्रतिभा-गार्थञ्चावसरं प्रदाय तेषां वैयक्तिकं सामाजिकञ्च कौशलमभिवर्धयति । तेभ्य: समवयस्कच्छात्रैस्सह सामान्यसम्बन्धस्थापनाय आत्मानं समाजस्याभिन्नमङ्गमवगन्तुञ्च अवसरान् कल्पयति । विशिष्ट-च्छात्रैस्सह समावेशिशिक्षा सामान्यच्छात्राणां विकासेऽपि महदुपकुर्यात् । अनया शिक्षया सामान्यच्छा-त्रेष्वपि धैर्य-क्षमा-दया-प्रीति-सहयोग-सहिष्णुता-नि:स्वार्थतादीनामुच्चमानवीयगुणानां विकास: भवति। समावेशनेन छात्रा: विविधतां स्वीकर्तुमधिगच्छन्ति । समावेशिशिक्षया शिक्षा 'न्यूनेभ्य: स्वल्पेभ्यो वा शिक्षा' इत्यस्मात् 'सर्वेभ्य: शिक्षां' प्रति याति । भारतवर्षे वैधानिकरूपण मान्यताप्राप्तविशेषावश्यक-तानां वर्णनं सर्वप्रथमं 'नि:शक्तव्यक्ति (समानावसराधिकारसंरक्षणपूर्ण-प्रतिभागिता) अधिनियम:, १९९५'[3] इत्यस्मिन् कृतम् । तदनु २०१६ तमे वर्षे नि:शक्तजन-संरक्षण-अधिनियमे[4] विस्तरेण वर्णनमस्ति । यस्मिन् एकविंशतिविधदिव्याङ्गतां वर्णयन् वर्तमानसामाजिकपरिप्रेक्ष्ये दिव्याङ्गजनानां समुचितसंरक्षणस्य विधानं कृतमस्ति ।

## समावेशिशिक्षाया: समस्या:

कस्यापि उद्देश्यस्य प्राप्तौ समस्यारूपेण अवरोधा: अपरिहार्यत्वेन संलग्ना: भवन्ति । अव- रोधै: सङ्केतोऽयं प्राप्यते यत् व्यक्ति: समूहो वा उद्देश्यमवाप्तुम् अभिप्रेरितोऽस्ति, अपि चतदर्थं स: अधिकशक्त्या क्षमतया च कठिनप्रयत्नं कर्तुं सक्षमोऽस्ति । समावेशिनी शिक्षाऽपि उच्चोद्देश्यपूर्ण: कश्चित् कठिन: प्रयास एव । यूनेस्को इति वैश्विकसंघटनस्य प्राथमिकशिक्षाविभागेन २०१३ तमेऽब्दे 'समावेशिनी शिक्षा: विकासाय व्यापकमार्गदर्शक:'[5] इत्यस्मिन् अभिलेखे समावेशिशिक्षाया: समस्यानां त्रिविधविभाग: कृत: । तद्यथा -

1. सामाजिकसमस्या: (Social Problems)
2. शैक्षिकसमस्या: (Educational Problems)
3. आर्थिकसमस्या: (Finantial Problems)

समावेशिशिक्षायाः क्रियान्वयने एताः समस्याः महाबाधामुत्पादयन्ति । अथात्र एतासां प्रमुखसमस्यानां तदन्तर्भूतानां विभिन्नोपभेदानाञ्च संक्षिप्तं समालोचनं प्रस्तूयते –

**१. सामाजिकसमस्याः**

i. विशिष्टच्छात्रान् प्रति नकारात्मकं चिन्तनम् ।
ii. विभेदनं रूढिवादिता च ।
iii. विशिष्टशिक्षायाः विकल्पः ।
iv. गभीरतायाः अभावः ।
v. परिवर्तनं प्रति प्रतिरोधात्मकाभिवृत्तिः ।
vi. अभिभावकानामसहयोगः ।
vii. लैंगिकभेदः ।
viii. संवेगात्मकसमस्याः ।

**2. शैक्षिकसमस्याः**

ii. विविधतां प्रति संवेदनहीनता ।
iii. अनम्यपाठ्यक्रमं प्रति आसक्तिभावः ।
iv. विशिष्टशिक्षां प्रति आग्रहः ।
v. शैक्षिकस्तरहीनतायाः आशंका ।
vi. प्रतिस्पर्धिभावनायाः अभावः ।
vii. शिक्षकाणां विरोधः ।
viii. प्रशिक्षितशिक्षकाणामभावः ।

**3. आर्थिकसमस्याः**

i. पर्याप्तानुदानस्याभावः ।
ii. प्राप्तानुदानस्यार्थहीनव्ययः ।
iii. धनस्य व्ययाधिक्यम् ।

**समावेशनस्य प्रत्यह्वानस्य निवारणम्**

एतादृशानां विभिन्नानां विशेषावश्यकतानामवगमनात्परं प्रश्नोऽयमुदेति यत् एतावत् – विविधताभिस्सह विशिष्टबालकाः सामान्यविद्यालयेषु पाठयितुं शक्यते न वा? प्रायः उत्तरमिदमायाति यत् नैव । यतः समावेशनस्य सन्दर्भे जनसामान्यस्य 'विचारः' भवति यत् यदि बालके काऽपि निःशक्तता भवति चेत् सः पृथक् विद्यालयं गच्छेदिति । विचारोऽयं परिवर्त्यते चेत् समावेशनस्य क्रियान्वयनं नाधिकं कठिनम् । समावेशिशिक्षायाः अपेक्षितपरिवर्तनार्थम् इदमप्यावश्यकं यत् अस्याः प्रणाल्याः सम्पूर्णकार्यक्रमः सिद्धान्ताधारितः स्यात्, यस्मिन् प्रतिभागिता विकासश्च दृष्टिगतौ स्याताम्। अपि चैतदर्थं कठिनपरिश्रम-आवेष्टन-वचनबद्धता-दूरदर्शिनेतृत्त्वञ्च अपेक्ष्यन्ते । अथाग्रे कचन उपायाः प्रस्तूयन्ते, यैः समावेशिशिक्षायाः समुचितं क्रियान्वयनं सुष्ठु समावेशनं वा सम्भवेत् ।

- **दृष्टिकोणपरिवर्तनम्** – समावेशिशिक्षायाः सुष्ठु क्रियान्वयनाय सर्वप्रथमं सकारात्मकः दृष्टिकोणः अपेक्ष्यते । प्राचार्यः, शिक्षकः, शिक्षकेतरकर्मकरः, विशिष्टावश्यकतावतां बाला-नामभिभावकाः, निःशक्तेतरसहपाठिच्छात्राः तेषामभिभावकाश्च सर्वेऽपि सम्भूय मतैक्येन विशेषावश्यकतावतां छात्राणां काठिन्यानां निवारणाय तत्परास्स्युः । तदैव निःशक्तबालानां समावेशनं सामान्यबालकैस्सह सम्भवेत् ।
- **शान्त-निर्बाधवातावरणयुक्तविद्यालयः** – प्रायः दृश्यते यत् व्हीलचेयर ट्राइसाकिल इत्यनयोः प्रयोक्तारः छात्राः विद्यालयस्य सर्वेषु कक्षेषु (प्रयोगशाला-पुस्तकालय-शौचालया-दिषु) गन्तुं न प्रभवन्ति । अतः समावेशिशिक्षायै विद्यालयभवनस्य उचितप्रबन्धनं भवेत् । अपि च तत्रावश्यकसामग्रीणां शैक्षिकसहायतानाञ्च सुष्ठु व्यवस्था भवेत् ।
- **प्रवेशनीतौ परिवर्तनम्** – विद्यालयेषु सर्वविधानामपि सामान्य-विशिष्टावश्यकतावतां छात्राणां प्रवेशव्यवस्था स्यात् । निःशक्ततायाः आधारेण न कोऽपि छात्रः प्रवेशात् वंचितः भवेत् । समावेशिशिक्षायाः मुख्योद्देश्यानि जनसामान्यं यावत् प्रसारयितुं विद्यालयस्य प्रवेश-पञ्जीकरणनीतिषु यथापेक्षितं परिवर्तनमपि कर्त्तव्यम् ।
- **पाठ्यक्रमनिर्धारणम्** – विशेषावपूयकतावतां छात्राणाम् आवश्यकतामवधार्य केन्द्रीयमाध्य-मिकशिक्षापरिषदा विषयचयन एतेभ्यः काचित् शिथिलता भवति । यथा भाषासम्बन्धि-समस्यायाः छात्राः भाषाद्वयस्य स्थाने एकामेव भाषां पठितुं शक्नुवन्ति । कषुचिद् विशिष्ट-विषयेषु गणितविज्ञानादिषु काठिन्ये सति विषयपरिवर्तनमपि कर्तुं शक्यते । विद्यालयः आव-श्यकतानुसारं बालेभ्यः एतेषां सौविध्यानां लाभं प्रदाय सहयोगं कर्तुमर्हन्ति ।
- **नूतनप्रविधिप्रयोगः** – समावेशीशिक्षायाः सफलक्रियान्वयनाय प्राविधिकोपकरणानां रीडिं-गसाफ्टवेयर-युक्तसङ्गणकः, ई-बुक, सान्द्रमुद्रिका, अक्षरसंवर्धकसौविध्ययुक्तप्रक्षेपणयन्त्रा-दीनाम् उत्तमोत्तमोपयोगं विधातुं शक्यते । अनेनैव शारीरिकसमस्याग्रस्तानां छात्राणां कृते नूतनप्रविधियुक्तानि कृत्रिमाङ्गानि सहायकानि भवितुमर्हन्ति ।
- **विशेषज्ञसेवा** – प्रायः सामान्यशिक्षकाः चिन्तयन्ति यत् निःशक्तच्छात्रान् विशेषज्ञशिक्षका एव पाठयितुमर्हन्ति । परञ्च एकस्मिन् विद्यालये एकस्य विशेषज्ञशिक्षकस्य नियुक्तिं कृत्वा तस्य सहयोगन शैक्षणिकरणनीतयः लक्ष्यञ्च निर्धारयितुं शक्यन्ते, तथा सामान्यशिक्षकोऽपि स्वीयकक्षायामेतेषां बालानां समावेशनं कर्तुमर्हति । विद्यालयेषु परामर्शदातणां नियुक्तेः प्रावधानं भवति । एकः कुशलमनोवैज्ञानिकपरामर्शदाता बालकस्य व्यवहारपरिष्कारकार्य-क्रमाणां निर्माणे अनुप्रयोग च सहायकः भवितुमर्हति । अपि च सः अभिभावकैस्सह परामर्शपूर्वकं समावेशनस्य क्रियान्वयने तेषां सहयोगं प्राप्तुमर्हति ।
- **परीक्षायां विशेषप्रावधानानि** – केन्द्रीयमाध्यमिकशिक्षापरिषदा परीक्षायां विशेषच्छात्रेभ्यः नैकानि सौविध्यानि प्रदीयन्ते । येषु मुख्यतः अतिरिक्तसमयः, लेखकस्य व्यवस्था, बृहदक्षर-

युक्तप्रश्नपत्राणां व्यवस्था, दृष्टिबाधितच्छात्रेभ्य: वैकल्पिकप्रश्नपत्रस्य व्यवस्था, स्वलीनता-ग्रस्तच्छात्रेभ्य: वयस्कसहायकस्य व्यवस्था चतानि प्रमुखानि । विद्यालय: यथावश्यकतानुसारं छात्रेभ्य: एतानि सौविध्यानि उपलब्धं कुर्यात् ।

यूनेस्को (2003) द्वारा "Open file on inclusive education : Support Materials for Managers and Administrators."[6] इत्यस्यां पुस्तिकायां समावेशिशिक्षाया: अवरोधानां निवारणाय प्रबन्धकेभ्य: व्यवस्थापकेभ्यश्च अधोलिखितनिर्देशानां स्पष्टमुल्लेखनमस्ति –

1. सम्मतीनां सङ्घटनम् (Mobilize Opinion)
2. सर्वसम्मते: निर्माणम् (Build Concensus)
3. परिस्थिते: विश्लेषणम् (Carry out a Situation Analysis)
4. विधे: परिष्करणम् (Reform Legislation)
5. स्थानीययोजनानां समर्थनम् (Support Local Projects)

**सर्वकारीयप्रयासा:**

1. सर्वासु सर्वकारीयवृत्तिषु आरक्षणमपि च अधिकतमं शैथिल्यमपि क्रियते ।
2. सर्वासु शासकीयशैक्षिकसंस्थासु शासकीयसहायताप्राप्तसंस्थासु च ३% स्थानानि आवश्यक-तया विशेषावश्यकतावद्भ्य: विद्यार्थिभ्य: आरक्षितानि स्यु: ।
3. सुगम्यभारताभियानं नि:सन्देहम् एव उत्तमप्रयास: अस्ति । अनेनाभियानेन आभारतं प्राय: अष्टचत्त्वारिंशत् महत्त्वपूर्णसार्वजनिकभवनानि, पञ्चसप्तति: रेलस्थानकानि, सर्वेषु वायु-यानस्थानकानि, २५% सार्वजनिक-बसयानानि तथा त्रिसहस्रं जनकेन्द्रित-वेबसाइट इत्येतानि विशेषावश्यकतावज्जनानामनुकूलानिउ परिवर्तितानि ।
4. बस-रेलयानादिषु विशेषावश्यकतायुक्तजनाय तस्य एकसहयात्रिकृतेऽपि भाटके न्यूनताया: प्रावधानमस्ति ।
5. रेल-बस-वायुस्थानकादिषु सार्वजनिकस्थलेषु प्रतीक्षालयेषु शौचालयादिषु च एभ्य: विशेष-सौविध्यानां व्यवस्थाया: निर्देशा: सन्ति । एतदर्थम् एवंविधस्थलेषु व्हीलचेयर इत्यस्योप-लब्धताया: व्यवस्था स्यात् । सहैव ब्रेललिपि: ध्वनिसंकेतरूपेण सूचनाप्रदानस्य प्रबन्धोऽपि भवति ।

**नि:शक्तजनेभ्य: राष्ट्रियसंस्थानानि**

भारतवर्षे विशेषावश्यकतावतां जनानां जनसंख्याया: विभिन्नसमस्यानां समुचितसमादानाय नि:शक्तताया: प्रमुखश्रेणीजनेभ्य: अधोलिखितराष्ट्रियसंस्थानानि स्थापितानि –

1. राष्ट्रियदृष्टिबाधितार्थसंस्थानम्, देहरादूनम् ।
2. राष्ट्रियास्थिबाधितार्थ संस्थानम्, कोलकाता ।
3. अलीयावरजंगराष्ट्रियश्रवणविकलांगार्थसंस्थानम्, मुम्बई ।

4. राष्ट्रियमानसिकविकलागार्थसंस्थानम्, सिकन्दराबाद ।

5. राष्ट्रियपुनर्वासप्रशिक्षणशोधसंस्थानम्, कटक ।

6. शारीरिकविकलांगार्थसंस्थानम्, नवदेहली ।

7. राष्ट्रियबहुव्याधिसशक्तीकरणसंस्थानम्, चैन्नई ।

एतानि सर्वाण्यपि संस्थानानि अशक्तजनानां विकाससम्बन्धिप्रशिक्षण-सेवाकार्यक्रमादीनां व्यवस्थां कुर्वन्ति । भारते नि:शक्तजनानां कल्याणसम्बन्धिविविधयोजनानां क्रियान्वयनं तत्र नवीनानु-सन्धानकार्याणां प्रवर्तनञ्च एभिरेव क्रियते । नि:शक्तजनानां समुचितोत्थानाय राष्ट्रिय- पुनर्वासन्यास: तथा तत्क्षेत्रीयकेन्द्राणि-श्रीनगर-लखनऊ-भोपाल-सुन्दरनगर-गुवाहाटीस्थितानि विभिन्नप्रशिक्षणकार्य-क्रमै: नि:शक्तजनेभ्य: व्यापकप्रशिक्षणं प्रदाय पुनर्वासाय साहाय्यं प्रयच्छन्ति । कानपुरनगरे कृत्रि-माङ्गनिर्माणनिगमद्वारा नि:शक्तजनेभ्य: सहायकोपकरणानि निर्मीयन्ते । अत्रोत्पादितान्युपकरणानि भारतीयमानकसंस्थानस्य निर्धारितमानकान् पूरयन्ति ।

सर्वेऽपि मानवा: जन्मन एव समानाधिकारवन्त: भवन्ति । अत: समेषां बालकानां स्वीया-शाऽऽकांक्षाभ्यां सह शिक्षाप्राप्ते: अधिकार: भवति । सत्यमिदं यत् केषुचित् छात्रषु अधिकमवधानं प्रेरणा च प्रदातव्यम् । समावेशिशिक्षाया: अवधारणायां तादशादर्शकक्षाया: कल्पना क्रियते, यत्र सर्वेषां छात्राणामावश्यकता: पूरयितुं शक्यन्ते । तेषु छात्रेषु विशिष्टावश्यकतावन्त: छात्रा: अपि समाविशन्ति । सामाजिकसमावेशनं विशिष्टावश्यकतावतां छात्राणां मौलिकाधिकारोऽस्ति, समावेशि-शिक्षा दायित्वमिदं पालयितुं प्रयतते ।

## सन्दर्भा:

1. डॉ. (श्रीमती) जसवन्त विर्क, अल्का अरोरा, समावेशी शिक्षा के आधार, टवेन्टी फर्स्ट सेन्चुरी पब्लिकेशन्स, पटियाला, 2010 ।
2. Write to Education (2009), Govt. of India.
3. नि:शक्त व्यक्ति (समानावसर-अधिकारसंरक्षण-पूर्णप्रतिभागिता) अधिनियम - 1995ए भारत सरकार ।
4. दिव्यांग जन संरक्षण अधिनियम - 2016, भारत सरकार ।
5. Inclusive Education : A Comparehensive Guide to Development (UNESCO - 2013).
6. UNESCO : 2003.

## सन्दर्भग्रन्थसूची

1. डा. (श्रीमती) जसवन्त विर्क; अल्का अरोरा, समावेशी शिक्षा के आधार, ट्वेन्टी फर्स्ट सेन्चुरी पब्लिकेशन्स, पटियाला, 2010.

2. निःशक्त व्यक्ति (समानावसर-अधिकारसंरक्षण-पूर्णप्रतिभागिता) अधिनियम - १९९५, भारत सरकार
3. दिव्याङ्ग जन संरक्षण अधिनियम (२०१६), सामाजिक सहकारिता मन्त्रालय, भारत सरकार, नवदेहली
4. Inclusive education : A comprehensive guide to development- UNESCO - 2013.
5. Open file on inclusive education : Support materials for managers and administrators- UNESCO – 2013.

**अतिथि-अध्यापकः,**
**शिक्षाशास्त्रविभागः,**
**राष्ट्रियसंस्कृतसंस्थानम्,**
**क. जे. सोमैयासंस्कृतविद्यापीठम्,**
**विद्याविहारः, मुम्बई - 77,**

★★★

# द्व्यर्थो धातुः

✍ब्र. अजयः

**( धातोः फलव्यापाररूपस्यार्थद्वयस्य मुनित्रयभर्तृहरिदीक्षितकौण्डभट्टनागेश-ादिवचनानि समाश्रित्य साधनमत्र प्रदर्शितम् । तत्र सर्वप्रथमं फलस्य व्यापारस्य च शाब्दिकसम्मतं निरूपणम् ततः क्रियायाः साध्यस्वरूपस्य विवेचनम्, व्यापारमात्रस्य धात्वर्थस्वीकारे पञ्चानां दोषाणां निरूपणम्, फलमात्रस्य च धात्वर्थत्वे चतुर्णां दोषाणां प्रतिपादनं सयुक्तिकं कृतं विद्यते । कतिपये शब्दप्रयोगाश्चात्रत्या अभिनन्दनीयाः ।॥ - स. )**

विश्वेषां विदिततरा विषयो यद्-विना व्यापारं फलावाप्तिवाञ्छा वियति कुसुमकल्पना-मात्रमेवेति । विषयेऽस्मिन् न कस्यापि विमतिवर्तते । **'फलव्यापारयोर्धातुः'**[१] इति प्रामाण्यात् धातोरेवार्थौ फलव्यापारौ । तत्रैक एव धातोः शक्तिः फले व्यापारे चैकवृन्तावलम्बिफलद्वयवत् खण्डशः स्वीक्रियते प्राच्यैः । नव्यैस्तुफलावच्छिन्नव्यापारे, व्यापारावच्छिन्नफले च धातोः शक्तिः स्वीक्रियते । यश्च बहुदोषदूषितत्वान्नादातव्यः । तत्र लोके फलमिति यल्लाभाभिलाषया क्रियायां प्रवृत्तिर्भवति तत् 'फलम्' इति भण्यते । यथा-उत्तरदेशसंयोगार्थं चलनक्रियां कुर्मश्चेत् गमनक्रियायाः फलम् उत्तरदेशसंयोग इति निश्चिनुमः । तत्कृते याः याः चेष्टाः क्रियन्ते ताः ताः व्यापार (यत्न) नाम्ना परिगण्यन्ते । यथा-प्रथमं योजना बुद्धौ परिकल्पयति, तदनन्तरं स्पन्दनं करोति, ततः स्पन्दनसमये मध्येमार्गम् उपस्थितानेकाध्वसु निश्चितपन्थानं सञ्चिनुते । पश्चात् तं प्रति चलनम् इत्येवम् उत्तरदेशसंयोगरूपफलनिष्पत्तिं यावत्, यावद् क्रियाकलापो भवति सर्वोऽसौ व्यापाररूप एव। किन्तु फलविषये भिन्नामतिर्वर्तते विदुषाम् । यथा च सामान्यरूपफलं प्रादर्शयत् भर्तृहरिः-**यस्यार्थस्य प्रसिद्ध्यर्थम् आरभ्यन्ते पचादयः । तत्प्रधानं फलं तेषां न लाभादि प्रयोजनम्** (वा. प. 12.18) अर्थात् पुंसां कस्याञ्चिदपि क्रियायां यदुद्दिश्य प्रवृत्तिर्भवति, कर्मारभते तत् क्रियाप्रवृत्युद्देश्यरूपमेव लोके 'फलम्' इत्युदीर्यत इति । स्वरितञितः कर्त्रभिप्राये क्रियाफले (अष्टा. 1.3.72) इत्यत्रापि एतादृक्फलमेवोरीकृतम् । किन्तु-लोकप्रसिद्धस्य धात्वर्थक्रियाप्रवृत्युद्देश्यरूपलक्षणस्यैव फलस्योररीकृते न सर्वत्रेष्टापत्तिः ।

यतो हि-स्वार्थफलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वम्, तत्समानाधिकरणवाचकत्व-ञ्चाकर्मकत्वमिति सकर्मकाकर्मकव्यवस्थां व्यवस्थापयन्ति वैयाकरणाः । तत्र च पूर्वोक्तस्यैव फल-स्यावापे सति 'पत्ये शेते' इत्यादावपि धात्वर्थव्यापारस्य स्त्रीनिष्ठत्वात्, फलस्य च पत्यौ सद्भावात् शीङ अपि सकर्मकत्वापत्तिरापद्येत । यच्च सर्वजनीनानुभवविरुद्धत्वादुपेक्षणीयमेव । अतो फलस्य

परिष्कृतपारिभाषिकरूपं प्रदर्शयाञ्चक्रे नागश:-**फलत्वं च तद्धात्वर्थजन्यत्वे सति कर्तृप्रत्ययसमभि-व्याहारे तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतावत्त्वम्**[2] इति । एवञ्च तद्धात्वर्थ (= व्यापारेण) जन्यत्वे सति तद्धात्वर्थत्वं फलत्वम् इति फलति समासत: । तच्च फलं व्यापारेण निष्पाद्यत्वात् विषेष्यरूपम् । पचतीत्यादिकर्तृप्रत्ययस्थले तु 'पाकानुकूलव्यापार:' इत्यादिविषयीभूतत्वाद् विशेषण-रूपमपि ।[3] एतादृग्विशिष्टफलस्य धात्वर्थव्यापारे अनुकूलत्वसम्बन्धेन, जन्यत्वसम्बन्धेन वाऽन्वयो भवति । तत्रापि-**'फले प्रधानं व्यापार'**[4] इत्युक्तत्वात् कर्तृप्रत्ययस्थले पचतीत्यादौ प्रकाररूपं, कर्म-प्रत्ययस्थले पच्यत इत्यादौ च विशष्यरूपम् ।

तत्र धातो: प्रधानभूतो व्यापार: – तत्र **तद्धात्वर्थफलजनकत्वे सति तद्धातुवाच्यत्वं व्या-पारत्वमि**ति लक्षणेन धात्वर्थफलजनक:, धातोरेवार्थीभूतो भवतीति लक्ष्यते । यं नाना नामभिर्व्याचक्षन्ते विचक्षणा: । यथा-**व्यापारो भावना सैवोत्पादना सैव च क्रिया** (वै. भू. सार: 1.5) अर्थात् यो व्यापार: सैव भावना, उत्पादना, क्रियेति व्याह्रियते । यतो हि-पचतीतिप्रयोगे विवरणेन यो बोधो भवति स एवंविध:-पाकमुत्पादयति, पाकानुकूला भावना, पाकानुकूला उत्पादना=अवयव-शैथिल्यजनको व्यापार:[5] इत्येवमादि । तत्र विवरणविव्रियमाणयोरर्थयोर्भावनाद्यर्थभानसद्भावात् भावना-दयोऽपि व्यापारपर्याया एवेति निश्चीयते । स च व्यापार: कदापि केनापि प्रत्यक्षीकर्तुमशक्यो भवति। तथाहि-एकस्मिन् क्षण उत्पन्नो व्यापार अन्यस्मिन् क्षण एव नष्टो भवति । अत: पूर्वापरी-भूतक्षणनश्वरक्रमिकव्यापाराणां दर्शनासम्भवात् कुतो तदधिकृत्य पचतीत्यादिप्रयोग इति शङ्का स्फ-टत्येव । तदिमां शङ्कां न्यवीवर वाक्यपदीयकारो भर्तृहरि:-**गुणभूतैरवयवै: समूह: क्रमजन्मनाम् । बुद्ध्या प्रकल्पिताभेद: क्रियेति व्यपदिश्यते** (वा. प. 3.8.4) अर्थात् क्षणनश्वराणामपि व्यापाराणां क्रमेणोत्पद्यमानानां गुणभूतानां=तत्तद्रूपेण भासमानानाम् (यथा पचौ अधिश्रयणादि:) अवयवानां वस्तुभूतसमुदायाभावेऽपि बुद्ध्याभेदं प्रकल्प्य समूह इति मन्यते, य: लोके क्रियाख्यया विख्यात: । यथा भाष्ये **'व्यापारसन्तान: क्रिया'**[6] इत्यभ्यधाद्भाष्यकार: । अस्मादेवाभिप्रायादभिप्रेत्याह श्रीकौण्डभट्टोऽपि- 'अयञ्च व्यापार: फूत्कारत्वाध: सन्तापनत्वयत्नत्वादितत्तद्रूपेण वाच्य: । पचती-त्यादौ तत्तत्प्रकारकबोधस्याऽनुभवसिद्धत्वात्'[7] इति । अपि चात्रावधेयं यद्-धात्वर्थक्रिया सर्वत्र साध्यस्वभावैव ग्राह्या । साध्यस्वरूपं च किमित्युदिते प्रश्ने, तत्साध्यस्वरूपं प्रदर्शयामास श्रीकौण्डभट्ट:-क्रियान्तराकाङ्क्षाऽनुत्थापकतावच्छेदकरूपं साध्यत्वमि'[8]ति । अर्थात् यस्मिन्नुच्चारित अन्यासां क्रियाणामाकाङ्क्षाया: निस्तारो जायेत तत्साध्यत्वम् । यथा-पचतीत्युक्ते वक्तुरभिप्रायो यथा सम्पूर्णतयावगम्यते न तथा पाक इत्युक्ते । यतो हि-पाक इत्युच्चारणानन्तरमेव (पाक:) भवति वा भूतो वा भविष्यति वेत्याद्यन्यासां क्रियाणामाकाङ्क्षा पभवत्येव । अतो न सा साध्यस्वभावा । यथा चोदलिखत् भर्तृहरि: – **यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते । आश्रितक्रमरूपत्वात्सा क्रियेत्यभिधीयते** (वा.प.3.8.1) इति । अर्थात् सिद्धं = निष्पन्नं = भूतकालावच्छिन्नं अपाक्षीदित्यादौ, असिद्धं=अनिष्पन्नं=वर्तमानभविष्यत्कालावच्छिन्नं पचति, पक्ष्यतीत्यादौ च यावत्=सर्वं साध्यत्वेन (संपू-र्णाभिप्रायबोधकतया) अभिधीयते सा एव आश्रितक्रमरूपा साध्यस्वभावा क्रियेति प्रोच्यत इति भाव:।

तदेव श्रीकौण्डभट्टोऽपि कीर्तयाञ्चकार ईदृशा वाचा – 'व्यापारस्तु भावनाऽभिधा = साध्यत्वेनाभिधीयमाना क्रिया'[9] इति । तत्रापि क्रियाया अवान्तरव्यापारषु यश्चरमो व्यापारः, यस्यानन्तरं फलमुद्भविष्यति, स एव व्यापारनाम्ना कीर्तितुं युक्तः, अन्ये तु व्यापाराः तदन्तिमव्यापाराय क्रियमाणत्वात् तेऽपि व्यापाररूपेण भण्यन्ते भाक्तरूपेण । यथाभ्यधत्त वाक्यपदीयकृदपि-**अनन्तरं फलं यस्याः कल्पते तां क्रियां विदुः । प्रधानभूतां तादर्थ्यात् अन्यासां तु तदाख्यता** (वा. प. 3.8.15) अर्थात् यथा वेचनक्रियानन्तरं पच्धातोः फलं 'विक्लित्तिः' प्रक्लृप्ता भवति अतो वेचनक्रिया प्रधानभूता । अन्यासान्त्वधिश्रयणप्रभृत्यधः श्रयणपर्यन्तानामवान्तरक्रियाणां वेचनक्रियाया उत्पत्त्यर्थं सत्त्वात् **'तादर्थ्यात्ताच्छब्द्य'मि**ति न्यायेन पच्धात्वर्थव्यापारनाम्ना परिगण्यन्ते ।

## फलव्यापारयोर्धात्वर्थत्वसाधनम्

फलव्यापारौ धात्वर्थावथवामुयोः एकः – फलं व्यापारो वा धात्वर्थ इतिविषये विवदन्तेऽत्र तत्तन्मतेषु पारङ्गतपण्डिताः । तत्र वैयाकरणनयः फलव्यापारावुभौ धात्वर्थाविति स्वीचकार । मीमांसकास्तु फलं धात्वर्थः, भावना तिङर्थ इति, तत्रैव मण्डनमिश्रास्तु फलमात्रं धात्वर्थः, व्यापारः प्रत्ययार्थ इत्युद्गृणन्ति । नैयायिकेषु प्राञ्चः धात्वर्थः फलम्, आख्यातार्थः कृतिर्मन्वते, नव्यास्तु फलं व्यापारौ धात्वभिधेयौ, कृतिर्पुनराख्यातार्थ इति व्याहरन्ते । तत्र शाब्दिकाभिमतमतमेव साध्वित्यग्रे प्रस्तोष्यमाणविषयः । तत्र तावद् यदि धातुः व्यापारमात्रं ब्रवीति न फलमिति संगिरेत, तदाऽनेकप्रयोगानामनिष्टापत्तिः, अनुशासने चासमर्थदोष आपद्येत ।

प्रथमस्तत्र दोषः – धातूनां सकर्मकाकर्मकव्यवस्था न प्रक्लृप्स्यते ।[10] तत्र हेतुः – स्वार्थफलव्यधिकरणव्यापारवाचकत्वम्, स्वार्थव्यापारव्यधिकरणफलवाचकत्वं वा सकर्मकत्वमिति, स्वार्थफलसमानाधिकरणव्यापारवाचकत्वम्, स्वार्थव्यापारसमानाधिकरणफलवाचकत्वं वाऽकर्मकत्वमिति सकर्मकाकर्मकव्यवस्था व्यधायि मध्यशाब्दिकनयेन । तत्र धात्वर्थो व्यापारमात्रं मन्येत तर्हि व्यधिकरणफलवाचकत्वं वा, समानाधिकरणफलवाचकत्वं वा किमाधारकः सिद्ध्येत? स्वीकृते तु फलार्थे तन्नानुपपन्नम् ।

अथ द्वितीयो दोषः-कर्मकर्तरि कृञ्धातोः 'क्रियते घटः स्वयमेव' इत्यमुष्मिन् प्रयोगे कर्मवद्भावेन क्रियमाणाः यगादयो न सेत्स्यन्ति ।[11] यतो हि – कर्मवद्भावविधायकसूत्रेण कर्म- वद्भावः कर्मस्थभावकानां कर्मस्थक्रियाणामेव भवतीति भाष्यकारेण भाष्ये विहितत्वात्[12], अन्यत्रकर्तृस्थभावकानां कर्तृस्थक्रियाणाञ्च कर्मवद्भावस्य निस्तारः सञ्जातः । दशायामस्यां यदि यत्नमात्रं धात्वर्थ इति ब्रुवीत तर्हि, तद्यत्नस्य घटादावचेतनेषु पदार्थेष्वभावात् कर्मस्थभावस्यासत्त्वात् कर्मवद्भावः न स्यात्, गृहीते तु फलस्यापि वाच्यत्वे कृञ्धात्वर्थ (व्यापार) जन्यफलस्योत्पत्तेः कर्मणि घटे सत्त्वात् कर्मस्थक्रियावत् कृञ्धातुरपि कर्मवद्भावमवाप्य यगादिकार्यान् संपादयति ।

फलाभावे ततीयो दोषः – त्यजिगम्योर्पर्यायतापत्तिः ।[13] स चेत्थं – त्यज्धातोः विभागानुकूलव्यापारः अर्थः, गम्धातोश्च संयोगानुकूलव्यापारः अर्थः । तत्र यदि फलस्य धात्वर्थत्वं

निष्काशयेत् तदोभयो: शेषव्यापारौ सममेव स्याताम्, तेन च यत्र प्रयोगे 'ग्रामं गच्छति' इत्यादिषु प्रसङ्गेषु 'ग्रामं त्यजती'ति प्रयोगप्रसङ्ग:, तथैव 'वृक्षं त्यजती'त्यत्र 'वृक्षं गच्छती'ति पर्याय-रूपप्रयोगानिष्टापत्तिरापद्येत । समानार्थत्वात् । अन्यच्च 'त्यजिगम्यो'रिति वचने त्यज्गमिरित्युपलक्षणं तादृशसमानार्थकव्यापारवतान्धातूनाम् । तेन यत्रापि व्यापार: समं भवति द्वयो: धात्वो:, फलमात्रे तु विलक्षणता, तत्तत्स्थलेष्वयं दोष: प्रवर्तेत । फलस्यापि धात्वर्थे स्वीकारे तु दोषनिस्तार: स्पष्ट एव ।

अथ चतुर्थो दोष: प्रदर्श्यते – कृञ्धातो: अकर्मकतापत्ति: ।[14] हेतुरत्रायमवसेय: – पाणिनिना परिपठित 'यती प्रयत्ने' धातो: फलव्यापारौ 'यत्न:' 'यत्नानुकूलव्यापार:' इत्युभौ । तौ यथा कर्तृ-मात्रनिष्ठत्वात् 'स्वार्थफलसमानाधिकरणव्यापारवाचकत्वमकर्मकत्वमि'ति लक्षणेनाकर्मक: 'यती प्रयत्ने' धात्रिति निश्चिनुम:, तद्वत् यत्नमात्रार्थे व्यापारे स्वीकृते तस्य यत्नस्य कर्तृमात्रनिष्ठत्वात् कृञ्धातोरप्यकर्मकत्वप्रसक्ति: स्यात् । अत: तद्वारणाय – उत्पत्तिरूपफलसहितं यत्नादि: कृञर्थ इति स्वीकार्य: । अन्यथा – 'बीजादिना अङ्कुर: कृत:', 'रथो गमनं करोती'त्यादिसदृक्षाणाम्प्रयोगाणां व्यवस्थापि दुरुपपादनीया भवेत् ।

दोषेषु चरम: दोष: प्रदर्श्यते–द्व्यर्थ: पचि: इति भाष्योक्ति: न सङ्गच्छेत ।[15] तथाहि– व्याकरणे, लोके च लब्धवर्ण: भाष्यकार: 'कर्तुरीप्सिततमं कर्म' (अष्टा. 1.4.49) इति सूत्रव्याख्या- प्रसङ्गे 'तण्डुलान् ओदनं पचती'ति वाक्यप्रसाधनाय 'द्व्यर्थ: पचि:' = पच्धातो: एकं विक्लेदनम्, अन्यद् निर्वर्तनम् इति 'फलद्वयं' पर्यजीगणत्, सा च फलद्वयपरिगणनान्तरेण धातो: फलार्थं न सम्भ- वतीति धातो: फलार्थतावश्यमङ्गीकार्या ।

एवं समासत: कतिपयदोषप्रदर्शनपुरस्सरं धातोर्फलवाचकत्वमप्यवश्यग्राह्यमिति प्रतिपाद्याग्रे धात्वर्थव्यापारांशानभिमतपक्षे सम्भावितानां कतिपयदोषानां दिङ्मात्रं प्रस्तूयते ।

प्रथमस्तावद्–यदि धात्वर्थ: फलमात्रमित्यातिष्ठेत तर्हि–सकर्मकाकर्मकव्यवस्थोच्छे-दापत्ति: । यथा पूर्वं निदर्शितं तद्वदत्राप्यवगन्तव्यम् ।[16]

द्वितीय:–घटं भावयतो'त्यत्र यथा णिच्प्रकृतिकभूधात्वर्थफल'स्योत्पत्ते:' घटे विद्यमानत्वात्, फलाश्रयकर्मणि 'घटे' द्वितीया भवति तथैव फलमात्रे धात्वर्थे स्वीकृते 'घट: भवती'त्यमुष्मि-न्प्रयोगेऽपि भूधात्वर्थफलसत्ताया: घट विद्यमानत्वादत्रापि द्वितीयोत्पत्तिप्रसङ्ग:।[17] स एव व्यापारेऽर्थेपि गृहीते व्यापाराश्रयभूतघटस्य कर्तृसंज्ञात्वात्, कर्तृसंज्ञया कर्मसंज्ञाया: निस्तारो भवति । तेन द्वितीयाऽप्यनुपपन्नो भवति ।

तत्र तृतीयो दोष:–लोके किं कृतम् ? इति प्रश्ने पृच्छति, तत्समाधाता पक्वम् इत्युत्तरयति । सत्याञ्चास्यां स्थितौ धात्वर्थव्यापारानभिमतजनानां पक्षे एष: प्रयोग: न क्लृप्त: भवति ।[18] यतो हि – किं कृतम् इत्यत्र का क्रिया कृता भवता? इत्यभिप्रायस्य सत्त्वात् अधिक्रियं प्रश्ने कृते तस्य समाधानमपि क्रियापूर्वकमेव प्रयच्छति, नान्यत्पृष्टे नान्यदाचष्टे 'आम्रान् पृष्टे कोविदारानाचष्टे' इति लोकप्रसिद्धभिया । तत्र फलमेव धात्वर्थ इति मत्वा स्थिते पक्वम् = पाकक्रिया कृतेति समाधानं न सङ्गच्छेत । पुनरपि लोके प्रतमां प्रयोगोस्योपलब्धि: अत: उत्तरेऽस्मिन् व्यापारार्थोऽपि वर्तते । स

चानन्यलभ्यत्वाद्धातोरेव । अन्येप्येतादृक्षाः कतिपयप्रयोगाः यथा–'देवदत्तो गमनवान्' इति प्रयुज्यते लोके । स च गम्धात्वर्थफल'संयोगस्य' कर्तृनिष्ठत्वात् । सम्प्रति फलमात्रे धात्वर्थेऽकांक्षिते ग्रामो गमनवानित्यप्यनिष्टप्रयोगप्रसङ्गः ।[19] यतो हि–संयोगरूपफलस्य द्विष्ठत्वात्=ग्रामरूपकर्मण्यपि विद्य–मानत्वात् । अथ व्यापारेऽपि स्वीकृते 'संयोगानुकूलव्यापारस्य' कर्तृमात्रनिष्ठत्वात्, ग्रामे तु संयोग–मात्रविद्यमानत्वात्, तदनुकूलव्यापारस्यासत्त्वात् ग्रामो गमनवानिति नातिदोषप्रसङ्गः । अपि च – फलमात्राभ्युपगते धात्वर्थे यावत्पर्यन्तं फलं नोत्पस्यति,तावत्पर्यन्तं पाको भवतीति वाक्यप्रयोगोऽशक्यः। यद्यपि लोके तु विक्लित्तिरूपफलमुत्पन्नं स्याद्वा न वा, व्यापारस्य विद्यमाने 'पाकः भवती'तिप्रयोगः सन्दृश्यते । अन्यच्च व्यापारस्याभावेऽपि फले विद्यमाने 'पाको विद्यते' इति प्रयोगापत्तिः, यो लोके सर्वथा विरुद्धो मन्यते । यतो हि – विना क्रियामेतादृशाः प्रयोगाः लोकेन न कदाप्युपायुक्षत । अथ च यावत्पर्यन्तं विक्लित्तिरूपफलन्न जनिष्यते तावत्पर्यन्तमेव 'पाको विद्यते' इति प्रयोगः साधुः, अभिनिर्वृत्ते तु फले 'पाकोऽविद्यत' इति प्रयोगः साधुः । अत इष्टलाभाय, अनिष्टवारणाय च व्यापारार्थोऽप्यावश्यकं धातोः ।

सम्प्रति चतुर्थो अत्यन्तचर्चनीयो दोषः प्रदर्श्यते – धातोः व्यापारार्थमन्तरा समेषां धातूनां धातुसंज्ञैव न प्रकल्पेत ।[20] यतो हि – धातुसंज्ञाविधायकसूत्रे भाष्यकारेण धातुलक्षणं निरमायि यद् – **'क्रियावचनो धातुः'** इति । तत्रैव फण्येतद्विषयमपि व्यवास्थापयद् यत् – वार्त्तिकघटकक्रियाशब्दो व्यापारपर इति । यथा तेनैव गीर्णगिरा तं प्रसङ्गमुपन्यस्यते – **'का पुनः क्रिया? ईहा, का पुनरीहा? चेष्टा, का पुनश्चेष्टा? व्यापारः'** इति । अस्मिन् व्यापारविषये वाक्यपदीयकारस्तु एतावत्पर्यन्तमुदीरयामास यत् – 'भाव एव हि धात्वर्थः'[21] इति । अतः सर्वेषां धातूनां व्यापारवाचकत्वमवश्यरूपेण ग्राह्यम् ।

अथ चरमो दोषः प्रस्तूयते – धातोः फलमात्रार्थे गृहीते 'कर्तृकरणे कृता बहुलम्' इत्यस्य सुप्रसिद्धोदाहरणे – नखैर्भिन्नः = नखभिन्नः, हरिणा त्रातः = हरित्रात इति न सेत्स्यतः।[22] यतो हि – 'समेषां कारकाणां सम्बन्धः क्रियायामेव भवति नन्यत्रे'ति विषयः सिद्धान्तसिद्धः । तत्र धातोः फलमात्रवचने ग्रहणे कृते हरिणा, नखैः इति तृतीयाविभक्तिककारकाणां 'भिन्न' घटक 'भिद्'धातौ वा, 'त्रात' घटक 'त्रैङ्' धातौ वा सम्बन्धः कथं स्यात् ? अपि च विना सम्बन्धं तेषां पदविधिः = समासोऽपि कथं स्यात् । न शक्य इत्यर्थः । अतः तदुपपत्तये धातोः व्यापारार्थोऽपि गृहीतः, तेन तृतीयान्तयोः धात्वर्थव्यापाराभ्यां सम्बन्धात् समास ईषत्करः ।

अत्रैका शङ्का जागर्ति यद् – यदि समेषां धातूनां फलव्यापारार्थौ वर्तेते, तर्ह्यस्त्यादौ धातौ व्यापारः कुतो न दृश्यते? इति । यतो हि – पच्धातौ यदि निरीक्षेत, तत्राऽधिश्रयणप्रभृत्यधः श्रयणपर्यन्तानां व्यापाराणां प्रत्यक्षतया कर्तरि दर्शनं भवति, तेनोत्पाद्यफलस्य 'विक्लित्तेश्च' दर्शनं तण्डुलकर्मणि सरलतया भवति, तद्वदस्त्यादौ प्रत्यक्षतयाऽदृष्टत्वात् अस्त्यादौ व्यापारो वर्तते वा न वेति संशीतिः । तत्राप्येतदेव समाधानं यद्–व्यापारोऽस्त्येव । यावत् प्रत्यक्षादर्शनस्य प्रश्नः वर्वर्ति, तदर्थं प्रोच्यते – "...अन्यत्रा- शेषभावात्तु सा तथा न प्रकाशते"[23] इति । अर्थात् अन्यत्र = सकर्मकादन्यत्र

अकर्मकेषु अशेषभावात् = समानाधिकरणे = समानस्थाने यथा सकर्मकेषु व्यापारः कर्तरि, तद्भाव्य-फलञ्च भिन्नस्थाने वर्तते न तथाकर्मकेषु विद्यते । अत्र तु व्यापारः तज्जन्यफलञ्चैकस्मिन्नेवाधिकरणे = कर्तर्येव वर्तते, तस्माद् यथा सकर्मकषु व्यापारस्य स्पष्टरूपेण प्रकाशो भवति न तथाकर्मकेषु भवतीति भावः ।

**सन्दर्भाः**

1. वैयाकरणभूषणसारः 1.2 ।
2. द्र. परमलघुमञ्जूषा - धात्वर्थनिर्णयः ।
3. विभागजन्यसंयोगादिरूपे पतत्यादिधात्वर्थे विभागसंयोगयोः फलत्ववारणायोभयम् (प. ल.म. -धा.नि.)
4. वै. भू. सारः - 1.2 ।
5. तत्र बीजम् - 'पचति' इत्यत्र वर्तमाने लट् (अष्टा. 3.2.123) इत्यनेन लट् विहितः । स च वर्तमानकालिकव्यापारवाचकधातोः लट्प्रत्ययं विदधाति । तस्मात्तन (पचतिना) बोध्यमानविवरणेष्वपि व्यापारः, भावनेत्याद्यर्थबोधः सहजमेव ।
6. द्र. महाभाष्यम् - भूवादयो धातवः (1.3.1.) ।
7. वै. भू. सारः - 1.2 ।
8. तत्रैव ।
9. तत्रैव ।
10. वै. भू. सारः 1.5 ।
11. तत्रैव 1.6 ।
12. **तथा कर्मस्थभावकानां कर्मस्थक्रियाणां च** (म. भा. वा. 3.1.87)
13. वै. भू. सारः 1.7 ।
14. **कृञोऽकर्मकतोपत्तेर्...** (तत्रैव - 1.5) ।
15. तत्रैव - 1.7 ।
16. तत्रैव - 1.5 ।
17. तत्रैव - 1.5 ।
18. तत्रैव - 1.8 ।
19. तत्रैव - 1.8 ।
20. ...किञ्च क्रियावाचकतां विना धातुत्वमेव न (वै. भू. सारः 1.9) ।
21. द्र. वा. प. 3.8.23 ।
22. वै. भू. सारः 1.9. ।
23. तत्रैव 1.12 ।

**सन्दर्भग्रन्थसूची**

1. वैयाकरणभूषणसारः, कौण्डभट्टः, चन्द्रिका प्रसाद द्विवेदी, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, 2016 ।
2. महाभाष्यम्, पतञ्जलिः, शिवदत्त शर्मा, रघुनाथ शास्त्री, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, 2011 ।
3. परमलघुमञ्जूषा, नागेशभट्टः, लोकमणिदाहाल, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2013 ।

**निगमनीडम्,**
**वेदगुरुकुलम्, पिडिचेड,**
**गज्वेल, सिद्धिपेट,**
**तेलंगाणा - ५०२२७८ ।**

★★★

# कारकत्वं प्रातिपदिकार्थत्वञ्च

✍डॉ. माधवदत्तपाण्डेयः

**(कारकत्वं नाम किमिति ? प्राचीनमतेन नियतोपस्थितिकः प्रातिपदिकार्थः इत्यस्य परिष्कारशैल्या विवेचनम्, प्रातिपदिकार्थलिङ्गेति सूत्रस्य विधायकत्वं, नियामकत्वं वा, तत्रापि अर्थनियमः, प्रत्ययनियम इत्यादिविचारा निबन्धेऽस्मिन् प्रस्ताविताः । कृतोऽत्र विचारः साम्प्रदायिकः ॥ - स.)**

करोति क्रियां निर्वर्तयतीति व्युत्पत्त्या क्रियाजनकत्वं कारकत्वं यद्वा साक्षात्परम्परया वा क्रियान्वयित्वं कारकत्वम् ।

द्वेऽपि लक्षण दूषिते इति मत्वा 'कारके' इति सूत्राधिकारपठितत्वे सति साक्षात्परम्परया वा क्रियान्वयित्वं कारकत्वमिति ।

तद्यथा 'फलव्यापारयोर्धातुः'[1] फलवाचकत्वं व्यापारवाचकत्वञ्च धातोरर्थः । 'देवदत्तः ओदनं पचती'त्यादौ धातुनिष्ठो यद्व्यापारः फूत्कारत्वाधः सन्तापनत्वार्थरूपस्तदाश्रयो देवदत्तः कर्तृसंज्ञां भजते क्रियायां स्वातन्त्र्येण विवक्षितत्वात् ।

तत्र फलत्वं नाम धात्वर्थव्यापारजन्यत्वे सति धातुवाच्यत्वम् । अत्र पच्धात्वर्थव्यापारः फूत्कारत्वाधः सन्तापनत्वादि तज्जन्यं यद् विक्लित्तिरूपं फलं तदाश्रयास्तण्डुलाः कर्मसंज्ञाभाजकाः ।

'काष्ठैः पचति' इत्यत्र फूत्कारत्वाधः सन्तापनत्वव्यापारात्मक क्रियासिद्धौ काष्ठादयः प्रकृष्टोपकारकाः । अतस्तेषां करणसंज्ञेति ।

'विपायौदनं ददाति' इत्यत्र च दाधातोरोदनः कर्म तेन कर्मणा कर्ता विप्रमिच्छति सम्बध्नाति। अतस्तस्य सम्प्रदानसंज्ञा तदपि परम्परया क्रियान्वयितमेव ।

यदा च पक्वौदनं दर्व्यादिना प्रपाते विभनक्ति तदा विभजनक्रियाऽवधिभूतस्य स्थालीरूप-कारकस्यापादानसंज्ञा भवति । परम्परया तदपि क्रियान्वयिभूतमेव ।

कर्तृनिष्ठक्रियायाः कर्मनिष्ठक्रियायाश्चाधारोऽधिकरणसंज्ञां भजते । तदधिकरणमपि स्वाश्रया-श्रयत्वरूपपरम्परासम्बन्धेन क्रियान्वयिभूतमेव ।

यथा - 'कटे चैत्रः आस्ते' इत्यत्र स्वं स्थितिभूता क्रिया तदाश्रयश्चैत्रस्तदाश्रयश्च कट इति। एवं 'स्थाल्यामोदनं पचति' इत्यत्र स्वं विक्लित्तिभूता क्रिया तदाश्रय ओदनस्तदाश्रयश्च स्थाली इति समन्वयः ।

एतेनाह - **कर्ता कर्म च करणञ्च सम्प्रदानं तथैव च ।**
**अपादानाधिकरणमित्याहुः कारकाणि षट् ॥**

'देवदत्तस्य पुत्रं पन्थानं पृच्छति' इत्यत्र देवदत्तस्य तत्र कारकप्रकरणे प्रथमं सूत्रम् - 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा'[2] पदं पदं प्रतोत्यर्थेऽव्ययीभावः प्रतिपदमर्हतीति विग्रहे तदर्हति इति ठकि प्रातिपदिकमिति तस्यार्थः प्रातिपदिकार्थः, स च लिङ्गम् च परिमाणं च वचनं च तान्येव प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रं, तस्मिन् प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा । ननु स्वार्थ-द्रव्य-लिङ्ग-संख्या-कारकेति पञ्चविधः प्रातिपदिकार्थः इति पक्षे लिङ्गस्यापि प्राति-पदिकाथनैव गतार्थत्वात् तटः, तटी, तटमित्यादौ प्रातिपदिकार्थमात्रे इत्यनेनैव प्रथमासिद्धे लिङ्गग्रहणं व्यर्थम्, तत्सार्थक्याय नियतोपस्थितिकः प्रातिपदिकार्थ इति स्वीक्रियते । तदर्थस्वीकारे यस्मिन् प्रातिपदिके उच्चारिते यस्यार्थस्य नियमेनोपस्थितिः स प्रातिपदिकार्थः ।

नि पूर्वकयम् धातोः व्यापकत्वमर्थः नियता - व्यापिका उपस्थितिः शाब्दबोधो यस्यार्थस्य स नियातोपस्थितिकोऽर्थः प्रतिपादकार्थः । उपस्थितिपदेन शाब्दबोधस्य ग्रहणे तु तटः तटी, तटमित्यादौ विसर्गसमभिव्याहारे पुंस्त्वस्यैवाम्समभिव्याहारे नपुंसकस्यैव ङीष्समभिव्याहारे स्त्रीत्वस्यैवेति कस्यापि लिङ्गस्य यत्र यत्र तटशब्दस्तत्र तत्र नियमेनोपस्थितेरभावेन लिङ्गविषयकोपस्थितिर्न व्यापिकेति लिङ्गग्रहणं सार्थकम् ।

अन्यच्च - प्राचीनमतानुसारेण प्रातिपदिकार्थं परिष्कत्य तस्य नवीनमतानुसारेण परिष्कारोत्र विधीयते - 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा'[3] इति सूत्रघटकीभूतं प्रातिपदिकार्थं निरू-पयन् प्राह सिद्धान्तकौमुदीकारः नियतोपस्थितिकः प्रातिपदिकार्थः । यस्मिन् प्रातिपदिके उच्चरिते सति यस्यार्थस्य नियमेनोपस्थितिः स इति तदर्थः । स्वार्थद्रव्यलिङ्गसंख्याकारकाणां पञ्चानां प्राति-पदिकशक्यत्वेऽपि लिङ्गग्रहणसामर्थ्यात् अत्र सूत्रे प्रातिपदिकार्थपदेन नियतोपस्थितिकस्यैवार्थस्य ग्रहणम् । तेन कर्माद्याधिक्ये प्रथमा न भवतीति भावः । नियतोपस्थितकपदार्थश्च - नियता उपस्थितिर्यस्य स नियतोपस्थितिकः । अत्र निपूर्वकयम्धातोर्व्यापकत्वमर्थः । आश्रयश्च क्तार्थः । षष्ठ्यर्थश्च विषयता । तथा च व्यापकताश्रयोपस्थितिविषयत्वं प्रातिपदिकार्थत्वमिति शब्दतो लभ्यते ।

तत्र व्यापकत्वस्य यत्किञ्चिन्निष्ठव्याप्यतानिरूपितत्वेन किञ्चिनिष्ठव्याप्यतानिरूपिता उप-स्थितिनिष्ठव्यापकता इत्याशङ्कायामाह - यस्मिन् प्रातिपदिके उच्चरिते इत्यादि । अयमाशयः प्राति-पदिकोच्चारणनिष्ठव्याप्यतानिरूपिता व्यापकता वाच्या, तथा च प्रातिपदिकोच्चारणनिष्ठव्याप्यता-निरूपितव्यापकतावदुपस्थितिविषयताश्रयत्वं तत्त्वमिति पर्यवसन्नम् ।

नन्वेवमपि उच्चारयितरि समवायेन उच्चारणस्य श्रातरि च तज्जन्योपस्थितेः सत्त्वेन व्यधि-करणत्वात् कथं व्याप्यव्यापकभावापन्नत्वं तयोः । समवायं परित्यज्य स्वजन्यश्रावणप्रत्यक्षसम-वायित्वसंसर्गव्याप्यतावच्छेदकं, समवायं च व्याकपतावच्छेदकं स्वीकृत्य उक्तदोष - परिहारेऽपि अ-गृहीतशक्तिकघटादिपदश्रोतरि स्वजन्यश्रावणप्रत्यक्षसमवायित्वेन उच्चारणस्य सत्त्वेऽपि घटपटत्वसम-वायानाम् उपस्थितेरभावात् तदुपस्थितेर्व्यापकत्वं दुर्घटमेवेति चेत्, न, स्वविषयपदानिष्ठशक्तिज्ञान-समवायित्वस्वजन्यश्रावणप्रत्यक्षसमवायित्वोभयसम्बन्धस्य व्याप्तावच्छेदकत्वोपमेनादोषात् ।

एतेन नियतलिङ्गघटादिपदस्य बधिरनिकटे उच्चारणेऽपि उपस्थितेरभावात् निरुक्तप्रातिपदिकार्थत्वं तादृशस्थले न स्यादित्यपास्तम् । स्वजन्यश्रावणप्रत्यक्षसमवायित्वसम्बन्धेन, बधिरात्मनि प्रातिपदिकोच्चारणस्याभावेन तत्रोपस्थितेरभावेऽपि क्षतिविरहात् ।

वस्तुतस्तु प्रातिपदिकोच्चारणे व्याप्यतास्वीकारे स्वजन्यश्रावणप्रत्यक्षसमवायित्व स्वविषयपदनिष्ठशक्तिज्ञानसमवायित्वोभयस्य व्याप्यतावच्छेदकसम्बन्धत्वस्वीकारे गौरवात् स्वविषयकश्रावण प्रत्यक्षसमवायित्व स्वनिष्ठशक्तिज्ञानसमवायित्वोभयसम्बन्धावच्छिन्नप्रातिपदिकलिङ्गव्याप्यतानिरूपितसमवायसम्बन्धावच्छिन्नव्यापकतावदुपस्थितिविषयत्वं प्रातिपदिकार्थत्वमिति वक्तव्यम् ।

प्रातिपदिकनिष्ठव्याप्यता च न प्रातिपदिकत्वसामान्यरूपेण असम्भवात्, नापि तद्व्यक्तित्वेन, अव्यावर्तकत्वात्, किन्तु तत्तदानुपूर्वीप्रकारेणेति बोध्यम् । व्यापकतावदुपस्थितिविषयत्वमित्यस्य च व्यापकतावच्छेदकोपस्थितीयविषयताश्रयत्वमित्यर्थः । तेन घटपदजन्यघटत्वप्रकारकोपस्थितौ उद्बोधकान्तरवशात् कदाचित् पटादिभानेऽपि तद्विषयताया निरुक्तोभयसम्बन्धेन घटादिप्रातिपदिकाधिकरणकालान्तरेण घटादिविषयकोपस्थित्यधिकरणात्मनिष्ठाभावीयप्रतियोगितावच्छेदकत्वान्नातिव्याप्तिः । परे तु प्रातिपदिकनिष्ठशक्तिविशिष्टत्वं प्रातिपदिकार्थत्वम् । वैशिष्टयञ्च स्वप्रयोज्यबोधविषयत्वप्रकारक तात्पर्यविषयता पर्याप्त्यधिकरणत्व स्वनिष्ठशक्त्यभावत्वोभयसम्बन्धेन । अभावश्च – स्वप्रयोज्यधर्मितानिरूपितप्रकारतावत्त्वस्वविशिष्टावच्छेदकतावत्त्वैतदुभयसम्बन्धपरिच्छिन्न प्रतियोगिताको बोध्यः ।

वैशिष्टयञ्च – स्वविषयतानिरूपितनिरूपकत्वसम्बन्धावच्छिन्नत्वस्वज्ञानाधीनापस्थितिशाब्दबोधनिष्ठभेदप्रतियोगितानिरूपितत्वोभयसम्बन्धेन, अत एव नीलरूपावच्छिन्नवाचककृष्णपदप्रातिपदिकार्थत्वं पुंस्त्वस्य न अन्यथा पूर्वोक्तरीत्या वासुदेवनिरूपितशक्त्यभावस्य निरूक्तोभय- सम्बन्धेन सत्वात् तत्त्वात् पत्तिः । प्रातिपदिकवैशिष्ट्यं विहाय शक्तिवैशिष्ट्यदाने तु नीलरूपवत् पटादिपरकृष्णपदवाच्यपुंस्त्वे, वासुदेवनिरूपितशक्तिप्रयोज्यबोधविषत्वप्रकारकतात्पर्यविशेषतापर्याप्त्यधिकरणत्वस्याभावात् शक्तिविशिष्टत्वरूपप्रातिपदिकार्थत्वाभावान्न तदापत्तिः ।

ननु सम्प्रसारणप्रातिपदिकस्य यणस्थानिकेकिः सम्प्रसारणपदयोज्यविधेयताश्रये च खण्डशः शक्तिः स्वीक्रियते, अत एव 'वाह ऊठि'[4] त्यादौ विधेयस्थले स्मप्रसारणपदप्रयोज्यविधेयताश्रयत्वांशस्य मोषेण नान्योन्याश्रयः विशिष्टे शक्तेः स्वीकारे तु मोषासम्भवादन्योन्यश्रयो दुर्वारः । एवञ्च प्रथमान्तसम्प्रसारणपदस्थ्ले एकखण्डविषयको बोधः अन्यत्र चोभयविषयकः । सर्वत्र यणस्थानिकेग्विषयिण्येव तु न शक्तिः तत्र वक्तुं शक्यते । द्युम्यामित्यादौ 'हल्'[5] इति दीर्घापत्तेः । एवञ्च हल इत्यादौ सम्प्रसारणप्रदप्रयोज्यविधेयताश्रयस्वप्रकारकयणस्थानिकेग्विशेष्यताको बोध आवश्यक इति सम्प्रसारणपदप्रयोज्यविधेयताश्रयरूपार्थस्योक्ताऽपदार्थ सम्बन्धावच्छिन्नप्रकारताश्रयत्वेन स्वविशिष्टातावच्छेदकताश्रयत्वेन प्रकृते सम्प्रारणेति प्रातिपदिकार्थत्वा भावेन – 'अनेन सम्प्रसारणं कृतमित्यादिवाक्येऽपि सम्प्रसारणपदप्रयोज्यविधेयताश्रयरूपाशस्य मोषाद् दोषात् ।' अत्र 'प्रातिपदिकार्थलिङ्गपरिणामवचनमात्रे प्रथमेति'[6] सूत्रे सविशेषं मात्रग्रहणप्रयोजनं निरूप्य तत्प्रत्याख्यानाभिप्रायश्चोप वर्ण्यते प्रसङ्गेऽस्मिन् ।

प्रातिपदिकेत्यादिसूत्राणि अर्थविधायकानि स्वादिसूत्रेणैकवाक्यतया प्रातिपदिकार्थदिषु प्रथमा-विधायकानीत्येकः पक्षः, स्वादिसूत्रेण विदितानां नियामकानीत्यपरः पक्षः । तत्रापि द्वौ पन्थानौ - अर्थनियमः प्रत्ययनियमश्चेति । तत्र प्रातिपदिकार्थ एव प्रथमा । कर्मण्येव द्वितीयेति प्रत्ययनियमः, यतः एवकारस्ततोऽन्यत्र नियमः इत्यभियुक्ताः । प्रातिपदिकार्थे प्रथमैवेत्यादिरर्थनियमः, उक्तयुक्तेः । तत्र प्रातिपदिकार्थ एव प्रथमेति प्रत्ययनियमपक्षे मात्र ग्रहणं व्यर्थम्, नियमशरीरेणैव मात्रशब्दार्थ लाभात् । अर्थनियमपक्षेऽपि मात्रग्रहणं व्यर्थम् । कर्मणि द्वितीयैवेत्यादि नियमेन कर्मत्वाद्याधिक्येन प्रथमायाव्यावृत्तिसिद्धेरित्याहुः । तत्र पक्षान्तरे मात्रग्रहणस्यानावश्यकत्वेऽपि प्रत्ययनियमपक्षे तस्यावश्यकत्वमाह शेखरकारः -

मात्रग्रहणाभावे तु यथा - 'कर्मणि द्वितीये'ति नियमेन कर्मत्वाऽज्ञानसमानकालिकार्थान्तरस्यैव व्यावृत्तिः, न तु तज्ज्ञानसमानकालिकार्थान्तरस्य । अत एव गां दोग्धि पयः' इत्यादावपा-दानत्वादिबोधेऽपि द्वितीया । एवञ्च 'कर्मणि सत्येव द्वितीया न तु तदसत्वे' इति नियमाकारः । तथाऽनेनापि प्रातिपदिकार्थसत्वे एव प्रथमा न तु तदसत्वे, इत्येव नियमः स्यात् । एवञ्चानर्थक-निपातेभ्यः प्रथमा नैव एवञ्च तत्समभिव्याहारे स्यात् । स पूर्वायाः प्रथमेत्यादिशास्त्रप्रवृत्तिर्नस्यात् । तत्सत्वे कर्मादियोग्यार्थकप्रातिपदिकाच्चेत् तद्रहितस्वार्थे इत्यर्थान्न दोषः । इदमव मात्रग्रहणं 'कर्मणि द्वितीयेत्यादे'[7] मदुक्ताकारनियमत्वे मानम् । मात्र ग्रहणाच्च सूत्रकारस्य प्रत्ययनियमपक्ष एवाभिमतः इति गम्यते । तदकरणलाघवेन त 'कर्मणि द्वितीयैवेत्यर्थनियम उक्तो भाष्यादौ स्पष्टं चेदं सर्वं भाष्ये' इति भाष्यप्रदीपोद्योते निरूपितमित्याहुः ।

**सन्दर्भाः**


1. धात्वर्थनिर्णयः - वैयाकरणभूषणसारः ।
2. पा. सू. 2/3/46 ।
3. पा. सू. 2/3/46 ।
4. पा. सू. 6/4/132 ।
5. पा. सू. 6/4/2 ।
6. पा. सू. 2/3/46 ।
7. पा. सू. 2/3/2 ।



**संविदाध्यापकः**
**व्याकरणविभागः,**
**राष्ट्रियसंस्कृतसंस्थानम्,**
**क.जे.सोमैयासंस्कृतविद्यापीठम्,**
**विद्याविहारः, मुम्बई-७७**


★★★

# TERRORISM IN SOUTH ASIA

✍ Dr. Suman Singh

**( Terrism is a new threat to the mankind. It is a type of was against non-combatant to generate fear in order to achieve a political or social aim. In South Asia, for some recent years, terrorist attacks have been conducted by the Islamic terrorists to establish a pure Islamic Society. It has made an unrest in the region and become a globle liability. In this paper, Dr. Singh, has made her best effort to define terrorism according to its nature. She had very carefully tried to find out the cause of terrorism and also made suggestions to wipe it out.- Ed. )**

"It is a natural law that when a vacuum is created somewhere in the atmosphere, at once a flow begins from an area of greater pressure. But while the flow starts from the area of greater pressure, the cause lies in the vacuum. It is the vacuum that creates the situation."

\- Maharishi MaheshYogi (Bhagwad Gita )

Taking off from the above commentary, it is easy to draw that human experience over the millennia has shown, nevertheless, that whenever there is a vacuum in the affairs of humans, it is invariably and almost inevitably malevolent forces that rush in to fill the vacuum. This is quite evident with the emergence of terrorism in its gigantic proportion on the world scene in the post-cold war period after the demolition of communism. This new menace is now threatening the mankind. There is no country today in which at this moment someone is not discussing terrorism. The renewed anxiety about it dates back to 9/11 terrorist attacks. Since then nations have brought their own experiences, concerns and even policy differences to the global war against terrorism. In the certain sense, third world war has started after 9/11, officially declared, legally sanctioned and actively pursued. It is the real world war of mankind, as everyone is involved.

In this paper an attempt has been made to explore the frontiers of amorphous zone of terrorism in South Asia. As far as the conceptualisation of terrorism is concerned, it has in itself emerged as a problem as there is no universally acceptable definition of it. As 'one man's terrorist is another man's freedom- fighter'. Different scholars have tried to come to terms with terrorism depending upon their ideological moorings. To cite few of them, Yonah Alexander, links terrorism with national security. To him, "Terrorism is

the use or threat of violence against random or civilian threats in order to intimidate or create generalized pervasive fear for the purpose of achieving political goals". Paul Wilkinson makes a distinction between political terrorism and other forms of violence. Political terrorism, to Wilkinson is "the systematic use of murder and destruction, and the threat of murder and destruction in order to terrorize individuals, groups, communities or governments into conceding to the terrorists' political demands". The Department of State (U.S.) defined it as a "pre-meditated, politically motivated violence perpetrated against non-combatant targets by sub- national groups or clandestine State Agents, usually intended to influence an audience".

These definitions show the lack of consensus on what terrorism actually encompasses. There are, however, certain features common to all forms of terrorism. For instance, terrorism, in all its forms, is aimed to generate fear, panic and terror in the minds of the general public. It may be politically motivated or may emerge because of obscure ideologies or beliefs, the acts of terror may be perpetrated for political ends or for changing the cultural norms or religious ethos of a targeted country or a segment of population. Further, terrorism, unlike ordinary violence, employs inordinate lethal force against civilian targets to erode the political will of the targeted country, undermine the morale of the people, spread despondency and panic through catastrophic terrorist attacks. Moreover, terrorism is arbitrary and unpredictable as far as its effects are concerned. And it does not recognize any rules and conventions of war and geographical limitations.

The spectre of terrorism has been transformed from peripheral issue in the 1970s to one of the foremost security challenges in the 1990s. In the post- cold war period, a new dimension was added to the genre of terrorism with the rise of the Islamic jihad. It has become a serious destabilizing factor in plural states. Unlike other terrorist groups whose goals are definable in distinct political terms, the goals of Jihadi elements are no less than to establish a pure Islamic society in the regions once ruled by Muslim rulers. Kashmir, Kosovo and Chechanya are a case in part. One of its horrific manifestations is the 11 September event which has shown that terrorism runs in the veins of radical religious belief. Out of the 100 active terrorist groups, 64 are identified as religiously motivated.

**Terrorism in South Asia:**

South Asia is likely to remain the main theatre of terrorist operations in the recent years to come. State sponsored terrorism for long term political objectives has assumed the form of protracted low- intensity conflict in South Asia. In recent years, 75 percent of all terrorism related casualties in the world occurred in south Asia. South Asia has been the major target areas of terrorism, insurgencies and separatist movements in comparison with other

parts of Asia. Afghanistan, Pakistan, India, Bangladesh are facing serious terrorist threats. In South Asia, the number of fatal casualties in terrorist attacks is highest in the world; internecine ethnic, communal and separatist conflicts pose a serious threat to stability and inter-state relations in this region. Afghanistan, Pakistan, India, Srilanka, Bangladesh are witnessing multiple conflicts in which ideological, ethnic, communal and political issues are intertwined.

However, at this point, it's very necessary to throw light on the fact that terrorism is in operation in this region under the façade of different terminologies and varies in its nature. To illustrate, they vary from a strident assertion of group identities as manifested in their demand for political independence, like that of the Nagas, Khalistanis (Punjab) and Jammu and Kashmir liberation Front in India and Pakhtunistan in Pakistan, to change in demographic equations triggered by both intra-country induced and external migration like that of Chittagong Hill Tracts in Bangladesh and Assam in India. They also range from the practice of internal colonialism as manifested by constant regional disparity as in Balochistan, Pakistan, to the demand for political independence by the Srilankan Tamils in the north-east of Srilanka; and brutal and massive human rights violations ranging from social discrimination and disenfranchisement as in southern Bhutan to economic alienation manifested in naxalite movements in Andhra Pradesh, Chhattisgarh, Odisha, Bihar etc.

Further, this also includes the ethno-cultural discrimination and alienation as in the case of Muhajirs in Pakistan, extreme regional disparity and the attempt to bring about structural changes in the polity by the Maoist elements in Nepal and historical dislocations and poor post- independence adjustments as in Nagaland in India. Moreover, the irony is that these South Asian countries have also been clearly involved in encouraging, hosting and aiding terrorists from neighbouring countries. The ULFA's presence in Bhutan, insurgents in Bangladesh and the well known support extended by Pakistan to terrorism activities in Jammu and Kashmir are blatant manifestation of cross-border abetment of terrorism. The worst part is that the increasing coordination of the terrorists, insurgents and radical groups with their counter parts in neighbouring countries has added a critical dimension to the entire management of militancy or terrorism in South Asia.

**Causes:**

At this juncture, today, there is a compelling need for an honest introspection as to why such spells of terrorism took place at more frequent intervals. Many questions are posed: what makes the average citizen become an active member of a terrorist organization? Is it the absence of political and civil rights? Is it the belief that no possible redress is possible? Is it a

repressive state, one that tortures and systematically violates the political, civil and personal Liberty, rights of its citizenry? And what is the way to deal with it? Can the bombings in Iraq, Afghanistan, by sole super power be justified where thousands of innocents have lost their lives? Why pre-emptive strike should be the monopoly of a single state? What about the other states who have been the real victim of this menace? Is the resolution 1373 backed by US brought forth in Security Council is really going to work when, the UN always dances to the tunes of U.S.?

A bad situation cannot be simply wished away. The need is to address the root causes. Some of which could be visualised are:

- Social discontent produced by economic and social deprivation of the masses.
- Demographic explosion that has produced a huge bulge of urbanized unemployed young men.
- Feelings of nationalism when peaceful movements are suppressed by brute force.
- Dispossession, human-rights abuse, alienation and humiliation on different counts.
- State-Terrorism.
- Failure of political management or governance to meet the aspirations of people.
- Clash of values, especially associated with ideological or religious terrorism.
- Process of globalization which according to some scholars has resulted in economic instability, volatile social situations and has incited economic devastation, ethnic hatred and genocidal violence throughout the world.

**Suggestions:**

The menace of terrorism has engulfed the entire fabric of the region and has disrupted the entire administrative structure of the country as the massive amount of budget is allocated to defence. According to an estimate, a 5 percent cut in military spending can finance the entire agenda of South Asia for basic social services and credit to the poor. Terrorism has become a reality today and the need is to wage war against it. Some of the suggestions which can be put forth to retrieve of this sorry state are enumerated as follows:

- The threat of terrorism is unstructured, immensely complex, constantly changing in form and tactic, and significantly unpredictable. To counter it, it will be necessary to confront the full magnitude of the dynamics of terrorism- the proliferation of small arms, the complicity of the arms industry and of its sponsoring.

- The war against terrorism in its present dominant forms, substantially, though not exclusively, a war against global pan-Islamist terror-is an ideological war, and demand responses at the level of ideas.
- Terrorism is an ideologically neutral and global method of warfare: while a single ideological form of terrorism-Islamist fundamentalist terrorism-appears to comprise the most urgent and widespread contemporary threat, it is necessary to recognize that terrorism is in no way uniquely tied to this ideology and has been, and continues to be, adopted as a favoured method of warfare and state destabilization by a wide range of actors who are unrelated to "Islamism".
- Terrorism, moreover, is not the problem of its victim societies alone. Its impact reverberates across the globe. 'A victory of terrorism anywhere in the world is the victory for terrorism everywhere'. This necessitates the states to view it as a common problem and should go for joint and co-ordinated effort. To quote MacIntyre, "the future is being determined by our actions today. And the smell of blood could draw a number of scavengers too timid to attack by themselves, adding to our problems and making attribution and retaliation very difficult".

**South Asian context:**

- Regional consensus to meet the threats of trans-national, cross-border, domestic, cyber, chemical, biological and nuclear or radiological terrorism.
- Awareness of the threats at the regional level is increased and co-ordinated efforts are made to track down terrorists operating in the region.
- Permanent organizations are created to develop regional programmes for countering terrorism.
- Assets and financial resources for countering terrorism are pooled.
- Combined action programmes and fine tuning of missions.
- Access to the human and material sources is denied to the terrorist and their active supporters.
- The need is to reconstruct a failed state i.e. reforms are sought at different fronts like political, judicial, administrative, socio-institutional, human.
- To construct a government that is decent, responsible, consensual and ultimately democratic.
- To address the injustices and inequalities whether social, economic or political.

- SAARC forum has to be made vibrant; this is possible only when SAARC regional convention on the suppression of terrorism is pursued with political will and commitment by the member states.

**Conclusion:**

Thus, combating and defeating international terrorism is clearly not a singular end in itself, but is essentially required to pursue the larger global agenda of advancing the cause of democracy, or building civil societies, or overcoming the crisis in governance, or the challenge of globalization and the multitude of non-military threats excoriating international security.

Moreover, economically developed, politically stable and conflict-free South Asia is conducive not only for the members of the region but can be an asset for the international community and sure guarantee for international peace and security. Moreover, though the war against terrorism seems to be dream today, however the optimism of a successful venture by mankind over it in the near future could not be ruled out.

**REFERENCES:**


1. Almond, Gabriel A., R. Scott Appleby, and Emmanuel Sivan (2003), Strong Religion: The Rise of Fundamentalisms around the world, Chicago: University of Chicago Press.
2. Esposito, John L. (1997): Political Islam: Revolution, Radicalism or Reform?, Boulder CO, Lynne Rienner.
3. Feener, R. Michael. (ed.) (2006): Islam in world Cultures: Comparative perspectives, ABC – CLIO,California.
4. Huttington, Samuel. P. (1996), Clash of Civilizations and the Remaking of the world order, New Delhi: Penguin Books India.
5. Khatri,Sridhar K. and Kueck,Gert W. (eds.) (2003), Terrorism in South Asia: Impact on Development and Democratic Process, Delhi:Shipra Publications.
6. Kumarasamy,P.R (April 2007), "Terrorism in South Asia: The Changing Trends," Journal of South Asian Studies, XXX(1):7-24.
7. Muni,S.D. (ed.) (2006), Responding to Terrorism in South Asia, New Delhi: Manohar Publishers.
8. Riaz, Ali (2009), "Religion and Politics in South Asia", London: Routledge.
9. Ranstorp,Magnus(summer 1996), "Terrorism in the name of religion", Journal of International Affairs, 50(1):41-62.
10. Saikia, Jaideep (2004), Terror sans Frontiers: Islamist Militancy in North East India, New Delhi: Vision Books.
11. Tibi, Bassam (1988), The challenge of Fundamentalism, Political Islam and the New World Disorder, Berkeley: University of California Press.

**Contract Teacher (Political Science),**
**Rashtriya Sanskrit Sansthanam,**
**K.J. Somaiya Sanskrit Vidyapeetham,**
**Vidyavihar, Mumbai.**

★★★

# धर्मशास्त्रोक्तदृशा अशौचनियमाः

✍डॉ. जितेन्द्रकुमाररायगुरुः

**( शुचेर्भावः शौचम् । न शौचमशौचम् । तदिद्वविधम् जननाशौचं मरणाशौचञ्च । तत्र शुचिर्नाम पापक्षयो धर्मयोग्यता च । द्वयमेतद् धर्मशास्त्रे वर्णजातिवयोऽवस्थादिभेदेन व्यवस्थापितम् । शास्त्रीयप्रमाणैश्चात्र तत्प्रतिपादितम् । तत्रोल्लेखनीयं यद्बाह्याभ्यान्तरभेदेनाप्यशौचं मनुयाज्ञवल्क्यादिभिः विहितम् । तस्मादुभयत्रैव शौचेन भाव्यम् । शौचकारकतत्वानि - कालः, अग्निः कर्म्मः, मृत्तिका, मनः, ज्ञानं, तपः, जलं, पश्चात्तापः, आहाररहिततत्वञ्चेति विज्ञानेश्वरमते । धर्मो नाम परोक्षतत्त्वम् । तस्य साक्षात्कारो योगेनैव लभ्यः । मन्वादयो योगबलेन धर्मं साक्षात्कृत्यास्मदादीनां हिताय धर्मानुशासनमुपादिशन्। वयं चर्मचक्षुर्मात्रप्रमाणकाः तेषां विधाने प्रश्नानुत्थापयितुं न प्रभवः । शिरोऽवनभ्य तदङ्गीकरणमेवास्माकमभ्युदयाय निःश्रेयसाय च कल्पते ॥ - स. )**

**विषयप्रवेशः -**

सुविदितमस्ति तत्र भवतां प्रेक्षावतां विदुषां यदिह जगति यावन्ति शास्त्राणि दरीदृश्यन्ते, तेषु समेषु शास्त्रेषु शाश्वतशास्त्रं भवति धर्मशास्त्रम् । धर्ममुपदिशति यत् शास्त्रं तत् भवति धर्मशास्त्रम् । जगन्मूलत्वेन संसृतिनियामकानि तत्त्वानि 'धर्म' इति व्यपदिश्यन्ते । भारतीयसंस्कृतौ धर्मस्य महत्तमं स्थानमस्ति । तत्र च कोऽसौ धर्मः? इति विचिकित्सायां 'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः' इति महर्षिणा कणादेन प्रतिपादितम् । येन च मानवस्याभ्युदयस्य निःश्रेयसस्य च सिद्धिर्भवति सः धर्मः। धारणार्थकात् धृधातोः धर्मशब्दस्य निष्पत्तिर्भवति । तथा च यश्च वस्तुस्वरूपं धारयते वा यो धृतः सन् धारयते सः धर्म इति । किञ्च मनुना धृतिक्षमादयो दशगुणा एव धर्मशब्दवाच्यत्वेन निर्दिष्टाः ।

तथोक्तम् - **धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।**
**धीर्विद्यासत्यमक्रोधो दशकं धर्मलक्षणम् ॥**[१]

अर्थात् सर्वेषाम् आचाराणां विचाराणाम् आहाराणां व्यवहाराणां सदाचाराणां च नियामको धर्म एव। धर्मशास्त्रे बहवः विषयाः प्रतिपादिताः सन्ति । तेषु आचारः, व्यवहारः, प्रायश्चित्तञ्चेति प्रमुखाः सन्ति । तत्र प्रायश्चित्ताध्याये अशौचस्य महत् स्थानं वर्तते । तर्हि किं नामशौचम्? इति जिज्ञासायां शुचेर्भावः शौचम् । न शौचम् अशौचम् । शौचं नाम शुद्धत्त्वम् शुद्धतायाः अभावः अशौचमिति विदुषामभिप्रायः । अशौचं द्विविधं जननाशौचं मरणाशौचं च । अशौचस्य लक्षणं

विविधैः धर्मशास्त्रकारैः टीकाकारैश्च भिन्नदृष्ट्या प्रत्यपादि । भट्टाचार्यमतानुसारं शुद्धेरभाव एव अशौचम् । शुद्धिर्नाम पापक्षयः धर्मयोग्यत्वं च । सपिण्डेषु बान्धवेषु च जन्ममृत्युजन्यव्याधिनिवारणमेव पापक्षय इति तेन प्रतिपादितम् । अतः तन्मतानुसारमशौचं नाम जन्ममरणजन्यशुद्धेः विवरणपूर्वकं धर्मे प्रवृत्त्यर्थं सामर्थ्यं शुद्धिरित्युच्यते । तद्विपरीतम्तु अशुद्धिरशौचं वेति कथ्यते । अशौचनिवारणं नाम शुद्धिकरणम् । यथोक्तम् –

**कालोऽग्निः कर्म मृद्वायुर्मनोज्ञानं तपोजलम् ।**
**पश्चात्तापो निराहारः सर्वेऽमी शुद्धिहेतवः ॥**[२]

इदं चाशौचं विज्ञानेश्वरमते – कालस्नानाद्यपनोद्य पिण्डोदकदानादिविधेः अध्ययनादिपर्युदासस्य च निमित्तभूतः पुरुषगतः कश्चनातिशयः कथ्यते, न पुनः कर्मानधिकारमात्रम् । अर्थात् अशौचं नाम पुरुषगतव्यापारविशेषः । अनेन अशौचं द्विविधमुक्तं – बाह्याशौचमाभ्यन्तराशौचम् । देवलेनाप्युक्तम् – अशौचं द्विविधं भवति । बाह्यं चाभ्यन्तरं चेति । बाह्याशौचस्य नैकानि कारणानि भवन्ति । तानि कारणानि यथा जननं, मरणं, शिशुमृत्युः, गर्भस्रावः, ऋतुस्रावः, गर्भपाततः इत्यादीनि। अशौचं कदाचित् सपिण्डवाचकं कदाचित् एकपुरुषगतम् । वर्ण्यते यथा –

**लेपभाजः चतुर्थाद्याः पित्राद्याः पिण्डभागिनः ।**
**पिण्डदः सप्तमस्तेषां सपिण्डयं सप्तपौरुषम् ॥**[३]

उक्तं च मनुना – **सपिण्डता तु पुरुषे सप्तमे विनिवर्तते ।**
**समानोदकभावश्च जन्मनाम्नोरवेदने ॥**[४]

एतेषु सपिण्डेषु जननमरणगताशौचं भवति । रजस्वलाया अशुचिपुरुषस्पर्शात् यदाऽशौचं भवति तदेकपुरुषगतं न तु सपिण्डगतम् ।

जननमरणजनिताशौचनिवारणार्थं याज्ञवल्क्यस्मृतौ कालनियमः विहितः यथा –

**त्रिरात्रं दशरात्रं वा शावमाशौचमिष्यते ।**
**ऊनद्विवर्षं उभयोः सूतकं मातुरेव हि ॥**[५]

अर्थात् जननमरणजातमशौचं सपिण्डानां दशरात्रं समानोदकानां त्रिरात्रं च भवति । सूतकः ऊनद्विवर्षे संस्थिते उभयोः मातापित्रोः अशौचं भवति न तु सपिण्डानाम् । अशौचमध्ये पुनर्जनने मरणे वा जाते प्रतिनिमित्तं नैमित्तिकमावर्तते इति स्थले उक्तं यत् –

**अन्तरा जन्ममरणे शेषाहोभिर्विशुद्ध्यति ।**
**गर्भस्रावे मासतुल्या निशाः शुद्धेस्तु कारणम् ।**[६]

वर्णापेक्षया वयोवस्थापेक्षया वा यस्य यावनाशाचकालः तत्समस्य ततो न्यूनस्य वाशौचस्य निमित्तभूते जनने मरणे वा जाते पूर्वाशौचावशिष्टेः एवाहोभिविशुद्धयति । किञ्च गर्भस्रावे यावन्तो गर्भग्रहणमासास्तत्समसंख्यका निशाः शुद्धेः कारणम् ।

वयोऽवस्थाविशेषादपि दशाहाद्याशौचदोस्यापवादं निर्दिश्यते –

**आदन्तजन्मनः सद्य आ चूडान्नैशिकी स्मृता ।**

**त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परम् ॥**[७]

किञ्च स्त्रीषु गर्वादिषु च वयोवस्थाविशेषेण निर्दिश्यते –

**अहस्त्वदन्तकन्यासु बालेषु च विशोधनम् ।**
**गुर्वन्त्रेवास्यनूचानमातुलश्रोत्रियेषु च ॥** [८]
**अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च ।**
**निवासराजनि प्रेते तदहः शुद्धिकारणम् ॥**

अनुगमनाशौचं यथोक्तं –

**ब्राह्मणेनानुगन्तव्यो न शूद्रो न द्विजः क्वचित् ।**
**अनुगम्याम्भसि स्नात्वा स्पृष्ट्वाऽग्निं घृतभृक्शुचिः ॥**[१०]

अर्थात् ब्राह्मणेन असपिण्डेन द्विजो विप्रादिः शूद्रो वा प्रेतो नानुगन्तव्यः । यदि स्नेहादिनानुगच्छति तदा जले स्नात्वाग्निं स्पृष्ट्वा घतं पीत्वा च शुचिर्भवेत् । क्षत्रियादिषु दशरात्रस्य सपिण्डाशौचस्यापवाद उच्यत –

**क्षत्रस्य द्वादशाहनि विशः पञ्चदशैव तु ।**
**त्रिंशाद् दिनानि शूद्रस्य तदर्ध न्यायवर्तिनः ॥**[११]

क्षत्रियवैश्यशूद्राणां सपिण्डजनने तदुपरमे च यथाक्रमेण द्वादशपञ्चदशत्रिंशद्दिनान्या शौचं भवति । न्यायवर्तिनः पुनः शूद्रस्य पाकयज्ञद्विजशुश्रूषादिरतस्य तदर्धं पञ्चदशरात्रमशौचम् । सपिण्डाशौचेऽपि क्वचिदपवादो निर्दिश्यते । तद्यथा –

**महीपतीनां नाशौचं हतानां विद्युता तथा ।**
**गोब्राह्मणार्थे संग्रामे यस्य नेच्छति भूमिपः ॥**[१२]

किञ्च पुनः प्राह –

**ऋत्विजां दीक्षितानां च यज्ञियं कर्म कुर्वताम् ।**
**सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदां तथा ॥**[१३]
**दाने विवाहे यज्ञे च संग्रामे देशविप्लवे ।**
**आपद्यपि हि कष्टायां सद्यः शौचं विधीयते ॥**[१४]

तथैवान्याशौचं विवक्ष्यते तत्र गभस्रावाद्यशौचं यथा –

**आचतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः ।**
**अत ऊर्ध्वं प्रसूतिः स्याद्दशाहं सूतकं भवेत ॥**[१५]

**उपसंहारः**

अनेन प्रकारेण समाजे अशौचं परिपाल्यते । यथा पापस्य विशुद्धिनिमित्तं प्रायश्चित्तं भवति तथैव शास्त्रनिर्दिष्टकालानुसारं अशौचं परिपालनीयं भवति । अन्यथा शरीरं सर्वदा अशुद्धं भवति । अशुद्धशरीरेण कृतं कार्यं पापं वर्धयति । इति दिक् ।

**सन्दर्भाः -**

1. मनु. 6.92
2. या. स्मृ. प्रा. 31
3. द. मी. पृ. 47
4. मनु. 5.60
5. या. स्मृ. 18
6. या. स्मृ. 20
7. या. स्मृ. 23
8. या. स्मृ. 24
9. या. स्मृ. 25
10. या. स्मृ. 26
11. या. स्मृ. 22
12. या. स्मृ. 27
13. या. स्मृ. 28
14. या. स्मृ. 29
15. या. स्मृ. 3.16

**सन्दर्भग्रन्थसूची**


1. डॉ. कामेश्वरनाथमिश्र, अर्थसङ्ग्रहः, चौखम्बा विद्याभवन, वाराणसी, 2014 ।
2. डॉ. गङ्गासागर राय, याज्ञवल्क्यस्मृतिः, चौखम्बा विद्याभवन, वाराणसी, 2011 ।
3. डॉ. ब्रजकिशोर स्वाईं, कालमाधवः, चौखम्बा संस्कृत भवन, 2017 ।
4. शिवराज आचार्यः, कौण्डिन्न्यायनः, मनुस्मृतिः, चौखम्बा विद्याभवन, वाराणसी, 2010 ।



**संविदाध्यापकः**
**शिक्षाशास्त्रविभागः,**
**राष्ट्रियसंस्कृतसंस्थानम्,**
**क.जे.सोमैयासंस्कृतविद्यापीठम्,**
**विद्याविहारः, मुम्बई-७७**


★★★

# 'अक्षरवैदर्भी' या नियतकालिकाचे वाङ्मयीन योगदान

✍डॉ. मिनाक्षी बऱ्हाटे

**( एखाद्या नियकालिकाचा अभ्यास करणे हे मोठे आव्हानात्मक काम असते. कारण प्रत्येक नियतकालिकांच्या निर्मितीमागील भूमिका एका विशिष्ट धोरणातून निर्माण होते. अशाच उद्दशातून 'अक्षरवैदर्भी' या नियत-कालिकाचा जन्म १ एप्रिल, १९८४ रोजी झाला, जनसाहित्य परिषदेचे मुखपत्र म्हणून या नियतकालिकाने साहित्य विश्वामध्ये आपली अस्मिता आजमागायत जोपासली आहे. आपली भूमिका स्पष्ट करण्यासाठी आजपर्यंत पंधरा जनसाहित्य संमेलने भरविली आहेत. 'जनसाहित्य' म्हणजे सामान्य माणसांचे जगणे, अनुभव घेणे होय. जनसाहित्याची माणसाविषयी असणारी अभंग निष्ठ ( आपुलकी ) व्यक्त केली आहे. याच भावनेतून जनसाहित्याची संकल्पना विकसित झाली. कोणत्याही स्वरूपाचे आर्थिक पाठबळ न घेता संपादक डॉ. सुभाष सावरकर योनी जनसाहित्य परिषदेची स्थापना केली. या परिषदेचे मुखपत्र म्हणून 'अक्षरवैदर्भी' ने आपले कार्य अतिशय चोखपणे पार पाडले आहे. - स. )**

**प्रस्तावना** -

वाङ्मयाभिरूची वाढविण्यामागे नियतकालिकांचा वाटा अतिशय मोलाचा आहे. मूलत: नियतकालिकांचा आशय ज्ञानवर्धक असतो, मुख्यत्वे वाङ्मयाशी साधलेला हा एक महत्त्वाचा व्यवहार आहे. ह्यातून वाङ्मयेतिहासांची पार्श्वमूळे घट्ट होतात. याच दृष्टिकोनातून 'अक्षरवैदर्भी' या नियतकालिकाची वाङ्मयीन जडणघडण कशा स्वरूपाची आहे. याचा शोध घेण्याचा प्रयत्न करून अभ्यासाअंती आलेला निष्कर्ष नोंदविला आहे.

मराठो साहित्याच्या कक्षा विस्तृत करण्यामागे नियतकालिकाचा वाटा मोलाचा आहे. साहित्याचा विकास होण्यासाठी 31 मार्च, 1984 रोजी नागपूर येथे पहिले विदर्भ साहित्य सम्मेलन भरविण्यात आले. जनसामान्यांना एक खुले व्यासपीठ निर्माण व्हावे यासाठी 'अक्षरवैदर्भी' या नियतकालिकाचा जन्म झाला. तो आजतागायत तेहतीस (33) वर्षाचा पल्ला पूर्ण करून साहित्यक्षेत्रात जनसाहित्यासारखा विषय अभ्यासकासमोर समर्थपणे उभा केला.

'जनसामान्यांच्या साहित्य, संस्कृती, कलाभिरूची संवर्धनास वाहिलेले मासिक' अशा ब्रीद वाक्याने आपली वाटचाल सातत्याने सुरू ठेवली. प्रारंभीच्या काळामध्ये कथा, कविता क्रमश: कादंबरीचा काही भाग प्रकाशित करून काही महत्त्वाची सदरे चालविली. ज्यामधून मुख्यत्वे जनसाहित्याची संकल्पना अभ्यासकासमोर स्पष्ट व्हावी या हेतूने साहित्य लेखन करण्यात आले.

प्रथमत: नियतकालिकाची पार्श्वभूमी सांगून सैद्धान्तिक विषयावर भर देण्याचा प्रयत्न प्रस्तुत शोध निबंधामध्ये केला आहे. जनसाहित्य प्रवाहाची संकल्पना अधिक बळकट होण्यासाठी 'अक्षरवैदर्भी'चे संपादक सुभाष सावरकर यांनी अनेक नाविन्यपूर्ण उपक्रम केले. जनसाहित्यातील 'जन' हा विशिष्ट वर्गातील गट, धर्म, पंथ, पक्ष अशा गटांना समाविष्ट करून माणसाच्या निखळ भावना (जीवनाभिमुख) मांडतो. आपल्यात जननिष्ठ, मानवनिष्ठ प्रवृत्ती समाविष्ट करून माणसामाणसांमधील भेदभाव न करता, सर्वप्रथम 1970 मध्ये या वा. वडस्कर सर्वसमावेश कल्पना मांडली. ही 'जनसाहित्याची संकल्पना' स्पष्ट करताना आपली भूमिका मांडताना ते म्हणतात, 'जनसामान्यांच्या जीवनाचा जननिष्ठ जाणिवांनी घेतलेला कलात्मक वेध म्हणजे जनसाहित'[1]

अक्षरवैदर्भी या नियतकालिकाला महाराष्ट्र राज्य साहित्य-संस्कृती मंडळाचे अनुदान तुटपुंज्या स्वरूपात होते. तरीही या नियतकालिकाने आपली भूमिका नेहमी ठाम ठेवली. याच मूल्य परिवर्तनाच्या चळवळीला पाठबळ दिले, या संदर्भात संपादक मंडळ आपली भूमिका घेताना असे म्हणतात, 'अक्षरवैदर्भी म्हणजे अभिजन संस्कृतीच्या कैफात चूर असलेल्या मराठी साहित्याला लाभलेले जनसंस्कृतीचे महन्मंगल प्रवेशद्वारच होय. आपल्या मनात नावाविषयी असणारे गैरसमज दूर करून जनसामान्यांना नवे व्यासपीठ देण्यासाठी 'अक्षरवैदर्भी'ची स्थापना झाली'[2]

'अक्षरवैदर्भी' या नियतकालिकाच्या योगदानाबद्दल आपल्या काही महत्त्वाच्या बाबी नोंदविता येतील. अक्षरवैदर्भी ने जनसामान्यांना व्यासपीठ उपलब्ध करून दिले आपल्या साहित्यातून जनसामान्यांच्या जीवन जाणिवा सतत अभिव्यक्त करण्यावर भर दिला. फक्त मांडण्यावर भर न देता त्यानुसार त्याचे अधिक विश्लेषण करून त्या संकल्पनेला वैश्विक रूप धारण करण्याच्या प्रेरणा निर्माण केल्या.

'अक्षरवैदर्भी' या नियतकालिकाने तेहतीस वर्षाच्या (आजतागायत सुरू आहे) कारकिर्दी-मध्ये जनसाहित्य सारख्या वटवृक्षाला विस्तारित करण्याचे योगदान दिले. इतर वाङ्मयीन नियत-कालिकांपेक्षा आपल्या नियतकालिकाचा वेगळेपणा जोपासण्यासाठी 'जनसंस्कृतीचे उपासक आणि आधारस्तंभ' अक्षरयात्रिक (लेखकांचा वाङ्मयीन परिचय करून देणारे सदर), अक्षरगंगेच्या काठी (प्रत्येक आठवडयाला सभा घेऊन साहित्यिकांच्या चर्चा करून घेतल्या) या सदरांची निर्मितो केली. या सर्व सदरांमधून जनसाहित्याला पोषक वातावरण (लेखन) केले आणि हेच 'अक्षर-वैदर्भी'चे महत्त्वाचे योगदान आहे.

इ.स. 1970 नंतर निर्माण झालेल्या जनसाहित्य चळवळीला ठसठशीतपणे सर्वांसमोर ठेवून साहित्यासमोर एक नवा व्यापक दृष्टिकोन ठेवला. वाङ्मयनिर्मिती आणि वाङ्मय चळवळ या

संदर्भात रावसाहेब कसबे म्हणतात, 'कलावंत जर खरा कलावंत असेल, तर तो आपल्या अनुभवांना व्यापक आणि अथांग रूप देण्यासाठी मानवी जीवन आणि समाजजीवन यांचा विविध पातळ्यांवर डोळसपणे स्वत:शी प्रामाणिक राहून शोध घेत असतो'[3] यामधून वाङ्मयाचा अनेक बाजूने विचार केला जातो.

प्रारंभापासून 'अक्षरवैदर्भी'ने आपली स्वतंत्र छपाईयंत्र, जनसाहित्य परिषद प्रकाशन, जनसाहित्य परिषदेचे मुखपत्र अशा अंगाने साहित्य विश्वात पदार्पण केले. आपले कार्य अतिशय चोखपणे पार पाडले. कोणत्याही वाङ्मय प्रवाहाची मुखपत्रे किंवा नियतकालिके आपली वैचारिक भूमिका घेऊन जगत असताना वाङ्मय क्षेत्रामध्ये आपली बाजू मांडण्याचा सातत्याने प्रयत्न करतात.

जनसाहित्याची चळवळ आणि तिचे तात्त्विक अधिष्ठान अधिक बळकट करण्याचे भविष्य पाहिले. या साहित्याच्या निर्मितीचा विचार मांडताना र. बा. मंचरकर म्हणतात, 'जनसाहित्याचे वेगळेपण त्याच्या मानवकेंद्रित, परिवर्तनसम्मुख, समन्वय प्रकृतीत शोधावे लागेल. विभाजिततेतून संकलितता हे जनसाहित्याचे वैशिष्ट्यपूर्ण कार्य ठरू शकेल.'[4] अशी आशावादी भूमिका व्यक्त करतात. याच संदर्भात जनसाहित्याचे अभ्यासक सुरेंद्र बारलिंगे म्हणतात, 'आनंदाबरोबर माणसाचे दु:ख जाणणे, त्या अन्यायाचा प्रतिकार करण्याकरिता आपले बाहू स्फुरण पावण, विद्राह उत्पन्न होणे आणि शेवटी त्यांच्या भव्यदिव्यतेचे, उदात्त मानवतेचे प्रकार साहित्यातून प्रकट होतात. हेच खरे विश्वाचे साहित्य म्हणजे जनसाहित्य'.[5] या सर्व सैद्धांतिक बाजूवर आपल्या हाती जे काही निष्कर्ष आले आहे. ते शेवटी नोंदविली आहे. तात्पर्य, साहित्य क्षेत्रामध्ये आजतागायत 'अक्षरवैदर्भी' या नियतकालिकाने आपली अस्मिता जोपासली आहे.

## निष्कर्ष

1. 'जन' या संकल्पनेचा विस्तार 'गण' या शब्दातून निर्माण होऊन ही संरचना संपूर्ण मानवसमूहाला एकत्रित आणण्याचे कार्य करते.
2. 'अक्षरवैदर्भी' या नियतकालिकाने पहिल्या अंकापासून तर आजपर्यंत धर्म, पंथ, पक्ष इतर समूहामध्ये विखुरलेला लोकसमष्टीचा (लोकसमूह) वेध घेणारी जाणिव जनसाहित्यात चित्तित करून जनसाहित्याचा एक नव्या साहित्य प्रवाहाची ओळख करून दिली
3. 'जन' म्हणजे सर्व सामान्य निखळ माणूस आणि त्यांच्या जीवन जाणीवा व्यक्त करणारे साहित्य म्हणजे जनसाहित्य होय.

## संदर्भ

1. वडस्कर या. वा, जनसाहित्याच्या दिशेन, मेहता पब्लिशिंग हाऊस, प्रथमावृत्ती 1988, पृ. 17.

2. खवले हिंमत, अक्षरवैदर्भी, वर्ष 5, अंक 11, फेब्रु 1989, पृ. 29.
3. वडस्कर, या. वा., जनसाहित्याच्या दिशेन, मेहता पब्लिशिंग हाऊस, प्रथमावृत्ती 1988, पृ. 16.
4. सावरकर सुभाष, जनसाहित्य : संकल्पना, स्वरूप, आवाका, वर्ष 13, अंक 7-8-9, ऑक्टो.-नोव्हें-डिसें., 1996 (दिवाळी विशेषांक अक्षरवैदर्भी).
5. वडस्कर या. वा., जनसाहित्याच्या दिशेन, मेहता पब्लिशिंग हाऊस, प्रथमावृत्ती 1988, पृ. 17.



**अतिथि अध्यापिका (मराठी विभाग),**
**राष्ट्रिय संस्कृत संस्थान,**
**क. जे. सोमैया संस्कृत विद्यापीठ,**
**विद्याविहार, मुंबई-७७**


★★★

# वास्तुशास्त्रदृष्ट्या गृहदोष निरूपणम्

✍डॉ. अनिरूद्ध नारायण शुक्लः

**( भगवतो जैमिनेर्लिप्सासूत्रं व्याचक्षाणैरेभिर्महापण्डितैः 'कुत्वर्थत्वं पुरुषार्थं वार्थोपार्जनस्य'ति मीमांसामानैरुपार्जनस्य पुरुषार्थत्वं संसाधयद्भिः, प्राकरणिकं विविधं मीमांसाशास्त्रीय विचारमुद्भावयद्भिः, 'ब्राह्मणस्य प्रतिग्रहादिना, राजन्यस्य जयादिना, वैश्यस्य कृष्यादिना, शूद्रस्य सेवादिना, सर्वेषां दाया-दिने'ति समर्थयमानैः, स्वेष्टसम्पादनाय जातिव्यवस्था गरीयसी, धर्मसम्पादनाय च सा वराकी कलङ्कभूतेत्यत्र निजामुद्वेजिकामापत्तिं प्रभाविशैल्योपस्थाप-यद्भिः, शास्त्रं लोकेऽवतारयद्भिः प्रस्तुतोऽयं गभीरो लेखो बलाद् विचारयितुं विवशीकरोतीव लक्ष्यते ॥ - स. )**

वास्तुशास्त्योपयोगिता सांप्रतिके काले मुख्यं स्थानं भजते । तत्र वास्तुः इत्युक्ते वास-योग्यभूमिः स्थानानि च । अर्थात् गृहनिर्माणे भूखण्डनिर्माणे (क्रीडादिक्षेत्राणि) च वास्तु शास्त्रस्य विचारः अत्यावश्यको भवति । तत्र गृहादिनिर्माणे वास्तुदोषं वास्तुकालञ्च अविचार्य वास्तुनिर्माणः क्रियते । चेत् तद्वास्तुः अशुभफलदायको भवति । अतः गृहादिनिर्माणे दिग्देशकालादिविचार्य वास्तुनिर्माणः कर्तव्यः ।

**तत्र भूप्लवत्म्** -

नैऋत्य-पश्चिम-दक्षिण-वायव्य-आग्नेय कोणेषु तथा च इष्टभूखण्डस्य मध्यभागे भूप्लवनं व्याधिः दरिद्रता मृत्युवाहिका च कथिता । अतः उक्तस्थाने भूप्लवनं न कर्तव्यम् । उक्तञ्च

**रक्षोम्बुनाथकीनाशमरुद्दह्नं दिक्प्लवा ।**
**मध्यप्लवा च भूर्व्याधिदारिद्रयमरकावहा ॥**[१]

अपि च आग्नेयकोणे प्लवाभूमिः स्यात् तदा तत्र निर्मितगृहे अग्निदाहस्य भयः भवति । दक्षिणादिग्गतप्लवा भूमौ गृहानिर्माणे मृत्युभयः स्यात् । नैऋत्यकोणे प्लवा भूमिः रोगोत्पादकी भवति । पश्चिमदिग्गतप्लवा भूमिः धनधान्यविनाशकी भवति । यथा -

**वह्निप्लवा वह्निभये मृतये दक्षिणप्लवा ।**
**रूजे रक्षः प्लवा प्रत्यक्प्लवा धान्यधनच्छिदे ॥**[२]

**गृहनिर्माणे वर्ज्या भूमयः** -

**तुषास्थिकेशकीटत्वक् शङ्खभस्मोषरान्विताम् ।**

**कर्मराङ्गारिणीं दुष्टसत्वानार्यजनां त्यजेत् ॥**[३]

या भूमि: तुसास्थिकेश कीटत्वम् शंखभष्मोषरमृदभाण्ड-अङ्गारिणीसमन्विता स्यात्तथा यत्र दृष्टसत्वानार्य जनानां निवासो स्यात्तदा सा भूमि: त्यक्तव्या ।

**चैत्रादिमासेषु निर्मितानां गृहाणां फलम्**

**चैत्र शोककरं वेश्म ज्येष्ठे मृत्युप्रदायकम् ।**
**पशुनाशनमाषाढे शून्यं भाद्रपदे कृतम् ॥**[४]

अर्थात् चैत्रमासे निर्मितभवनं शोककरं भवति । ज्येष्ठमासे भवननिर्माणं मृत्युप्रदायकं भवति । आषाढमासे भवननिर्माणे सति पशुसम्पदाया: विनाशो भवति । भाद्रपदमासे भवननिर्माणे सति शून्यता भवति । अपि च -

**आश्विने कलहाय स्यात् कार्तिके भत्यनाशनम् ।**
**माघे चाग्निभयाय स्यान्मासेष्वेषु न कारयेत् ॥**[५]

**दिङ्मूढेषु गृहेषु फलम्**

**पूर्वपश्चिमदिङ्मूढं वास्तु स्त्रीनाशकृद् भवेत् ।**
**उदङ्मूढं न निष्पत्तिं याति सर्वं च नाशयेत् ॥**[६]

यत् वास्तु: पूर्वपश्चिमदिशो: दिङ्मूढ़ (वक्र: दिग्ज्ञानाभाव:) तदा तद्वास्तु: स्त्रीनाशक: भवति । उत्तरदिशि दिङ्मूढ: स्यात्तदा तद् वास्तो: निर्माणकार्यम् एव न पूरयति, यदि पूरयति तदा सर्वस्वाहानि: भवति । दक्षिण दिङ्मूढ: स्यात्तदा मरणमेव भवति ।

**नगरे प्रासादादीनां निवेशस्थानम्**

पूर्वोक्तदोषाणां दृष्टिगतं भूत्वा शिल्पिना नगरे सदैव पूर्वाभिमूखप्रासादगहाणि निर्मातत्यानि । उक्तम् - **प्राग्वास्तुनि तु कुर्वीत प्रासादं मन्दिरं पुरे ।**[७]

गृहनिर्माणे वलित-चलित-भ्रान्त-विसूत्रनिर्मितानि गृहस्वरूपाणि वास्तुशास्त्रे कथितानि । तत्र यस्या: भूमे: आकार: मुखाग्रभागे सूच्याकारा स्यात् तदा सा भूमि: दिङ्मूढ: (दिग्ज्ञानाभावयुक्त:) स्यात् सा भ्रान्ताख्या स्यात् । यो भूमि: कोणै: हीन स्यात् सा विसूत्राख्या कथ्यते । वलितवास्तौ विचलनस्य भूकम्पस्य च आशंका भवति । चलितवास्तौ विग्रह: भवति । भ्रान्ते स्त्रीणां विनाश: भवति । विसूत्रे शत्रुवृद्धि: भवति । उक्तम् -

**वलिते चलितस्थानं चलिते विग्रहो भवेत् ।**
**भ्रान्ते योषिद्विनाशाय विसूत्रं भूरिशत्रुकृत् ॥**[८]

गृहनिर्माणवसरे शल्यादिकं मर्मदोषचतुष्ट्यज्ञानमपि आवश्यकं भवति, अत: शल्यादिसहितभूमि: सशल्य: कथ्यते । भवनस्य अधोभागे क्षीणभूमि: पादहीना कथ्यते, एकसमानसन्धि: यथा दृष्टिकोपरिसमाना अपराया: दृष्टिकाया: सन्धि: समसन्धि: कथ्यते, भवनस्य

शिरस्थाने स्थूलता महानता च स्यात् तदा सा भूमिः शिरोगुरुः कथ्यते । अतः यादृक् सर्वाणि भवनानि मर्मदोष युक्तानि कथितानि वास्तुशास्त्रे । यथा –

**सशल्यं पादहीनं च समसन्धिः शिरोगुरुः ।**
**वेश्मनाभिदविमुद्दिष्टं मर्म दोषचतुष्ट्यम् ॥**[९]

गृहनिर्माणे मार्गवेधः अपि अशुभफलदायको भवति । तत्र यदि पृथक् पृथक् गृहद्वयमध्ये पार्श्वे वा एकैव मार्गः स्यात् तदा मार्गवेधः भवति । एवं मार्गवेधे सति गृहजनान् शोकसन्तापादिफलं लभते । यथा –

**मार्गश्चैको यदा गच्छेदुभयोर्गृहपार्श्वयोः ।**
**मार्गवेधस्तदा स स्याच्छेकसन्तापकारकः ॥**[१०]

गृहनिर्माणे द्वारस्थापनमपि महन्महत्वं भजते । तत्र मनुष्याणां भवनेषु मध्यवर्ती भागे कदापि द्वारं न निर्मातव्यम् । भवन मध्यप्रदेशे द्वारनिर्माणे कुलनाशः भवति । यथोक्तम् –

**मध्येद्वारं न कर्तव्यं मनुजानां कथञ्चन ।**
**मध्ये द्वारे कृते तत्र कुलनाशः प्रजायते ॥**

तत्रापि गृहेमुकय द्वारस्थापनस्य निश्चितं स्थानं वास्तुशास्त्रे विहितम् । गृहस्य यस्मिन् भागे द्वारनिर्माणमभीष्टं तस्मिन्भागे गृहस्य दैर्घ्यमाने (लम्बाई) विस्तारमाने (चौडाई) च नवभिर्विभज्य नवभागं करणीयं दक्षिणः तु पंचभागे गृहभित्तिकादिनिर्माणकार्यं करणीयम् । तथैव उत्तरतः भागत्रयेऽपि भितिकादिनिर्माण कार्यं करणीयम् । यद् अवशिष्टं दक्षिणतः षष्ठभागः उत्तरतश्च चतुर्थभागः तत्र द्वारं निर्मातव्यम् । यथोक्तम् –

**नवभागं गृहं कृत्वा पंचभागं तु दक्षिणे ।**
**त्रिभागमुत्तरे कार्यं शेषं द्वारं प्रकीर्तितम् ॥**[११]

तत्र द्वारस्थापने दक्षिणोत्तरभागयोः निर्णयार्थ वास्तुरत्नावल्यां निगदितमस्ति –

**दक्षिणाङ्ग स वै प्रोक्तः मन्दिरान्निःसृते सति ।**
**यो भूयाद् दक्षिणे भागे वामे भूयात् स वामगः ॥**[१२]

अर्थात् गृहतः बहिर्गमनकाले दक्षिणहस्तं प्रति दक्षिणे भागः, वामहस्तं प्रति उत्तरो भाग ज्ञेयः । गृहप्रासादिनिर्माणावसरे दैर्ध्ये विस्तारे वा एव द्वारनिर्माण कारयेत् । कोणेषु द्वारस्थापनं दु:खदायकं भवति, तथा च द्वारस्योपरि द्वारं द्वारस्य सम्मूखम् अपरद्वारं न करणीयम् । यथा पराशरस्य वचनम् –

**द्वारस्योपरि यद्द्वारं द्वारं द्वारस्य सम्मुखम् ।**
**न कार्यं व्ययदं यच्च संकटं तद्दरिद्रकृत ॥**

अपि च –

**द्वारं द्वारस्य कर्तव्यमुपर्युपरि भूमिषु ।**
**प्रदक्षिणेन वा कार्यं कार्यं नापरथा पुनः ॥**[१३]

तत्र गृहसम्मुखे कोऽपि प्रणाल: (नाबदान) स्यात्तदा महद् दु:खदायक: भवति । अपि च महान् भय: महान् कलहश्चापि भवति, अत एव द्वारवेधं विहाय प्रणाल: कर्तव्य: । उक्तम् -

**निष्कर्ष**

वास्तुशास्त्रविचारक्रमे सर्वप्रथमं गृहनिर्माणपूर्वं दोषोत्पादकं स्थानद्वारादिकं सम्यक् विचार्य एव गृहनिर्माणं कर्तव्यम् । यथा - उपर्युक्तं भूप्लवं वर्ज्यभूमि:, चैत्रादिमाषानां विचार: आदि एवं विचार्य गृहनिर्माणे सति गृहजनानां कृते शुभफलदायकं गृहं भवति । अत: आधुनिककाले गृहोपयोगी स्थानाद्यल्पत्वे उपर्युक्तं गृहदोषनिरूपणम् अवश्यं ध्यातव्यम् इति ।

**सन्दर्भा:**

1. समराङ्गणसूत्रधार: गृहदोषनिरुपणाध्याये, श्लोक. 2 ।
2. समराङ्गणसूत्रधार: गृहदोषनिरुपणाध्याये, श्लोक. 3 ।
3. समराङ्गणसूत्रधार: गृहदोषनिरुपणाध्याये, श्लोक. 5 ।
4. समराङ्गणसूत्रधार: गृहदोषनिरुपणाध्याये, श्लोक. 6 ।
5. समराङ्गणसूत्रधार: गृहदोषनिरुपणाध्याये, श्लोक. 7 ।
6. समराङ्गणसूत्रधार: गृहदोषनिरुपणाध्याये, श्लोक. 9 ।
7. समराङ्गणसूत्रधार: गृहदोषनिरुपणाध्याये, श्लोक. 1 ।
8. समराङ्गणसूत्रधार: गृहदोषनिरुपणाध्याये, श्लोक. 13 ।
9. समराङ्गणसूत्रधार: गृहदोषनिरुपणाध्याये, श्लोक. 20 ।
10. समराङ्गणसूत्रधार: गृहदोषनिरुपणाध्याये, श्लोक. 24 ।
11. बृहद्वास्तुमाला श्लोक सं. 158 ।
12. वास्तुरत्नावल्याम् ।
13. समराङ्गणसूत्रधार: गृहदोषनिरुपणाध्याये, श्लोक. 45 / वास्तुराजवल्लभे राजगृहनिवेशलक्षणम् - श्लोक. 23 ।
14. समराङ्गणसूत्रधार: गृहदोषनिरुपणाध्याये, श्लोक. 56 ।

**सन्दर्भग्रन्थसूची**

1. समराङ्गणसूत्रधार:, महाराजाधिराजश्रीभोजदेवविरचितम्, अनुवादक: - डॉ. श्रीकृष्ण जुगनू, प्रकाशक:, चौखम्बा संस्कृत सीरीज आफीस, वाराणसी ।
2. राजवल्लभवास्तुशास्त्रम्, सूत्रधारमण्डनविरचितम्, व्याख्याकार: - डॉ. श्रीष्ण जुगनू, प्रकाशक: - परिमल पब्लिकेशन दिल्ली ।
3. वास्तुसर्वस्व, शैलेन्द्र शर्मा दैवज्ञ, रंजल पब्लिकेशन, नई दिल्ली ।

4. विश्वकर्मावास्तुशास्त्रम् दिव्येन विश्वकर्मणा विरचितम्, व्याख्याकर्त्ता – डॉ. श्रीष्ण जुगनू, प्रकाशक: – परिमल पब्लिकेशन दिल्ली ।
5. प्रासादमण्डनम् – सूत्रधारमण्डलविरचितम्, व्याख्याकार: श्रीष्ण जुगनू, प्रकाशक: – परिमल पब्लिकेशन दिल्ली ।
6. बृहत्संहिता, वराहमिहिरविरचितम् – अच्युतानन्द झा, प्रकाशक: – चौखम्बा विद्याभवन वाराणसी।
7. बृहद्वास्तुमाला, श्री रामनिहोर द्विवेदी, संकलित, सम्पादक – डॉ. ब्रह्मानन्द त्रिपाठी, प्रकाशक: – चौखम्बा सुरभारती प्रकाशन, वाराणसी ।
8. वास्तुशास्त्रविमर्श:, लेखक: – हरिप्रसाद पाण्डेय:, प्रकाशक: – न्यू भारतीय बुक कार्पोरेशन दिल्ली ।
9. वास्तुमञ्जरी, सूत्रधारनाथेनविरचितम्, व्याख्याकार: श्रीष्ण जुगनू, प्रकाशक: – चौखम्बा संस्कृत सीरीज ऑफीस, वाराणसी ।
10. वास्तुशिल्प चयन, लेखक: श्रीष्ण जुगनू, प्रकाशक: – न्यू भारतीय बुक कार्पोरेशन दिल्ली ।

**संविदाध्यापक: ( ज्योतिषविभाग: )**
**राष्ट्रियसंस्कृतसंस्थानम्,**
**क.जे.सोमैयासंस्कृतविद्यापीठम्,**
**विद्याविहार:, मुम्बई-७७**

★★★

# शारीरिक स्वास्थ्य एवं योग, एक अध्ययन

✍डॉ. शंकर बाबुराव आंधळे

**( स्वास्थ्य अर्थात् स्वस्थ व्यक्ति में रहनेवाला धर्म । सुश्रुत के अनुसार जिसक सत्वादि गुण तथा वातादि दोष, जठर तथा काय की अग्नि, रसादि सप्त धातु एवं पुरीषादि मल की क्रियाएँ सम हो तथा जिसकी आत्मा, इन्द्रियाँ तथा मन प्रसन्न हो वह स्वथ्य कहलता है । इस प्रकार उक्त तमाम बातें संसार की किसी विधि से शत प्रतिशत सम्भव नही है । इनके लिए एक मात्र उपाय है, और वह है योग । शारीरिक, मानसिक एवम् आध्यात्मिक - हर प्रकार का योग-क्षेम इस विद्या से सम्भव है । निबन्ध प्रस्तोता ने यहाँ शारीरिक स्वास्थ्य समस्या के कारणों पर विचार करते हुए योगाभ्यास से त्रिविध विकास पर प्रकाश डाला है ॥ - स. )**

भारतीय संस्कृति में योग का बहुत पुराना सहसंबंध है । योग हमारे ऋषि मुनियों की हमारे लिए एक बडी देन है । योग भारतीय संस्कृति व जीने की शैली का प्राण है । शारीरिक स्वास्थ्य के लिए योग को वरदान माना गया है ।

प्राचीन व्याकरणशास्त्र को देखा जाए तो स्पष्टरूप से योग के स्वरूप की जानकारी हो जाएगी । व्याकरण में योग सम्बन्धी दो धातुएँ प्राप्त होती है – **'युज् समाधौ और युजिर् योगे'** इसका अर्थ योग समाधि है और संयोग, मिलन, जोड आदि के अर्थ में किया गया है । योग की अवस्था आत्मा व परमात्मा के संयोग, मेल, मिलन की अवस्था है ।[1]

आधुनिक युग में हमने अपनी संस्कृति को भुला दिया और पाश्चात्त्य संस्कृति एवं रोगों ने हमारे शरीर पर अपना अधिकार जमा लिया है । आज घर-घर में फास्ट फूड और जंक फूड का उपयोग भारी मात्रा में किया जा रहा है । विशेष कर छोटे बच्चे इसका सर्वाधिक उपयोग कर रहे है । यह फूड हमारी पाचन शक्ति के साथ-साथ पेट के रोगों को बढावा मिल रहा है । यह यांत्रिक युग में मानव दिन प्रतिदिन आलसी बनता जा रहा है । कसरत कम होने से मानव यंत्रों का उपयोग ज्यादा करने लगा है । मानव ने कसरत, व्यायाम, चलना कम किया है । इस लिए आज विश्व में मोटापा यह एक बडी समस्या बन गई है ।

## शारीरिक स्वास्थ्य

जीवन सार्थक रूप से जीने के लिए शारीरिक स्वास्थ्य अच्छा रखना आवश्यक है । शारीरिक स्वास्थ्य की सुरक्षा करना हमारा परम धर्म है । जीवन की संचित निधि को सुरक्षित रखने के लिए स्वच्छता की ओर ध्यान देना अत्यन्त आवश्यक है ।

शारीरिक स्वास्थ्य का अर्थ केवल रोगों से मुक्ति नहीं है । यदि कोई शारीरिक, मानसिक, बौद्धिक एवं भावनात्मक रूप से तंदुरूस्त हो तभी उसे शारीरिक स्वास्थ्यपूर्ण व्यक्ति कह सकते है ।[2]

जीवन जीना यह भी एक कला है । हर एक प्राणी अपने जीवन को अपने ढंग से जीना चाहता है और उसी के अनुसार वह साधन जुटाने का प्रयास करता है । मानव स्वच्छता का पहला पाठ अपने परिवार से सीखता है । आज हमें गर्व है कि भारत के प्रधानमंत्री पूरे स्वच्छ भारत के लिए एक आंदोलन चला रहे हैं और उसका परिणाम भी दिखने लगा है । रोग व्यक्ति के शरीर को स्वस्थता से दूर हटाकर उसे आलसी बना देता है ।

## शारीरिक स्वास्थ्य समस्या के कारण

मानव का शरीर एक मशीन के कूलपुर्जे की तरह है जिसमें अनेक प्रकार की समस्याएँ उत्पन्न होती हैं । जिसका समय पर इलाज नहीं करवाया जाए तो बडी कठिनाई पैदा हो सकती है ।

### १. पर्यावरण असन्तुलन

मानव का शरीर पर्यावरण पर निर्भर करता है । मानव जिस प्रकार के वातावरण में रहता है वह उसी के अनुरूप अपने आप को विकसित कर लेता है । जादा गर्मी, जादा सर्दी के मौसम में मानव आदि अपना खयाल नहीं रखेगा तो वह कई प्रकार की बीमारियों से ग्रासित हो सकता है ।

### २. अनुसन्तुलित भोजन

मानव के स्वास्थ्य समस्या का दूसरा प्रमुख कारण असन्तुलित भोजन है । मानव ने खाना कब खाना चाहिए, कितने प्रमाण में खाना चाहिए, खाना कैसे करना चाहिए, यानि जो खाना है उसमें कैलरी की मात्रा कितनी होनी चाहिए, गरिष्ट भोजन करना चाहिए या नही आदि खाने संबंधी आदतें व्यक्तियों को बीमार कर सकती है । जैसे व्यक्ति ज्यादा खाना खा लेता है तो वह मोटा हो जाता है, कम खाता है तो पतला हो जाता है । प्रोटीन युक्त, कार्बोहायड्रेट, वसायुक्त भोजन समय पर खाना चाहिए और शरीर को पूर्ण कॅलरी युक्त मिलता रहे । मानव को जंक फूड, फास्ट फूड, बासी खाना, दूषित जल आदि से बचना चाहिए ।

### ३. मादक पदार्थों का सेवन

स्वास्थ्य सम्बन्धी समस्याओं का एक महत्वपूर्ण कारण मादक पदार्थों का सेवन करना है । मादक पदार्थ से मानसिक और शारीरिक उत्तेजक का कार्य करते है, जो बाद में शारीरिक गतिविधि को प्रभावित करते है । अपने खेल को उत्कृष्ट बनाने और प्रदर्शन को सुधारने के लिए खिलाडियों द्वारा कई प्रकार की दवाओं, हार्मोन्स व आहार लेने का प्रयास किया जा रहा है । जिसको लेना पाबंदी है और उसका शरीर स्वास्थ्य के उपर बाद में विपरित परिणाम होता है ।

### ४. मानसिक तनाव संबंधी कारण

आधुनिक युग में मानव का रक्तचाप अधिक व कम होता रहता है जिसके कारण नींद न आना, हृदय रोग की व्याधी होती है, जिसका कारण मानसिक तणाव है । मानव की सोच नकारात्मक हो जाती है और मानव की किसी कार्य में रूची नहीं होती है । इसके अलावा आकस्मिक आपदा, नुकसान, शारीरिक विकलांगता, बेरोजगारी, गलत पेहराव आदि कई परिस्थितियो है जो मानव में मानसिक तणाव संबंधी बिमारियों को जन्म देती है ।

### ५. गलत पेहराव

व्यक्ति का पेहराव अच्छा न होने से विविध शारीरिक समस्या को सामने जाना पडता है। ऊँची हील की सैंडल, फिट कपडा पहने से मानसिकता के साथ ही शारीरिक दोष निर्माण हो जाते है ।[3]

उपरोक्त शारीरिक स्वास्थ्य संबंधी समस्याओं से बचने के लिए मानव को शारीरिक व्यायाम और योग का अभ्यास करना चाहिए । पर्यावरण को हानि पहुँचानेवाला मानव ही है और मानव को अपने वंश को आगे जीने के लिए पर्यावरण का सन्तुलन बनाय रखना चाहिए । व्यक्ति का समय समय पर सन्तुलित भोजन करना चाहिए । शुद्ध जल, स्वच्छ एवं पौष्टिक भोजन समय समय पर ग्रहण करना चाहिए जिससे शारीरिक समस्याओं से बचा जा सकें ।

### योग अभ्यास

योग शब्द 'युज् समाधौ' धातु में घञ् प्रत्यय लगाने पर निष्पन्न हुआ है । जिसका अर्थ **समाधि** है । **जीवात्मा का परमात्मा से संयोग योग कहलाता है** । तन और मन को प्रसन्न रखना है । **'संयोगो योग इत्युक्तो जीवात्मपरमात्मनो: ।'** अर्थात् जीवात्मा और परमात्मा की साम्यावस्था समाधी है । महर्षि पतञ्जलि ने योग साधना को आठ अंगो में विभाजित किया है और अंतिम अंग समाधि को माना है । यम, नियम, आसन, प्राणायाम, प्रत्याहार, धारणा, ध्यान और समाधि यह '**अष्टांग योग**' कहलाता है ।[4]

योग में संपूर्ण मानव जाति को एकजुट करने की शक्ति है । योग यह ज्ञान, कर्म और भक्ति का आदर्श मिश्रण है । आज के भागदौड आधुनिक युग में असंख्य लोगो ने योग को अपने जीवन का अभिन्न अंग बनाया है । योग भारतीय संस्कृति एवं जीवन शैली के प्राण है । योग करना हमारे लिए आधुनिक युग में आवश्यक हो गया है ।

अन्तर्राष्ट्रिय योग दिवस 21 जून को मनाया जाता है । संयुक्त राष्ट्र संघ ने योग की महत्ता को स्वीकारते हुए माना कि, 'योग मानव स्वास्थ्य व कल्याण की दिशा में एक संपूर्ण नजरिया है ।' 21 जून यह वर्ष का सबसे लंबा यानी बडा दिन होता है और योग मनुष्य को दीर्घ जीवन, अच्छा स्वास्थ्य प्रदान करता है ।

योग को अष्टांग योग में विभाजित किया गया है । अष्टांग योग में प्रथम पाँच अंग बहिरंग और शेष तीन अंग अंतरंग के नाम से जाने और पहचाने जाते है । आठ अंगां में प्रथम अंग नियमें में शौच, संतोष, तप, स्वाध्याय और ईश्वर प्रणिधान शामिल है । दूसरे अंग आसन में योगासनों द्वारा शारीरिक नियंत्रण, तोसरे प्राणायाम में श्वास लेने सम्बन्धी तकनीकों द्वारा प्राण पर नियन्त्रण, चौथे प्रत्याहार के अंतर्गत अपने इन्द्रियों को वश में करना, पांचवे में एकाग्र चित्त होकर अपने मन को नियंत्रित करना, छठे अंग ध्यान में सातत्य, ध्यान मग्न होना, सातवे में समाधि के अंतगर्त आत्मा से जूडना है । इस के अतिरिक्त यम अंग में अहिंसा, सत्य, अस्तेय, ब्रह्मचर्य और अपरिग्रह का पालन करना है ।[5]

मानव शरीर पूरी तरह से स्वस्थ होगा तो ही निश्चित रूप से उसका मन भी प्रसन्न और प्रफुल्लित होगा । इसके लिए योग बहुत लाभदायक है । योगासन का सबसे अच्छा लाभ यह है कि, यह करने के लिए सहज, सरल और सुलभ आसन है । योगासन, करने के लिए धन की आवश्यकता नहीं है । योग अमीर-गरीब, छोटा-बडा सबके लिए समान है । योगासन में मांसपेशीयों को तानने, सिकोडने तथा ऐठने वाली शारीरिक क्रियाएँ करनी पडती है । वही दूसरी और तणाव, खिंचाव दूर करने वाली क्रियाएँ भी होती है । योग से शारीरिक थकान को समाप्त कर के आधुनिक जीवन शैली की विभिन्न बीमारियों से भी मुक्ति मिलने की शक्ति हासिल हो जाती है । योग करने से मनुष्य शारीरिक, मानसिक एवं आध्यात्मिक उन्नति के पथ पर निरन्तर बढता रहता है ।

## योग अभ्यास एवं शारीरिक स्वास्थ्य/विकास

हरदिन योग अभ्यास करने से योगाभ्यासी का शरीर सुदृढ, निरोगी एवं बलशाली हो जाता है । कहा गया है - 'आसनेन रुजो हन्ति ।' आसन रोज करने से रोगों का नाश हा जाता है ।

**आसनेन भवेद्दृढम ।**

इसमें शरीर मजबूत होने का संकेत दिया है । प्राणायाम द्वारा शरीरस्थ मलों का नाश होकर ज्ञान का प्रकाश होता है । **शरीरमाद्यं खलु धर्मसाधनम् ।**

स्वस्थ शरीर वाला व्यक्ति ही सुखी कहलाता है । योग अभ्यास से मानव शरीरस्थ वात, पित्त व कफ दोषों को साम्यावस्था में लाता है, योगाभ्यास से जठराग्नि को प्रदिप्त करने में सहयोग मिलता है, योग अभ्यास धातुओं को पुष्ट करता है, मलों को निष्कासन की प्रक्रिया भलीभाँति सम्पन्न होती है । नित्य योग करने से मानव के इन्द्रिय, मन व आत्मा प्रसन्न रहते है । यागाभ्यास द्वारा शारीरिक स्वास्थ्य अच्छा प्राप्त करके जीवन में सफलता प्राप्त की जाती है ।[6]

**योग अभ्यास एवं मानसिक स्वास्थ्य/विकास**

मानव प्राणी निरन्तर प्रगति की ओर जाने के लिए प्रयत्नशील रहता है । किन्तु अपने मन पर नियन्त्रण न होने के कारण मानव सफलता प्राप्त नहीं कर पाता । इसलिए मानव ने अपने मन पर नियन्त्रण करने के लिए योगाभ्यास का सहयोग लेना चाहिए । मानव प्राणी ने प्राणयाम, प्रत्याहार, धारणा और ध्यान का अभ्यास करता है तो मन पर आसानी से विजय पाया जा सकता है । व्यक्ति यम-नियमों का पालन करके अपने चारित्रिक दोषों को दूर करके गुणों का वरण कर सकता है, जो व्यक्ति के मानसिक स्थिति को उच्च स्थान प्रदान करने में सहायक है ।[7]

**योगाभ्यास एवं आध्यात्मिक विकास**

मानव चार पुरुषार्थों धर्म, अर्थ, काम और मोक्ष में से केवल अर्थ और काम की इच्छा स्वभावत: करता है । जब इनसे उपर उठता है तो धर्म की तरफ भी दृष्टि डाल लेता है । किन्तु मोक्ष के अभिलाषी विरल ही होते है ।[8]

इस प्रकार मानव के शारीरिक स्वास्थ्य में योग एक वरदान का कार्य करता है । योग अभ्यास करने से व्यक्ति अपना शारीरिक, मानसिक एवं अध्यात्मिक विकास कर लेता है । योग अभ्यास से व्यक्ति जीवन में व्यक्तिगत और सामाजिक दृष्टि से आदर्श स्थापित करता है । व्यक्ति के सर्वांगीण विकास के लिए योग अभ्यास अत्यावश्यक है ।

**सन्दर्भा**

1. निवेदिता, योग एवं प्राण साधना, पृ. सं. 1/16
2. गंदगे, के. एन्, शारीरिक शिक्षणशास्त्र, पृ. सं. 2/251
3. गंदगे, के. एन्, शारीरिक शिक्षणशास्त्र, पृ. सं. 3/257
4. निवेदिता, योग एवं प्राण साधना, पृ. सं. 4/17
5. निवेदिता, योग एवं प्राण साधना, पृ. सं. 5/16
6. भारद्वाज ईश्वर, सरल योगासन, पृ. सं. 6/8
7. भारद्वाज ईश्वर, सरल योगासन, पृ. सं. 7/8
8. भारद्वाज ईश्वर, सरल योगासन, पृ. सं. 8/9

**सन्दर्भग्रन्थसूची**


1. भारद्वाज ईश्वर (2008) – सरल योगासन, सत्यम् पब्लिशिंग हाउस, नई दिल्ली – 110059, ISBN – 81-88134-18-x
2. शेखावत दयाल सिंह (2012) – योग दर्पण, कृष्णा पब्लिकेशन, जयपूर – 302012 ISBN – 978-81-905447-7-1
3. षढन्गी सुधांशु कुमार (2010) – योगसारसंग्रह, भारतीय विद्या प्रकाशन, दिल्ली – 110007
4. पांडे उर्मिला (2016) – योगसाधना के दो शिखर, पतंजलि एवं बुद्ध, सत्यम् पब्लिशिंग हाउस, नई दिल्ली, ISBN – 978-93-83754-71-7
5. निवेदिता (2015) – योग एवं प्राणसाधना, सत्यम् पब्लिशिंग हाउस, नई दिल्ली, ISBN – 978-93-83754-75-5
6. गंदगे के. एन्. (2006) – शारीरिक शिक्षणशास्त्र, समर्थ प्रकाशन, नांदेड



**शारीरिकशिक्षा विभाग,**
**राष्ट्रिय संस्कृत संस्थान,**
**क. जे. सोमैया संस्कृत विद्यापीठम्,**
**विद्याविहार, मुम्बई-७७**


★★★

# नागेशरीत्या तार्किकभूषणकृतोर्मतनिरसनपूर्वकः स्फोटविमर्शः

✍सुश्री विदुषी बोल्ला

**(शब्दे श्रोत्रेन्द्रियण गृहीते सति जायते अर्थबोध इति सामान्यतया सम्मन्यते । परं कः शब्दः कीदृशः शब्दः कुतो वा तस्य अर्थवाचकत्वम्, स च शब्दः कतिविधः, केन शब्देन कस्यार्थस्य बोधः, कुतो वा बोधः, ध्वनिः कः, कतिप्रकारश्च स इत्यादिविषये शास्त्रेषु भूयान् विचारः कृतः । गवेषिकात्र तत्र-तत्र विमृश्य विशेषतो न्यायमतमुपपाद्य शाब्दिकदिशा तन्निरस्य शाब्दिक-सम्मतं मतं प्रस्तौति । तथाहि नैयायिका वर्णसमूहात्मकं पदमर्थवाचकमिति प्रतिपादयन्ति । किन्तु वैयाकरणमते तादृशस्य पदस्य प्रत्यक्षत्वासम्भवात् स्फो-टात्मकः शब्द एवार्थवाचक इति दृढं निरूप्यते । तदनुसारम् स्फोटविषयका विचाराः क्रमेण निरूपिताः ॥ - स.)**

### वृत्त्याश्रयः शब्दः कः? -

मञ्जूषायामादौ शक्तिलक्षणाव्यञ्जनावृत्तिं निरूप्य वृत्तेः आश्रयभूतस्य शब्दस्य स्वरूपं प्रतिपादयति । वृत्त्याश्रयमते बहूनि मतमतान्तराणि सन्ति । यथा ध्वनिरेव शब्दः, स च अनित्यः इति नैयायिकवैशेषिकाः आचक्षते । ध्वनिव्यङ्ग्यं वर्णात्मकं नित्यं शब्दमाहुः मीमांसकाः । वैयाकरणाः पदे वर्णानामिव वाक्ये पदानां कल्पितत्वात् तेषामर्थवत्त्वमपि काल्पनिकमिति वाक्यस्यैव शब्दत्वं सङ्गिरन्ते । एवञ्च शाब्दिकमते शक्तिः व्यञ्जना चेति वृत्तिद्वयम् । वृत्तेः निरूपकः अर्थः, वृत्तेराश्रयः शब्दश्च । अर्थनिरूपिता वृत्तिर्यत्र तिष्ठति, स एव वृत्त्याश्रयः उच्यते । वृत्त्याश्रय अर्थवाचको भवति । तत्र कोऽर्थवाचक इति शङ्कायां सत्यां वर्णः, वर्णसमूहः, ध्वनिः, स्फोटो वेति विचाराः शास्त्रान्तरेषु सन्ति ।

### तत्र तार्किकमतम् -

तार्किकाः वृत्त्याश्रयः शब्दः पदमेव, स चाऽनित्यमिति मन्यन्ते । वर्णानां समूहः पदं, पदमेव वृत्त्याश्रयो भवति । किन्तु वर्णस्य क्षणिकत्वात् वर्णसमूहस्य प्रत्यक्षत्वाऽसम्भवात् कथमर्थवाचको भवतीत्यत्र उपायत्रयं तार्किकैः प्रदर्शितम् ।

### तत्र प्रथमः उपायः -

पूर्ववर्णस्य विनष्टत्वेऽपि तस्य संस्कारवशात् अव्यवहितोत्तरत्वसम्बन्धेन पूर्ववर्णयुक्त-चरमवर्णस्य प्रत्यक्षता भवति । एवञ्च 'घट' इत्यत्र घकार-अकार-टकार-अकाराश्चत्वारो वर्णाः,

तत्राऽव्यवहितोत्तरत्वसम्बन्धेन घकारेण अकारः सम्बद्धः, घकारसम्बद्ध-अकारेण टकारः सम्बद्धः, घकारसम्बद्ध-अकारसम्बद्ध-टकारेण सम्बद्धः अकारो वर्त्तते । तथाहि अन्तिमस्याऽकारस्य प्रत्यक्षकाले परस्परसम्बद्धत्वात् चतुर्णामपि वर्णानां प्रत्यक्षत्वे घटपदस्य प्रत्यक्षत्वं जायते । अस्मिन् उपाये घट इत्यत्र पूर्वेषां त्रयाणां संस्कारवशात् स्मरणम् अन्तिमस्य च श्रवणं भवति । अनेनोपायेन पौर्वापर्य्यव्यवहारः सुलभस्तेन च 'इको यणचि' इत्यनेन यणादिकार्य्यं सम्भवति ।

**द्वितीयः उपायः** -

शब्दजशब्दन्यायेन पदं प्रत्यक्षं भवति । शब्दात् जातः शब्दः शब्दजशब्दः, तस्य न्याय्यः= रीतिः शब्दजशब्दन्याय्यः इति कथ्यते । अनेन शब्देन वक्ता यं शब्दमुच्चारयति, स एव शब्दः श्रोतुः श्रवणेन्द्रियेण गृह्यते ।

**तृतीयः उपायः** -

पूर्वपूर्ववर्णानां श्रवणानुभवात् उत्पन्नसंस्कारेण सहितः योऽन्तिमवर्णश्रवणानुभवस्तेन पूर्वपूर्ववर्णसंस्कारसहिताऽऽन्तिमवर्णानुभवन सकलपूर्ववर्णविषयकक्रमिकस्मरणेन घटादिपदात् शाब्दबोधोः भवति ।

**तार्किकखण्डनम्** -

तार्किकाः वृत्त्याश्रयः शब्दः पदमेव, स चाऽनित्यमिति मन्यन्ते । वर्णसमुदायरूपं पदमनित्यमर्थात् उत्पत्तिविनाशयुक्तं विद्यते । यद् वस्तु उत्पत्तिविनाशवद्, तदन्यस्माद् भिद्यते, यथा मनुष्येषु गवादिषु च । परन्तु भाष्ये[1] इत्यत्र एकः इन्द्रशब्दः शतसङ्ख्यकेषु यज्ञेषु प्रादुर्भूतो युगपत् सर्वयागेषूपस्थित्या उपकारकं भवतीत्युक्तम् । अत्र 'एकः इन्द्रशब्दः क्रतुशते.'[2] इति भाष्ये पदस्याऽनित्यत्वे परस्परञ्च पदानामनेकत्वे 'एकः' इति प्रयोगेन विरोधः स्पष्टः। एवञ्च पदानां प्रत्यक्षत्वाय अव्यवहितोत्तरत्वसम्बन्धेन, शब्दजशब्दन्याय्येन, चरमवर्णपर्य्यन्त-संस्कारद्वारा समेषां वर्णानां स्मरणात्मकं प्रत्यक्षमित्युपायत्रयं प्रदर्शितम्, मञ्जूषाकृता स्वग्रन्थे ते उपायाः खण्डिताः।

**प्रथमोपायखण्डनम्** -

अव्यवहितोत्तरत्वसम्बन्धेन द्वौ विद्यमानौ एव सम्बद्धौ शक्नुतः । घटादिपदे पूर्ववर्णः उत्तरवर्णप्रत्यक्षकाले नष्टः, उत्तरवर्ण एव तदा विद्यमानः, तयोः नष्टविद्यमानवर्णौ न सम्बद्धौ । तेन च अचोऽव्यवहितपूर्ववर्णोऽयम्, इकोऽव्यवहितोत्तरवर्णोऽयमिति सुधी+उपास्यः इत्यादौ शाब्दिकद्वारा सिद्धिवेलायां प्रत्यक्षव्यवहारोऽसम्भवः स्यात् । तथा च प्रथमे पक्षे नष्टविद्यमानयोः पौर्वापर्य्यं वक्तुमशक्यमिति दोषः। तथा च पूर्वत्वविशिष्टोत्तरवर्णरूपपदस्याऽभावात् वृत्त्याश्रयत्वाभावो दोषः।

**द्वितीयोपायखण्डनम्** -

शब्दजशब्दन्याय्येन पदप्रत्यक्षत्वस्य साधनेऽपि पदस्य विद्यमानतायाः अभावः स्यात् । तस्य प्रत्यक्षस्य भ्रमत्वात् भ्रमात्मकज्ञाने वस्तुनः (पदस्य) सत्ता न सिध्यति, यथा शुक्तौ रजतभ्रमेऽपि रजतस्य विद्यमानता न जायते । यदि चाऽविद्यमाने पदे वृत्तेः आश्रयता अर्थात् नष्टं पदं वृत्तिमत् इति मन्येत, तर्हि 'नष्टः घटो जलवान्' इत्यपि व्यवहारः प्रामाणिको भविष्यति । अत्र पक्षे वर्णानां

युगपदेवोत्पन्नत्वेन पौर्वापर्य्यमसम्भवम्, अपि चाऽविद्यमाने पदे वृत्तेः आश्रयताऽसम्भवा इति दोषद्वयम् ।

**तृतीयोपायखण्डनम्** –

अस्मिन् पक्षे चरमवर्णपर्य्यन्तसंस्कारद्वारा समेषां वर्णानां स्मरणात्मकं प्रत्यक्षं जायते । अत्र समेषां वर्णानां स्मरणप्रत्यक्षेऽपि वर्णक्रमस्य पौर्वापर्य्यस्य स्मृतिप्रत्यक्षभावो दृश्यते । अस्यां स्थितौ येन क्रमेण वर्णानुभवस्तेनैव क्रमेण वर्णसंस्कारः स्यादेव इत्यत्र निश्चायकस्याऽभावात् सरः रसः, नदी दीनः इत्यादिषु पदेषु कदाचित् विपरीतक्रमेण संस्कारस्योद्बोधेन सरः इत्यस्मात् अन्यस्य रस इत्यस्य, रसः इत्यस्माच्च सरः इत्यस्य स्वभिन्नस्य अर्थबोधस्याऽऽपत्तिर्जायेत ।

शाब्दिकमतेवृत्त्याश्रयः स्फोटात्मकः शब्दो भवति । अयञ्च स्फोटः नित्यः, एकश्च, तस्मात् पौर्वापर्य्यव्यवहारः, विद्यमानत्वाद् वृत्त्याश्रयत्वं, भाष्यस्य एक इन्द्रशब्दः इति कथनस्य च सङ्गतिर्भवति ।

**चतुर्विधवाग्निरूपणम्** –

वाणी चतुर्भिर्भेदैर्भिद्यते, ते च परा, पश्यन्ती, मध्यमा, वैखरीति शब्दैर्व्यवह्रियन्ते । तेषा भेदानां स्वरूपं क्रमशः निरूप्यते –

1. **परा** – पिपर्त्ति पालयति पूरयति सर्वं जगत् इति परा वाणी । इयं जगतः उपादानकारणं शब्दब्रह्मस्वरूपं वर्त्तते । मञ्जूषायां परावाचः स्वरूपम् – 'तत्र मूलाधारस्थ-पवनसंस्कारीभूता मूलाधारस्था शब्दब्रह्मरूपा स्पन्दशून्या बिन्दुरूपिणी परा वागुच्यते'[3] । अर्थात् ईश्वरात् सिसृक्षारूपा माया वृत्तिर्जायते । मायावृत्तितः बिन्दुरूपमव्यक्तं त्रिगुणं जायते । तस्माद् बिन्दोः शब्दब्रह्मनामको नादः उत्पद्यते, यत्र वर्णपदवाक्यानां भानं न भवति । इदं शब्दब्रह्म सर्वत्र व्याप्तमपि प्राणिनां मूलाधारचक्रे उच्चारणेच्छया उत्पन्नप्रयत्नेन सह वायोः सम्बन्धः, तेनाऽभिव्यक्तं स्फुरणरहितं सत् परा वाक् कथ्यते । अत एव आह मञ्जूषायाम् – मूलाधारचक्रे स्थितपवनस्य संस्कारेणाऽभिव्यक्ता, मूलाधारे स्थिता, शब्दब्रह्मस्वरूपा, क्रियाशून्या, त्रिगुणप्रकृतिरूपिणी परा वाक् उच्यते ।
2. **पश्यन्ती** – पश्यति सर्वं प्रपञ्चं स्वस्यां या सा पश्यन्ती वाक् । अथवा परया दृश्यते या सा पश्यन्ती । पूर्वव्युत्पत्तौ कर्त्रर्थे शतृप्रत्ययः, परव्युत्पत्तौ दृश्धातोः कर्मणि बाहुलकात् शतृप्रत्ययः। मञ्जूषायां पश्यन्त्याः वाचः स्वरूपन्तु – नाभिपर्य्यन्तमागच्छता तेन वायुनाऽभिव्यक्ता मनोगोचरीभूता 'पश्यन्ती' वागुच्यते[4] इति । अर्थात् मूलाधारचक्रात् प्रचलितः संस्कृतपवनो यदा नाभिचक्रे आगतः, तदा तस्मादेव पवनात् परारूपं शब्दब्रह्म अभिव्यक्तं सत् मानसप्रत्यक्षस्य विषयो भवति । तदेव शब्दब्रह्म पश्यन्ती इत्युच्यते ।

एतत् परारूपं पश्यन्तीरूपञ्च शब्दब्रह्म क्रमशः सूक्ष्मतमं सूक्ष्मतरञ्चाऽस्ति । योगिनां निर्विकल्पकसमाधौ परा, अपि च सविकल्पकसमाधौ पश्यन्ती प्रत्यक्षा जायते ।

3. **मध्यमा** – मध्ये मा = बुद्धि: यस्या: असौ मध्यमा । हृदयोत्थितबुद्धियुतनादरूपवर्ण: इत्यर्थ: । तदेवोक्तं मञ्जूषायाम् – ततो हृदयपर्य्यन्तमागच्छता तेन वायुनाऽभिव्यक्ता तत्तदर्थवाचकस्फोटरूपा श्रोत्रग्रहणायोग्यत्वेन सूक्ष्मा जपादौ बुद्धिनिर्ग्राह्या 'मध्यमा' वागुच्यते । अर्थात् नाभिचक्रात् ऊर्ध्वमागच्छन् संस्कृतपवनो हृदयदेशं गत्वा मध्यमारूपं शब्दब्रह्म अभिव्यञ्जयति । इयं वाक् तत्तदर्थस्य वाचकस्य स्फोटस्य स्वरूपं यस्या: तादृशी, परश्रोत्रेण ग्रहीतुमयोग्यतया सूक्ष्मा, मानसिकोच्चारणकाले, स्वयं कर्णच्छिद्रस्य पिधानकाले च बुद्धिद्वारा अर्थविशेषत्वेन शब्दविशेषत्वेन च पृथक् पृथक् ग्रहणयोग्या मध्यमा उच्यते ।
4. **वैखरी** – खाय = श्रोत्रेन्द्रियाय तीव्रतारूपगुणं राति ददाति इति खरम्, विशिष्टं खरं यस्या: असौ वैखरी वाक्, परश्रोत्रग्राह्या वाणी । अस्या: वाण्या: स्वरूपमुक्तं मञ्जूषायाम् – तत आस्यपर्य्यन्तमागच्छता तेन वायुनोर्ध्वमाक्रामता च मूर्धानमाहत्य परावृत्त्या च तत्तत्स्थानेष्वभिव्यक्ता परश्रोत्रेणाऽपि ग्राह्या 'वैखरी' वागुच्यते[5] । अर्थात् मुखप्रदेशमागच्छन् संस्कृतपवन: ऊर्ध्वं गच्छन् मूर्धानमाहतं कृत्वा उपरि मार्गमलब्ध्वा परावृत्त्य च तत्तत्स्थानेषु तालुमूर्धादिस्थानेषु वैखरीरूपं शब्दमभिव्यञ्जयति, तदा परस्य स्वस्य च कर्णेन श्रवणयोग्या या वाक्, सा वैखरीत्युच्यते ।

एतदाशयेनैव शब्दतत्त्वविद्भि: शब्दस्याऽवस्थाचतुष्टयं निर्दिष्टम् –

**परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।**
**हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ॥**
**वैखर्य्या हि कृतो नाद: परश्रवणगोचर:।**
**मध्यमया कृतो नाद: स्फोटव्यञ्जक उच्यते ॥**

परा वाक् मूलाधारचक्रस्थिता, पश्यन्ती वाक् नाभौ संस्थिता, मध्यमा वाक् हृदये स्थिता, वैखरी वाक् च मुखदेशस्था बोध्या । अपि च, वैखरीरूपो वक्त्रोच्चारितो ध्वनि: परश्रोत्रगाह्य: सन् श्रोतु: हृदये स्फोटव्यञ्जक:, च मध्यमारूप: कृतो ध्वनि: स्फोटस्य अर्थात् वाचकस्य वृत्त्याश्रयस्य शब्दस्य वक्तु: हृदये प्रकाशक: कथ्यते । वैखर्य्या मध्यमया इत्यत्राऽभेदे तृतीया, प्रकृत्यादित्वात् ।[6] तेन वैखरीरूप:, मध्यमारूपश्चेत्यर्थो लभ्यते ।

**स्फोटस्वरूपम्** –

स्फोटो नाम स्फुटति अर्थो यस्मात् स स्फोटोऽर्थात् वाचक: शब्द: । अपि च स्फुट्यते ध्वनिभिर्व्यज्यते इति स्फोटोऽर्थात् ध्वनिव्यङ्ग्य: शब्दश्चेत्येतद्व्युत्पत्तिद्वयेनाऽर्थप्रकाशकत्वमेव स्फोटत्वम् । तथा च ध्वनिव्यङ्ग्यत्वे सत्यर्थविषयकबोधजनकत्वं स्फोटस्य लक्षणं पर्य्यवसन्नम् । लक्षणेऽस्मिन् प्रत्यक्षेऽनुमाने चाऽतिप्रसङ्गवारणाय विशेषणदलम् । चुटचुटादिध्वनिनाऽभिव्यक्ते इतोऽपसर्त्तव्यम् इत्याद्यर्थविशेषेऽतिप्रसङ्गवारणाय विशेष्यदलम् । विशेष्यदले बोधजनकत्वं बोधस्वरूपयोग्यत्वमेव, तेन घटपदे श्रुते कस्यचिदर्थबोधाभावेऽपि न तत्र स्फोटलक्षणस्याऽव्याप्ति:। इदञ्च स्फोटस्य तटस्थलक्षणम् ।[7] स्वरूपलक्षणञ्चोक्तं मञ्जूषाकृता – मध्यमानादव्यङ्ग्य: शब्द:

स्फोटात्मको ब्रह्मरूपो नित्यश्चेति ।[8] अव्यवधानेन एव वक्तुः हृदये मुखे च क्रमशः अर्थवाचकस्फोटशब्दप्रतिपादनाय मध्यमानादः, वैखरीनादश्चोत्पद्यते । तयोः मध्यमानादो वक्तुः हृदये घटपटाद्यर्थस्य वाचकस्य स्फोटरूपशब्दस्य प्रकाशको बुद्ध्या गृह्यते । वैखरीनादस्तु वक्तृणाञ्च श्रोतणां सकलव्यक्तीनां श्रोत्रेन्द्रियमात्रेण ग्रहणयोग्यो ध्वनिः श्रोतुः हृदये स्फोटव्यञ्जकः, वक्तुः दृष्ट्या च भेर्य्यादिनादवत् स्फोटस्याऽव्यञ्जकत्वात् निष्प्रयोजनो भवति । अस्य स्फोटस्य शब्दत्वं, ब्रह्मत्वं, नित्यत्वञ्च वाक्यपदीयेऽनया कारिकया प्रतिपद्यते –

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।**
**विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥**[९]

अनादिनिधनं = आदिश्च निधनञ्च आदिनिधने, न आदिनिधने यस्य तदनादिनिधनमित्यस्याऽर्थः आद्यन्तरहितमिति, अक्षरं = व्यापकम् यद् ब्रह्म, तदेव शब्दतत्त्वमस्ति । यस्मात् जगतः = नामरूपात्मकस्य शब्दार्थोभयरूपस्य संसारस्य प्रक्रिया = उत्पत्तिः व्यवहारश्चाऽर्थभावेन = वृक्षनदीपर्वतादिरूपेण विवर्त्तते = भासते । स्फोटोऽयं परमार्थतः एकः, अखण्डश्चाऽस्ति, तथापि पदव्यञ्जकवशात् पदं, वाक्यरूपव्यञ्जकवशात् वाक्यमिति प्रतीयते । तदुक्तं भर्तृहरिणा –

**पदे न वर्णा विद्यन्ते वाक्येष्ववयवा न च ।**
**वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन ॥**[१०]

पदे प्रतीयमानाः अपि वर्णाः न भवन्ति, एवञ्च वाक्ये अवयवाः = प्रतीयमानानि पदान्यपि न भवन्ति । वाक्यात् पदानां कोऽपि प्रविवेकः = भेदो न वास्तविकोऽस्ति ।

**स्फोटभेदाः –**

अयञ्च स्फोटः वस्तुतः एकः, नित्यः, विभुः किन्तु वर्णपदवाक्यरूपात् उपाधिभेदात् स्फोटस्याऽष्टौ औपाधिकभेदा भवन्ति । अत्र नागेशः तान् एव विवेचयति मञ्जूषायाम् – तत्र वणपदवाक्यभेदेन स्फोटस्त्रिधा । तत्राऽपि जातिव्यक्तिभेदेन पुनः षोढा । अखण्डपद-स्फोटोऽखण्डवाक्यस्फोटश्चेति सङ्कलनयाऽष्टौ[11] स्फोटाः इति । तथा चाऽष्टौ स्फोटानां विवरणमित्थम् –

1. **वर्णव्यक्तिस्फोटः** – पदवाक्यलक्षणानाक्रान्तस्य वर्णसमूहस्य वर्णस्य वा प्रकृतिप्रत्ययरूपस्य व्याकरणेन गृहीतशक्तिकस्य पच, तिप् इत्यादिकस्य वाचकत्वे प्रकृतिप्रत्ययरूपवर्णव्यक्तिव्यङ्ग्यः तत्सदृशः स्फोटः वर्णव्यक्तिस्फोटः । प्रकृतिप्रत्यय-घटकीभूता वर्णा अनर्थका इति न तत्र सखण्डस्फोटव्यवहारः।
2. **सखण्डपदव्यक्तिस्फोटः** – रामं, रामेण, रामायेत्यादौ परिनिष्ठिते रूपे कियानंशो द्रव्यादिवाचकः, कियांश्च कर्म्मत्वादेरित्यस्य विनिगन्तुमशक्यतया राममित्यादि परिनिष्ठितं पदमेव वाचकं कर्म्मत्वादिविशिष्टस्येति पदस्फोटपक्षः । तत्र सुबन्ततिङन्ततदादिघटक-प्रकृतिप्रत्ययरूपवर्णाभिव्यक्तस्फोटेनार्थप्रतीतौ सखण्डपदव्यक्तिस्फोटः, यथा पाचकः, औपगवः।

3. **सखण्डवाक्यव्यक्तिस्फोट:** – सर्वप्रथमं व्यवहारे वाक्ये एव शक्तिग्रहात् वाक्यमेव वाचकं वाक्यार्थस्येति वाक्यस्फोटपक्ष:। तत्र सुबन्ततिङन्तपदजन्यबोधपूर्वकवाक्याभि- व्यक्तस्फोटस्य बोधकत्वे सखण्डवाक्यव्यक्तिस्फोट:, यथा गां बधान, गां नय इत्यादि ।
4. **अखण्डपदव्यक्तिस्फोट:** – एक: पट इतिवदेकं पदमित्यबाधितप्रतीत्या वर्णादिरिक्तमेव पदमखण्डं वर्णव्यङ्ग्यम् । अखण्डेष्वपि ऋकारादिषु वर्णेषु वर्णान्तरसमानाकारैक- देशावभासो यथा, तथाऽत्र पक्षे वर्णाविभास: प्रकृतिप्रत्ययजन्यबोधाभावे सति पदस्फोटेन बोधेऽखण्डपदव्यक्तिस्फोट:।
5. **अखण्डवाक्यव्यक्तिस्फोट:** – पदजन्यबोधाभावे सति वाक्यरूपव्यक्तिव्यङ्ग्येन तत्सदृशेन वाक्यस्फोटेन बोधेऽखण्डवाक्य-व्यक्तिस्फोट: । वाक्येऽखण्डत्वञ्चापृथगु- पस्थितिजनकत्वम् । उदाहरणञ्च दध्यानय, हरेऽव, विष्णोऽवेत्यादि ।
6. **वर्णजातिस्फोट:** – अनन्तानां वर्णानां वाचकत्वकल्पनापेक्षया तन्निष्ठाया जातेरेव वाचकत्वकल्पने लाघवमिति वर्णजाति-स्फोटपक्ष:। यथा अनन्तासु गोव्यक्तिषु शक्ति- कल्पनापेक्षया लाघवेन गोपदस्य गोत्वे शक्तिकल्पनम् । प्रकृतिप्रत्ययादिगतजातिव्यङ्ग्य: स्फोटो वर्णजातिस्फोट: । यथा पच्त्वतित्वादिजातय:।
7. **पदजातिस्फोट:** – पूर्ववदनेकपदानां वाचकत्वकल्पनापेक्षया पदनिष्ठजातेरेव वाचकत्व- मिति सुबन्ततिङन्तपदगतजातिव्यङ्ग्य: स्फोट: पदजातिस्फोटो यथा घटपदगोपदादौ घट- पदत्वगोपदत्वादिजाति:।
8. **वाक्यजातिस्फोट:** – वाक्यगतजातिव्यङ्ग्यस्फोटो हि वाक्यजातिस्फोट: । तथाहि देवदत्त गामभ्याज शुक्लां दण्डेन इत्यादिपद-संघातरूपेषु वाक्येष्वस्ति कश्चन प्रतिवाक्यं भिद्यमानो जातिविशेष:, येन प्रतिपुरुषं प्रत्युच्चारणं प्रतिक्षणं भिद्यमानेऽपि वाक्ये एकत्वप्रत्यभिज्ञा भवति । अत: पदसंघातगताया जातेरेकस्या एव वाचकत्वमिति समायाति वाक्यजातिस्फोट:।

**जातिस्फोटस्य वाचकत्वनिरूपणम्** –

अष्टविधेषु स्फोटेषु वर्णनिष्ठा, पदनिष्ठा, वाक्यनिष्ठा च जाति: वाचिका भवति । इयञ्च जाति: शक्ततावच्छेदिकाऽस्ति । शक्तम् अर्थात् शक्ते: आश्रयो वर्ण:, पदम्, वाक्यञ्च । शक्तता वर्णे, पदे, वाक्ये च तिष्ठति, तस्या अवच्छेदिका तादात्म्येन तत्तन्निष्ठा जातिरेव । अर्थात् वर्णनिष्ठाया: जाते:, पदनिष्ठाया: जाते:, वाक्यनिष्ठाया: जाते: एव वाचकत्वं भवतीति मन्तव्यम् । अत्र प्रमाणत्वेन हरिकारिका उद्धियते – 'अनेकव्यक्त्यभिव्यङ्ग्या जाति: स्फोट इति स्मृता:'[12] इत्यस्यार्थस्तु अनेकव्यक्तिभि: अभिव्यक्ता जाति: स्फोट: अर्थात् वाचिका भवतीति । एवञ्च शास्त्रप्रक्रियानिर्वाहार्थं, व्यवहारसम्पादनार्थञ्च वर्णाभिव्यक्तस्य वर्णस्फोटस्य, पदाभिव्यक्तस्य पदस्फोटस्य, वाक्याभिव्यक्तस्य वाक्यस्फोटस्य च स्वीकारात् अष्टविध: स्फोटात्मक: शब्द एव वृत्त्याश्रयो बोध्य: । वस्तुतस्तु व्यवहारे वाक्येनैवाऽर्थाकाङ्क्षापूर्त्तिदर्शनात् वाक्यव्यङ्ग्य: स्फोट:

वाक्यस्फोट एव वृत्त्याश्रयः स्वीकार्य्यः । अथवा लाघवानुरोधेन वाक्यव्यक्तिस्फोटस्य वाक्यजातिस्फोटस्य च मध्ये वाक्यजातिस्फोटः एव वृत्त्याश्रयो भवति ।

ध्वनिभेदः, तत्कार्य्यञ्च-स्फोटो व्यङ्ग्यः, ध्वनिः तस्य व्यञ्जको भवति । प्राकृतो वैकृतश्चेति द्विविधो ध्वनिः।

1. **प्राकृतध्वनिः** – प्रकृतिः अर्थात् अर्थबोधनस्य इच्छा, स्वभावो वा । तथाहि प्राकृतशब्दस्य द्विधा व्युत्पत्तिः। प्रकृत्या अर्थबोधनेच्छया प्रथमतया जातः उत्पन्नः ध्वनिः प्राकृतः ।[13] अनया व्युत्पत्त्या प्राकृतस्य स्फोटव्यञ्जकत्वं सिध्यति । तेन च प्राकृतेन स्फोटस्याऽभिव्यक्तिर्भवति ।
2. **वैकृतध्वनिः** – प्राकृतात् ध्वनेः अनन्तरं जातः वैकृतो ध्वनिर्भवति । अयञ्च विकृतिः अर्थात् विकारः, तया युक्तः, चिरकालं यावत् स्थायी, वृत्तीनाञ्च भेदको भवति । एतदेवोक्तं हरिणा –

**स्फोटस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते ।**
**शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृताः॥**
**ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते ॥**[14] इति ।

स्फोटस्य अभिव्यक्तौ प्राकृतो ध्वनिः प्रयोजको भवति । स्फोटस्याऽभिव्यक्तेः पश्चात् चिरकालोपलब्धये वैकृताः ध्वनयो वृत्तिभेदे अर्थात् द्रुतमध्यविलम्बितेति त्रिषु भेदेषु कारणानि भवन्ति, वृत्तिभेदकैः वैकृतध्वनिभिः स्फोटात्मा न भिद्यते, अपितु अखण्डः एक एव तिष्ठति । स एवायम् अकारः इति प्रत्ययात् ।

**वृत्तिभेदः** –

स्फोटस्याऽभिव्यक्तेः पश्चात् चिरकालोपलब्धये वैकृताः ध्वनयो वृत्तिभेदे अर्थात् द्रुतमध्यविलम्बितेति त्रिषु भेदेषु कारणानि भवन्ति, तदाह –

**अभ्यासार्थे द्रुता वृत्तिर्मध्या वै चिन्तने स्मृता ।**
**शिष्याणामुपदेशार्थे वृत्तिरिष्टा विलम्बिता ॥** इति ॥

अस्यार्थस्तु शास्त्रमभ्यसितुं द्रुता = शीघ्रोच्चारणानुकूला, चिन्तने = अर्थानुसन्धानपूर्वके स्वाध्याये मध्या = न शीघ्रतया न च मन्दतया, च शिष्याणाम् उपदेशार्थम् = पठनार्थं विलम्बिता वृत्तिः निश्चयेनेष्यते ।

**निष्कर्षः** –

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते । अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥[15] इति भर्तृहरिकारिकायां निखिलाऽर्थेनाऽनुस्यूतशब्दस्य किं स्वरूपमिति जिज्ञासा उत्पद्यते, तत्र मञ्जूषाकृता 'वस्तुतो बौद्ध एवार्थः शक्यः, पदमपि स्फोटात्मकं प्रसिद्धमि'[16]ति सिद्धान्तेन स्फोटात्मकः शब्दः इति लभ्यते । तत्र स्फोटो नाम स्फुटति अर्थो यस्मात् स स्फोटोऽर्थात् वाचकः शब्दः। अपि च स्फुट्यते ध्वनिभिर्व्यज्यते इति स्फोटोऽर्थात् ध्वनिव्यङ्ग्यः शब्दश्चेत्येतद्व्युत्पत्तिद्वयेनाऽर्थप्रकाशकत्वमेव

स्फोटत्वम् । तथा च ध्वनिव्यङ्ग्यत्वे सत्यर्थविषयक - बोधजनकत्वं स्फोटस्य लक्षणं पर्य्यवसन्नम् । लक्षणेऽस्मिन् प्रत्यक्षेऽनुमाने चाऽतिप्रसङ्गवारणाय विशेषणदलम् । चुटचुटादिध्वनिनाऽभिव्यक्ते इतोऽपसर्त्तव्यम् इत्याद्यर्थविशेषेऽतिप्रसङ्गवारणाय विशेष्यदलम् । विशेष्यदले बोधजनकत्वं बोधस्वरूप-योग्यत्वमेव, तेन घटपदे श्रुते कस्यचिदर्थबोधाभावेऽपि न तत्र स्फोटलक्षणस्याऽव्याप्ति:। इदञ्च स्फोटस्य तटस्थलक्षणम् ।[17] स्वरूपलक्षणञ्चोक्तं मञ्जूषाकृता - मध्यमानादव्यङ्ग्य: शब्द: स्फोटात्मको ब्रह्मरूपा नित्यश्चेति।[18] अत्र नैयायिकास्तु वृत्त्याश्रय: शब्द: पदमेव, स चाऽनित्यमिति मन्यन्ते । वर्णानां समूह: पदं, पदमेव वृत्त्याश्रयो भवति । किन्तु वर्णस्य क्षणिकत्वात् वर्णसमूहस्य प्रत्यक्षत्वाऽसम्भवात् कथमर्थवाचको भवतीत्यत्र उपायत्रयं तार्किकै: प्रदर्शितम् - पूर्ववर्णस्य विनष्टत्वेऽपि तस्य संस्कारवशात् अव्यवहितोत्तरत्वसम्बन्धेन पूर्ववर्णयुक्तचरमवर्णस्य प्रत्यक्षता भवति, शब्दजशब्दन्यायेन पदं प्रत्यक्षं भवति, पूर्वपूर्ववर्णानां श्रवणानुभवात् उत्पन्नसंस्कारेण सहित: योऽन्तिमवर्णश्रवणानुभवस्तेन पूर्वपूर्ववर्णसंस्कारसहितान्तिमवर्णानुभवेन सकलपूर्ववर्णविषयकक्रमिक-स्मरणेन घटादिपदस्य प्रत्यक्षता भवतीति तन्न, अव्यवहितोत्तरत्वसम्बन्धस्तु द्वयोर्विद्यमानयोरेव भवति, शब्दजशब्दन्याय्येन पदप्रत्यक्षत्वस्य साधनेऽपि पदस्य विद्यमानताया: अभावात्, अभावस्य चाऽश्रयत्वा-सम्भव:, एवञ्च चरमवर्णपर्य्यन्तसंस्कारद्वारा समेषां वर्णानां स्मरणात्मकप्रत्यक्षेऽपि वर्णक्रमस्य पौर्वापर्य्यस्य स्मृतिप्रत्यक्षभावदर्शनान्न तार्किकमते वर्णप्रत्यक्षं सम्भवति । अस्तु । वाणी चतुर्भिर्भेदैर्भिद्यते, ते च परा, पश्यन्ती, मध्यमा, वैखरीति शब्दैर्व्यवह्रियन्ते । अत्र वैखरीरूपो वक्त्रोच्चारितो ध्वनि: परश्रोत्रगाह्य: सन् श्रोतु: हृदये स्फोटव्यञ्जक:, च मध्यमारूप: कृतो ध्वनि: स्फोटस्य अर्थात् वाचकस्य वृत्त्याश्रयस्य शब्दस्य वक्तु: हृदये प्रकाशक: कथ्यते । अयञ्च वृत्त्याश्रयस्फोटो वस्तुत: एक:, नित्य:, विभु: किन्तु वर्णपदवाक्यरूपात् उपाधिभेदात् स्फोटस्याऽष्टौ औपाधिकभेदा भवन्ति । 'अनेकव्यक्त्यभिव्यङ्ग्या जाति: स्फोट इति स्मृता:'[19] इत्यभियुक्तोक्त्या अनेकव्यक्तिभि: अभिव्यक्ता जाति: स्फोट: अर्थात् वाचिका भवतीति । अत्र स्फोटो व्यङ्ग्य:, ध्वनि: तस्य व्यञ्जको भवति । ध्वनिश्च द्विविध: प्राकृतो वैकृतश्चेति ।[20] एवं स्फोटस्याऽभिव्यक्ते: पश्चात् चिरकालोपलब्धये वैकृता: ध्वनयो वृत्तिभेदे अर्थात् द्रुतमध्यविलम्बितेति त्रिषु भेदेषु कारणानि भवन्ति, तदाह - अभ्यासार्थे द्रुता वृत्तिर्मध्या वै चिन्तने स्मृता ।शिष्याणामुपदेशार्थं वृत्तिरिष्टा विलम्बिता ।।[21] इति ।।

**सन्दर्भा:**

1. 01-02-64 इत्यस्मिन् सूत्रे 'एक इन्द्रशब्द: क्रतुशते प्रादुर्भूतो युगपत्सर्वयागेष्वङ्गं भवति ।'
2. प. ल. म. पृ. सं. - 304, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018 ।
3. प. ल. म. पृ. सं. - 308, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018 ।
4. प. ल. म. पृ. सं. - 308, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018 ।
5. प. ल. म. पृ. सं. - 308, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018 ।
6. प्रकृम्यादिभ्य उपसङ्ख्यानमिति वार्त्तिकेन ।

7. यच्च यावल्लक्ष्यभावितामनुपेत्यापि व्यावर्त्तकं सल्लक्ष्यैकदेशे वर्त्तते, तथा व्यावर्त्तकमपि जायते, तदेव तटस्थलक्षणमिति वे. प. ।
8. प. ल. म. पृ. सं. - 314, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018 ।
9. वा. प. का. 1 ।
10. वा. प. का. 1-63 ।
11. प. ल. म. पृ. सं. - 132, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018 ।
12. वा. प. का. 1-93 ।
13. प्रकृत्याऽर्थबोधनेच्छया स्वभावेन वा जातः स्फोटव्यञ्जकः प्रथमः प्राकृतः इति प. ल. म. पृ. सं. - 321, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018 ।
14. वा. प. का. 1-77-78 ।
15. वा. प. का. ब्र. का. 123
16. प. ल. म. पृ. सं. - 216, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018 ।
17. यच्च यावल्लक्ष्यभावितामनुपेत्यापि व्यावर्त्तकं सल्लक्ष्यैकदेशे वर्त्तते, तथा व्यावर्त्तकमपि जायते, तदेव तटस्थलक्षणमिति वे. प. ।
18. प. ल. म. पृ. सं. - 314, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018 ।
19. वा. प. का. 1-19 ।
20. स्फोटस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते ।
शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृताः ॥
ध्वन्यः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते । इति भर्तृहरेः वा. प. का. 1-77-78 इत्यत्र प्राकृतवैकृतयोः स्वरूपमुक्तम् ।
21. प. ल. म. पृ. सं. - 321, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018 ।

## सन्दर्भग्रन्थसूची

1. साहित्यदर्पणः, श्रीविश्वनाथाचार्य्यः, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, प्रथम-संस्करणम्, 2013
2. काव्यप्रकाशः, श्रीमम्मटाचार्यः, सम्पादकः - डा. नरेन्द्रः, ज्ञानमण्डललिमिटेड, वाराणसी, षष्ठसंस्करणम्, 2010
3. प्रौढनिबन्धसौरभम्, आचार्यविश्वनाथमिश्रः, राष्ट्रियसंस्कृतसाहित्यकेन्द्रम्, जयपुरम्, प्रथम-संस्करणम्, 2003
4. मीमांसायां काव्यशास्त्रे च शब्दशक्तिः, विरूपाक्ष वि. जड्डोपाल, अमरग्रन्थपब्लिकेशन्स, दिल्ली, प्रथमसंस्करणम्, 2002

5. शब्दशक्तिप्रकाशिकासमीक्षणम्, डा. विष्णुपदमाहापात्रः, मान्यताप्रकाशनम्, मायापुरी, प्रथमसंस्करणम्, 2005
6. वैयाकरणानामन्येषाञ्चमतेनशब्दस्वरूपतच्छक्तिविचारः, डा. कालिकाप्रसादशुक्लः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, प्रथमसंस्करणम्, 2001
7. परमलघुमञ्जूषा, श्रीनागेशभट्टः, व्याख्याकारः - प्रो. बोधकुमारझाः, हंसाप्रकाशन, जयपुर, प्रथमसंस्करणम्, 2018
8. परमलघुमञ्जूषा, श्रीनागेशभट्टः, व्याख्याकारः - डा. जयशङ्करलालत्रिपाठी, चौखम्बाकृष्णदास अकादमी, वाराणसी, चतुर्थसंस्करणम्, 2011
9. तत्त्वचिन्तामणिः, श्रीगङ्गेशोपाध्यायः, सम्पादकः - श्रीमदुमेशमिश्रः, मिथिलाविद्यापीठः, प्रथमसंस्करणम्, 1957
10. शब्दशक्तिप्रकाशिका, श्रीजगदीशतकालङ्कारः, व्याख्याकारः - श्रीयोगगुरुचरणदेवशर्म्मा, कलिकाताविश्वविद्यालयः, कलिकाता, 1914
11. काव्यप्रकाशः, श्रीमम्मटाचार्य्यः, व्याख्याकारः - श्रीहरिशङ्करशर्म्मा, चौखम्भासंस्कृतसंस्थानम्, वाराणसी, दशमसंस्करणम्, वि.2060

**शोधच्छात्रा,**
**व्याकरणविभागः,**
**राष्ट्रियसंस्कृतसंस्थानम्,**
**क.जे.सोमैयासंस्कृतविद्यापीठम्,**
**विद्याविहारः (पू), मुम्बई - ४०००७७**
**महाराष्ट्रम् ।**
**दू.स. - ९८१९११८०२४**

★★★

(भगवतो जैमिनेर्लिप्सासूत्रं व्याचक्षाणैरेभिर्महापण्डितैः 'क्रत्वर्थत्वं पुरुषार्थं वार्थोपार्जनस्य'ति मीमांसामानैरुपार्जनस्य पुरुषार्थत्वं संसाधयद्भिः, प्राकरणिकं विविधं मीमांसाशास्त्रीय विचारमुद्भावयद्भिः, 'ब्राह्मणस्य प्रतिग्रहादिना, राजन्यस्य जयादिना, वैश्यस्य कृष्यादिना, शूद्रस्य सेवादिना, सर्वेषां दाया-दिने'ति समर्थयमानैः, स्वेष्टसम्पादनाय जातिव्यवस्था गरीयसी, धर्मसम्पादनाय च सा वराकी कलङ्कभूतेत्यत्र निजामुद्वेजिकामापत्तिं प्रभाविशैल्योपस्थाप-यद्भिः, शास्त्रं लोकेऽवतारयद्भिः प्रस्तुतोऽयं गभीरो लेखो बलाद् विचारयितुं विवशीकरोतीव लक्ष्यते ॥ - स.)

**( Sanskrit, the proud Indian Language, is the Mother of all the languages of the world. It is the proven language of science. It is a regret to say that there is no such effort made by the Govt. of various Indian States to popularize Sanskrit where as it has become the most wanted research subject in the foreign universities. Owing to the educational condition of the nation, the auther, has reflected her brain how to improve Sanskrit eduction, in this chapter.- Ed. )**